श्रीविजयनेमिसूरीश्वरग्रन्थमाला-रत्नम् ६२

श्रीमत्तपोगच्छाधिपति-शासनसम्राट्-सूरिचक्रचक्रवर्त्ति-

बालब्रह्मचारि-विविधतीर्थोद्धारक-सर्वतन्त्र-

स्वतन्त्र-जगद्गुरु-स्वर्गस्थ-

परमपूज्य-

श्रीमद्विजयनेमिसूरीश्वर-

पट्टालङ्कार-व्याकरणवाचस्पति शास्त्रविशारद-कविरत्न-

साधिकसप्तलक्षश्लोकप्रमाणसंस्कृतसाहित्यसर्जक-

परमशासनप्रभावक-निरुपमव्याख्याना-

मृतवर्षि-बालब्रह्मचारि-स्वर्गस्थ-

परमपूज्य-

श्रीमद् विजयलावण्यसूरीश्वर-

विरचितः

# ॥ स्याद्यर्थप्रकाशः ॥

सम्पादकः संशोधकश्च—

व्याकरणरत्न-शास्त्रविशारद-कविदिवाकर-देशनादक्ष-

बालब्रह्मचारि-परमपूज्य-

श्रीमद्-विजयदक्षसूरीश्वर-

पट्टधरः साहित्यरत्न-शास्त्रविशारद-कविभूषण-

पदालङ्कृतः—

श्रीमद्विजयसुशीलसूरिः ॥

प्रकाशिका :—

* महागुजरात-सौराष्ट्रान्तर्गत-बोटाद-नगरस्थ—

श्रीज्ञानोपासक-समितिः । *

नेमि सं० १७ वीर सं० २४९२, विक्रम सं० २०२२,

प्रथमावृत्तौ पुस्तक, संख्या १००० मूल्यम्-२.५०

एतद्ग्रन्थमुद्रणव्यये सहायका :—

५००) रु० सादडी, श्रीजैनश्वेताम्बर मूर्तिपूजक संघनी, 'प्रतिष्ठा समिति'

३००) रु० बम्बई लुहारचाल जैनसंघ, ह० शनीलाल दलसुखभाई खंभातवाला

१५१) रु० शा० कपूरचंदजी जेठाजी ह० शङ्करलालजी, वराडा०

प्रकाशिका-ज्ञानोपासक समितिः, बोटाद्, सौराष्ट्र।

कार्यवाहकः- बगडीया चिमनलाल हरिचन्द्रः।

प्राप्तिस्थानम् :—

(१)
श्रीमद्विजयलावण्य
सूरीश्वर-ज्ञानमन्दिर
बोटाद, सौराष्ट्र

(२)
सरस्वती पुस्तक भण्डार
रतनपोल, हाथीखाना
राजनगर, अहमदावाद
( गुजरात )

( अस्य सर्वेऽधिकारा राजनियमानुसारं स्वायत्तीकृताः )

मुद्रकः—श्री गुणानन्द मिश्र
श्री श्याम प्रिन्टिङ्ग प्रेस, दरभंगा ( बिहार )

# प्रकाशकीय–निवेदन

'स्याद्यर्थप्रकाश' ए नामनी आ पुस्तिका प्रकाशित करतां अमो अति आनन्द अनुभवीए छीए। विश्वमां श्रीजैनधर्मना महान् ज्ञानज्योतिर्धर अने महावैयाकरण तरीके प्रसिद्धि पामेला एवा व्याकरणवाचस्पति–शास्त्रविशारद–कविरत्न–स्वर्गस्थ–परमपूज्य–परमोपकारी–आचार्य-प्रवर–श्रीमद् **विजयलावण्य सूरीश्वरजी** महाराजश्रीए शासनप्रभावक अनेक ग्रन्थोनुं सर्जन कर्युं छे, ते पैकीनो आ अनुपम ग्रन्थ छे।

आनुं संशोधन अने सम्पादन कार्य स्व० पू० सूरीश्वरजी महाराजश्रीना प्रधानपट्टधर पू० आचार्य श्रीमद् **विजयदक्षसूरीश्वरजी** महाराजश्रीनापट्टधर पू० आचार्य श्रीमद् **विजय-सुशीलसूरीश्वरजी** महाराजश्रीए सुन्दर करेल छे। मुद्रणकार्य मिथिलाप्रान्तान्तर्गत दरभङ्गा नगरनुं, दरभङ्गा प्रेस कम्पनीनां प्रसिद्ध प्रेसमां थयुं छे।

आ अनुपम ग्रन्थना प्रणेता स्वर्गस्थ पू० गुरुदेवनो तथा आग्रन्थनुं सम्पादन अने संशो-धन करनार पू० आचार्य महाराजश्रीनो सादर सविनय कोटिशः वन्दना पूर्वक आभार मानीए छीए। मुद्रणकार्य करनार प्रेस मालिकनो पण आभार मानीए छीए।

अमारी समितिने आ रीते स्व० पू० गुरुदेवना अनेक–ग्रन्थ–प्रकाशननो लाभ मलतो रहे एम शुभेच्छा राखतां विरमीए छीए।

卐 ॐ अर्हं नमः 卐

# भूमिका

अये पदवाक्यविचारसारपारावारीणा विचक्षणाः !

सुविदितमेव भवतां यत्– सकलवाङ्मयप्रवेशाय शब्दानुशासनानुशीलनमभ्यर्हिततमं, यतः तत् 'मुखम्' इत्युच्यतेऽभियुक्तैरिति । सर्वेषु चाङ्गेषु मुखस्येव सर्वेष्वनुशासनेषु शब्दानुशासनस्यैव प्राधान्यमिति सर्वसम्मतं वस्तु । तदवधृत्यैव बहुभिः प्राचीनैराचार्यैः स्वस्वमति–विभवानुसारं शिष्टलक्ष्याण्यालोच्य तदनुसारेण शब्दानुशासनानि विरचितानि, यानि च ऐन्द्र–चान्द्रादिनामभिः प्रथितानि लोके । तेषु च सम्प्रति न सर्वाणि समुपलभ्यन्तेऽपि तु पञ्चषाण्येव दृष्टिपथमवतरन्ति । तेषु यथायथं काठिन्याव्यापकत्वादि–दोषानाकलय्य, शिष्यदयावशंवदैः कलिकालसर्वज्ञैः सर्वतोमुखप्रतिभानवद्भिः श्रीमद्भिर्हेमचन्द्राचार्यैः सरलतमं व्यापकतमं च श्रीसिद्धहेमशब्दानुशासनाभिधानं शब्दानुशासनं व्यरचि । तत्र च सर्वेषां सुखेन प्रवेशाय बृहद्वृत्तिः शब्दमहार्णवनामा न्यासग्रन्थश्च स्वोपज्ञ एव प्रकटितः । तस्य च न्यासग्रन्थस्य प्रचारवैरल्यात् केचनांशाः परिभ्रष्टा इति बृहद्वृत्त्याशयजिज्ञासूनां महान्तं क्लेशमाकलय्य, समुपलभ्यमानं तदंशं महता परिश्रमेण, महत्या च योग्यतया सम्पाद्य, तदीयत्रुटितस्थलेषु तद्रीतिमनुसृत्यैव तदनुसन्धानरूपां पूर्त्तिं, तपोगच्छाधिपति– शासनसम्राट्–सूरिचक्र–चक्रवर्त्ति–श्रीकदम्बगिरि–प्रमुखानेकतीर्थोद्धारक– सर्वतन्त्रस्वतन्त्र - जगद्गुरु–बालब्रह्मचारि– परमपूज्य–परमोपकारि–परमकृपालु-परमगुरुभगवत्–स्वर्गस्थ–**आचार्यमहाराजाधिराज–श्रीमद्विजयनेमिसूरीश्वर**–सुप्रसिद्धपट्टालङ्कारभूताः, साधिकसप्तलक्षप्रमाणनूतनसंस्कृतसाहित्यसर्जकाः व्याकरणवाचस्पति–कविरत्न– शास्त्रविशारद– इति पदवीविभूषिताः परमपूज्याः प्रगुरुदेवाः स्वर्गीयाः स्वनाम–धन्याः आचार्यप्रवर– श्रीमद्-विजय-लावण्यसूरीश्वरा अकार्षुः ।

तत्समय एव विभक्त्यर्थप्रकरणविचारावसरे तेषां प्रधानशिष्याः पू० **आचार्यश्रीमद्–विजयदक्षसूरीश्वर**– गुरुवर्यादयः, प्रशिष्या अस्मदादयश्च स्याद्यर्थविषये कमपि स्वतन्त्रं निबन्धं– सर्वमतसार– सङ्ग्रहभूतं विरचयितुमाचार्यचरणान् प्रार्थितवन्तः । तेषां तथाविधां प्रार्थनामवश्यसफलनीयामवगच्छद्भिरपि, तदा कार्यान्तरव्यापृततया स विचार उपेक्षितः । कालान्तरेषु च बहुशः तदर्थमन्यैरपि प्रार्थिताः ते– बहुत्र स्व– समये पर– समये च स्याद्यर्थ-विचारस्य विस्तरेण समुपलभ्यमानत्वेऽपि सकलहृदयङ्गमताया विरहेण, आकरग्रन्थेभ्यः तदव–गमार्थमपेक्षितस्य बुद्धिवैभवस्य साम्प्रतिकच्छात्रवर्गेष्वदृश्यमानतया च, सकलतत्तद्– विषय–

ग्रन्थानालोच्य स्वकीयनैपुण्यं च समुपयोज्य विहितोऽयं निबन्धः छात्राणां विदुषामपि च बहूपकृतये स्यादिति दृढोऽस्माकं विश्वासः ।

अत्र, प्रथमं कारकाकारकभेदेन स्यादिविभक्तेर्द्वैविध्यं प्रकृत्य कारकत्व- विभक्तित्व- प्रत्ययत्व- क्रियात्व- कर्तृत्व- कर्मत्वादि- निर्वचनपूर्वकं द्वितीयार्थनिर्णयः कृतः। ततश्च क्रमशस्तृतीयादिस्याद्यर्थोऽपि तत्तद्विधायकसूत्राणि तद्वृत्तिग्रन्थञ्चाधिकृत्य, प्रथमं स्वमतं संस्थाप्य, आचार्योदाहृतेषु तेषु तेषु लक्ष्येषु तद्विभक्त्यर्थप्रकाशनपूर्वकं वाक्यार्थबोधप्रकारं प्रदर्श्य, अन्येष्वपि शिष्टप्रयोगेषु तद्विभक्त्यर्थं विचार्य तत्रत्य वाक्यार्थबोधप्रकारो नैयायिकादिरीत्यापि विविच्य, प्रदर्शितः। अन्ते च प्रथमाविभक्त्यर्थोऽपि यथायथं संक्षेपेण सरलया पद्धत्या च सम्यक् प्रकाशितः इति प्रकृतग्रन्थपरिशीलनेनैव प्रकटीभविष्यति सर्वेषामिति तदर्थमधिकलेखेनालम् ।

अस्य च ग्रन्थस्य बहुदुरूहविषयकतया, साम्प्रतिकच्छात्राणामीदृशकठिनविषये रुचिविरहमपि मनसिकृत्वा यथाशक्ति सरलीकरणपरतया, स्वस्य वार्धककृतबाधसम्भावनया झटिति सम्पादिततया च सम्भवन्तो द्विरुक्त- दुरुक्तत्वादिदोषाः, मानवमात्रसुलभा अन्ये च दृष्टिदोषादयो गुणग्रहणैकशीलैर्विद्वद्भिः स्वयमेव परिशोधनीयाः सूचनीयाश्च येनाग्रिमसंस्करणे तेषां परिमार्जनं सम्भाव्येत ।

ग्रन्थस्यास्य स्वदृष्टिपातपूर्वकं प्रकाशनाय बहुत्वरितैरपि लेखकमहानुभावैः सुयोग्यमुद्रणालयानुपलम्भेन मुद्रितमिमं ग्रन्थं समवलोकयितुं नापारीति पुनर्दृष्टिविकलमेवेमं हित्वा नवत्यधिकचतुर्विंशतिशतवीरवत्सरे, विंशत्यधिकविंशतिशतविक्रमवत्सरे च फाल्गुनकृष्णनवम्यां विजयमुहूर्त्ते राजस्थानान्तर्गतमरुधरास्थ ( राणावतों का ) खिमाडाग्रामे, ते निर्वाणपदमलंकुर्वन्निति यथास्थित एवायं भवतां पुरतः समुपस्थाप्यते । मुद्रणकार्यकराणां संस्कृतभाषानभिज्ञतयाऽशुद्धिबाहुल्यस्य सतः परिशोधने दृष्टिदोषवशात्, परिशोधितस्यापि मुद्रणसमये मात्रारेफादिकण्टकपातादिभिश्च कतिपया अशुद्धयः सत्योऽपि बहुस्थूलतया नार्थबोधविघातिका इति तच्छुद्धिपत्रमिह न संयोजितमिति तच्छोधनभारोऽपि पाठकेष्वेवायत्त इति सविनयं विज्ञाप्य विरम्यते । इति शम्

स्थानम्- श्रीजैनसंघन्याती नोरा
जैन उपाश्रय, रानीगाम
राजस्थान (मारवाड़)
कार्तिक शुक्ला पञ्चमी
वीर सं० २४९२, विक्र० सं० २०२२

*ग्रन्थकर्तृ-प्रशिष्यः*

**आचार्यश्रीविजयसुशीलसूरिः**

# स्याद्यर्थप्रकाशस्य विषयानुक्रमणिका


| पृष्ठे | विषयः |
|---|---|
| २ | कारकत्वनिरुक्तिः |
| ४ | तस्य द्वितीयः परिष्कारः |
| ९ | तस्य तृतीयः प्रकारः |
| ९ | तस्य चतुर्थः प्रकारः |
| ९ | कारकसंज्ञासूत्रव्याख्या |
| ११ | विभक्तित्वनिरुक्तिः |
| १२ | परिष्कारान्तरम् |
| १२ | प्रत्ययत्वपरिष्कारः |
| १५ | प्रकृतित्वनिरुक्तिः |
| १५ | विभक्तिविभागः |
| १७ | क्रियापदार्थनिर्वचनम् |
| १९ | कर्तृत्व निरुक्तिः |
| २१ | स्याद्यर्थादीनां मतभेदेन विशेषणविशेष्य–भावनिरुक्तिः |
| २१ | तत्तत्प्रयोगेषु वाक्यार्थबोधविचारः |
| २४ | कर्मकारकनिरुक्तिः |
| २५ | कर्मविभागः |
| २६ | विकार्यकर्मविचारः |
| २७ | निर्वर्त्यकर्मविचारः |
| २७ | प्राप्यकर्मविचारः |
| २७ | सूत्रे कर्तुर्ग्रहणस्य प्रयोजनम् |
| २८ | ईप्सितार्थलाभविचारः |
| २८ | द्वितीयार्थस्यान्यथावर्णनम् |
| २९ | सकर्मकत्वपरिष्कारः |
| ३० | फलत्वपरिष्कारः |
| ३१ | नञ् समभिव्याहारे कर्मत्वविचारः |
| ३१ | विवक्षाया विभक्तिप्रयोजकत्वम् |
| ३१ | बौद्धार्थविचारः |
| ३२ | कर्मद्वितीयार्थप्रकाशः |
| ३२ | कर्माख्यातार्थविचारः |
| ३३ | अधिकरणताधेयत्वयोर्द्वितीयार्थत्वखण्डनम् |
| ३३ | कर्तृकर्मणोरर्थे विशेषः |
| ३४ | न्यायमतेन द्वितीयार्थविचारः |
| ३५ | द्वितीयाया निरर्थकत्वाक्षेपपरिहारौ |
| ३६ | भेदोऽपि द्वितीयार्थः |
| ३९ | अत्र भाट्टमतम् |
| ४० | पुनर्द्वितीयार्थकर्मत्वे आक्षेपपरिहारौ |
| ४३ | द्वितीयाया विषयत्वादौ शक्तिः |
| ४३ | शारीरकभाष्यविरोधपरिहारः |
| ४३ | द्वितीयाया आधेयत्वार्थकत्वेऽनुपपत्तिपरिहारः |
| ४५ | कतिपयधातुसमभिव्याहारे द्वितीयार्थान्वय–विवेकः |
| ४६ | पुनः कर्मणस्त्रैविध्यम् |
| ४६ | द्विकर्मकविवेकः |
| ५३ | एषु, कुतः कस्मिन् कर्मणि प्रत्यय इति विचारः |
| ५४ | सन्नन्तस्थले कर्मत्वविचारः |
| ५६ | विशिष्य कर्मसंज्ञास्थलेषु वाक्यार्थबोधविचारः |
| ५७ | ण्यन्तस्थले कर्मप्रत्ययोत्पत्ति विचारः |
| ५७ | कारकान्तराणां कर्मसंज्ञायां वाक्यार्थबोध-विचारः |

| पृष्ठ | विषयः |
|---|---|
| ५८ | अकारकद्वितीयार्थविचारः |
| ६० | क्रियाविशेषणद्वितीयार्थविचारः |
| ६१ | कालाध्वनोर्व्याप्तौ ( २-२-२४२ ) |
| | **अथ तृतीयाविभक्त्यर्थविचारः** |
| ६२ | हेतुकर्तृकरणेत्थंभूतलक्षणे ( २-२-४४ ) |
| ६४ | कर्तृतृतीयार्थः |
| ६६ | करणतृतीयार्थः |
| ६९ | इत्थंभूतलक्षणतृतीयार्थः |
| ७३ | सहार्थे ( २-२-४५ ) |
| ७३ | शब्दशक्तिप्रकाशिकाशयः |
| ७६ | सहार्थतृतीयायाः कारकार्थत्वमपि |
| ७९ | प्रसङ्गादधीकोऽर्थविचारः |
| ८२ | प्रयोगवशात् सहार्थभेदः |
| ८३ | सहार्थोपसंहारः |
| ८३ | यद्भेदैस्तद्वदाख्या ( २-२-४६ ) |
| ८५ | प्रकृतिपदार्थविचारः |
| ८६ | गोत्रपदार्थविचारः |
| ८६ | अभेदार्थकत्वविचारश्च |
| ८९ | (२) प्रसितोत्सुकावबद्धैः (२-२-४९) |
| | (१) कालेभान्नवाऽऽधारे (२-२-४८) |
| | (३) व्याप्ये द्रोणादिभ्यो वीप्सायाम् (२-२-५०) |
| ९० | अत्र मतान्तरम् |
| ९० | विशिष्यद्रोणपदार्थविचारः |
| ९१ | प्रसङ्गात् क्रीणात्यर्थविचारः |
| ९१ | समोज्ञोऽस्मृतौ (२-२-५१) |
| ९१ | दामः सम्प्रदाने० (२-२-५२) |
| ९२ | तुल्यार्थैस्तृतीयाषष्ठ्यौ (२-२-११६) |

| पृष्ठे | विषयः |
|---|---|
| | **अथ चतुर्थ्यर्थप्रकाशः** |
| ९३ | चतुर्थी (२-२-५३) |
| ९५ | प्राचीनशाब्दिकमेत चतुर्थ्यर्थः |
| ९६ | वृत्तिकृन्मतम् |
| ९६ | वैयाकरणान्तरमतेन ददात्यर्थ० |
| ९६ | अत्र विप्रतिपत्तिरपि |
| ९८ | एतत्परिहारः |
| ९८ | सम्प्रदानस्य त्रैविध्यम् |
| ९८ | तादर्थ्ये (२-२-५४) |
| ९९ | रुचिकृप्यर्थधारिभिः २-२-५५) |
| ९९ | कृप्यर्थयोगे विकारे विहितायाश्चतुर्थ्या विचारः |
| ९९ | धारेर्योगे उत्तमर्णे विहितायाश्चतुर्थ्या० |
| १०० | प्रत्याङ् श्रुवार्थिनि (२-२-५६) |
| १०१ | प्रत्यनोर्गृणाख्यातरि (२-२-५७) |
| १०२ | यद्वीक्ष्ये राधीक्षी (२-२-५८) |
| १०३ | उत्पातेन ज्ञाप्ये (२-२-५९) |
| १०३ | श्लाघ-ह्नु-स्था-शपा प्रयोज्ये (२-२-६०) |
| १०४ | तुमोऽर्थे भाववचनात् (२-२-६१) |
| १०५ | गम्यस्याप्ये (२-२-६२) |
| १०५ | मन्यस्यानावादिभ्यो० (२-२-६४) |
| १०६ | स्पृहेर्व्याप्यं वा (२-२-२६) |
| १०७ | क्रुद्-द्रुहेर्ष्या० (२-२-२७) |
| १०९ | परिक्रयणे (२-२-६७) |
| ११० | शक्तार्थवषड्० (२-२-६८) |
| १११ | मीमांसानुसारं देवतात्वविचारः |
| ११२ | देवता मन्त्ररूपाश्चेतना वेति विचारः |
| | **अथ पञ्चम्यर्थप्रकाशः** |
| ११५ | पञ्चम्यपादाने (२-२-६९) |

| पृष्ठे | विषयः |
|---|---|
| | इति सूत्रमवलम्ब्य नानापञ्चम्यर्थविचारः |
| १२३ | अपादानस्य त्रैविध्यम् |
| १२४ | बुद्धिकृतापायविवक्षायामपि पञ्चमी |
| | तस्याश्च व्यापकत्वेन बहुलक्ष्यसिद्धिः |
| १३२ | अन्तर्धौ पञ्चमीविचारः |
| १३३ | जन्यादिधातुयोगे प्रकृतेः पञ्चमी |
| १३४ | उत्पत्तिस्थानात् पञ्चमी |
| १३४ | धात्वर्थादिविषये मतान्तराणि |
| १३६ | आङाऽवधौ (२–२–७०) |
| १४० | पयपाभ्यां वर्ज्ये (२–२–७१) |
| १४० | यतः प्रतिनिधिप्रतिदाने (२–२–७२) |
| १४१ | आख्यातर्युपयोगे (२–२–७३) |
| १४३ | गम्ययपः कर्माधारे (२–२–७४) |
| १४४ | प्रभृत्यन्यार्थ० (२–२–७५) |
| १४५ | अत्र विशेषविचारः |
| १४८ | ऋणाद्धेतोः (२–२–७६) |
| १४८ | गुणादस्त्रियांनवा (२–२–७७) |
| १५२ | आरादर्थैः (२–२–७८) |
| १५३ | स्तोकाल्पकृच्छ्र० (२–२–७९) |
| १५३ | पृथग्नाना पञ्चमी च (२–२–११३) |
| १५३ | ऋते द्वितीया च (२–२–११४) |
| १५३ | विना ते तृतीया च (२–२–११५) |

## अथ षष्ठीविभक्त्यर्थ प्रकाशः

| पृष्ठे | विषयः |
|---|---|
| १५४ | अज्ञाने ज्ञः षष्ठी (२–२–८०) |
| १५५ | शेषे (२–२–८१) |
| १५६ | रिरिष्टात्-स्तात० (२–२–८२) |
| १५६ | शेषषष्ठीविशेषविचारः |
| १५९ | स्वमते विशेषः |
| १६० | स्मृत्यर्थदयेशः |
| १६० | कर्मणिकृतः (२–२–८३) |
| १६३ | द्विषोवाऽतृशः (२–२–८४) |
| १६३ | कर्तरि (२–२–८५) |

## अथ सप्तम्यर्थ प्रकाशः

| पृष्ठे | विषयः |
|---|---|
| १६४ | सप्तम्यधिकरणे (२–२–९५) |
| १६९ | नवा सुजर्थैः काले (२–२–९६) |
| १६९ | कुशलाऽऽयुक्तेना० (२–२–९७) |
| १६९ | स्वामीश्वराधिपति (२–२–९८) |
| १७० | व्याप्ये क्तेनः (२–२–९९) |
| १७० | तद्युक्ते हेतौ (२–२–१००) |
| १७१ | अप्रत्यादावसाधुना (२–२–१०१) |
| १७२ | साधुना (२–२–१०२) |
| १७२ | निपुणेन चार्चायाम् (२–२–१०३) |
| १७३ | स्वेशेऽधिना (२–२–१०४) |
| १७३ | उपेनाधिकिनि (२–२–१०५) |
| १७४ | यद्भावोभावलक्षणम् (२–२–१०६) |
| १७६ | षष्ठीवाऽनादरे (२–२–१०८) |
| १७६ | सप्तमीचाविभागे निर्धारणे (२–२–१०९) |
| १८१ | क्रियामध्येऽध्वकाले० (२–२–११०) |

## अथ प्रथमार्थप्रकाशः

| पृष्ठे | विषयः |
|---|---|
| १८३ | नाम्नः प्रथमैकद्विबहौ (२–२–३१) |

# स्याद्यर्थप्रकाशस्य शुद्धिपत्रम्

| पृष्ठे | पंक्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १७ | २९ | यावत्सिद्धि० | यावत्सिद्ध० |
| २५ | शीर्षके | कर्तृत्वनिरुक्तिः | द्वितीयार्थप्रकाशः |
| २५ | १६ | वाच्यत्वनिवेशा– | वाच्यत्वानिवेशा– |
| २५ | ४० | व्यप्यधर्मेण | व्याप्यधर्मेण |
| २७ | शीर्षके | कर्तृत्वनिरुक्तिः | द्वितीयार्थप्रकाशः |
| २८ | ४६ | सर्वमेतादवलो० | सर्वमेतद्वालो० |
| २९ | शीर्षके | कर्तृत्वनिरुक्तिः | द्वितीयार्थप्रकाशः |
| २९ | ३५ | –गमकर्मणो– | –गमनकर्मणो– |
| २९ | ३६ | दृष्टि | दृष्टं |
| ३१ | ११ | निरूक्ते– | निरुक्ते |
| ३१ | १६ | वक्ता | वक्त्रा |
| ३१ | १९ | –निष्ठद्देश्यता | –निष्ठोद्देश्यता |
| ३२ | १८ | –फलजकता– | फलजनकता |
| ३२ | ४४ | –पदतीत्यादौ | पचतीत्यादौ |
| ३३ | ४० | वर्हिस्तिलाधि– | वर्हिस्तिलादि– |
| ३५ | १३ | (द्वितीयाया निरर्थकत्वाक्षेपः) | (द्वितीयाया निरर्थकत्वाक्षेपपरिहारौ) |
| ३५ | १ | स्वनिरूपित्व | स्वनिरूपितत्व |
| ३५ | ६० | –प्रत्यार्थाभावो | प्रत्ययार्थाभावो |
| ३७ | ६० | स्वप्रवृत्तिभेद– | स्ववृत्तिभेद– |
| ३८ | ४७ | वृत्यनियाक | वृत्यनियामक– |
| ३८ | ५८ | ग्रामस्यन्वबोधः | ग्रामस्यान्वयबोधः |
| ३९ | २४ | –सम्बन्धिवत्व– | सम्बन्धित्व |
| ३९ | ३९ | भूवृत्तिभेदाय | भूवृत्तिभेदस्य |
| ४४ | १२ | संयोगवच्छिन्न | संयोगावच्छिन्न |
| ४५ | अन्ते | मा भदित्याकारिका | मा भूदित्याकारिका |

| पृष्ठे | पंक्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ८७ | ५५ | –दानाति– | –दानादि– |
| ९१ | ५१ | –वियक्षयेति | –विवक्षयेति |
| ९२ | ५५ | तया हि | तथाहि |
| १०१ | ३० | पितृत्वस्त्रे | पितृष्वस्रे |
| १०१ | ४३ | –वर्णनस्यावश्यक– | वर्णनस्यानावश्यक– |
| १०२ | २५ | योग | योगे |
| १०२ | ५८ | नमित्तिक | नैमित्तिक |
| १०३ | ५१ | मैत्रनिष्टा | मैत्रनिष्ठा |
| १०५ | ३५ | एधनानेतुं | एधानानेतुं |
| ११० | २५ | षष्ट् मपि | षष्ठ्यपि |
| ११० | ३७ | चतुर्थ्यर्थः | चतुर्थ्यर्थः |
| १११ | ५८ | षठ्यर्थस्य | षष्ठ्यर्थस्य |
| ११२ | ५ | प्रयोत्कृ– | प्रयोक्तृ |
| ११२ | ९ | षठ्यर्थतया | षष्ठ्यर्थतया |
| ११२ | ३२ | प्रीतिच्छाया– | –प्रीतीच्छा– |
| ११९ | १५ | न पत्रानित्यत्र | न पत्रादित्यत्र |
| १२१ | ७ | फलविषयकावच्छिन्नत | फलविषयकावच्छिन्नत्व |
| १२३ | ४८ | इत्यज्ञावधि– | इत्यत्रावधि– |
| १२४ | १५ | धात्त्रन्तरा– | धात्वन्तरा |
| १२५ | १५ | गोणायाय | गौणापाय |
| १२५ | १७ | नैयादिकै– | नैयायिकै |
| १२६ | ५६ | –रूपत्वान् ) | –रूपत्वात् ) |
| १४४ | ६० | प्रभूति– | प्रभृति– |
| १४५ | १५–२१ | पृथत्क्वा | पृथक्त्व– |
| १४५ | ५६ | एतञ्च | एतच्च |
| १५९ | ३० | तस्याज्जनकत्वं | तस्माज्जनकत्वं |
| १६३ | ३४ | –शल्दस्य | –शब्दस्य |
| १६३ | ५७ | –विभक्तिप्रकाशः | –विभक्त्यर्थप्रकाशः |
| १६४ | ५२ | सम्नह्वते | सन्नह्यते |

| पृष्ठे | पंक्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १६६ | ५५ | ध्याप्यत्व– | व्याप्यत्व– |
| १६७ | ६१ | विवणवाक्ये | विवरणवाक्ये |
| १६८ | ४६ | निवेशते | निविशते |
| १७१ | ५ | –कोश | –कोष |
| १७१ | ६ | कस्तूरीप्राप्त्र्थ | कस्तूरीप्राप्त्यर्थं |
| १७५ | ५९ | क्रियायां | क्रियायाः |
| १८० | १७ | नराणां | तदा नराणां |
| १८३ | ३१ | विभविभवित | विभक्ति |
| १८४ | ४४ | कथमपि प्रमा | कथमपि प्रथमा |

॥ अर्हम् ॥

श्रीमत्तपोगणगगनाङ्गणगगनमणि-सूरिचक्रचक्रवर्त्ति-सर्वतन्त्र-स्वतन्त्र-श्रीविजयनेमिसूरीश्वरपट्टालङ्कारेण व्याकरण-वाचस्पति-शास्त्रविशारदकविरत्नेतिपदा-लङ्कृतेन श्रीविजयलावण्यसूरिणा प्रणीतः-

# स्याद्यर्थप्रकाशः ।

बहुविधरूपपरिग्रहजगदभिनाटनमिहाकाङ्क्षन् ।
स्वयमपि नटति सुकुतुकी यस्तस्मा अर्हतेऽस्तु नमः ॥१॥

नत्वा श्रीनेमिनाथं विमलगुणगुरुं सर्वदा शीललीनं,
सूरीन्द्रं हेमचन्द्रं निरुपमधिषणं सर्वतन्त्रस्वतन्त्रम् ।
प्राज्यानां प्राच्यवाचां मतिततिफलदं द्योतितानल्पभावं,
कारं कारं विचारं विहित इह मया स्यादिवाच्यप्रकाशः ॥२॥

आसीत्तपोगच्छविराजमानः, सतां प्रियः शासनचक्रवर्त्ती ।
अनेकतीर्थोद्धरणे प्रसिद्धः, श्रीनेमिसूरीश्वर इद्धतेजाः ॥३॥

तत्पट्टशिष्यः पदवाक्यवेत्ता, शास्त्रेषु सर्वेषु कृतावगाहः ।
लावण्यसूरिर्विजयादिनामा, स्याद्यर्थवादे कुरुते प्रकाशम् ॥४॥

यस्य व्याकरणेऽपि तर्ककलिता वाणी सदा खेलति,
प्रख्यानेन च तत्त्वदर्शनधिया द्वेधापि दक्षाभिधाम् ।
बिभ्राणस्य विनेयतां गतवतः सूरीशतां चादरोद्,
स्याद्यर्थस्य प्रकाश एष रचितस्तस्यैव विज्ञप्तितः ॥५॥

*आदौ कारकत्वनिरुक्तिः ॥*

तत्रेदमाचार्यीयसूत्रम्—क्रियाहेतुः कारकम् (२।२।१) इति । तस्येयं भूमिका कारकाकारकभेदेन विभक्तिर्द्विविधा । तत्र कारकाणि षट् । यथा—

"कर्ता कर्म च करणं च, सम्प्रदानं तथैव च ।
अपादानाधिकरणे इत्याहुः कारकाणि षट्

"इति प्राचामाचार्याणां विभाजनश्लोकः । ननु श्लोका अपि प्रमाणम् ? किन्त्वातः ? यदि श्लोका अपि प्रमाणायेरन् तर्हि अयमपि श्लोकः प्रमाणायेत—

'यदुदुम्बरवर्णानां, घटीनां मण्डलं महत् ।
पीतं न गमयेत् स्वर्गं, किन्तत् क्रतुगतं नयेत्" इति ।

नैष दोषः । प्रमत्तगीत एषः । यस्त्वप्रमत्ताप्तगीतस्तत्प्रमाणम् । पूर्वोदाहृतश्लोकस्य तथाभूतत्वात् प्रामाण्यमक्षतमेव । सम्बोधनविभक्तेर्यथायथमत्रैवान्तर्भाव इति शास्त्रविदः । लौकिकभाषासु तु सम्बोधनमपि पृथक्कारकमिति तत्र सप्त कारकाणीत्यन्यदेतत् ।

अकारकविभक्तिरुपपदविभक्तिपदेन प्राचीनार्वाचीनव्याकरणाचार्यैः पदमुपादाय या विभक्तिरिति व्युत्पत्तिमाश्रित्यान्वाख्यायते । पदञ्चात्र क्रियापदभिन्नं बोध्यम् । अन्यथा सर्वासां स्यादित्यादिविभक्तीनां साक्षात्परम्परया वा क्रियामाश्रित्य जायमानत्वेनोपपदविभक्तित्वमेव स्यात् ।

कारकमित्यन्वर्था संज्ञा, करोति स्वस्वव्यापारद्वारा प्रधानाप्रधानन्यायानुगृहीतप्रधानक्रियां निर्वर्तयतीति योगाश्रयणात् । अत एव प्राचीनपाणिन्यादितन्त्रेषु कारकसंज्ञासूत्रमनन्वाख्यायापादानादि–कारकषट्काभिधानम् । कारकशब्दस्य निरुक्तषट्के नित्यसङ्केतभावात् । अनित्यसङ्केतभावे हि कारकसंज्ञाग्राहकसूत्रं विना कर्मादिकारकादीनामभिधानमसङ्गतं स्यात् । वृत्तिकारोऽपि कारकसंज्ञासूत्रमिदं प्रणीय "**करोतीति कारकमिति अन्वर्थसंज्ञासमाश्रयणाच्च** चोहेतौ, समाश्रणाद्धेतोः । **अनाश्रितव्यापारस्य** अध्ययनेन वसतीत्यादिष्वध्ययनस्य **निमित्तत्वमात्रेण** कारणत्वमात्रेण, **हेत्वादेः** हेतुतृतीयार्थस्य कारकसंज्ञा न भवतीत्याह । **हेत्वादेरिति**—अत्रादिना दण्डं दधातीत्यादौ धारणक्रियान्वयी यादृशोऽधिकरणादिर्द्वितीयार्थः तादृशस्यैवाधिकरणादेर्द्वितीयार्थस्य—'अनुदण्डं जातिः' इत्यादौ जात्यन्वयात्तत्परिग्रहः । तेन मन्दबुद्धीनामध्येतॄणामनुग्रहाय कारकसंज्ञासूत्रं प्रणयतापि वृत्तिकृता कारकशब्दस्य पङ्कजादिवद् योगरूढित्वमेव सूचितम् ।

अथोच्यते—किन्नाम कारकत्वम् ? न तावत् क्रियान्वयित्वं तत्त्वम्; "कुमार्य इव कान्तस्य त्रस्यन्ति स्पृहयन्ति च" इत्यादौ त्रासहेतोः शेषषष्ठ्यर्थस्यापि कारकत्वापत्तेः, त्रासस्पृहयोः क्रिययोः तदर्थस्यान्वयात् । यदि चैतदर्थं षष्ठ्यर्थभिन्नत्वमपि निवेश्येत, तदा तण्डुलस्य पाक इत्यादौ षष्ठ्यर्थस्य कारकत्वानापत्तेः । यदि च कृद्युक्तान्यषष्ठ्यर्थभिन्नत्वे सति क्रियान्वयित्वं कारकत्वमिति परिष्कुर्यात्तदपि न, सुराणां पातार्हन्नित्यत्र कृद्युक्तशेषषष्ठ्या अर्थेऽतिव्याप्तेः, तत्र निरुक्तकारकत्वस्य सत्त्वात् । न च धात्वर्थेतरान्वयायोग्यत्वेन क्रियान्वयित्वं विशेष्यताम्, (सुराणां पातेत्यत्र च धात्वर्थान्वययोग्यत्वस्य सत्त्वेऽपि तदितरान्वययोग्यताया अपि सत्त्वाददोषः इति हृदयम्) ततश्च धात्वर्थेतरस्मिन् राज्ञः पुरुष इत्यादौ पुरुषादावन्वयान्नातिव्याप्तिरिति वाच्यम्; धात्वर्थेतरान्वययोग्यत्वमविज्ञाय तदन्वयायोग्यत्वस्य दुर्ग्रहत्वात् । तच्चान्वययोग्यत्वं कारकान्यत्वमेव; तथासत्यन्योन्याश्रयापत्तेः । तादृशान्वयायोग्यत्वस्वरूपकारकत्वज्ञानस्य तादृशान्वययोग्यत्वरूपकारकान्यत्वज्ञानस्य च परस्परसापेक्षत्वात्; अभावज्ञाने प्रतियोगिज्ञानस्य कारणत्वमित्याशयात् । एतेन धात्वर्थान्वियायोग्यत्वं शेषत्वम्, शेष–भिन्नत्वं कारकत्वमित्यपि प्रत्युक्तम्, धात्वर्थान्वयायोग्यत्वस्य कारकत्वस्वरूपाग्रहे–दुर्ग्रहत्वेनान्योन्याश्रयतादवस्थ्यात् ।

एतेन धात्वर्थान्वितस्याद्यर्थत्वं कारकत्वं विभक्त्यर्थस्य, विभक्त्यर्थद्वारकक्रियान्वयित्वं कारकत्वं विभक्तिप्रकृत्यर्थस्येत्यपि परास्तम्; दर्शितषष्ठ्या अर्थे तत्प्रकृत्यर्थे चातिव्याप्तेः ।

यत्त्वपादानाद्यन्यतमत्वं कारकत्वम्, नातः क्वाप्यव्याप्त्यतिव्याप्ती भवत इति तन्न, अपादानत्वादेरपि क्वचित्षष्ठ्यर्थत्वात्। किञ्च अपादानत्वादिकमपि नैकम्, ध्रुवत्वासोढत्वादिभेदेन बहुविधत्वात्, इति कथमुक्तान्यतमत्वं कारकत्वम्। न च ध्रुवाद्यन्यतमत्वेनापादानादीन्निरुच्य, तावदन्यतमत्वं कारकत्वं निर्वाच्यमिति वाच्यम्। कतिपयापादानादिकं जानतां सकलापादानादिकमजानतां ध्रुवादौ कारकत्वग्रहानापत्तेः। प्रतियोगिज्ञानं विना यावदपादानादिभेदस्यैव दुर्ग्रहतया तदन्यतमत्वस्य नितरां दुर्ग्रहत्वात्। एतेन तावदन्यतमत्वं कारकपदप्रवृत्तिनिमित्तमिति कारकपदवाच्यत्वमेव कारकत्वमिति निरस्तम्, तावदन्यतमत्वस्य निर्वचनासम्भवादिति चेत्—

अत्रोच्यते—नामार्थान्वयप्रयोजकत्वाभाववद्धात्वर्थान्वयित्वप्रयोजकधर्मवत्त्वे सति पदान्तरासमभिव्याहृत-(पदान्तरसमभिव्याहाराजन्य-) स्याद्यर्थत्वम् कारकत्वम्। नामार्थान्वयप्रयोजकताव्यापकत्वाभाववद्धात्वर्थान्वयित्वप्रयोजकत्वव्यापकधर्मवत्त्वसमानाधिकरणपदान्तरासमभिव्याहृत—(पदान्तरसमभिव्याहाराजन्य-) स्याद्यर्थत्वं कारकत्वमिति यावत्। व्यापकत्वं च समनियतमनतिरिक्तवृत्तित्वं वा बोध्यम्। 'कुमार्य इव कान्तस्य त्रस्यन्ति स्पृहयन्ति चे' त्यादौ षष्ठ्यर्थस्य कारकत्वं वारयितुं धर्मे नामार्थान्वय—प्रयोजकत्वाभाववत्त्वं विशेषणम्। तथा च कान्तस्यैति षष्ठ्यर्थस्य हेतुत्वस्य सम्बन्धत्वधर्मेणान्वयात् सम्बन्धत्वरूपो धर्मो नामार्थान्वयप्रयोजकत्वाभाववान् नेति न कश्चिद्दोषः। व्याघ्राद्बिभेतीत्यादौ तादृशो धर्मो हेतुतात्वम्, तेन धर्मेण पञ्चम्यर्थहेतुत्वस्य भयक्रियायामन्वयः। अत एव कर्तृत्वादिकारकस्य कृदन्तार्थे कर्तृत्वत्वादिधर्मेणान्वयार्थं 'कर्तरि' (२।२।८६) इति कर्मणि कृतः (२।२।८३) इत्यादिः पृथक्सूत्रारम्भः सङ्गच्छते। अन्यथा शेषत्वेन कारकस्य सर्वथाऽन्वयसम्भवे पृथक् सूत्रप्रणयनस्य वैयर्थ्यापत्तेः। शेषत्वं च सम्बन्धत्वं सप्रतियोगित्वं वेतन्यदेतदित्यादि षष्ठीविवरणे स्पष्टीभविष्यति। कर्मादिपदोपात्तानां कर्मादीनां कारकत्ववारणाय स्याद्यर्थत्वमुक्तम्। तत्रापि दण्डं दधातीत्यादौ दण्डनिरूपितवृत्तित्वादिस्वरूपकर्मत्वस्य 'अनु दण्डं जातिः' इत्यादौ नामार्थजातावन्वयात् कर्मकारकेऽव्याप्तिः स्यात्तद्वारणाय पदान्तरासमभिव्याहृतत्वं—(पदान्तरसमभिव्याहाराजन्यत्वं वा) स्यादेर्विशेषणम्। दर्शितकर्मत्वादेर्नामार्थान्वये कर्मप्रवचनीयान्वादिपदसमभिव्याहारस्य तन्त्रत्वात्। अन्यथा 'दण्डं जाति'रित्यत्रापि तादृशान्वयबोधप्रसङ्गात्।

नन्वेवमपि गेहे पचतीत्यादौ गेहवृत्तित्वस्य पाकान्वयित्वेन कारकत्वम्, तस्य 'गेहेघट' इत्यादौ नामार्थघटादावन्वयान्निरुक्तकारकत्वविरहात् सप्तम्यर्थकारकेऽव्याप्तिः। नच कर्तृकर्मान्यतरघटितपरम्परासंसर्गावलीढाधेयत्वस्यैव सप्तम्यर्थत्वेन कारकत्वम्, तादृशाधेयत्वस्य नामार्थेऽन्वयासम्भवात् कथमव्याप्तिरिति वाच्यम्, सप्तम्यधिकरणे (२।२।९५) इति सूत्रेणाधेयत्वसामान्यस्यैव सप्तम्यर्थत्वेन प्रतिपादनाद्, दर्शितपरम्पराघटिताधेयत्वस्य प्रतिपादने 'गेहे घट' इत्यादावाधेयत्वसामान्यस्यानानुशासनिकत्वापत्तेरिति चेत्, मैवम्; उक्तसूत्रेण (सप्तम्यधिकरणे २।२।९५ इत्यनेन) आधेयत्वसामान्यस्य दर्शितपरम्पराघटितसंसर्गावलीढाधेयत्वस्य च द्वयोस्तन्त्रावृत्त्यादिना सप्तम्यर्थत्वप्रतिपादनात्। यद्वा यादृशसंसर्गेण क्रियायामन्वयस्तादृशसंसर्गेणैव नामार्थेऽन्वयो विवक्षितः। एवमाधेयत्वसामान्यस्य सप्तम्यर्थत्वेपि न क्षतिः, तस्य दर्शितपरम्पराघटिताधेयत्वीयस्वरूपसम्बन्धेन क्रियायामन्वयात्, नामार्थे तु संयोगाद्यवलीढाधेयत्वीयस्वरूपसम्बन्धेनेति दर्शितपरम्पराघटिताधेयत्वीयस्वरूपसम्बन्धेनान्वयसम्भवात् सप्तम्यर्थाधेयत्वकारके नाव्याप्तिः। नामार्थान्वयस्तु नामार्थविशेष्यकशाब्दबोधे बोध्यः। अन्यथा स्यादीनां लिङ्गसंख्याद्यतिरिक्तस्वार्थे प्रकृतिभूतनामार्थविशेषणशाब्दधीजनकत्वनियमादसम्भवापत्तेः। तथापि 'गगनं न पश्यती' त्यादौ द्वितीयादेः स्वार्थविशेषणकनञर्थविशेष्यकशाब्दधीजनकत्वादव्याप्तिरिति नाम्नि निपातातिरिक्तत्वं विशेषणं देयम्।

यदि तिवाद्यर्थकर्तृकर्मणोरपि कारकत्वं तदा न्यायमते तत्राव्याप्तिः स्यादेः प्रथमान्तार्थविशेष्यकशाब्दधीप्रयोजकत्वादिति विभाव्यते तदा नामार्थान्वयप्रयोजकत्वव्यापकधर्मे तिवाद्यर्थत्वाव्यापकत्वं विशेषणं देयम्। स्यादिपदस्थाने च विभक्तिपदं निवेशनीयम्। शाब्दिकमते तु (व्यापार-मुख्यविशेष्यकबोधात्) नाव्याप्तिरतो न तद्विशेषणमिति बोध्यम्।

ननु यदि क्रियायां नामार्थे चान्वये एकसम्बन्धावलीढत्वं विशेषणम्, तदा सप्तम्यर्थकारकेऽव्याप्तिः, दर्शित-परम्पराघटिताधेयत्वीयसंसर्गेणाधेयत्वविषयकनामार्थविशेष्यक शाब्दबोधाप्रसिद्धेः, तादृशसंसर्गकाधेयत्वविषयकशाब्द-बोधौपयिकाकाङ्क्षाया नाम्नि विरहात्। तथा च तादृश-शाब्दप्रयोजकत्वाव्यापकत्वघटितलक्षणाप्रसिद्धया सर्वत्रैवा-सम्भवः। षष्ठीं विना पदान्तरासमभिव्याहृत-(पदान्तर-समभिव्याहाराजन्य-) विभक्तीनामर्थस्य क्रियान्वयघटक-सम्बधेन नामार्थेऽनन्वयात् इति चेन्न, द्विविधाधेयत्वस्य सप्तम्यर्थताभ्युपगमेन सम्बन्धविशेषानवलीढान्वयस्य लक्षणे अप्रवेशात्। एकसम्बन्धघटितान्वयविवक्षणे तु क्रियानिरू-पितसम्बन्धावलीढप्रकारतानिरूपितविशेष्यतासम्बन्धावच्छिन्न प्रतियोगिताकस्य नामार्थनिष्ठस्य शाब्दबोधाभावस्य प्रयो-जकताया अवच्छेदकत्वं व्यापकत्वमेव नामार्थान्वयप्रयोजक-ताया अनवच्छेदकत्वम्—अव्यापकत्वं बोध्यम्। तादृशशाब्द-बोधाभावप्रयोजकताव्यापकत्वं विभक्तिवाच्यताव्यापका-पादानत्वत्वादौ सम्भवति। तथा हि क्रियानिरूपितत्वोप-लक्षितयत्सम्बन्धावच्छिन्न—विभक्त्यर्थप्रकारतानिरूपितविशे-ष्यतासम्बन्धेन शाब्दबोधं प्रति नामजन्योपस्थितिविशेष्य-त्वस्य उक्तोपस्थितेर्विशेष्यतासम्बन्धेन वा प्रतिबन्धकत्वं कल्पनीयम्। न च वृक्षात्पततीत्यादौ विभागासमवायि-जनकत्वस्य पञ्चम्यर्थस्य पतनक्रियान्वयिनोऽन्वये नामार्थस्या-प्रयोजकत्वादेव वृक्षात्पर्णमित्यादौ ऋते पतनक्रियां बोधो न भवति इति नामजन्योपस्थितेः प्रतिबन्धकत्वमकल्प्यमिति वाच्यम्; क्वचिदयोग्यत्वेऽपि सर्वत्रायोग्यत्वाभावात्, वृक्षात्कर्मेत्यादौ योग्यतायाः सत्त्वाच्छाब्दबोधापत्तिवारणाय दर्शितप्रतिबध्यप्रतिबन्धकभावकल्पनाया आवश्यकत्वात्। एवं क्रियान्वितापादानत्वाद्यर्थकतत्तद्विभक्तेर्नाम्ना सहाना-काङ्क्षत्वेन तादृशशाब्दबोधाभावप्रयोजकनामनिराकाङ्क्ष-त्वाश्रयविभक्तिजन्योपस्थितिप्रकारतानिरूपकत्वात्मकतादृश-शाब्दबोधाभावप्रयोजकतावच्छेदकत्वस्वरूपनामार्थान्वयप्रयो-जकतावच्छेदकत्वं विभक्त्यर्थताव्यापकधर्मे स्पष्टम्। तादृश-सम्बन्धावलीढविभक्त्यर्थप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधं प्रति धातुजन्योपस्थितेः विशेष्यतासम्बन्धेन हेतु-त्वात्। ईदृशहेतुहेतुमद्भावग्रहार्थमेव नामार्थोपस्थितेः प्रति-बन्धकत्वं प्रदर्शितम्, न तु वास्तवम्। धातुजन्योपस्थितेर्हेतु-तयैवातिप्रसङ्गवारणसम्भवात्। अत एव 'तण्डुलस्य पाक' इत्यादौ नामजन्योपस्थितिसत्त्वेऽपि धातुजन्योपस्थिति-बलात् 'तण्डुलकर्मताकः पाक' इति शाब्दबोध उपपद्यते। न्यायमते दर्शितहेतुहेतुमद्भावे विभक्तौ स्याद्यन्यत्वमपि विशेषणम्।

## ( द्वितीयः परिष्कारः )

एवं धातुभिन्ननिराकाङ्क्षताप्रजोजकार्थवद्भिन्ना स्याद्यन्या या विभक्तिस्तद्भिन्नायाः पदान्तरासमभिव्याहृतायाः (पदा-न्तरसमभिव्याहारजन्यभिन्नायाः) विभक्तेरर्थः कारकम्। अत्र पदान्तरसमभिव्याहारोऽपि विभक्तिस्वरूपशब्दधर्मतया धातुभिन्ननिराकाङ्क्षताप्रयोजको बोध्यः। अत्रार्थस्य निरा-काङ्क्षताप्रयोजकत्वं विभक्तिवाच्यताव्यापकधर्मेण क्रिया-न्वयनिरूपकसम्बन्धप्रतियोगित्वेन रूपेण च बोध्यम्, अतो न पूर्वोक्तो व्याघ्रस्य भयम्, भूतले घटः इत्यादौ नाम-साकाङ्क्षत्वेऽपि दोषः। यदि पततीतिविनाकृताया वृक्षा-दिति पञ्चम्या अर्थो न कारकमिति मन्यते तदा धातु-समभिव्याहृतत्वं चरमविभक्तौ विशेषणं बोध्यम्। एवं कान्तस्य त्रस्यतीत्यत्र षष्ठ्यर्थशेषस्य नामनिराकांक्षत्व-प्रयोजकत्वान्न तत्र कर्मत्वेऽव्याप्तिः। स्याद्यन्यत्वविशेषणा-

स्याद्यर्थकर्तृत्वादौ नातिव्याप्तिः। पदान्तरासमभिव्याहृतत्व–( पदान्तरसमभिव्याहाराजन्यत्व– ) विशेषणाद् 'दण्डमनुजातिः' इत्यादौ द्वितीयार्थाधेयत्वे नातिव्याप्तिः। एवमीदृशस्यादित्यादिविभक्त्यर्थद्वारा नामार्थस्यापि कारकत्वं मन्तव्यम्।

यदि च स्याद्यर्थस्य न कारकत्वं मन्यते तदा धातुभिन्ननिराकाङ्क्षत्वप्रयोजकः पदान्तरासमभिव्याहृतस्य ( पदान्तरसमभिव्याहाराजन्यस्य ) धातुसमभिव्याहृतस्यादेरर्थः कारकम्। अत्र धातुभिन्ननिराकांक्षत्वप्रयोजकत्वं धातुभिन्नपदव्यतिरेकप्रयुक्तव्यतिरेकाप्रतियोगिस्वप्रकारकशाब्दबोध – सामान्यकत्वं तथाभूतस्याद्यर्थस्य बोध्यम्। सामान्यपदोपादानात् 'कान्तस्य त्रस्यती' त्यादौ षष्ठ्यर्थस्य शेषस्य तादृशशाब्दधीप्रकारत्वेऽपि न तत्रानिव्याप्तिः, शेषप्रकारकशाब्दधीसामान्ये तादृशव्यतिरेकाप्रतियोगित्वविरहात्; 'कान्तस्य केशाः' इत्यादौ धातुभिन्नपदेनापि शेषप्रकारकशाब्दधीजननात्। 'तण्डुलस्य पाकः' इत्यादौ षष्ठ्यर्थकर्मत्वादौ नाव्याप्तिः; कर्मत्वप्रकारकशाब्दधीसामान्यस्य तादृशव्यतिरेकाप्रतियोगित्वात्, धातुभिन्नपदेन कर्मत्वप्रकारकशाब्दबोधाजननात्।

एवं स्वप्रकारता स्वार्थकस्याद्यर्थतावच्छेदकरूपेण क्रियानिरूपितसम्बन्धेन चावलीढा बोध्या। तेन व्याघ्राद्बिभेतीत्यादौ पञ्चम्यर्थहेतुत्वस्य, गेहे पचतीत्यादौ सप्तम्यर्थाधेयत्वस्य, व्याघ्रस्य भयमित्यादौ भूतले घट इत्यादौ च शेषत्वेन–क्रियानिरूपकान्यसम्बन्धेन शाब्दप्रकारत्वेऽपि नाव्याप्तिः। पञ्चम्यर्थतावच्छेदकहेतुतात्वेन क्रियानिरूपककर्तृकर्मान्यतरघटितपरम्परासम्बन्धेन च दर्शितस्थलयोः शाब्दप्रकारताया अनवलीढत्वात्। एवं सति तण्डुलं पचतीत्यादौ तण्डुलीया कर्मतेत्यवान्तरवाक्यार्थबोधस्य द्वितीया–प्रकृतिभूतधातुभिन्नतण्डुलादिपदव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वेनासम्भवः स्यात्। तद्वारणार्थमुपात्तस्य स्वप्रकारकेत्यत्र प्रकारकत्वस्य निवेशो निष्प्रयोजन एव, स्वविषयताकत्वनिवेशेनापि तद्वारणसम्भवात्। विषयतायाः क्रिया–निरूपकत्वोपलक्षिततत्तत्सम्बन्धावलीढत्वविशेषणात् 'तण्डुलीया कर्मतेत्यत्र कर्मताया विशेष्यत्वेऽपि तस्य दर्शित–सम्बन्धानवलीढत्वात्।

नचैवं पश्यमृगो धावतीत्यादौ दृशिक्रियायां–शाब्दिकमते धावनक्रियायाः, न्यायमते धावनकर्तृमृगादेर्वाक्यार्थस्य कर्मतासंसर्गेणान्वयात् तादृशवाक्यार्थबोधस्य निरुक्तव्यतिरेकाप्रतियोगित्वेन तद्विषयसंसर्गीभूतकर्मत्वेऽतिव्याप्तिरिति वाच्यम्, संसर्गीभूतकर्मत्वस्य स्याद्यर्थत्वाभावात्। यदि च कर्मत्वादिकं न द्वितीयार्थः, कर्मत्वादिसंसर्गकशाब्दबोधे द्वितीयादिसमभिव्याहारस्तन्त्रमिति मतमास्थीयते तदा पश्यमृगो धावतीत्यत्र कर्मत्वस्य कारकत्वमिष्टमेव। यदि तु नेष्यते तदा कर्मत्वादिसंसर्गताकशाब्दबोधे स्यादिसमभि–व्याहारप्रयोज्यत्वं विशेषणं देयमित्यन्यदेतत्। एवं पदा–न्तरासमभिव्याहृतत्वं ( पदान्तरसमभिव्याहाराजन्यत्वं ) निरर्थकपदासमभिव्याहृतत्वं ( निरर्थकपदसमसमभिव्याहाराजन्यत्वं ) बोध्यम्। 'दण्डमनुजाति' रित्यादावन्वादिपदस्य निरर्थकताया वक्ष्यमाणत्वात्। स्यादिवाच्यतावच्छेदकत्वमपि स्यादिजन्योपस्थितिप्रकारत्वं बोध्यम्। तथा च निरर्थकपदसमभिव्याहारज्ञानाभावविशिष्टस्यादिजन्योपस्थितिप्रकारीभवद्धर्मावलीढदर्शितसम्बन्धनिरूपितप्रकारताकशाब्द–बोधसामान्ये निरुक्तव्यतिरेकाप्रतियोगित्वोपपत्तये पदान्तरा–समभिव्याहृतस्याद्यर्थत्वमुपात्तम्। एवं च धातुविनाकृत–स्याद्यर्थस्य कारकत्वनिराकरणाय धातुसमभिव्याहृतत्वं साकांक्षत्वार्थकमुपात्तम्। इत्थं च धातुपदव्यतिरेकप्रयुक्त–व्यतिरेकप्रतियोगित्वमेव निरुक्तशाब्दसामान्ये विशेषणं बोध्यम्। एतावतैव षष्ठ्यर्थशेषातिप्रसङ्गवारणसम्भवात्।

तदयं समुदायार्थः :— धातुपदव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगिनिरर्थकपदसमभिव्याहारज्ञानाभावविशिष्टस्वार्थकस्यादिज्ञानजन्योपस्थितिप्रकारीभवद्धर्मावलीढक्रियानिरूप – कत्वोपलक्षितसंसर्गावच्छिन्नस्वप्रकारतानिरूपकशाब्दबोध – सामान्यनिरूपकस्याद्यर्थत्वं कारकत्वम्। 'कान्तस्य केशाः' इत्यादौ षष्ठ्यर्थे शेषेऽतिव्याप्तिवारणाय प्रतियोग्यन्तं

शाब्दविशेषणम् । तावतापि 'कान्तस्य वस्यति' इत्यादौ षष्ठ्यर्थशेषेऽतिव्याप्तितादवस्थ्यमिति ( तद्वारणाय ) सामान्यपदम् । शाब्दसामान्ये निरुक्तप्रतियोगित्वासम्भवः स्यादिति शाब्दे स्वप्रकारताकत्वं विशेषणम् । तावताऽपि व्याघ्राद्बिभेतीत्यादौ पञ्चम्यर्थभयहेतुत्वादेः, व्याघ्रस्य भयमित्यादौ षष्ठ्यर्थशेषत्वेन शाब्दधीप्रकारतयाऽव्याप्तिरसम्भवो वा स्यादिति °धर्मावलीढान्तं प्रकारताविशेषणम् । तावताऽपि शेषत्वस्य स्यादिजन्योपास्थितिप्रकारतया तद्दोषतादवस्थ्यमिति स्वार्थकत्वं स्यादेर्विशेषणम् । तत्रापि तादृशोपस्थितिप्रकार-कारणत्वस्य 'शत्य' इत्यादौ शाब्दप्रकारतावच्छेदकतया करणत्वेऽव्याप्तिरिति प्रकारपदं परित्यज्य प्रकारीभवदित्युक्तम् । तदर्थस्तु-स्याद्यन्यज्ञानजन्योपस्थितिप्रकारत्वाभावविशिष्ट — तादृशोपस्थितिप्रकारत्वमापन्नो बोध्यः । तादृशप्रकारत्वाभावस्तु समानाधिकरण्य-कालिकविशेषणताभ्यां सम्बन्धाभ्यामवलीढप्रतियोगिताको बोध्यः । तेन 'शत्य' इत्यादौ करणतात्वप्रकारतायाः स्याद्यन्यतद्धितज्ञानजन्योपस्थितिप्रकारत्वेन स्वेनैव दर्शितोभयसम्बन्धेन विशिष्टत्वात्, तदभाववैशिष्ट्यविरहान्नाव्याप्तिरिति । न च स्यादिज्ञानजन्योपस्थितिप्रकारत्वावलीढ एव प्रकारीभवदित्यन्तेनोच्यतां तावतैव 'शत्य' इत्यादौ शाब्दसम्भवेऽपि करणत्वे नाव्याप्तिः, तत्र करणतात्वप्रकारतायास्तद्धितप्रयोज्यत्वात्; किं तादृशप्रकारतायां निरुक्तप्रकारत्वाभाववैशिष्ट्यनिवेशेनेति वाच्यम्, यत्र शत्य इत्यादौ शतेनेति निराकाङ्क्षं केनचिदुक्तं तत्र तृतीयाजन्योपस्थितिप्रकारतापन्नकरणतात्वस्य शाब्दप्रकारताव्यापकत्वेनाव्याप्तितादवस्थ्यात् । निरुक्तप्रकारत्वाभाववैशिष्ट्यनिवेशे तु तृतीयाप्रयोज्यप्रकारतायास्तद्धितप्रयोज्यप्रकारत्वेन दर्शितोभयसम्बन्धविशिष्टत्वात् निरुक्तप्रकारत्वाभाववैशिष्ट्यविरहाद् दर्शितस्थले शाब्दबोधसम्भवेऽपि करणत्वे नाव्याप्तिरिति । निरुक्तप्रकारत्वाभावप्रतिजोगितायाः सामानाधिकरण्यमात्रावच्छिन्नत्वोक्तौ शतेन क्रीणातीत्यादौ करणत्वेऽव्याप्तिः, तत्र करणतात्वप्रकारतायाः सामानाधिकरण्येन तद्धितप्रयोज्यप्रकारताविशिष्टत्वात् । अतः कालिकविशेषणतासम्बन्धावच्छिन्नत्वमपि तत्प्रतियोगितायामुक्तम् । तावन्मात्रोक्तौ तु प्रकृत्यर्थताव्यापकप्रकारतया कालिकसम्बन्धेन विशिष्टायाः स्यादिप्रयोज्यतायाः सर्वत्रैव करणतात्वादौ सत्त्वात् निरुक्तप्रकारत्वाभावविशिष्टप्रकारताविरहादसम्भवः स्यादिति सामानाधिकरण्यावच्छिन्नत्वमपि प्रतियोगितायां निवेशितमिति ।

दण्डं ददातीत्यादौ दृष्टस्य दण्डकर्मत्वस्य अनु दण्डं जातिरित्यादौ द्वितीयावाच्यत्वव्यापकाधेयत्वधर्मेण शाब्दप्रकारत्वेन, तत्रातिव्याप्तिरिति विशिष्टान्तं ( निरर्थकपदसमभिव्याहारज्ञानाभावविशिष्टेति ) स्यादिज्ञानस्य विशेषणम् । न च निरर्थकपदासमभिव्याहृततया स्यादिविशेष्यतां तावतैव दर्शिताव्याप्तिवारणसम्भवात्, किं तादृशसमभिव्याहारज्ञानाभावस्य स्यादिज्ञाने वैशिष्ट्यनिवेशेनेति वाच्यम्, दण्डं जातिरित्यादौ तादृश समभिव्याहारज्ञानबलात् शाब्दधीसम्भवेनोक्ताव्याप्त्यनुद्धारात् । न चैवमपि तादृशसमभिव्याहारज्ञानाविषयत्वं स्यादेर्विशेषणमस्तु, दर्शितस्थले द्वितीयायाः तादृशसमभिव्याहारज्ञानविषयत्वात् शाब्दसम्भवेऽप्यव्याप्त्यसम्भवात् किं स्यादिज्ञाने तादृशज्ञानाभाववैशिष्ट्यनिवेशेनेति वाच्यम्, यत्र दण्डो जातिरित्यादौ प्रथमायां तादृशसमभिव्याहृतद्वितीयात्वभ्रमः तत्र शाब्दबोधसम्भवेनोक्ताव्याप्तिसम्भवात्, तत्र प्रथमायास्तादृशसमभिव्याहारज्ञानाविषयत्वात् । स्यादिज्ञाने तु तादृशसमभिव्याहाराभाववैशिष्ट्यनिवेशनेऽव्याप्तिर्न भवति; स्वविषयतावच्छेदकप्रकारत्वसम्बन्धावच्छिन्नप्रतियोगिताकस्य तादृशसमभिव्याहारज्ञानाभावस्य स्यादिज्ञाने वैशिष्ट्यनिवेशात् । दण्डो जातिरित्यादौ प्रथमाज्ञाने तादृशसमभिव्याहारज्ञानस्य स्वविषयताव्यापकद्वितीयात्वप्रकारकत्वेन सम्बन्धेन तत्र तदभाववैशिष्ट्यविरहात् । एवं सति दण्डं ददातीत्यादौ द्वितीयाज्ञाने स्वविषयताव्यापकप्रकारकत्वसम्बन्धेन कालान्तरीयस्य पुरुषान्तरीयस्य तादृशसमभिव्याहारज्ञानाभावस्य सत्त्वेन तादृशज्ञानाभावविशिष्टस्वार्थकस्यादिज्ञानाप्रसिद्ध्या दण्डकर्मत्वेऽव्याप्तिः स्यादिति तादृशसमभिव्याहारज्ञाना-

भावप्रतियोगिता कालिकविशेषणता–सामानाधिकरण्याभ्यां सम्बन्धाभ्यामवच्छिन्ना बोध्या। अत एव शत्य इत्यादौ शाब्दधीसम्भवेनाव्याप्तिवारणार्थं स्याद्यन्यज्ञानजन्योपस्थितिप्रकारत्वाभावविशिष्टत्वं धर्मे विशेषणमस्तु, तावतैवाव्याप्तेर्वारणसम्भवात्–स्वार्थकेत्यादि प्रकारीभवदित्यन्तं व्यर्थमिति परास्तम्, स्वार्थकेत्याद्यनुक्तौ तादृशसमभिव्याहारज्ञानाभावस्य स्यादिज्ञानं विना निवेशयितुमशक्यत्वात्। अनुदण्डं जातिरित्यादौ शाब्दप्रकारतया दण्डकर्मत्वेऽव्याप्त्यनुद्धारात्।

नचास्तु स्वार्थकेत्यादि धर्मविशेषणं, तथापि स्वाद्यन्यजन्योपस्थितिप्रकारत्वाभावस्य वैशिष्ट्यं धर्मे, धर्मविशेषणीभूततादृशोपस्थितिप्रकारत्वे वा निवेशनीयमित्यत्र विनिगमकाभाव इति वाच्यम् पुरुषान्तरीयतद्धितजन्योपस्थितेः सार्वदिकत्वसम्भवेन शतकरणत्वेऽव्याप्तिसम्भावनात्। स्याद्यन्यजन्योपस्थितौ शाब्दे च तत्पुरुषीयत्वं निवेश्याव्याप्तिसम्भवनिरासेऽपि पुरुषभेदेन कारकभेदापत्तेः। तादृशोपस्थितिप्रकारतायां तु स्याद्यन्यजन्योपस्थितिप्रकारत्वाभाववैशिष्ट्यनिवेशे तत्प्रतियोगितायां स्वनिरूपकज्ञानसमानाधिकरणज्ञानीयत्वसम्बन्धेनाप्यवच्छिन्नत्वप्रवेशात् पुरुषान्तरीयतद्धितजन्योपस्थितेः सार्वदिकत्वसम्भावनेऽप्यव्याप्तिसम्भावनानिरासात्, तत्पुरुषीयत्वानिवेशेन विनिगमकसम्भवात्।

एवं गेहे पचतीत्यादौ सप्तम्यर्थाधेयत्वस्य गेहे घट इत्यादौ शाब्दप्रकारतया तत्राव्याप्तिः स्यात्तद्वारणाय क्रियानिरूपकत्वोपलक्षितसम्बन्धावच्छिन्नत्वं स्वप्रकारताविशेषणम्। तेन गेहे घट इत्यादौ सप्तम्यर्थाधेयत्वस्य आधेयत्वीयस्वरूपसम्बन्धेन शाब्दप्रकारत्वेऽपि क्रियानिरूपकेण कर्तृकर्मान्यतरपरम्परासम्बन्धावलीढाधेयत्वीयस्वरूपसम्बन्धेन तत्र शाब्दप्रकारत्वविरहान्नाव्याप्तिरिति। तत्र हि क्रियानिरूपकत्वविशिष्टसंसर्गावलीढत्वोक्तौ कान्तस्य त्रस्यतीत्यादौ षष्ठ्यर्थस्य शेषस्य त्रासनिरूपकत्वविशिष्टस्वरूपसम्बन्धेन 'कान्तस्य चेष्टा' इत्यादौ चेष्टान्वयविषयकशाब्दत्वविरहात् षष्ठ्यर्थशेषेऽतिव्याप्तिः स्यादिति क्रियानिरूपकत्वोपलक्षितत्वेन सम्बन्धो विवक्षितः। तेन तथोपलक्षितेन स्वरूपसम्बन्धेन षष्ठ्यर्थशेषस्य चेष्टान्वयविषयकशाब्दप्रकारत्वान्न तत्रातिव्याप्तिः।

यदि च सप्तम्या द्विविधमाधेयत्वमर्थः तदा तण्डुलं न पचतीत्यादाविव तण्डुलं नेत्यादौ तण्डुलकर्मत्वस्य नञर्थान्वयविषयकशाब्दप्रकारकर्मत्वादावव्याप्तिरसम्भवो वा स्यात्तद्वारणाय निरूक्तसंसर्गावलीढत्वं स्वप्रकारताविशेषणं बोध्यम्। यदि च धातुविनाकृतात् तण्डुलं नेत्यादिवाक्यात् कर्मत्वादेर्नञर्थान्वयविषयकशाब्दबोधो नाभ्युपेयते, नञर्थे कर्मत्वादेरन्वयबोधे नञो धातुसमभिव्याहारस्य तन्त्रत्वादिति तदा, निरुक्तसम्बन्धावच्छिन्नत्वं न स्वप्रकारताविशेषणम्। तण्डुलं न पचतीत्यादौ कर्मत्वस्य नञर्थान्वयविषयकशाब्दप्रकारत्वेऽपि तादृशशाब्दस्य धातुपदव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वान्न तत्राव्याप्तिरिति। एवं निरुक्तशाब्दसामान्यस्य लक्षणत्वे श्रोतरि निरुक्तशाब्दसामान्यस्य समवायेन सत्त्वात् तत्रातिव्याप्तिः स्यादतोऽनिरूपकत्वमुक्तम्। निरूपकत्वं प्रकारत्वं बोध्यम्। तावतापि धात्वर्थताव्यापकधर्मादावतिव्याप्तिरिति स्याद्यर्थत्वमुक्तम्। स्याद्यर्थत्वं तु स्यादिजन्योपस्थितिप्रकारीभवद्धर्मत्वं बोध्यमिति।

अत्रेयमुपपत्तिः—निरर्थकपदासमभिव्याहृत–(निरर्थकपदसमभिव्याहाराजन्य–) द्वितीयार्थकर्मत्वप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दं प्रति भावप्रत्ययान्यप्रत्ययप्रकृतिधातु–जन्योपस्थितेः विशेष्यतासम्बन्धेन हेतुत्वम्। तेन घटादिपदेन लक्षणया पाकोपस्थितौ योग्यतासत्त्वेऽपि तण्डुलं घट इत्यादौ न शाब्दबोधः। भावाख्यातस्थले द्वितीयान्तपदत्वेऽपि तण्डुलं पच्यते इत्यादौ न शाब्दबोध इत्यन्वयव्यभिचारवारणाय प्रकृत्यन्तं धातुविशेषणम्। नचोक्तव्यभिचारवारणाय भावप्रत्ययाप्रकृतित्वमेव धातुविशेषणमस्तु किं द्वितीयप्रत्ययपदप्रवेशेनेति वाच्यम्, तथा सति 'तण्डुलं पच्' इत्यादौ शाब्दापत्तेः। इत्थमेव निर्विभक्तिकस्य शब्दस्य शाब्दबोधाप्रयोजकत्वरूपमसाधुत्वमुपपद्यते। इदमेवासाधुत्वं तत्साप्यानाप्यात्कर्मभावे (३।३।२१) इति सूत्रे अनाप्यादितिपदं भावप्रत्ययान्तधातोः कर्मत्वप्रकारशाब्द-

बोधाप्रयोजकत्वलक्षणम् ( असाधुत्वं ) ज्ञापयति । एवं षष्ठ्यर्थस्य कर्मत्वस्य कर्तृत्वस्य च प्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दधियं प्रति कृदन्तधातुजन्योपस्थितेर्विशेष्यतासम्बन्धेन हेतुत्वम्, तेन तण्डुलस्य पाकः, पाचको; मैत्रस्य पाकः, पाच्यो वा इत्यादौ तण्डुलकर्मत्व–मैत्रकर्तृत्व-प्रकारकपाकविशेष्यकशाब्दबोधस्य नानुपपत्तिरिति षष्ठ्यर्थयोः कर्मत्वकर्तृत्वयोः न कारकत्वानुपपत्तिः । एवं तृन्नुदन्तेति ( २।२।६९ ) षष्ठ्या निषेधेनासाधुतया तण्डुलस्य पचनं मैत्रस्य पच्यमानो वेत्यादौ कर्मत्व–कर्तृत्वप्रकारकशाब्दानुत्पत्त्याऽन्वयव्यभिचारः स्यादिति तद्वारणाय तृन्नादि ( २।२।६९ ) सूत्रोपात्तप्रत्ययभिन्नत्वं कृति विशेषणं देयमिति । यदि 'तण्डुलं पाचकः' इत्यादौ द्वितीयार्थकर्मत्वस्य धात्वर्थे नान्वयः, कर्मणि कृतः ( २।२।८३ ) कर्तरि ( २।२।८६ ) इति सूत्राभ्यां षष्ठीविधायकाभ्यां द्वितीयाबाधादिति, तदातृन्नुदन्तेति सूत्रोक्तप्रत्ययभिन्नकृदन्यत्वमपि भावप्रत्ययान्यप्रत्यये विशेषणं देयमिति । एवं पच्यते इत्यादौ कर्माख्यातस्थले द्वितीयार्थकर्मत्वस्य न धात्वर्थेऽन्वयः इति कर्मप्रत्ययान्यत्वमपि तस्य विशेषणं बोध्यम् । अथ कर्मकर्मतान्यतरबोधकशब्दासमभिव्याहृतत्वं धातोरेव विशेषणं बोध्यम् । तेन 'छेत्तं साम्प्रतं वृक्ष' इत्यादौ, 'नारद इत्यबोधि सः, इत्यादौ च निपातेन कर्म-कर्मत्वयोर्बोधने धात्वर्थे द्वितीयार्थस्य नान्वय इति । इदमेवासाधुत्वं कर्मप्रत्ययनिपातसमभिव्याहृतधातोरर्थे स्वार्थान्वय–बोधाप्रयोजकत्वलक्षणं ज्ञापयितुं पाणिनीये मये अनभिहिते ( पा० सू० २।३।१ ) इत्यधिकारसूत्रम् । इहानुशासने तु तत् शाब्दबोधौपयिकाकाङ्क्षालस्य बोध्यम् ।

एवं तृतीयार्थकर्तृत्वकरणत्वान्यतरप्रकारतानिरूपित–विशेष्यतासम्बन्धेन शाब्दबोधं प्रति कर्तृबोधकपदासमभि–व्याहृत–करणबोधकपदासमभिव्याहृतान्यतर– सप्रत्ययधातु–जन्योपस्थितेः विशेष्यतासम्बन्धेन यथायोग्यं हेतुत्वम् । तेन घटादिपदेन लक्षणया पाकोपस्थितावपि 'चैत्रेण घटः' 'चैत्रेण काष्ठेन घटः' इत्यादौ न तथा शाब्दधीः । न वा पचनं, पचति वेत्यादौ चैत्रेणेति–तृतीयार्थकर्तृत्वस्य धात्वर्थे अन्वयबोधः । न वा पचनमित्यादौ काष्ठेनेति– तृतीयार्थ–करणत्वस्य धात्वर्थेऽन्वयबोध इति न्यायमते एवं कार्यकारण–भावाः । शाब्दिकमतेऽप्येते कार्यकारणभावाः । परन्तु–कर्मत्व–कर्तृत्व–करणत्वानि न विभक्तीनामर्थाः किन्तु कर्म-कर्तृ–करणानि । तेन कर्मत्व–कर्तृत्व–करणत्वान्यनिवेश्य कार्यकारणभावा यथोक्ता बोध्याः ।

एवं पञ्चम्यर्थविभागजनकत्वाद्यपादानत्वादिप्रकारता–निरूपितविशेष्यतासम्बन्धेन शाब्दं प्रति प्रत्ययान्तधातु–जन्योपस्थितेः विशेष्यतासम्बन्धेन हेतुत्वम् । तेन घटादिपदेन लक्षणया पतनोपस्थितावपि 'वृक्षाद् घटः' इत्यादौ न तथा शाब्दधीः । वृक्षात्पतति, पत्यते, पतनमित्यादौ तु तथा–शाब्दधीः । चोराद्बिभेतीत्यादौ हेतुतासामान्यविलक्षणस्य भयहेतुत्वस्य पञ्चम्यर्थस्य बिभेत्यर्थ एवान्वयात् चौराद्धन–लाभ इत्यादावनन्वयात् न भयहेतुत्वेऽव्याप्तिशङ्का ।

अत्र कृत्तद्धितयोरपादानबोधकत्वं न दृश्यते । समासे तु चौरभीत इत्यत्रचौरपदस्य चौरभीते लक्षणा भीतपदस्य तात्पर्यग्राहकत्वम् । तथा च धातुजन्योपस्थितिविरहात् पञ्चम्यर्थान्वयसम्भवात्– अपादानबोधकपदासमभिव्याहृतत्वं धातोर्न विशेषणम्, न्यायमते प्रयोजनविरहादिति । शाब्दिक-मते कृत्तद्धितसमासेषु वृत्तिस्वीकाराद् धातुजन्योपस्थिति–सम्भवाच्च तद्विशेषणमस्त्येव । यदि च व्याघ्र इति बिभेति, 'भेत्तुं साम्प्रतं व्याघ्र' इत्यादिप्रयोगानुरोधात् निपातो भया-पादानमभिधत्ते, तदा न्यायमतेऽपि तद्विशेषणं बोध्यमिति ।

एवं चतुर्थ्यर्थ– स्वत्वनिरूपकत्वादिप्रकारतानिरूपित–विशेष्यतासम्बन्धेन शाब्दं प्रति सम्प्रदानबोधकपदासमभि–व्याहृत– सप्रत्ययधातुजन्योपस्थितेः विशेष्यतासम्बन्धेन हेतु-त्वम् । तेन घटादिपदेन लक्षणया दानोपस्थितावपि न तथा शाब्दधीः : न वा दानीयो ब्राह्मणायेत्यादौ चतुर्थ्यर्थ–सम्प्रदानत्वस्य धात्वर्थेऽन्वयबोधः ॥

एवं सप्तम्यर्थस्य कर्तृकर्मान्यतरघटितपरम्परासंसर्गा–वलीढाधेयत्वस्य प्रकारतया, आधेयत्वसामान्यस्य निरुक्त–सम्बन्धावलीढप्रकारतया वा निरूपितं यद्विशेष्यत्वं तेन संसर्गेण शाब्दं प्रति विशेष्यतासम्बन्धेनाधिकरणबोधकपदा–

समभिव्याहृत ( सप्रत्यय ) धातुजन्योपस्थितेः हेतुत्वम्, तेन घटादिपदेन पाकोपस्थितावपि न तथा शाब्दबोधः । न वा पचती स्थाल्यामित्यादौ सप्तम्यर्थाधेयत्वस्य धात्वर्थे अन्वयबोधः । भवति च स्थाल्यां पचति, पच्यते, पाक इत्यादौ तथा शाब्दबोधः ।

एवं कारकलक्षणे समुपपन्ने कर्तृत्वादीनां धात्वर्थ-विशेष्यकनिरुक्तस्यादिज्ञानजन्योपस्थितिप्रकारीभवद्धर्मावलीढ-प्रकारताकशाब्दकाले एव कारकत्वं, यथा धूमादीनां व्याप्तिपक्षधर्मताज्ञानकाल एव वह्निगमकत्वस्वरूपं वह्नि-लिङ्गत्वम् इति । वृत्तिकृताऽपि शक्तिश्च सहभूर्यावद्द्रव्य-भाविनी च क्रियाकाले एवाभिव्यज्यते इत्यादिनैतदेवोक्तम् ॥

## ( तृतीयः प्रकारः )

इत्थं हि क्रियान्वयित्वमित्यपि प्राचां लक्षणं कारकत्वस्य संभवति तथा हि– अन्वयित्वमात्रोक्तौ नामार्थान्वयिनि षष्ठ्यर्थशेषादावतिव्याप्तिः । तद्वारणार्थमुपात्तेऽपि क्रिया-पदे क्तान्तस्य त्रस्यतीत्यादौ सा तदवस्थैवेति क्रियामात्रान्व-यित्वं तद्वाच्यम् । तदर्थस्तु धातुं विना स्वान्वयबोधाजनक-स्याद्यर्थत्वम्—'इति । त्याद्यर्थस्यापि कारकत्वमिति मते स्यादिपदस्थाने विभक्तिपदं बोध्यमिति विभक्तिज्ञानजन्यो-पस्थितिविषयो विभक्त्यर्थः, तत्र तादृशोपस्थितौ निरुक्ता-न्वयबोधस्याजनकत्वमनुपधानं बोध्यमिति । एवं धातुं विना स्वविशेषणतान्वयबोधानुपहितस्य विभक्तिज्ञानजन्योपस्थिति-सामान्यस्य विषयः नामार्थान्वययोग्यः कारक इति । अत्र स्वविशेषणतायां स्यादिपदस्थाने विभक्तिपदं प्रक्षिप्य पूर्वोक्तं विशेषणं बोध्यम् । षष्ठ्यर्थशेषेऽतिव्याप्तिवारणाय अनुपहितस्येत्यन्तं सामान्यविशेषणम् । तत्राप्यसम्भव-वारणाय धातुं विनेत्युक्तम् । क्तान्तस्य त्रस्यतीत्यादौ षष्ठ्यर्थशेषेऽतिव्याप्तिवारणाय सामान्यपदम् । इष्टसाधन-त्वादावतिव्याप्तिवारणाय नामार्थान्वययोग्यत्वं विशेषणम् । स्वविशेषणताविशेषणकृत्यं पूर्वोक्तं वेदितव्यम् ।

इयांस्तु विशेषः, प्रथमान्तार्थविशेष्यताकत्याद्यर्थकर्तृ-त्वकर्मत्ववृत्तिप्रकारतया शाब्दं प्रति धातुसमभिव्याहृत धातुजन्योपस्थितेः विशेष्यतासंसर्गेण हेतुत्वमिति शाब्दिक-मतेऽप्ययं कार्यकारणभावः । परन्तु प्रथमान्तार्थविशेषणताक-कर्तृकर्मविशेष्यतया शाब्दं प्रतीति विशेषः । तेन ति देवदत्त इत्यादौ न तथा शाब्दबोध इति ।

## ( चतुर्थः प्रकारः )

एवं निरर्थकपदसमभिव्याहारज्ञानाभावविशिष्ट— द्वितीयादिज्ञानजन्योपस्थितिविशेष्यतापन्नं कर्मत्वमिति तत्त-द्विभक्तिजन्योपस्थितिविशेष्यतापन्नं कर्तृत्वं करणत्वं सम्प्र-दानत्वमपादानत्वमधिकरणत्वं नानाविधं कारकपदशक्यम् इति नानार्थमेव कारकपदम् । तथा च कर्मत्वादिसकल-साधारणं कारकपदवाच्यत्वमेव कारकत्वमिति–यथा गो-पृथिव्यादिसकलसाधारणं गोपदवाच्यत्वमेव गोत्वमिति ।

ननु नानार्थत्वाभ्युपगमेऽपि कारकपदस्य, कारकपद-वाच्यत्वं कारकत्वं न भवति, कारकपदाधुनिकसङ्केतविषये द्रव्यादावतिव्याप्तेः । न च नित्यसङ्केतेन कारकपदवत्त्वं तत्, आधुनिकसङ्केतविषये द्रव्यादौ नित्यसङ्केताभावान्नाति-व्याप्तिरिति वाच्यम्; तथा सति कर्मत्वादीनामतथात्वाद-सम्भवापत्तेः; तेषां शाब्दिकसङ्केतेन कारकपदवत्त्वादिति चेन्न, कर्मत्वादौ कारकपदस्य नित्यः सङ्केत इति प्राचीन-शाब्दिकानां सिद्धान्तात् । प्राचीनानुशासने कुत्रापि कारक-संज्ञाया अनभिधानात् शाब्दिकसङ्केताप्रसक्तेः । इहापि व्याकरणे स्थूलदृशां स्पष्टप्रतिपत्तये क्रियायां हेतुत्वेन विवक्षितः कारकेत्यनुगतार्थः कारकसंज्ञो भवतीति निरुक्त-सिद्धान्त एवानूद्यते । इत्यास्तां विस्तरः ।

## ( अथ सूत्रव्याख्या )

क्रियाया हेतुः कारणं कर्त्रादि कारकसंज्ञं भवतीति वृत्तिः । निरूपितत्वं षष्ठ्यर्थः ( क्रियाया इत्यत्र ) तच्चोप-

लक्षणविधया हेतुपदार्थैकदेशे जनकत्वेऽन्वेति । कर्त्रादीत्यनेन योगार्थ इतः प्रागनुपदं परिष्कृत आश्रीयते । कारकसंज्ञमिति । क्रियानिरूपितत्वोपलक्षितजनकत्वाश्रयो रूढ्यर्थः सङ्केत्यते । अत एव कारकविभक्त्यर्थस्य क्रियायामेवान्वयः । क्रियानिरूपितत्वोपलक्षितेत्युक्त्या निरूपितत्वस्य विशेषण-भावव्याप्तत्वादनयोर्नित्यसाकाङ्क्षत्वम् । तदुक्तमभियुक्तैः क्रियाजनकं कारकमिति ज्ञाते का सा क्रियेत्याकाङ्क्षोत्पत्तेः क्रियाया जनकाकाङ्क्षया च तत्रैवान्वयस्यौचित्यादिति । तच्च कारकं द्रव्यस्य वह्न्यादेः वाक्यार्थबोधकालिकी उत्पादविनाशयोगिनी—प्रादुर्भावतिरोभावशालिनी कर्तृ-त्वादिरूपा शक्तिः, न तु द्रव्यस्वरूपं तत् । अतश्च क्रिया-मध्ये० ( २।२।११० ) इतिसूत्रस्थानीये सप्तमीपञ्चम्यौ कारकमध्ये ( पा० सू० २।३।७ ) इति सूत्रे भाष्यकारा-दीनां 'कारकमध्ये' इत्यस्य 'शक्तिद्वयमध्ये' इति विवरणम् । तेन स्थाली पचति, काष्ठानि पचन्ति, वह्निः पचतीत्यादिषु शक्तेर्द्रव्यसत्तात्मकत्वात् व्यापकत्वात् यद्द्रव्यशक्तिः प्राधा-न्येन स्वातन्त्र्येण आश्रीयते, इतरेषां द्रव्याणां पाकक्रिया-सम्बन्धिनां च शक्तयः स्वतन्त्रक्रियायाः सहकारितया विवक्ष्यन्ते तदा तदेव कर्तृकारकम्– तदुक्तम्– विवक्षातः कारकाणि भवन्तीति । सर्वेषां कारकाणां स्वस्वावान्तर-क्रियाद्वारा स्वातन्त्र्येण विवक्षितप्रधानक्रियानिष्पादकत्वम् ' करोति क्रियां ( स्वतन्त्रां ) निष्पादयतीति व्युत्पत्तेः । तदाह तच्चेत्यादि । स्वं परश्च स्वपरौ तौ चाश्रयाविति विशेषणसमासो न तु षष्ठीसमासः । तयोः समवेता सम्ब-न्धिनी क्रिया तस्या निर्वर्तकमित्यर्थः । 'चैत्रस्य पुत्रं पन्थानं पृच्छतीत्यत्र चैत्रस्य कारकत्वव्यावृत्तये प्रयोजकसाधारणं जनकमिति विवरणं विहाय कारणमुपात्तम्, तेन चैत्रस्य कुलालजनकवत् ( यथाघटं प्रति कुलालजनकस्य तथेत्यर्थः ) चतुर्थान्यथासिद्ध्या अकारणत्वान्न तत्त्वम् । एवं चैत्रस्य पितरमित्यत्र चैत्रस्य रासभवत् ( यथा घटं प्रति मृदा-हरणसाधनस्य रासभस्य तथेत्यर्थः ) पञ्चमान्यथासिद्धिः । "चैत्रस्य पितुरेव पन्थाः प्रष्टव्यः" इति प्रतिजानतः ( निदिचिन्वानस्य ) कस्यचित् प्रश्न–( विषयके ) वाक्ये 'चैत्रस्य पितरं पन्थानं पृच्छती' त्यादौ चैत्रपितृत्वेनैव प्रश्नं प्रति कारणत्वात् कारकत्वं दुर्वारमिति न शङ्कनीयम्— दण्डत्वादेरिव प्रथमान्यथासिद्धेः" इत्यादि कस्यचिदुक्तं सर्वं काकदन्तपरीक्षणम्; कारकत्वास्यानुपदोक्तपरिष्कारेण सर्वेषां परिहारात् । न चैतत्परिहारसम्भवे व्यर्थयत्नः परिष्कारः, कान्तस्य त्रस्यतीत्यादिकृते तदावश्यकत्वात् इति परिष्कारान्तर्गताव्याप्त्यतिव्याप्तिस्थलीयलक्ष्यमाश्रित्य स्वय-मूहनीयम् । स्वाश्रयसमवेता कर्तृस्था क्रिया भावना च, पराश्रयसमवेता– कर्मस्था क्रिया भावना चेति वृत्ति-तात्पर्यम् ।

वृत्तितात्पर्यं हि वाक्यघटकधातुवाच्य क्रियया सह युगपदुपलब्धजन्मा सकलद्रव्यवर्तिनी कर्तृत्वादिकारकशक्तिः धातुवाच्यक्रियाविशेष्यकवाक्यार्थबोधकाले एव क्रियान्वयित्व-रूपेण भाव्यते । यदुच्यतेऽग्रे– क्रियाकाले– क्रियान्वयकाले एवाभिव्यज्यते इति । यत्, कारकत्वपरिष्कारे, धूमादीनां व्याप्तितद्विशिष्टपक्षधर्मताज्ञानकाले एव वह्निगमकत्वस्वरूपं वह्निलिङ्गत्वमिति दृष्टान्तेन व्याख्यातम्, तदेव तात्पर्यमिति सुधियो विभावयन्तु । लिङ्गसंख्यान्वितं द्रव्यं, तेनाव्ययं न द्रव्यम् । यावद्द्रव्यं सकलं द्रव्यं तन्निष्ठा नत्वव्ययनिष्ठा कारकशक्तिरितिभावः । अन्वर्थसंज्ञासमाश्रयणाच्चानाश्रित-व्यापारस्येत्याद्यग्रिमग्रन्थोऽपि क्रियान्वयकाल एव कर्मत्व-कर्तृत्वादिकारकशक्त्यभिव्यक्तिं गमयति । न तु निमित्त-त्वमात्रेण । अनाश्रितव्यापारस्य– व्यापारेणसहानन्वि-तस्य हेत्वादेः क्रियाहेत्वादेः कारकसंज्ञेति अनेन स्पष्टी-करोतीत्यलं खपुष्पाघ्राणेनेतिदिक् ।

अन्वर्थसंज्ञापदं हि पङ्कजादिपदमिव वृत्तिद्वयाश्रितं योग-रूढं भवति, पद्मत्वजातिविशिष्टव्यक्त्युपस्थापिका रूढवृत्तिः, तद्योगात् कुमुदकह्लारादौ न पङ्कजपदप्रवृत्तिः । पङ्काधि-करणकोत्पत्तिकर्तृत्वविशिष्टव्यक्त्युपस्थापिका योगवृत्तिः, तत्सम्बन्धात् भूकमले प्रयोगो नेति विस्पष्टम् । प्रकृते च कारकपदस्यापि हेमचन्द्राचार्यस्य कारकपदं क्रियाहेतुं

( कर्त्राद्यन्यतमं ) बोधयतु, कारकपदात् क्रियाहेतुर्बोद्धव्य इतिसङ्केतसम्बन्धेन कारकपदवति शक्तिरियं रूढा।

एवं च कारकशब्दस्य– धातुपदाभावप्रयोज्याभावप्रतियोगि— निरर्थकपदसमभिव्याहारज्ञानाभावविशिष्ट – स्वार्थकस्यादिज्ञानजन्योपस्थितिप्रकारीभवद्धर्मावच्छिन्न—क्रियानिरूपकत्वोपलक्षितसम्बन्धनिरूपित— स्वप्रकारतानिरूपकशाब्दधीसामान्यनिरूपक–स्याद्यर्थे यौगिकी शक्तिरित्युभाभ्यां वृत्तिभ्यां बोध्य उपस्थितिगोचरः कारकपदार्थ इति निष्कर्षः। पदकृत्यानि पूर्वं यथास्थलमुक्तानीति विस्तरभयात्पुनर्नोच्यन्ते । एतद्भिन्नत्वमकारकत्वमुपपदविभक्तित्वमिति सिद्धम् । प्रयोजनम्— आर्हताः नमस्यन्ति महर्षीन् इत्यादिषु चतुर्थीव्यावृत्तिः— उपपदविभक्तेः कारकविभक्तिर्बलीयसीति न्यायात् । ईदृशकारकत्वस्य विभक्तिवाच्यतासमनियतव्यापकत्वविरहेऽपीदृशकारकत्वावलीढस्य रूपान्तरेण विभक्त्यर्थत्वमक्षतमेव । एतादृशकारकत्वशून्यो अकारकस्तस्याप्यनुदण्डं जातिरित्यादिषु तथैव विभक्त्यर्थत्वमिति सिद्धान्तः ।

( इति कारकत्वनिरुक्तिः )

## अथ विभक्तित्वनिरुक्तिः ॥

ननु कारकाकारकौ कथं विभक्त्यर्थौ स्यातां, विभक्तित्वस्यैव दुर्वचत्वात् प्रतिशब्दानुशासनं भिन्नरूपसङ्केतेनानुगतत्वात् । तथा च विभक्तित्वं न स्यादित्यादिनिराकाङ्क्षप्रत्ययत्वम् । पाचयति पिपक्षतीत्यादौ णिग्सनोरतिव्याप्तेः । न च स्यादित्याद्योरन्यतरनिराकाङ्क्षत्वं प्रवेशनीयमिति णिग्सनोर्नातिव्याप्तिः, तयोस्त्यादिसाकाङ्क्षत्वादिति वाच्यम्; चैत्रः पचति फूत्कारविशेषादित्यादौ पञ्चमीतिपोः परस्परसाकाङ्क्षत्वेनोरभयोव्याप्तेः । तार्तीयिक इत्यादौ तीयादितद्धितेऽतिव्याप्तेश्च, टीकण् प्रकृतेस्तीयस्य स्यादित्यादिनिराकाङ्क्षत्वात् । अत एव स्यादित्याद्योरप्रकृतित्वं तन्निराकाङ्क्षत्वमिति दर्शितयोः पञ्चमीतिपोर्नाव्याप्तिरिति परास्तम् । स्यादित्याद्योरन्यतरस्यैव सम्यक्त्वे तदन्यतराप्रकृतित्वे व्यर्थविशेष्यत्वाच्च ।

यत्तु प्रकृत्यर्थविधेयतानिरूपितस्वीयोद्देश्यताकशाब्दजनकशब्दत्वम्— विभक्तित्वम्; स्यादित्याद्योरेव तथाभूतशाब्दजनकशब्दत्वमिति लक्षणसमन्वयः । कृत्तद्धितादेरर्थे प्रकृत्यर्थस्य न विधेयतयाऽन्वय इति न तत्रातिव्याप्तिरिति तदसत् स्यादित्याद्योरर्थे प्रकृत्यर्थस्य विधेयत्वेनान्वयेऽननुभवात्, मानाभावाच्च । किञ्च तण्डुलं पचतीत्यत्र तण्डुलीया कर्मतेत्यवान्तरवाक्यार्थबोधे तण्डुलस्य विधेयत्वं कर्मत्वस्योद्देश्यत्वं यदि भवति तदा तण्डुलमोदनीयत्वादिति द्वितीयार्थकर्मतापक्षकन्यायप्रयोगः स्यात् । यदि प्रकृत्यर्थविशेषणतानिरूपित-विशेष्यताकबोधजनकत्वमेवाभ्युपेयते तदा प्रत्ययान्तरसाधारण्यान्नेदं लक्षणम् । अपि च दाक्षिरित्यादौ तद्धितार्थेऽपत्ये दक्षादेः प्रकृत्यर्थस्य तुल्ययुक्त्या विधेयतयान्वये बाधकाभावात्तद्धितेऽतिव्याप्तिः । एवं पिपक्षा इत्यादौ सनोऽर्थे इच्छायां पाकस्य तथान्वयात् सन्प्रत्यये, कर्तेत्यादौ कृदर्थे आश्रये कृतेस्तथान्वयात् कृत्प्रत्यये चातिव्याप्तिः । न च दर्शितप्रयोगेषु प्रकृत्यर्थस्य विधेयतया न प्रत्ययार्थेऽन्वयः, तथा सति अपत्यं दक्षस्य चैत्रस्य च, इच्छा पाकस्य भोजनस्य च, आश्रयः कृतेर्ज्ञानस्य चेत्यादौ दक्षचैत्रयोः, पाकभोजनयोः, कृतिज्ञानयोर्युगपद्विधेयताद्वयशाल्यन्वयबोधः स्यादिति वाच्यम्, प्रत्ययार्थे प्रकृत्यर्थान्वयस्य व्युत्पन्नत्वेन प्रकृत्यर्थान्यस्य चैत्रादेः तद्धितार्थे विधेयतयान्वयबोधस्यानुपपत्तेः, प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानामिति व्युत्पत्तेः । अन्यथा तवापि तण्डुलमोदनस्येत्यादौ तण्डुलौदनोभयविधेयताकान्वयबोधः स्यात् । नचेयमिष्टापत्तिः, तथा सति सर्वदर्शनसिद्धान्तविरोधमदूषणमभ्युपगच्छतः पूर्वपक्षिणो भवतः प्रदर्शितस्थले तद्धिताद्यर्थे चैत्रादेरन्वये कुतो नेष्टापत्तिः । नचैवं दाक्षिः सुन्दर इत्यादौ सुन्दरतादात्म्यस्य प्रकृत्यर्थान्यस्य तद्धितार्थेऽन्वयो न स्या–

दिति नाच्यम्, दक्षापत्यस्वरूपविशिष्टस्य तद्धितान्तवाक्यार्थस्याप्रत्ययार्थतया तत्र सुन्दरतादात्म्यान्वयस्य निष्प्रत्यूहत्वात् । तद्धितार्थे केवलापत्ये सुन्दरतादात्म्यान्वयस्य केनाऽप्यनभ्युपगमात् । नचैवं तण्डुलमोदनस्येत्यादौ तण्डुलकर्मत्वे वाक्यार्थे ओदनादेरन्वयः स्यादिति वाच्यम्, प्रकृत्यर्थविशेषितप्रत्ययार्थस्वरूपवाक्यार्थस्य विशेष्यतयान्वये कृत्तद्धितार्थस्यैव प्रयोजकत्वात् । तण्डुलकर्मत्वादिरूपवाक्यार्थस्य विशेषणतयाऽन्वये धात्वर्थस्य प्रयोजकत्वात्, तण्डुलमोदनस्येत्यादौ ( कर्मत्वादिना ) ओदनादेरन्वयासम्भवात् । यत्र प्रकृत्यर्थस्य प्रत्ययार्थेनान्वययोग्यता तत्र नञ्समभिव्याहारे अन्वयबोधस्य प्रामाणिकत्वे तु तत्रैव प्रकृत्यर्थविशेषितनञर्थस्याप्रकृत्यर्थस्य प्रकृतिलक्ष्यस्य वाऽन्वय इति वक्ष्यते । एतेन प्रथमोक्तपदार्थस्यैवोद्देश्यत्वं भवति 'यच्छब्दयोगः, प्राथम्यं भवेदुद्देश्यलक्षण'मिति व्युत्पत्तेः । अत एव 'न्यक्कारो ह्ययमेव मे यदरयः' इत्यादावविमृष्टविधेयांशत्वं दोषमाचक्षते काव्यविदः । तथा च तण्डुलमित्यादौ तण्डुलीया कर्मतेति बोधे तण्डुलस्य विधेयत्वं न भवति, किन्तु पर्वते वह्निरित्यादौ विशेषणीभूतपर्वतादेरिव तण्डुलस्योद्देश्यत्वमेव । तथा च प्रकृत्यर्थोद्देश्यतानिरूपितस्याद्यर्थविधेयताकशाब्दजनकशब्दत्वं विभक्तित्वमित्यपि प्रत्युक्तम्, तद्धितादिप्रकृत्यर्थस्योद्देश्यतयान्वयबोधे बाधकाभावात्, तद्धितादावतिव्याप्तेरिति चेदुच्यते —

## ( परिष्कारान्तरम् )

संख्यावाचकप्रत्ययत्वं विभक्तित्वमिति । प्रत्ययत्वमात्रोक्तौ कृत्तद्धितादावतिव्याप्तिरिति संख्यावाचकत्वमुक्तम् । यद्यपि संख्यात्वविशिष्टस्य वाचकत्वं न विभक्तीनां किन्तु एकत्वत्वविशिष्टस्य द्वित्वत्वविशिष्टस्य बहुत्वत्वविशिष्टस्य चेति संख्यात्वव्याप्यजातिविशिष्टवाचकत्वं वक्तुमुचितं तथापि लाघवेन— संख्यामात्रविशेष्यताकबोधोद्देश्यकसङ्केतवत्त्वं निवेशनीयम्, तावतैव समीहितसिद्धेः । पार्थिवमित्यादितद्धितस्य सम्बन्धित्वेन संख्याबोधकत्वोपगमे तत्रातिव्याप्तिवारणाय मात्रपदमुक्तम् । तदर्थस्तु संख्येतरावृत्तित्वम् । तथा च संख्येतरावृत्तिविशेष्यताकबोधोद्देश्यकसङ्केतवत्त्वं संख्यावाचकत्वं बोध्यम् इति ।

न च चैत्रो मैत्रश्च पचत इत्यादौ द्वित्वस्य चैत्रो मैत्रो जैत्रश्च पचन्तीत्यादौ बहुत्वस्य बोधाद् द्विवचनबहुवचनत्याद्योः संख्यावाचकत्वमस्तु त्याद्येकवचनस्य संख्यावाचकत्वे न मानमस्तीति त्याद्येकवचनेऽव्याप्तिरिति चेन्न, तथा सति पुरुषौ पचतीति प्रयोगप्रसङ्गात् । मम तु त्याद्युपस्थापितैकत्वस्य द्वित्वविशिष्टपुरुषेऽन्वयायोग्यत्वमिति वह्निना सिञ्चतीतिवत् न तादृशः प्रयोगः सम्भवति । न च द्विवचनप्रथमान्ते द्विवचनत्याद्यन्तस्य समभिव्याहारस्तयोः परस्परार्थान्वयानुभवे तन्त्रमिति न तथा प्रयोगः सम्भवतीति वाच्यम्, पुरुषौ स्त्री च पचन्तीत्यादौ बहुवचनत्याद्यन्तसमभिव्याहारेऽपि तथाभूतप्रथमान्तार्थेऽन्वयबोधदर्शनेन तथोक्तत्याद्यन्तसमभिव्याहारस्यातन्त्रत्वात् । न च तथा प्रथमान्तबहुवचनत्याद्यन्तस्यापि समभिव्याहारस्तन्त्रमिति न दर्शितसमभिव्याहारस्यातन्त्रत्वमिति वाच्यम्, तथापि तथाप्रथमान्ते बहुवचनान्तस्येव एकवचनान्तस्य त्याद्यन्तस्य समभिव्याहारः कुतो न तन्त्रमिति बीजानुयोगे संख्यान्वयायोग्यत्वस्यैव बीजत्वेन प्रदर्शनीयत्वात् । अत एव पचतीत्यादौ तृतीयाप्रसङ्गवारणाय कर्तृसंख्यानभिधानं तृतीयाप्रयोजकमिति आख्यातवादे दीधितिकृद्भिः प्रमाणीकृतमिति । इत्थं च संख्यावाचकत्वं शतादिशब्देऽतिव्याप्तमिति प्रत्ययत्वमुपात्तम् ॥

इति विभक्तित्वपरिष्कारः ।

### ( *प्रत्ययत्वपरिष्कारः* )

नन्वेवं प्रत्ययत्वानुगमं विना तद्घटितं तत् ( विभक्तित्वम् ) तथापि दुर्निरूपम् । तथा हि प्रत्ययत्वं न तावद्

पदार्थान्वितस्वार्थकत्वम्, 'राजपुरुष' इत्यादिसमासेऽति–
व्याप्तेः । इत एव पूर्वपदार्थान्वितप्रधानीभूतस्वार्थकत्व–
मित्यपि परास्तम् । यत्तु "शब्दान्तरार्थाविशेषिते यादृशे
स्वार्थे धर्मिणि त्याद्यर्थस्यान्वयबोधने स्वरूपायोग्यो यः स
निभ– तुल्य – सदृशप्रतियोग्यनुयोग्यधिकरणाधेयादिशब्देभ्यो
निपातेभ्यश्च भिन्नः शब्दः तादृशार्थे प्रत्ययः इति। कृतद्धि–
तादीनां स्वार्थे त्याद्यर्थान्वयस्वरूपयोग्यत्वात्तेष्वतिव्याप्तिरिति
तद्वारणाय शब्दान्तरार्थाविशेषितत्वं स्वार्थे विशेषणम् ।
'तस्या अङ्कक' मित्यादौ कादिप्रत्ययस्य कमस्तीत्यादौ शिरः
प्रभृति–स्वार्थे त्याद्यर्थान्वयस्वरूपयोग्यत्वात् तत्रातिव्याप्ति–
रिति यादृशत्वविशेषणम् । तेन कादिप्रत्ययस्याल्पादिस्वरूप-
स्वार्थे त्याद्यर्थान्वयस्वरूपयोग्यत्वान्नातिव्याप्तिरिति । अस्ती-
न्द्राणीत्यादाविन्द्रशब्दार्थाविशेषिते ङ्यर्थे स्त्रियां त्याद्यर्था–
न्वयस्वरूपायोग्ये आन्शब्देऽतिव्याप्तिरिति स्वार्थं इत्यु–
क्तम् । प्रत्ययमात्रस्य स्वार्थे प्रकृत्यर्थान्वयस्वरूपयोग्यत्वाद–
सम्भवः स्यादिति त्याद्यर्थस्येत्यवोचि । चन्द्रनिभोऽस्ती–
त्यादौ निभादिशब्दानां पूर्वपदार्थचन्द्राद्यविशेषिते स्वार्थे
सदृशादौ त्याद्यर्थान्वयस्वरूपायोग्यत्वात्तत्रातिव्याप्तिरिति
निभादिभिन्नत्वं शब्दस्य विशेषणम् । समुच्चय–विकल्पाद्यर्थ-
कानां च–वादिनिपातानां स्वार्थे त्याद्यर्थान्वयस्वरूपा–
योग्यत्वात्तत्रातिव्याप्तिरिति निपातभिन्नत्वं विशेषणम् ।
कादिप्रत्ययस्य शिरःप्रभृत्यर्थे प्रत्ययत्ववारणाय तादृशार्थे
इत्युक्तमिति मतं", तदपि न सम्यक् निभादिसकलशब्दस्य
प्रतियोगिनोऽवगमस्याशक्यतया तावद्भिन्नत्वस्य दुर्ज्ञेयत्वात् ।
किं च सम्बन्धीत्यादाविन्प्रत्ययार्थस्य सम्बन्धिनः शब्दान्तर–
सम्बन्धेन विशेषितत्वात्तदविशेषितस्वार्थाप्रसिद्ध्या तत्रा–
व्याप्तिः । यदि चाविशेषितत्वमनन्वितत्वमुच्यते तदापि
खलेकपोतन्यायेन शाब्दमते दाक्षिरस्ति पाचकोऽस्तीत्यादौ
प्रकृत्यर्थेन समं त्याद्यर्थस्य तद्धितकृत्प्रत्ययार्थे युगपदन्वयेन
तयोरव्याप्तिः । किं च सम्बोधनान्तस्य निर्विभक्तिकस्य च
चैत्रादिनाम्नः स्वार्थे त्याद्यर्थान्वयायोग्यत्वात् तादृशतादृश–
चैत्रादिपदेऽतिव्याप्तिः । न च चैत्रोऽस्तीत्यादावन्वयदर्शनेन
चैत्रादिपदानां न त्याद्यर्थान्वयायोग्यत्वमिति दर्शितस्थलेषु
सम्बन्धीतरप्रथमासमभिव्याहारस्य सहकारिणो विरहान्ना–
न्वयबोध इति वाच्यम्, एवं सति हि कृत्तद्धितस्थलेऽपि
प्रकृतिसमभिव्याहारस्य सहकारित्वान्न त्याद्यर्थान्वयायोग्यत्व-
मिति तत्राव्याप्तिः । न च कृत्तद्धितस्थले प्रकृतिसमभि–
व्याहारो न त्याद्यर्थान्वये तन्त्रम्, किन्तु प्रकृत्यर्थान्वय एवेति
वाच्यम्, प्रत्यये प्रकृतिसमभिव्याहारस्य प्रत्ययार्थान्वयमात्रे
तन्त्रत्वात् प्रकृतिविनाकृतस्य कुत्राप्यननुभावकत्वात् । एवं
च पाकोऽस्तीत्यादौ घञ्प्रत्ययेऽव्याप्तिश्च, पदान्तरार्था–
नन्विते धातुघञुभयोपस्थापिते पाके त्याद्यर्थान्वयस्य सर्व–
मतसिद्धतया घञस्त्याद्यर्थान्वययोग्यत्वात् इति, यदपि,
"शब्दान्तराविशेषितस्य स्वार्थस्य विशेषणतयान्वयबोधना–
योग्यः शब्दः प्रत्यय "इति– तदपि, तादृशयोर्लिङ्गसंख्ययो–
विशेषणतयान्वययोग्ये स्यादौ, पाकमित्यादौ तादृशस्य
पाकस्य कर्मत्वे विशेषणतयाऽन्वययोग्ये घञ्प्रत्यये चाव्या–
प्त्या नादरणीयमिति । तस्मात् प्रत्ययत्वं दुर्वचमिति चेत्,
उच्यते— सार्थकशब्दोत्तरत्वज्ञानाविषयो यः शब्दः शाब्द–
बोधं नार्जयति स प्रत्ययः । प्रकृतीनां नामधातूनां सार्थक–
शब्दोत्तरत्वज्ञानाविषयाणामपि शाब्दबोधार्जकत्वं, प्रत्यया–
नान्तु सार्थकशब्दोत्तरत्वज्ञानविषयाणामेव तथात्वमिति ।
तथा च स्वार्थविषयशाब्दसामान्यीयाभावप्रयोजकाभावप्रति–
योगि–सार्थकशब्दोत्तरत्वज्ञानीयोत्तरत्वप्रकारतानिरूपितविशे-
ष्यतावत्सार्थकशब्दत्वं प्रत्ययत्वमिति । राज्ञः पुरुष इत्यादौ
पुरुषपदे राजपदोत्तरत्वप्रकारकज्ञानविषयतायाः सत्त्वात्
अतिव्याप्तिरिति प्रतियोग्यन्तं ज्ञानविशेषणम् । पुरुषपदे
षष्ठ्यन्तराजपदोत्तरत्व–ज्ञानस्य निरुक्तप्रतियोगित्वविरहात्–
पुरुषोराज्ञ इत्यतोऽपि शाब्दबोधोदयात्– नातिव्याप्तिरिति ।
असम्भववारणाय स्वार्थविषयकत्वं शाब्दविशेषणम् । राज–
पुरुष इत्यादिसमासे पुरुषपदे राजपदोत्तरत्वज्ञानं राजपदार्थ–
विशेषणताकपुरुषपदार्थविशेष्यताकशाब्दबोधस्य जनकमतः
पुरुषराज इत्यतो न तथाशाब्दबोधः । पुरुषो राजेत्यादौ
राजपदार्थान्वितविभक्त्यर्थतादात्म्यस्य पुरुषपदार्थे विशेषण–

तयाऽन्वयात् राजपदार्थस्यानन्वयात् न व्यभिचार इति राजपदार्थविशेषणताकपुरुषपदार्थविशेष्यताकशाब्दाभावप्रयोजकाभावप्रतियोगिनो राजपदोत्तरत्वज्ञानस्य विषये पुरुषपदेऽतिव्याप्तिरिति तद्वारणाय तादृशशाब्दसामान्यीयत्वेनाभावो विशेषितः, तेन पुरुषपदार्थविषयकशाब्दसामान्यं प्रति राजपदोत्तरत्वज्ञानं न जनकम् । पुरुषस्तिष्ठतीत्यादौ व्यभिचारात् न तादृश– शाब्दसामान्यीयाभावप्रयोजकाभावप्रतियोगिराजपदोत्तरत्वज्ञानमिति तद्विषये पुरुषपदे नातिव्याप्तिरिति । संयोगाद्युत्तरत्वज्ञानस्य तादृशप्रतियोगित्वादसम्भवः स्यादिति शब्दपदमुपात्तम् । अध्युत्तरत्वेन इङ्को ज्ञानमध्ययनशाब्दं प्रति हेतुरिति तादृशाभावप्रतियोगिनोऽध्युत्तरत्वज्ञानस्य विषये इङ्धातावतिव्याप्तिरिति तद्वारणाय सार्थकत्वविशेषणं शाब्दे, अध्यादिशब्दस्य निरर्थकत्वान्न तत्रातिव्याप्तिः । सार्थकशब्दोत्तरत्वज्ञानस्य प्रकृतित्वावच्छेदकप्रकारतानिरूपितविशेष्यतावति प्रकृतिशब्देऽतिव्याप्तिरिति विशेष्यतायाम् उत्तरत्वप्रकारतानिरूपितत्वं विशेषणम् । न च सार्थकशब्दोत्तरत्वप्रकारतानिरूपितज्ञानविशेष्यतावत्त्वं प्रवेश्यतां तावतैव समीहितसिद्धेः, तादृशोत्तरत्वज्ञानीयत्वस्य उत्तरत्वप्रकारतायां निवेशो व्यर्थ इति वाच्यम्; यत्र इन्द्राणीत्यादौ पचतीत्यादौ इन्द्रोत्तरानु–( आन्–उ )त्तरत्वेन ङीज्ञानं पजुत्तरशवुत्तरत्वेन त्यादेर्ज्ञानं शाब्दजनकं तत्र सार्थकशब्दोत्तरत्वप्रकारतानिरूपितविशेष्यतायाः ङ्यां त्यादौ चासत्त्वात्तयोरव्याप्तिप्रसङ्गात् । तादृशोत्तरत्वज्ञानीयोत्तरत्वप्रकारताया निवेशे तु तादृशानुत्तरत्व ( तादृश–आन्–उत्तरत्व ) प्रकारतानिरूपितविशेष्यताया ङ्यां ( तादृश–शव्–उत्तरत्वप्रकारतानिरूपितविशेष्यतायाः ) त्यादौ च सत्त्वान्नाव्याप्तिरिति । एवं शव्–आनाद्यागमेऽतिव्याप्तिवारणाय सार्थकपदं, तयोर्निरर्थकत्वान्न तत्रातिव्याप्तिः । अत्र लक्षणे शवादीनां स्वरूपार्थे वृत्तेः— शब्दशास्त्रे बहूनां सूत्राणां लौकिकार्थे तत्तद्विधेरसम्भवाद् वैयर्थ्येन स्वरूपबोधकत्वज्ञापनात्– ( इतिशवादीनामपि सार्थकत्वात् ) तत्रातिव्याप्तितादवस्थ्यमिति शब्दपदं वृत्तिमदर्थकं, तेन सार्थकपदं वृत्या स्वरूपेतरार्थोपस्थापकपरमिति न तत्रातिव्याप्तिः, तेषां स्वरूपेतरार्थोपस्थापकत्वाभावात् ।

अत्र विशेष्यता तादृशाभावप्रतियोगिताव्यावर्त्तिका बोध्या, अवच्छेदकस्वरूपेति यावत्; विशेष्यत्वेन रूपेण विशेष्यतावन्निष्ठा प्रतियोगिता ग्राह्येति भावः । तेनास्ति घट इत्यादौ असुत्तरतिवुत्तरं घटपदमित्याकारकासुत्तरत्वज्ञानीयोत्तरत्वप्रकारतानिरूपितविशेष्यताया घटपदे सत्त्वेऽपि नातिव्याप्तिः । घटपदनिष्ठतादृशविशेष्यतायाः तादृशाभावप्रतियोगित्वाव्यावर्त्तनेन प्रतियोगितानवच्छेदकत्वात्; तादृशोत्तरत्वेन रूपेण घटपदज्ञानस्य शाब्दाहेतुत्वात् । असुत्तरस्तिव् घटपदं चेत्याकारकसमूहालम्बनज्ञानादपि तथा शाब्दबोधोदयात् ।

अत्र चैत्रोऽस्तीत्यादौ चैत्रपदार्थविशेष्यक–स्याद्यर्थलिङ्गसंख्याप्रकारकशाब्दं प्रति चैत्रादिनामोत्तरः स्यादिः,नामोत्तरः स्यादिरिति वा ज्ञानं हेतुः । अस्धात्वर्थसत्ताविशेष्यकत्याद्यर्थाश्रयत्वविशेषणकशाब्दधियं प्रति धातूत्तरस्त्यादिः असुत्तरस्तिव् इति वा ज्ञानं कारणम् । एवमिन्द्राणीत्यादाविन्द्रपदार्थप्रकारक–स्वस्वामिभावसंसर्गकङ्यर्थस्त्रीविशेष्यकशाब्दबोधं प्रति इन्द्रपदोत्तरानुत्तरो ( इन्द्रपदोत्तर–आन्–उत्तरो ) ङीरिति ज्ञानं हेतुः । पचतीत्यादौ पच्धात्वर्थविशेष्यकत्याद्यर्थविशेषणकशाब्दं प्रति पजुत्तरस्तिविति ज्ञानं हेतुः । तेन सि–चैत्रेत्यादौ, ति–असित्यादौ आनी–इन्द्रेत्यादौ न तथा शाब्दधीः । अत्र स् –चैत्र, आनी–इन्द्र, ति–पच् इत्यादयो न भवन्ति प्रयोगा इति न भ्रमितव्यम्, अर्थं सम्प्रत्याययामि इति शब्दः प्रयुज्यते प्रयुक्तशब्दान् व्याकर्तुं व्याकरणम्, अनुशासनत्वात्– प्रयुक्तानां शब्दानामिदमन्वाख्यानमित्याचार्यभाष्यकारादीनामभिधानात् । यदि आनी-इन्द्र, ति–पच् प्रभृतिभ्योऽर्थधीः कार्यकारणभावादुदियात्, तान् शब्दान् व्याकर्तुं तदनुकूलमनुशासनमपि आरभेयुराचार्याः, परन्तु कारणाभावादर्थधीरेव तेभ्यो नेति सिद्धान्तः ।

प्रकृतमनुसरामः—उत्तरत्वं ध्वंसः, तद्विशिष्ट उत्तरः। तथा च चैत्र इत्यादौ चैत्रपदध्वंसविशिष्टं सिपदमिति ज्ञानस्य, चैत्रपदत्वावलीढप्रकारतानिरूपित–ध्वंसत्वावलीढ–विशेष्यत्वाभिन्नप्रकारतानिरूपितस्(का)रत्वावलीढविशेष्यताक–ज्ञानत्वेन ( चैत्र इत्यानुपूर्वीज्ञानत्वेनेत्यर्थः ), अस्तीत्यानु–पूर्व्या उत्तरत्वज्ञानस्य अस्त्वावलीढप्रकारतानिरूपितध्वं–सत्वावलीढविशेष्यतासमानाधिकरणप्रकारतानिरूपित-तित्वा-वलीढविशेष्यताकज्ञानत्वेन, ( अस्तीतिज्ञानत्वेन ) इन्द्राणी–त्यत्र उत्तरत्वज्ञानस्य इन्द्रत्वावलीढप्रकारतानिरूपितध्वंसत्वा-वलीढविशेष्यतावच्छिन्नप्रकारतानिरूपित–आन्त्वावलीढ –विशेष्यत्वाभिन्नप्रकारतानिरूदित–ई(ङी)त्वावलीढविशेष्य–ताकज्ञानत्वेन, पचतीत्यादावुत्तरत्वज्ञानस्य– पच्त्वावलीढ–प्रकारतानिरूपितध्वंसत्वावलीढविशेष्यत्वाभिन्नप्रकारतानिरू–पित-अ(शव्)त्वावलीढविशेष्यत्वाभिन्नप्रकारतानिरूपित-तिव्-त्वावलीढविशेष्यताकज्ञानत्वेन ( पच्–अ–तीतिज्ञानत्वेन ) हेतुत्वम्। एवमन्यत्राप्यूह्यम्। शप्तिवादीनामनुबन्धाना–मानुपूर्वी न ज्ञानहेतुतायां प्रविशति व्यर्थत्वात् गौरवप्रयोजक-त्वाच्च। प्रयोगव्युत्पादनार्थमेव ते सूत्रकारेण निर्दिष्टाः। एवमानुपूर्वीज्ञान–हेतुत्वेन सिद्धे तत्र पदाव्यवधानस्य निवे–शनमफलम् नितरां तन्निर्वचनायासासादन(मफल)मिति व्यवहितेऽपि ईदृशविशिष्टवैशिष्ट्यज्ञानात् शाब्दबोधो निष्प्र-त्यूह एव।

## ( प्रकृतित्वनिरुक्तिः )

एवं यत्पदध्वंसवैशिष्ट्यज्ञानं शाब्दे हेतुः, तत् सार्थकं 'बहु' भिन्नं पदं प्रकृतिः इति। विशेषणकृत्यं स्पष्टमेव। यदि प्रत्ययत्वेन बहुः अपि संग्राह्यस्तर्हि प्रत्ययलक्षणे तादृश–निरुक्तशब्द–बह्वन्यतरत्वं निवेशनीयमिति। वस्तुतस्तु निपातादिवद् भेदान्वययोग्यं शब्दान्तरमेव बहुः, अन्यथा तद्धितत्वेन 'बहुगुड' इत्यादौ बहुशब्दानन्तरं स्यादिप्रत्ययोत्प-त्तिसम्भवः, स्यादिविधौ तद्धितान्तस्यैवोपादानात्। अन्यथा पचतकि, भवतकि इत्यादावपि स्यादिप्रसङ्गात्। तद्धितसूत्र-सहचरितं 'बहु' विधिसूत्रं बहुघटितसमुदायस्य तद्धितसाम्यं ज्ञापयति, स्वरितत्वाभ्यनुज्ञानात् तस्य चाधिककार्यकारि–त्वोक्तेः। तेन नामत्वं, तद्धितस्यादिविधिश्च भवति इति। अत एव यदि बहुः प्रत्ययः स्यात्, तदा परः ७।४।११८–इत्यस्यानन्तरं न बहुः इत्यपवादं सूत्रयेत्। बहुप्रत्ययविधौ कृतयत्नापेक्षयाऽत्र लाघवमिति केषाञ्चित् कुकल्पनमपि प्रत्युक्तम्। एवं निभशब्दोऽपि सन्निभशब्दवत् न पदोत्तर–त्वेन ज्ञातो हेतुः शाब्दबोधे, तादृशहेतुताग्राहकाभावात्। प्रत्ययस्य तथात्वे परः ( ७।४।११८ ) इत्यनुशासनस्यैव ग्राहकत्वात्। तथा च निभं कमलस्य मुखमित्यादौ शाब्द–बोधोदयोऽभीष्ट एव। एवं शाब्दबोधहेतोः पदध्वंसविशिष्ट–पदज्ञानस्य ध्वंसविशेषणतया भातं सार्थकं पदं प्रकृतिः; ध्वंसविशेष्यता भातं सार्थकं पदं प्रत्ययः। तदुक्तं भर्तृ–हरिणा वाक्यपदीये "यः स्वेतरस्य यस्यार्थे स्वार्थस्यान्व–बोधने। यदपेक्षस्तयोः पूर्वा प्रकृतिः प्रत्ययः पर" इति। अपेक्षा पूर्वापरभावपन्नत्वे ज्ञानम्। तत्र प्रकृतेः पूर्वतया ज्ञानं शाब्दाङ्गमित्यत्र न प्रमाणम्। उत्तरत्वेन प्रत्ययज्ञानस्य वाचकता व्यापकत्वविरहेऽपि विभक्तित्वावलीढस्य रूपान्तरेण व्यापकत्वमक्षतमेव।

## ( विभक्ति विभागः )

विभक्तिरपि द्विधा, स्यादि–त्यादिभेदात्। लिङ्ग–वाचिका विभक्तिः स्यादिविभक्तिः। लिङ्गावाचिका विभक्तिः त्यादिविभक्तिः इति प्राचां मतम्। ङीप्रत्यये कृदादौ चातिव्याप्तिवारणायोभयत्र विभक्तिपदम्। स्या–दयोऽपि प्रथमा–द्वितीया–तृतीया–चतुर्थी–पञ्चमी–षष्ठी–सप्तमीभेदात्–सप्तविधाः। त्यादयश्च ( परस्मैपदात्मनेपद-भेदेन ) द्विविधाः तत्रापि प्रथम–मध्यमोत्तमपुरुषभेदत्

त्रयः । विध्याद्यस्त्याद्यर्थाः कुसुमाञ्जलिप्रभृतिप्राचीनन्यायग्रन्थे विस्तृतव्याख्यानाः संक्षिप्य व्यक्तीकरिष्यन्ते । तत्र विध्याद्यर्थेऽपि त्यादीनां तित्वादिना तेत्वादिना– यात्‌त्वादिना, इतत्वादिना, तुत्वादिना ताम्‌त्वादिना च शक्तिः । पचतीत्यादौ विध्याद्यर्थबोधो न भवति, योग्यतायास्तात्पर्यस्य वा विरहात् । तात्पर्यग्राहकं तु पचेदित्यादौ यातादिविकार एवेति मन्तव्यम् । एवं वर्तमानातीतानागतादिकालेषु त्यादीनां तित्वादिना तेत्वादिना च शक्तिः । तत्रापि तद्विकार–समभिव्याहाराविकारसमभिव्याहाराणां तात्पर्यग्राहकत्वात् पचेदित्यादौ तात्पर्यग्राहकविरहात् वर्तमानादेर्न बोधः । वर्तमानादिकालस्तु न्यायमते त्याद्यर्थकृतावन्वेति– इति न युक्तम्, तण्डुलः पच्यते इत्यादिकर्मप्रधानवाक्ये अनन्वय–प्रसङ्गात् । न च तत्र त्याद्यर्थकर्मत्वे एवान्वेति इति वाच्यम्, तथापि फलोत्पत्तेः पूर्वं प्रयुक्ते पच्यते ओदन इत्यादौ उत्पत्तिरूपफलाधेयत्वे वर्तमानत्वस्यान्वेतुमयोग्यत्वेनानन्वयप्रसङ्गात् । ओदनस्याविद्यमानतया वर्तमानोत्पत्त्याधेयत्वस्यानिरूपक–त्वात् । अतः परिशेषाद्भावाख्यातस्थले क्रियायामन्वय–स्यावश्यकत्वाच्च त्याद्यर्थः कालः क्रियान्वयीति । तत्र त्यादिक्रियाधिकरणं कालः काष्ठा वा वर्तमानः कालः । ईदृशवर्तमानकालवृत्तिध्वंसप्रतियोगी कालोऽतीतकालः । तादृशवर्तमानकालवृत्तिप्रागभावप्रतियोगी तादृशवर्तमान–कालध्वंसाधिकरणं वा कालो भविष्यत्कालः । अत्र त्रयः कालाः स्वस्वाधेयत्वेन क्रियायामन्वियन्ति, क्वचिद्‌व्यापारे, क्वचित्फले । तत्र पचति अपचत् पक्ष्यति, इत्यादौ व्यापारे कालस्यान्वयः । न च पचतीत्यादौ वर्तमानकाल आधेय–त्वेनान्वेतु आसीदित्यत्र विद्यमाननाशप्रतियोगित्वमतीतत्व–मन्वेति, नत्वतीतकालवृत्तित्वम्; पक्ष्यतीत्यत्र विद्यमान–प्रागभावप्रतियोगित्वरूपमनागतत्वमन्वेति नत्वनागतकाल–वृत्तित्वमिति वाच्यम्; "सदेव सौम्येदमग्र आसीत्' एक–मेवाद्वितीयं ब्रह्म, 'तदैक्षत' एकोऽहं बहु स्याम्" इत्यादि–श्रुतिवाक्ये परमात्मसत्तायाः तदिच्छाया वा अतीतत्वस्य बाधेनानन्वयप्रसङ्गात् । एवम् ईश्वरः प्रलयं करिष्यती–त्यादौ ईश्वरकृतेर्भाविन्वस्य बाधेनानन्वयप्रसङ्गात् । अतीत–कालवृत्तित्वस्य परमात्मेच्छायां भाविकालवृत्तित्वस्येश्वर–कृतौ निष्प्रत्यूहतयाऽन्वयसम्भवात् । एवं वर्तमान कालोऽनागतकालश्च, क्वचित् स्ववृत्तिध्वंसप्रतियोग्यवृत्तित्वेन, स्वा–धेयत्वेन चोभाभ्यां सम्बन्धाभ्यामन्वेति । यथा तेन कृष्णेन वियुज्यते व्रजमण्डलः, गोवर्धनेन च स संयुज्यते, कृष्णेन वियोक्ष्यते गोवर्धनेन च संयोक्ष्यते सः इति नाधुनिकः प्रयोगः । अन्यथा कृष्णवियोग गोवर्धनसंयोगयोर्वर्तमानानागतकालवृत्तित्वेन तथाप्रयोगो दुर्वारः स्यात् । एवं नष्टः अनश्यद्वा इत्यादौ अतीतकालवृत्तित्वं नाशेऽन्वेति, नश्यति, नंक्ष्यतीत्यादौ वर्तमानानागतकालयोः दर्शिताभ्यां सम्बन्धा–भ्यां नाशेऽन्वयः । इत्थमेव प्रयोगातिप्रसङ्गे वारिते नंक्ष्यति, नश्यति, नष्ट इत्यादौ प्रत्ययस्यानागतवर्तमानातीताना–मुत्पत्तीनां क्रमेण प्रत्यायकत्वकल्पनमफलमेवेति मन्तव्यम् । फलेतु आस्ते इत्यादौ स्फिग्भूसंयोगानुकूलो व्यापार आस्–धात्वर्थः । तत्र व्यापारस्याविद्यमानत्वेऽपि स्फिग्भूसंयोग–रूपफलस्य विद्यमानतायामास्ते इति प्रयोगाद् वर्तमानकाल आधेयत्वेन सम्बन्धेन स्फिग्भूसंयोगे फलेऽन्वेति । एवं जागर्तीत्यादौ मिद्धामनोविभागानुकूलो व्यापारो धात्वर्थः, तत्रापि मिद्धामनोविभागरूपे फले वर्तमानकालस्यान्वयः । एवं दण्डं दधातीत्यादौ धारणाख्यसंयोगानुकूलो व्यापारो धात्वर्थः, तत्रापि वर्तमानकालस्य धारणाख्यसंयोगरूपफले अन्वयः । अत्र आसिष्यते, जागरिष्यति, दण्डं धास्यति इत्यादावनागतकालः स्ववृत्तिध्वंसप्रतियोग्यवृत्तित्वेन स्वा–धेयत्वेन चोभाभ्यां सम्बन्धाभ्यां फलेऽन्वेतीति फलस्य विद्य–मानतायां न तथा प्रयोगः । एवम् आस्त, अजागरत्, दण्ड–मधादित्यादौ अतीतकालो ध्वंसाधिकरणवृत्तित्वेन स्वाधेय–त्वेन चोभाभ्यां सम्बन्धाभ्यां फलेऽन्वेतीति फलस्य विद्यमान–तायां व्यापारेऽतीतेऽपि न तथा प्रयोगः । यदि चासेः स्फिग्–भूसंयोग एवार्थः, उपविशेः स, तदनुकूलव्यापारश्चार्थः, उपविशतीत्यत्र वर्तमानकालस्य व्यापार एवान्वयः, आस्ते इत्यत्र स्फिग्भूसंयोगरूपव्यापार एव वर्तमानकालस्यान्वयः,

एवंजगर्तैरपि मिद्धामनोविभागस्वरूपव्यापार एवार्थः, तत्रैव च कालस्यान्वय इति विभाव्यते तदापि दण्डं धारयतीत्यादौ फले कालस्यान्वयो निष्प्रत्यूह एवेति दिक् ।

एतेन "फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः ।" इत्यादिप्रामाण्यादुभयत्र धातुपदशक्तिरिति प्राचां प्रमादः एव, निरुक्तसर्वानुभवसिद्धवाक्यनिचयेषु दोषाणां दुर्वारत्वादिति दिक् ।

परमनव्यास्तु– यथा आस्ते जागर्तीत्यादौ पूर्वं फल एवान्वय इति वदतापि व्यापारेऽपि तदन्वय इति स्वीकृतं, स्वीकृतं चैवमुभयार्थत्वं धातोः, तथैव दण्डन्दधातीत्यादावपि धारणाख्यसंयोगानुकूलव्यापारे ( हस्तदण्डसंयोगरूपे ) एव वर्तमानादीनामन्वयेऽपि दोषाभावेन कथमुभयत्र धातुपद–शक्यतायां विद्वेषः । एकस्य वाच्यत्वेऽपरत्र लक्षणाद्याश्रयणे वृत्तिद्वयसमाश्रयणरूपगौरवस्य सोढव्यत्वादित्यलं मान्यानां सिद्धान्ते कटाक्षनिःक्षेपेणेति वदन्ति ।

## ( क्रियापदार्थनिर्वचनम् )

क्रियाहेतुः कारकम् ( २।२।१ ) अत्र शास्त्रे क्रियापदं सर्वत्र फलव्यापारोभयबोधकम् । व्यापारे क्रियापदं रूढम्, फले यौगिकम्; क्रियते भाव्यते इति व्युत्पत्तेः । तत्र योगाद्रूढेर्बलीयस्त्वाद् द्वयोः सत्त्वे सति सम्भवे व्यापार–बोधकत्वम् । तदभावे व्यापारस्थानीयं फलमेव क्रियापदेन ग्राह्यम् । सा च क्रमिकावयवघटित–पिण्डीभूत–समुदाय–वर्तिनी साध्यत्वेन धर्मेणाभिधीयमाना जातिरेव । साध्यत्वं चास्या व्यक्तिद्वारकं ज्ञेयम् । तच्च क्रियान्तराकाङ्क्षोत्था–पकताप्रयोजकसिद्धत्वभिन्नजातिविशेषः । न च मानाभावः, पचति, पाकः; करोति, कृतिः, इत्यादौ क्रियान्तरनिराकांक्ष-त्वसाकांक्षत्वयोरेव तथात्वात् । एतद्रूपवत्त्वं चासत्त्वभूत–त्वम् । तथोक्तं हरिणा—

यावत्सिद्धिमसिद्धं वा साध्यत्वेनाभिधीयते ।
आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते ।।

प्रयोगार्हेषु सिद्धः सन् मन्तव्योऽर्थो विशेषणैः ।
प्राक् च साधनसम्बन्धात् क्रिया नैवोपजायते ।।

जातिमध्ये क्रियामाहुरनेकव्यक्तिवर्तिनीम् ।
असाध्या व्यक्तिरूपेण सा साध्येवोपलभ्यते ।।

सत्त्वस्वभावमापन्ना व्यक्तिर्नामभिरुच्यते ।
असत्त्वभूतो भावश्च तिङ्पदैरभिधीयते ।।

इति । साध्यत्वासत्त्वभूतत्वयोः पर्यायत्वमेव मन्तव्यम् । एतच्च "भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि ( अ १. ख० १ ) इति निरुक्तप्रतिपादनं ज्ञेयम् । व्याकरणे च विक्लित्त्यादिफलस्वरूपा 'तण्डुलः पच्यते स्वयमेवेत्यादिषु तण्डुलस्य कारकत्वोपपत्तये, 'तण्डुलानां पाचकः' इत्यादौ च कारकत्वाय सिद्धा; तण्डुलं पचतीत्यादौ साध्या चैताः सर्वाः क्रियापदेन गृह्यन्ते । फलत्वलक्षणं तु श्रुतेर्लौकितो वा– यदु-द्देशेन क्रियाप्रवृत्तिः तत्त्वम्, अन्येच्छानधीनेच्छाविषयत्वमिति यावत् । परन्तु विक्लित्त्युद्देशेन पाकक्रियायां प्रवृत्तस्य विक्लित्त्यनुत्पत्तिदशायां तण्डुलं पचतीत्यादिषु तण्डुलादेः व्यापारजन्यविक्लित्तिस्वरूपफलाश्रयत्वविरहात् कर्मकारत्वं न स्यात्, विद्यमानाविद्यमानयोराधाराधेयभावानङ्गीकरणात् । लोके रूढ्या फलशब्दस्योक्तार्थकत्वेऽपि इह तद्धातुजन्योप–स्थितिविषयत्वे सति तद्धात्वर्थजन्यत्वं फलत्वमिति मीमां–सकाः । फलं धात्वर्थः क्रिया प्रत्ययार्थं इति सिद्धान्तिनः । जन्यत्वप्रकारकधीविशेष्यत्वं लक्षणे जन्यत्वं ज्ञेयम्, अतः सत्तादौ नातिप्रसङ्गः । गम्याद्यर्थव्यापारजन्यपूर्वदेशविभा–गादौ अतिव्याप्तिवारणाय सत्यन्तम् । तदर्थव्यापारेऽति–प्रसक्तिवारणाय विशेष्यम् । विक्लित्त्यादीनां च तत् ( फलत्वम् ) अक्षतम् । तस्यापि पच्यादिशक्यता; तत्त–द्रूपेणैव तथाबोधस्य सर्वानुभवसिद्धत्वात्, धातुत्वादिकम–जानतामपि तथाबोधाच्च, धातुपदस्थाने पच्यादीन् प्रवेश्य पच्यर्थफलत्वगम्यर्थफलत्वमित्थमिति प्रातिस्विकरूपेणैव पारि-भाषिकफलत्वं लक्षणीयमिति सर्वतन्त्रसिद्धान्त इत्याहुः ।

## ( व्याकरणमतम् )

वैयाकरणास्तु फलव्यापारयोर्धातुवाच्यतां स्वीकुर्वन्ति, तन्मते कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थजन्यत्वे सति तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारता- वत्वम्- तद्धात्वर्थफलत्वमित्याहुः । जन्यता चारोपिताऽनारोपिता वेत्यन्यत् । विभागजन्यसंयोगादिरूपे- पतत्यर्थे विभाग- संयोगयोः फलत्ववारणायोभयम् । कर्माख्याते फलस्य विशेष्यतयैव भानात्तत्रातिप्रसङ्गवारणाय कर्तृप्रत्ययसमभि- व्याहारे इति; तच्चिन्त्यम्- अनुगतफलत्वानुक्तेः । विभाग- जन्यसंयोगे निरवयवत्वात्- प्रत्यक्षत्वात् पतत्यर्थत्वाभावस्य वक्ष्यमाणतया व्यावर्त्याप्रसिद्धेश्चेत्यधिकमन्यत्र बोध्यम् । अनुगमप्रकारस्तु- धातुविशिष्टत्वं फलत्वम्; स्वनिष्ठशक्ति- प्रयोज्योपस्थितीय विशेष्यनिष्ठजनकतानिरूपितजन्यताविशि- ष्टत्वम्, स्वनिष्ठशक्तिप्रयोज्योपस्थितिनिरूपितविषयत्वम्- इत्युभाभ्यां सम्बन्धाभ्यां वैशिष्ट्यं बोध्यम् । वैशिष्ट्यघटक- वैशिष्ट्यं च स्वनिष्ठप्रकारतानिरूपकप्रतीतिविशेष्यत्वेन बोध्यम् । तेन भवतीत्यादौ सत्तादीनामात्मधारणरूपतया सूक्ष्मचक्षुषाऽपि व्यापारस्य प्रतीत्यभावेन तज्जन्यत्वस्य नितरां सत्तादावभावात् अतिप्रसङ्ग इति आरोपितव्यापार- मादाय तज्जन्यत्वमुपपादनीयमिति न दोष इति स्पष्टं वैयाकरणभूषणदर्पणे । तदाशयस्तु सत्ता जीवयोनिशक्तिः;

"स्फुरत्तामात्मनः पश्येत्तदा विश्वस्य सम्भवः ।
स्फुरत्ता तु स्मृता सत्ता वस्तुनः परमेष्ठिनः ॥"

इत्यादिशैवदर्शने प्रत्यभिज्ञायां परमानन्दयोगिनः । सा चात्मधारणानुकूलव्यापार इति ।

सूत्रे- निरुक्तत्रिविधायाः 'क्रियाया हेतुः' इति षष्ठी- तत्पुरुषः । निरूपकत्वं निरूपितत्वं वा षष्ठ्यर्थः । कारण- ताश्रयः हेतुपदार्थः । क्रियानिरूपितकारणताश्रयः कारक- संज्ञावान् भवतीति सूत्रार्थः । कारकत्वं शक्तिः क्रियाकाल एवाभिव्यज्यते इति वदता वृत्तिकृता एवकारेण क्रियारहिते कारकत्वाभावः सूचितः । युक्तं चैतत्- उद्देश्यताव्यापक- धर्मव्यापकत्वस्य विधेये भानमौत्सर्गिकमिति नियमात् क्रियायाः समनियतव्याप्यव्यापकत्वे कारके भासेते । व्या- प्याभावश्च व्यापकाभावानुमापको भवतीति सिद्धं वृत्ति- तात्पर्यम् । तत्र कर्त्राद्यन्तः पात्यपादानसम्प्रदानादिषु क्व कीदृक्क्रिया यदभावे तन्नोपपद्यते इति तत्र तत्रोदाहरणे स्फुटिष्यति । तत्तदन्तर्भावेणैव सर्वत्र धात्वर्थस्यापि वाच्य- त्वम्, तत्तदर्थपुरस्कारेणैव वाक्यमिति बोध्यम् । अत एव चैत्रे फूत्कुर्वति सति, 'चैत्रः पचति' अधः सन्तापयति सति 'चैत्रः पचति' अधिश्रयति सति 'चैत्रः पचति' तण्डुलानाव- पति सति चैत्रः पचतीत्येकरूपाः प्रयुज्यन्ते, ते चार्थाः ता वा क्रियाः । यथा— तच्छब्दस्य सर्वार्थवाचकत्वेऽपि बुद्धि- विषयत्वोपलक्षणधर्मपुरस्कारेण शक्तिस्वीकारान्न नानार्थ- त्वम्, एवमिहापि बोध्यम् । बुद्धिविषयत्वस्योपलक्षणविधया शक्तिज्ञाने भानात् न वाच्यतावच्छेदकत्वं; वाच्यताव्यापकत्व- मिति यावत् । एवं च बुद्धित्वस्य जातिरूपतयैकत्वेन स्वा- श्रयनिरूपितविषयतावच्छेदकत्वसम्बन्धेन शक्तिज्ञाने भाना- च्छक्तेरैक्यमिति भावः । एतेनैव फूत्कारत्वादिनानाधर्मेण पचतीत्यत्र बोधस्य सर्वानुभवसिद्धत्वेऽपि एका विक्लित्त्यनु- कूलव्यापाररूपा क्रियेति व्यवस्थापि सूपपादेत्याह वाक्य- पदीये । यथा—

'गुणभूतैरवयवैः समूहः क्रमजन्मनाम् ।
बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते" इति ।

तेन पूर्वापरीभावापन्नक्षणनश्वरक्रमिकानेकव्यापारसमूहा- त्मिका, क्रियैकेतिस्थितौ क्रियापदं 'क्रम्' धातु-कृधातुभ्यां निष्पन्नमिति सूचितम् । अवयवाश्रयं पौर्वापर्यम् समूहाश्रय- मेकत्वम् । तत्र मानभुक्ता हरिकारिका । तदर्थः— गुण- भूतैः तत्तद्धर्मपुरस्कारेण भासमानैः अवयवैरुपलक्षितः, क्रमिकप्रतीतिविषयव्यापाराणां सङ्कलनात्मकैकत्वबुद्ध्या प्रक- ल्पिताभेदकः समूहः समुदायः क्रिया = क्रियात्वजातिमान् इति । अवयवावयविनोस्तादात्म्याध्यासे क्षणिकत्वात्क्रमिक-

त्वादनुपपत्तिं विभाव्य, तां परिहर्तुं 'बुद्ध्या प्रकल्पिताभेद' इत्युक्तम्, बुद्धौ यौगपद्येन सन्निधीयमाना यावन्तोऽवयवा अवयविनाऽभेदेनाध्यवसातुं शक्यन्त इति तात्पर्यम्। अत्र सूत्रे क्रियेति लुप्तविभक्तिकं पदमुत्तरसूत्रेऽनुवृत्त्यनुरोधादिति वयं प्रतीमः ॥

इति कारकत्वस्य निरुक्तिः पूर्णा ॥ २।२।१

## अथ कर्तृत्वनिरुक्तिः।

तत्र तन्निर्वचनसूत्रम्— "स्वतन्त्रः कर्ता" ॥ २।२।२ इति। अत्र पूर्वसूत्रादेकदेशे स्वरितत्वप्रतिज्ञानात् 'क्रिया' पदमनुवर्तते, लुप्तविभक्तिकनिर्देशस्वीकारे तु एकदेशे स्वरितत्वाभ्यनुज्ञानक्लेशो न कर्तव्यो भवति। वृत्तिकारस्तु पृथक्पदत्वे सौत्रत्वात् लुप्तविभक्तिकत्वकल्पना– गौरवम्। समस्यमानतायां ( केवलस्य क्रियापदस्यानुवर्तने ) एकदेशे स्वरितत्वाभ्यनुज्ञानकल्पनागौरवमिति पर्यालोच्य समस्तमेव पदमनुवर्त्य व्याख्याति—क्रियाहेतुभूतो यः क्रियासिद्धाव– परायत्ततया प्राधान्येन विवक्ष्यते स कारकविशेषः कर्तृसंज्ञो भवतीति। अत्र भवतीत्यंशः अस्तिर्भवन्तीपरः प्रथमपुरुषो अप्रयुज्यमानोऽप्यस्तीति कात्यायनस्मरणात् सर्वत्र वाक्यार्थे अध्याहृतं क्रियापदमन्वेति। उक्तस्मृतौ अस्त्यादीनां यथायथं क्रियापदोपलक्षकत्वात्। अतः 'वयः कालाः' इत्यत्र ज्ञाय– न्तामित्येतत्क्रियापदमध्याहृतं प्रथमोपपादकं बोध्यमित्यन्यत्र स्पष्टम्। तत एव सर्वं वाक्यं क्रियया परिसमाप्यत इत्य– भियुक्तोक्तिः। **क्रियाहेतुभूतो यः क्रियासिद्धापरायत्त** इत्यादिवृत्तिः। अत्र क्रियापदेन वाक्यघटकप्रधानीभूता क्रिया विवक्षिता, हेतुः फलं कारणं च। क्रियासिद्धिः हेतुः प्रयोजनं फलं यस्य कारकस्य, क्रियायाः सिद्धेः हेतुः कारणं वा यः कारकसंज्ञकः कारकशक्तिमान् स्वतन्त्रः स कर्तृ– संज्ञकः स्यात्। सर्वेषां कारकाणां साक्षात्परम्परया वा स्वस्वावान्तरक्रियाद्वारा प्रधानक्रियासाधकत्वमित्याह— अपरायत्ततया–प्राधान्येन विवक्षितः ( विवक्ष्यते ) इति सूत्रस्थितस्वतन्त्रपदस्यार्थः। तत्तात्पर्यन्तु सर्वत्र कर्ता कार– कान्तरानधीनतया प्राधान्येन विवक्ष्यते। परः कारकान्तरम्। अपरायत्ततया कारकान्तरानपेक्षतया क्रियासम्बन्धवत्त्वं स्वातन्त्र्यम्। कारकान्तराणां कर्तृसापेक्षतयैव क्रिया– सम्बन्धित्वम्, कर्तृघटितमूर्त्तिकत्वात्। अत एव "समस्त– कारकोपहितं रूपं कर्तुरिति आत्मतत्त्वविवेके स्पष्टम्। उपहितं व्यापकम्। तत्रैव विवरणे अपादानादीनां लक्षणं विवृतं दीधितिकृद्भिरिति क्रिया न क्वापि कर्तृविनाकृतेति कारकान्तराणां कर्तृसापेक्षत्वनियमः। कर्तुश्चापादानादिविनाकृताया अपि क्रियायाः सम्बन्ध इति न कारकान्तरापेक्षानियमः॥ एतेन "**किम्पुनः कारकान्त– रेभ्यः कर्तुः प्राधान्यं? यत् करणादीनि प्रयुंक्ते, कर्ता न तैः प्रयुज्यते** व्यापार्यते **तानि** अपादान–सम्प्रदानकर्माणि **न्यक्करोति न तैः** कर्ता **न्यक्क्रियते** तिरस्क्रियते **तानि निर्वर्त्तयति**, न तैर्निवर्त्यते **तानि प्रतिनिधत्ते** स्थाली पचतीत्यादौ विप्रो दत्ते इत्यादौ च न तैः प्रतिनिधीयते इति वृत्तिर्व्याख्यातेति बोध्यम्।

यद्यपि जानातीत्यादावपादानं विना, स्पन्दते इत्यादौ कर्म विना उभयत्र च सम्प्रदानं विनापि क्रियाया दर्शनात्– नापादान–सम्प्रदानकर्मभिः सापेक्षत्वनियमः, करणाधि– करणयोस्तु सकलक्रियानियतत्वात् कथं न तत्सापेक्षत्वं ( कर्तुः ) इति कथयितुं शक्यते, तथापि करणस्य कर्तृ– व्यापार्यतया कर्तृसापेक्षत्वेनैव क्रियायां सम्बन्धः, न तु कर्तुस्तत्र करणसापेक्षतया सम्बन्धः, करणाव्यापार्यत्वात्तस्य। अधिकरणस्य कर्तृकर्मान्यतरद्वारकक्रियाधारत्वेनैव कार– कान्तरसापेक्षतया क्रियायां सम्बन्धः; न तु कर्तुस्तथा, साक्षादेव क्रियासम्बन्धात्। यद्वा यः प्रधानीभूतो धात्वर्थः, तदन्वितत्याद्यर्थो वा, व्यापारो वा ( शाब्दिकतार्किकमीमां– सकमतभेदात् ) तद्वत्त्वं स्वातन्त्र्यमिति निरूपयिष्यतेऽग्रे।

नव्यास्तु– स्वार्थकारकाप्रयोज्यं यत् स्वार्थनिरूपित– कारकत्वं तदाश्रयत्वसम्बन्धेन धातुविशिष्टत्वं स्वातन्त्र्यम्।

कारकमात्रवृत्ति क्रियाजनकत्वरूपकारकत्वस्य कर्तृरूप–तथाविधकारकप्रयोज्यत्वात् नातिप्रसङ्गः। नचैवं सौकार्यादिविवक्षायां स्थाली पचतीत्यादौ स्थाल्यादेः कर्तृत्वानापत्तिः, स्थाल्यादिनिष्ठक्रियाजनकत्वस्य चैत्रादिरूपतत्कर्तृप्रयोज्यत्वादिति वाच्यम्; स्वार्थकारकाप्रयोज्यमित्यस्य स्वार्थनिरूपितकारकत्वेनविवक्षिताप्रयोज्यमित्यर्थात्, तदा पाककर्तृत्वेन चैत्रादेरविवक्षितत्वात्। नन्वेवं यत्र हरिणा 'मां भज' इति प्रयोजितो भक्तः हरिं भजति, तत्र हरिमिति (कर्मत्वस्य) अनुपपत्तिः, एवं काष्ठैः स्थाली पचतीत्यत्र काष्ठादेः कर्तृत्वापत्तिः तद्व्यापारस्य स्थाल्य दिव्यापाराप्रयोज्यत्वात् इति चेत्, तर्हि वैशिष्ट्यमुखेन कर्तृत्वमेव वाच्यमत्रैव सूत्रस्य तात्पर्यम्। कर्तृप्रत्ययसमभिव्याहारे स्वजन्यबोधीयमुख्यविशेष्यताश्रयो योऽर्थः, तदाश्रयत्वसम्बन्धेन धातुविशिष्टः कर्ता, तत्त्वं कर्तृत्वमिति। विशेष्यतायां मुख्यत्वं–स्वप्रयोजकप्रयोज्यविशेष्यतानिरूपितप्रकारताऽसामानाधिकरण्यम्। ननु णिगो द्योतकतापक्षे चैत्रेण मैत्रस्तण्डुलं पाचयतीत्यादौ णिग्समभिव्याहारज्ञानस्य ज्ञानद्वारोक्तसमभिव्याहारस्य वा हेतुत्वातिप्रसङ्गाप्रसक्तेः विक्लित्त्यनुकूलव्यापारानुकूलव्यापारस्य पच्धातुवाच्यत्वे प्रयोज्यव्यापारस्य पच्निष्ठशक्तिज्ञाने प्रयोजकव्यापारे प्रकारत्वेन, प्रकारत्वासमानाधिकरणविशेष्यतास्वरूपमुख्यविशेष्यत्वाभावेनाप्रधानत्वात्तदाश्रयमैत्रस्य कर्तृत्वानापत्तिस्तृतीयानापत्तिश्चेति चेन्न. णिगो वाचकत्वस्यैव प्राप्ताप्राप्तविवेकतः सिद्धान्तात् णिगान्ते वृत्तौ अवयवशक्तिसमुदायशक्त्योरविरोधेन अजहत्स्वार्थत्वेनावयवशक्तिज्ञाने मुख्यविशेष्यत्वात् पाचिसमुदायशक्त्या तु प्रयोक्तुः कर्तृता। अतश्च प्रयोक्तृव्यापारे (१।४।२०) इति सूत्रे वाचकत्वं सप्तम्यर्थः। अधिकमितस्तत्रैव निरूपयिष्यामः।

ननु कर्तृत्वलक्षणे कर्तृप्रत्ययसमभिव्याहारप्रवेशे आत्माश्रयः कर्तृप्रत्ययपदस्य कर्तृबोधनियामकतिवादिसमभिव्याहृतशबादि–तत्तद्विकरण परत्वेऽननुगमः, यभिन्नविकरणत्वेनानुगन्तुमशक्यम्, पक्ष्यते इत्यादौ स्यसमभिव्याहारे व्यभिचारादिति चेदुच्यते; अनुकूलत्वेनाप्रतीयमानधात्वर्थाश्रयस्य कर्तृत्ववचनात्, अनुकूलतया प्रतीयमानत्वं हि धात्वर्थेऽनुकूलत्वसम्बन्धेन विशेषणतानाश्रयत्वम्। फलानुकूलव्यापारे धात्वर्थे फलव्यापारौ धातुवाच्यौ अनुकूलत्वं नाम जनकत्वं सम्बन्धः सर्वत्रेति सिद्धान्तः। कर्तृप्रत्यये, व्यापारे फलस्यानुकूलत्वसंसर्गेणान्वयात् नानुकूलत्वसम्बन्धेन फले प्रकारतानाश्रयत्वमित्यदोषः। न च स्वस्वत्वध्वंसमानाधिकरणसम्प्रदानस्वत्वोत्पत्तिरेतदिच्छीयबोधानुकूल – व्यापारार्थकदाधातुवाच्योत्पत्तिमतो गोः निरुक्तानुकूलत्वसंसर्गकधात्वर्थप्रकारतानाश्रयत्वात् कर्तृसंज्ञा स्यादिति वाच्यम्, अनुकूलत्वसम्बन्धेन प्रतीयमानत्वसमानाधिकरणमनुकूलत्वेनाप्रतीयमानत्वं धात्वर्थे प्राधान्यम्, उत्पत्तिश्च न तथेत्यदोषात्। अथाप्यग्नेर्माणवकं वारयतीत्यादौ संयोगानुकूलव्यापारवतो माणवकादेः कर्तृता स्यात्, माणवकवृत्तिसंयोगानुकूलव्यापारादेस्तथात्वादिति चेन्मैवम्, अनुकूलत्वसम्बन्धेन प्रकारतानाश्रयत्वमित्यस्य स्वाश्रयत्व–स्वनिरूपितविशेषणताश्रयत्वान्यतरसम्बन्धेन प्रकारताप्रतियोगिकाभावाश्रयत्वमित्यर्थात्। प्रकृते च संयोगानुकूलव्यापाराभावानुकूलव्यापाररूपवारिधात्वर्थघटकस्य संयोगानुकूलव्यापारस्य; दाधात्वर्थघटकपरस्वत्वोत्पत्तेश्च अनुकूलत्वसम्बन्धेन प्रकारतानाश्रयत्वेऽपि तेन संसर्गेणाभावादिनिष्ठप्रकारतानिरूपितविशेषणताश्रयत्वेन तदन्यतरसंसर्गेण प्रकारत्वाभावस्यासत्त्वात् तदाश्रयस्य माणवकादेः न कर्तृत्वमिति। एवं चानुकलत्वसम्बन्धेन प्रतीयमानत्वे सतीति विशेषणं न देयम् फलाभावात्।

स्वजन्यशाब्दधीनिरूपितानुकूलत्वसंसर्गेण, प्रकारताधर्मेण प्रकारता नास्तीतिप्रतीतिसाक्षिकप्रकारतानिष्ठप्रतियोगिताकाभावाश्रयत्व - स्वप्रयोज्यविषयताश्रयत्वोभयसंसर्गेण धातुविशिष्टो योऽर्थः तदाश्रयत्वं कर्तृत्वम्। प्रतियोगिता च स्वाश्रयत्व-स्वनिरूपितविशेषणतारूपावच्छेदकताश्रयत्वान्यतरसंसर्गेण प्रकारताविशिष्टा ग्राह्येति निष्कर्षः। यद्वा–आश्रयत्वसंसर्गेण स्वजन्यशाब्दीयानुकूलत्वसम्बन्धनिरूपित–

प्रकारतात्वधर्मावलीढा प्रतियोगिता तादृशप्रतियोगितानिरूपकाभावाश्रयत्व-स्वजन्यशाब्दीयमुख्यविशेष्यताश्रयत्वोभयसंसर्गेण धातुविशिष्टो यो धर्मस्तदाश्रयत्वमिति ।

ननु ण्यन्ताण्णिगि एकस्य लोपे 'यः शिष्यते स लुप्यमानार्थाभिधायी' इति लोकप्रत्यक्षसिद्धन्यायात् व्यापारद्वयस्यापि णिगन्तवाच्यत्वेन धात्वर्थव्यापारानुकूलव्यापाराश्रयस्य मैत्रादेः 'मैत्रेण चैत्रेण पाचयति जैत्रः' इत्यादौ कर्तृत्वानापत्तिः, अनुकूलत्वसंसर्गावलीढप्रकारत्वानाश्रयत्वस्य तद्व्यापारेऽसत्त्वादिति चेन्मैवम्, धातुनिष्ठशक्तिविशिष्टत्वस्यैव प्राधान्यत्वात् । शक्तेर्वैशिष्ट्यमुक्तरूपमेव । शक्तेश्च वाच्यताविशेषणनिरूपकभेदेन भिन्नत्वात् पाचिनिष्ठशक्तेः, पाचिणिग्निष्ठशक्तेः, विक्लित्यनुकूलव्यापारानुकूलव्यापारनिरूपितायाः, विक्लित्यनुकूलव्यापारानुकूलव्यापारानुकूलव्यापारनिरूपितायाः मिथो भेदान्न दोष इत्यलं जल्पाधिक्येनेति बोध्यम् ।

## (अथ त्याद्यर्थादीनां मतभेदेन विशेषणविशेष्यभावनिरुक्तिः)

अथ कर्तृघटितवाक्ये मतभेदेन त्याद्यर्थादीनां विशेषणविशेष्यभावः प्रदर्श्यते । स्वातन्त्र्यादिपरिष्कृतं, केवलं बालोपलालनं मन्दबुद्ध्यर्थं न तु प्रथमान्त-तृतीयान्तकर्तृपदार्थकुक्षौ प्रवेष्टव्यम् । त्यादिना तृतीयया वा कुत्राप्यप्रत्यायनात् । तत्र शाब्दिकाः—चैत्रेण पच्यते तण्डुल इत्यादौ विक्लित्तिर्व्यापारश्च पचेरर्थः । कर्तृतृतीयाया व्यापाराश्रये शक्तौ व्यापारस्यान्यलभ्यतयोपलक्षणत्वे अनन्यलभ्यमाश्रयमात्रमर्थः । भावो, भावना, उत्पादना, क्रिया इति पर्यायान्तरम् । भावप्रधानमाख्यातमिति यास्कस्मरणात् क्रियामुख्यविशेष्यकः सर्वत्र बोध इति सकलवैयाकरणसिद्धान्तः । अतो यत्र वाक्ये क्रियापदं न श्रूयते तत्राध्याहृत्य क्रियापदं वाक्यर्थबोध उपपाद्यते । कल्पनातनुभिर्युक्तिशरणैस्तार्किकैः —प्रथमान्तार्थमुख्यविशेष्यको बोध इति विरोध उद्भाव्यते । एकत्वत्वेन धर्मेणैकत्वसंख्या च तृतीयाविभक्त्यर्थं एव । तयोरेकपदोपात्तयोरपि आकांक्षारूपकारणवैचित्र्यात् परस्परमन्वयः । प्रकृत्यर्थचैत्रादेरेकत्ववदाश्रयेऽभेदसंसर्गेणान्वयः । तथाविधाश्रयस्य धात्वर्थव्यापारे वृत्तित्वसंसर्गेण, तण्डुलपदार्थस्य समवेतत्वसम्बन्धेन विक्लित्तिरूपफले पच्यर्थे, तस्यानुकूलत्वसम्बन्धेन व्यापारे एकत्र द्वयमिति (एकवृन्तगतफलद्वयन्यायेनेतिभावः) न्यायेनान्वयः । तथा च चैत्राभिन्नैकाश्रयवृत्तिः तण्डुलसमवेतविक्लित्त्यनुकूलो व्यापार इति वाक्यर्थधीः ।

एवं चैत्रः पचति तण्डुलम् इत्यत्रापि समवेतत्वं द्वितीयार्थः । एकत्वमाश्रयश्च तिवर्थः । चैत्रपदोत्तरप्रथमा साधुत्वार्था । वाक्यार्थबोधः प्रागुक्त एव, इति हरिकाशिकाकार-कैयटादिप्राचीनमतम् । कर्मप्रधानवाक्ये विक्लित्तिमुख्यविशेष्यकबोधः, तत्र व्यापारस्य जन्यत्वसम्बन्धेन विक्लित्तावन्वयः । भाव्यते, भावयति वेति व्युत्पत्तिद्वयमाश्रित्य 'भावप्रधानमाख्यातम्' इति यास्कस्मृतौ भावपदस्य फलव्यापारोभयबोधकत्वम्, इति नव्यशाब्दिका दीक्षितनागेशादयः कर्तृप्रधानकर्मप्रधानयोर्भेदरक्षणं फलमित्याहुः ।

अयमाश्रयः, अयमाश्रयः इत्यादिप्रतीतिसाक्षिकमाश्रयत्वमखण्डोपाधिर्गगनत्वादिरिवेति शाब्दिकाः । स्पष्टं चैतत् नागोजीभट्टकृतव्याकरणलघुमञ्जूषायाम् । अखण्डस्याश्रयत्वस्याभावेन गौरवाद् आश्रयो न त्यादीनां शक्य इति तार्किकाणां विवादः । किन्तु कर्तृपदं भावप्रधानमिति कर्तृत्वं कृतिरेव (त्यादीनाम्) अर्थः । एवं चैत्रेण पच्यते इत्यादौ फूत्कारादिव्यापार एव पचिना प्रत्याय्यते । तदा त्यादीनामिव लाघवात् प्रयत्न एव तृतीयार्थोऽपीति न्यायमतम् ।

## (तत्तत्प्रयोगेषु वाक्यार्थबोधविचारः)

प्रतिबिम्बते इत्यादौ प्रतिबिम्बो धात्वर्थः । स च स्वविषयासम्बद्धवृत्तिचक्षुःसंयोगप्रयोज्यचक्षुःसंयोगजन्यचाक्षुषप्रत्य-

क्षम् । तादृशचक्षुसंयोगः क्वचित् प्रतीघाततया प्रयोजकः, प्रतीघातस्तु-देशान्तरसंयोगजनिकायाः क्रियाया जनकः संयोगः । क्वचिन्मार्गसंयोगतया गन्तव्यसंयोगप्रयोजकः ; यथा स्फटिकाधः स्थितपद्मरागचक्षुःसंयोगप्रयोजकः स्फटिक-चक्षुःसंयोगः । एतेन प्रतिहतचक्षुःसंयोगजन्यत्वमात्रं न चाक्षुषविशेषणमिति । तत्र ( प्रोक्ते स्वविषयासम्बद्धे-त्यादिधात्वर्थे) तन्तुचक्षुःसंयोगाधीनपटचक्षुःसंयोगजन्यपट-चाक्षुषव्युदासाय स्वविषयासम्बद्धवृत्तित्वं प्रक्षमचक्षुःसंयोगे विशेषणम् । स्वविषयासम्बद्धस्तु स्वविषयसम्बन्धित्वाव-लीढप्रतियोगिताकान्योन्याभाववान् — स्वविषयसम्बन्धी नेत्याकारकप्रतीतिसाक्षिकभेदवान् इति यावत्—बोध्यः । तेन तन्तुषु तत्तन्तुभेदसत्त्वेऽपि न क्षतिः । ईदृशं चाक्षुष-मादर्शाद्यविषयकमिदं मुखमित्याकारकमपि प्रतिबिम्ब एव । ईदृशमेव मुखावगाहिज्ञानं प्रथमतो जायते, तत एवादर्शे मुखं, मुखवानादर्श इति विशिष्टवैशिष्ट्यावगाहिज्ञानसंभ-वात् । प्राथमिकज्ञानं प्रतिबिम्बः, तद्विषयत्वमाख्यातार्थो मुखे एव नत्वादर्शे, अत एव मुखं प्रतिबिम्बते नत्वादर्श इति प्रयोगोपपत्तिः । यदि चादर्शज्ञानं विनापि दर्शितविशिष्ट-वैशिष्ट्यबोधयोरसम्भव एवेति प्राथमिकज्ञानेऽपि आदर्शो विषय एवेति, 'इदं मुखम्' 'अयमादर्शः' चेति समूहालम्बनं चाक्षुषमेव प्रथमतो जायते तत्कथमुक्तप्रयोगोपपत्तिरिति विभाव्यते, तदा स्वविषयेत्यत्र स्वविषय-यत्किञ्चिद्व्यक्त्य-सम्बन्धित्वं वक्तव्यम् । तेनादर्शस्य स्वविषयत्वेऽपि तद्वृ-त्तिचक्षुःसंयोगस्य प्रयोजकत्वे मुखप्रबिम्बस्य न तथात्व-हानिः । एवं 'प्रतिबिम्बते' इत्यत्र प्रयोजकचक्षुःसंयोग-सम्बन्धिवृत्तिभिन्नविषयत्वमाख्यातार्थो वाच्यः । तत एव दर्शितप्रयोगोपपत्तिः । आदर्शत्वादिविषयतानां तादृशभिन्न-त्वात् । एवं 'मुखं प्रतिबिम्बते' इत्यत्र त्याद्यर्थविषयत्वं तादृशभेदेन विशिष्टमुपलक्षितं वेत्यन्यदेतत् । एवं धात्व-र्थचाक्षुषमपि तादृश-चक्षुःसंयोगजन्यत्वेन विशिष्टमुपलक्षितं वेत्यपि । उपलक्षणतापक्षेऽपि विषयत्वत्वेन तादृशी व्यक्तिः प्रतीयते इति नातिप्रसंगः । बुद्धौ चैतन्यं प्रतिबिम्बते इत्यादौ चैतन्यप्रतिबिम्बो भ्रमः । धात्वर्थः प्रतिबिम्बः । प्रकारत्वं तु त्याद्यर्थः । बुद्धिपदोत्तरसप्तमी तु बुद्धिगतं प्रयोजकव्यापारं स्वच्छतामभिधत्ते । तस्य प्रयोजकतासंसर्गेण धात्वर्थे भ्रमेऽन्वयः । एवं 'बुद्धिस्वच्छताप्रयोज्यभ्रमप्रकारः चैतन्यम्' इति शाब्दधीः । शाब्दिकनये चैतन्यप्रकारको भ्रमः इति शाब्दधीः । यथा व्यापारोऽपि सप्तम्यर्थो भवति तत् सप्तमीप्रकरणे स्पष्टीकरिष्यते । एवं 'मुखेन प्रतिबि-म्ब्यते' इत्यत्र प्रयोजकचक्षुःसम्बन्धे वृत्तिभिन्नविषयत्वं त्यादेरिव तृतीयाया अर्थः ; तस्य प्रतिबिम्बे तथाविधचाक्षुषे धात्वर्थे विशेषणतया प्रतियोगितासंसर्गेणान्वयः । एवं मुख-विषयताप्रतियोगि तथाविधचाक्षुषमित्यन्वयधीः । चैतन्येन प्रतिबिम्ब्यते इत्यत्र प्रकारत्वं तृतीयार्थः, तस्य प्रतियोगिता-संसर्गेण धात्वर्थे भ्रमे विशेषणतयाऽन्वयः । एवं चैतन्य-प्रकारताप्रतियोगी भ्रम इति शाब्दधीः । 'घटेन नश्यते' इत्यादौ, 'घटो नश्यतीत्यत्र' त्यादेरिव, तृतीयायाः प्रतियो-गित्वमर्थः, तस्य निरूपितानुयोगितासंसर्गेण धात्वर्थे नाशे विशेषणतयान्वयः । घटप्रतियोगिताको नाश इति शाब्दधीः । वैयाकरणमते क्रियाकारकभावसम्बन्धः कर्तृत्वशक्तिमांश्च तृतीयाया अर्थः । कर्तृत्वशक्तिमतोऽभेदेन घटेऽन्वयः । क्रियाकारकभावसम्बन्धेन कर्तृत्वशक्तिमदभिन्नघटविशिष्टो नाश इत्यन्वयधीरिति बोध्यम् ।

प्रकृतमनुसरामः । 'वह्निना दीप्यते' 'वह्निर्दीप्यते' इत्यत्र भास्वररूपं भास्वररूपवत्तेजः संयोगनियतावयवसंयोगो वा दीप्यतेरर्थः । एवं मणिना दीप्यते इत्यत्रापि । तदन्वयि-समवायावलीढसमवायघटितसामानाधिकरण्यसंसर्गकवृत्तित्वं च तृतीयार्थः । 'चैत्रेण शय्यते' इत्यत्राधः स्वावयवावलीढ-संयोगानुकूलव्यापारो धात्वर्थः । तदनुकूला कृतिस्तृतीयार्थो न्यायमते । यदि चोक्तसंयोगमात्रं धात्वर्थः, व्यापारो नार्थः, अत एव नाशादिना व्यापारविगमे ऽपि तादृशसंयोगे वर्तमाने 'शय्यते' इति वर्त्तमानप्रयोगः, तदा आधेयत्वं तथाविधं तृतीयार्थः । आधेयत्वत्वेन आधेयत्वस्य शक्यत्वेऽपि संसर्ग-

विशेषणाधेयत्वीयस्वरूपसंसर्गेण धात्वर्थेऽन्वयान्नानुपपत्तिरिति ।

अत्र प्रयत्नत्वस्य जातिरूपतया तद्विशिष्टे तृतीयायाः शक्तिः । आधेयत्वादौ लक्षणा । यदि च आधेयत्वत्व-विषयत्वत्व- प्रकारत्वत्व- प्रतियोगित्वत्वानि अखण्डोपाधयः, तदा तत्तद्विशिष्टेऽपि तृतीयायाः शक्तिरेव । 'नृपेण गम्यते गमितो वा दिगन्तं शत्रुरित्यादौ प्रयाणादिव्यापारो नृपविशेषितः तृतीयार्थः प्रयोज्यतासंसर्गेण शत्रुकर्तृकगमनेऽन्वेति । 'आचार्येण बोध्यते बोधितो वा धर्मं माणवक' इत्यत्र तृतीयार्थोऽध्यापनादिव्यापारः आचार्यविशेषितः माणवककर्तृकबोधे तथाऽन्वेति । यजमानेन भोज्यते भोजितो वा पायसं साधुरित्यादौ तृतीयाऽर्थो गोचरीकरणप्रार्थनास्वरूपनिमन्त्रण-व्यापारो यजमानविशेषितः साधुकर्तृकभोजनेऽन्वेति । गुरुणा व्याहार्यते व्याहारितो वा तीर्थङ्कर एष इत्यादावुपदेशशिक्षणादिव्यापारः गुरुविशेषितस्तृतीयार्थः एतत्कर्तृकव्याहारे तथाऽन्वेति । गुरुणा श्राव्यते श्रावितो वा धर्मं शिष्य इत्यादौ तृतीयार्थो वाक्यादिप्रयोगव्यापारः गुरुविशेषितः शिष्यकर्तृकशाब्दबोधे तथाऽन्वेति । श्रावकेण मासानास्यते आसितो वा साधुरित्यादौ शयनासनभोजनादिव्यापारो गृहस्थविशेषितो साधुकर्तृकासनेऽन्वेति । मुद्गरेण घटो नाश्यते इत्यत्राभिघातव्यापारस्तृतीयार्थो मुद्गरविशेषितो घटनिष्ठ-प्रतियोगितानिरूपितनाशेऽन्वेतीति ( केचित् ) तन्नेत्यग्रे वक्ष्यते ।

'क्रियाहेतुभूतो यः.................स कारकविशेष' इति वृत्त्या 'क्रियाहेतुः कारकम्' ( २ २ १ ) इत्यस्य संज्ञासूत्रत्वमधिकारसूत्रत्वमुभयं सूच्यते । तत्कथम् ?

संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ।। इत्युक्त

विभागात् मिथोऽव्यधिकरणनानाधर्मप्रकारक-व्यापकधर्मावली-ढधर्मिविशेष्यकवाक्यार्थबोधानुकूलव्यापारः विभजतेरर्थः— इत्येकत्र संज्ञात्वमधिकारत्वमुभयं न सम्भवतीति चेन्न, पूर्वसूत्रे कारकमिति संज्ञापदे तन्त्रावृत्त्येकशेषान्यतममाश्रित्य स्वरितत्वात् तत्सिद्धेरिति केचित्; क्रियाहेतुर्य इत्युक्तिस्तु स्वरूपानुवाद इति । वस्तुतस्तु पूर्वसूत्रे क्रियाहेतुरिति मन्दप्रयोजनमदृष्टार्थम् । कारकमित्यधिकारसूत्रमुत्तरत्राधिकृतं वेदितव्यम् । कारकसंज्ञकः सन् कर्तृसंज्ञो भवतीति प्रकृतसूत्रार्थः इति प्रतिभाति । परे तु पूर्वसूत्रं सम्पूर्णमधिकृतं वेदितव्यम्, उत्तरत्र संज्ञासूत्रेण सहैव सर्वत्र महावाक्यार्थधीः । पूर्वत्र क्रियाया हेतुः कारणं कर्त्रादीत्यादिवृत्तिस्तु मन्दप्रयोजना छात्रधीवैशद्यार्थेत्याहुः ।

ननु स्थाल्यां पचतीत्यधिकरणादेः कारकस्य स्थाली पचतीत्यत्र कथं कर्तृत्वमित्याशङ्कां मनसि निधायाह— **अस्य कर्तुरधिश्रयणादयः पचिक्रियायामवान्तर-व्यापारा भवन्तीति** ( वृत्तिः ) । यतो व्यापारादारभ्य यद्व्यापारावधि पचतीति व्यवहारो लोके, तावतो व्यापारान् विक्लेदनानुकूलत्वेनानुगमय्याधिश्रयणत्वाधस्तापनत्व— चुल्ल्यु-परिधारणत्वादिप्रत्यक्षगोचरतत्तद्धर्मपुरस्कारेणैव वाक्यार्थबोधे भासयति पच्धातुः, समूह एषामतीन्द्रियो नश्वरावयवत्वात् । तथा च तण्डुलकर्मकस्थालीकर्तृकधारण-व्यापारं विक्लित्यनुकूलं पच्यर्थमादाय स्थाली पचतीति कर्तृत्वमुपपद्यते । इत्थं च प्रज्वालनप्रज्वलनादिव्यापार-मुपादाय काष्ठानि पचन्ति, वह्निः पचतीत्यादयो व्युपपादिताः ।

"चौरस्य रुजति रोगः" इति दुःखानुकूलव्यापारो धातुविकारस्वरूपो रुज्धात्वर्थः, एकत्वमाश्रयो वर्तमानकालोऽपि च त्याद्यर्थः, पित्तादिविकारो रोगपदार्थः, चौरस्येति षष्ठ्या आधेयत्वरूपं कर्मत्वमर्थः । प्रयोज्यप्रयोजकभावस्वरूपक्रियाकर्तृभाव आकांक्षाभास्यः, वाक्यार्थो वा । तथा च पित्तादिविकाराभिन्नैकाश्रयप्रयोज्यः चौरवृत्तिदुःखानुकूलधातुविकारस्वरूपो वर्तमानकालिको व्यापार इति वाक्यार्थधीः ।

**प्रयोजकोऽपि कर्त्तैवेति** (वृत्तिः) अयं भावः 'मुद्गरेण नाश्यते घटः' 'देवदत्तेन यज्ञदत्तं गमयति विष्णुमित्रः' इत्यादिषु प्रयोजकव्यापारस्य विशेषणतया प्रयोजक प्रयोज्यभाव-

संसर्गेण प्रयोज्यव्यापारे ऽन्वयात् णिग्प्रत्ययवाच्यत्वं न सम्भवति गौणत्वात्, प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थस्य प्राधान्यमिति न्यायविरोधादिति, तन्न सम्यक्। एवं हि सति प्रयोजकव्यापारस्य तृतीयार्थत्वमपि न स्यात्, ज्ञापकस्यानुशासनस्य च विरहात्। स्वतन्त्रः कर्तेत्यनेन धात्वर्थस्य त्याद्यर्थस्य प्रधानव्यापारस्याश्रयतायाः कर्तृतात्वेन ज्ञापनात्, न तु गौणस्य णिगर्थव्यापारस्येत्याशयादिति चेत्, सत्यम्; वाऽकर्मणामणिक्कर्ता णौ (२।२।४)–इति सूत्रेऽणिक्कर्तेत्यस्य ज्ञापकस्य सत्त्वात्। यदि च स्वतन्त्र एव कर्तृपदार्थः स्यात्तर्हि सूत्रेऽणिगित्यस्य वैयर्थ्यं स्यात्, णिगर्थव्यापाराश्रयस्यास्वातन्त्र्यादेव कर्तृत्वासिद्धेः। तस्मात् प्रयोजकोऽपि कर्ता भवेत्, तत्र कर्मसंज्ञा निषेधकतयाऽणिगित्यस्य सार्थक्यम्, तेन प्रकृते देवदत्तपदान्न द्वितीयेति।

इत्थं च णिगर्थव्यापाराश्रयस्य प्रयोक्तुः कर्तृत्वेऽवगते तृतीया। अतस्तत्र पञ्चविधः कर्तेत्यत्र प्रयोजक–स्वतन्त्र–कर्मकर्तृणामेव ग्रहणमिति त्रिविध एव कर्ताऽभिहितानभिहितत्वे स्वतन्त्रप्रयोजकयोरवान्तरधर्मौ, न विभाजकोपाधी इति कौण्डभट्टमतं सूचयतीति प्रतीमो वयम्। प्रकृतिप्रत्ययौ सहार्थं ब्रूत इति न्यायस्त्वभिधानपर्यवसानस्वरूपाकांक्षामूलकतयाऽसार्वत्रिकः। अत एव त्याद्यर्थस्य तस्य तस्य विशेषणतयैव भानात् णिग्द्योत्यप्रयोक्तृव्यापारस्यापि प्रयोज्यतासंसर्गेण णिग्रहितशुद्धधात्वर्थप्रयोज्यव्यापारे विशेषणतया द्योत्यत्वाद् भाने तद्विरोधोऽकिञ्चित्कर इति भट्टतात्पर्यम्। इतरेषां मते त्वजहत्स्वार्थापक्षे विशिष्टशक्त्याऽवयवशक्त्या चोभयोः प्रयोज्यप्रयोजकयोः स्वातन्त्र्यम्। जहत्स्वार्थापक्षे तूक्तज्ञापकसिद्धं कर्तृत्वमिति कश्चित्। स्पष्टाऽवशिष्टा वृत्तिनिरुक्तव्याख्यातो गतार्थेति संक्षेपः॥

## कर्मकारकनिरुक्तिः।

कर्तुर्व्याप्यं कर्म। २।२।३॥। कारकमिति पूर्वसूत्रादधिकृतं वेदितव्यम्। विशिष्टा चाप्तिः व्याप्तिः, इति प्रादिसमासः। आप्तिः सम्बन्धः, स च इच्छीयफलवत्त्वसम्बन्धः, फलाश्रयत्वप्रकारिकेच्छेति यावत्। धात्वर्थस्य इच्छाघटितत्वादुद्देश्यत्वं कर्मप्रत्ययार्थः। कर्तुरिति कृत्यस्य वा (२।२।८८) इति कर्तरि षष्ठी, तदर्थस्य आप्त्यर्थघटकेच्छायामन्वयः। आप्त्यर्थसम्बन्धघटकफलं हि कर्तृवृत्तिक्रियाद्वारकं ग्राह्यम्; वैशिष्ट्याद् व्युपसर्गसम्बन्धात्। क्रिया च वाक्यघटकधातुवाच्या प्रधानीभूता ग्राह्या, कारकाधिकारात् प्रत्यासत्तेर्धात्वर्थसम्बन्धमन्तरेण कारकत्वायोगात्, उपस्थितत्वाच्च। सा च क्रिया प्रधानाप्रधानन्यायेन प्रधानीभूता विवक्षिता। तथा च कर्तृवृत्तिप्रधानीभूतव्यापारप्रयोज्यफलाश्रयत्वप्रकारकेच्छोद्देश्यं कारकं कर्मसंज्ञं भवतीति प्रकृतसूत्रवाक्यार्थबोधः। यथा तण्डुलं पचतीत्यत्र देवदत्तादिकर्तृवृत्तिर्व्यापारः विक्लित्त्यनुकूलोऽधिश्रयणादिः तत्प्रयोज्यं फलं विक्लित्तिः, तदाश्रयत्वप्रकारिका इच्छा मद्वृत्ति "तण्डुलं पचतीतिवाक्यघटकपच्धातुवाच्यप्रधानीभूताधिश्रयणादिरूप" व्यापारप्रयोज्यविक्लित्तिरूपफलाश्रयः तण्डुलो भवतु इत्याकारा देवदत्तादिकर्तृसमवेता, तादृश्या इच्छाया विषयः उद्देश्यः तण्डुलः स कारकसंज्ञकः सन् कर्मसंज्ञकः प्रकृतसूत्रेण कृतः इति लक्षणसमन्वयः।

अत्र प्रधानीभूतव्यापारग्रहणाद् 'अग्नेर्माणवकं वारयति' इत्यत्र नाग्नेर्द्वितीया। तथा हि द्वे चात्रेच्छे प्रथमा माणवकसमवेता—मद्वृत्तिः व्यापारः, अग्निसंयोगानुकूलो व्यापारः, तत्प्रयोज्यसंयोगरूपफलाश्रयोऽग्निर्भवतु इत्याकारा। द्वितीया माणवकसंरक्षकवृद्धादिकर्तृपुरुषसमवेता इच्छा मद्वृत्तिः–संयोगानुकूलव्यापाराभावानुकूलव्यापारः प्रधानः तत्प्रयोज्यं फलं संयोगानुकूलव्यापारस्याभावस्वरूपं, तदाश्रयत्वप्रकारिका, तदुद्देश्यः माणवकः नत्वग्निः। अप्रधानव्यापारात्मकक्रियाग्रहणे संयोगानुकूलव्यापारमादाय माणवकसमवेतामिच्छां चादायाग्नेः कर्मता आपद्येत। प्राधान्यं च क्रियायां व्यापारे धातुनिष्ठशक्तिज्ञानजन्योपस्थितीयप्रकारत्वानाश्रयत्वस्वस्वरूपं बोध्यम्।

फले प्रकृतवाक्यघटक-धातुवाच्यव्यापारप्रयोज्यत्वनिवेशात्, यदा कृतभोजनः पयोलाभेन पुनः भोजने प्रवर्तते तदा 'पयसा ओदनं भुङ्क्ते' इत्यादौ भुजिवाच्यव्यापारप्रयोज्यगलविलाधःसंयोगरूपफलाश्रयत्वमोदनस्यैव न तु पयसः, तेन नेह (पयसि) कर्मत्वमिति वेदितव्यम्। वाक्यघटकधातुवाच्यत्वनिवेशात् —माषेष्वश्वं बध्नातीत्यत्र अश्वानामाप्तुमिष्टाः व्याप्या अपि माषा न कर्मसंज्ञकाः भक्षधातोर्वाक्याघटकत्वात्। तेन माषक्षेत्रे पुष्ट्यर्थमश्वबन्धनेऽपि माषेष्वश्वं बध्नातीत्यादौ न दोषः। एतच्च प्रकृतसूत्रे कर्तुर्ग्रहणस्य फलम्। तदभावे हि कारकाधिकारात् कारकवृत्तिप्रधानीभूतव्यापारप्रयोज्यत्वमात्रं फले विशेषणं स्यात्, न तु कर्तृवृत्तिप्रधानीभूतेत्यादि इति। तदुक्तं पाणिनीये तन्त्रे महाभाष्ये कर्मणो व्याप्तुमिष्टा माषा न तु बन्धनकर्तुरन्यत्र माषक्षेत्रात्। केचित्तु यदा पुष्ट्यर्थं माषक्षेत्रेऽश्वान् बध्नाति तदा माषाणां कर्मत्वमिष्टं, वाक्यघटकधातुवाच्यत्वनिवेशादित्याहुस्तदाकरग्रन्थविरोधादुपेक्ष्यमिति सिद्धान्तः।

तदेतत्सर्वं मनसि निधाय—**कर्त्रा क्रियया यद्विशेषेणाप्तुमिष्यते तद्व्याप्यं तत्कारकं कर्मसंज्ञमिति** वृत्तिः। कर्त्रेति तृतीयाया वृत्तित्वमर्थः। क्रिययेति प्रयोज्यत्वं तृतीयार्थः। विशेषेण प्राधान्येनेत्यर्थः क्रियान्वयी, आप्तुं फलेन सम्बन्धुमिष्यते इच्छोद्देश्यमित्यर्थः। इच्छार्थकधातोरुत्तरकर्मप्रत्ययार्थं उद्देश्यत्वाख्यविषयत्वमित्यनुसूत्रं द्विकर्मकवाक्ये स्पष्टीभविष्यति।

## कर्मविभागः

यद्यपि वाक्यपदीये हरिणा—

निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधा मतम्।
तच्चेप्सिततमं कर्म, चतुर्धान्यत्तु कल्पितम्।
औदासीन्येन यत्प्राप्तं यच्च कर्तुरनीप्सितम्।
संख्यान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम्॥" इत्युक्तया सप्तविधं कर्मेत्युक्तम्। वृत्तिकारस्तु द्वेष्यादीनां त्रिष्वेवान्तर्भावात् तत् क्रियाजन्यफलाश्रयं कर्म त्रेधेत्याह निर्वर्त्यम्, विकार्यं प्राप्यं च। तत्र त्रिषु **यदसज्जायते जन्मना वा प्रकाशते तन्निर्वर्त्यम्। घटं करोति पुत्रं प्रसूते** इति वृत्तिः। अत्र यदसज्जायते इत्युक्तिः असत्कार्यवादिमतानुसारिणी। जन्मनेत्याद्युक्तिः सत्कार्यवादिसांख्यकारादिसिद्धान्तानुसारिणी। सद्वा जन्मना यत्प्रकाशते इत्यनन्तरं वाक्यपदीये हरिणा प्रकृतेस्तु विवक्षायां विकार्यं कैश्चिदन्यथा। तन्निर्वर्त्यम्, इत्येव पठ्यते। अन्यथा व्यापकधर्मेणालक्षितस्य विकार्यस्य व्याप्यधर्मेण प्रदर्शनेऽर्थान्तरत्वापत्तेरतस्तस्यार्थः—कैश्चित् प्रसिद्धैराचार्यैः प्रकृतिविवक्षायां निष्पाद्यं विकार्यमित्युच्यते। अन्यथा—प्रकृत्यविवक्षायां तन्निष्पाद्यं निर्वर्त्यमिति तदर्थः। यथा घटं करोतीत्यादौ सत्या अपि मृदादिप्रकृतेः परिणामितया न विवक्षा, एवं कटं करोतीत्यत्र परिणामितया कटोपादानवीरणादेरविवक्षा, भस्म करोतीत्यादौ त्वसत्या एव तस्याः तत्त्वेन सेति। यद्यपि निर्वर्त्यते निष्पाद्यते इति व्युत्पत्त्या निर्वर्त्यत्वं तण्डुलानोदनं पचतीत्यादावोदनादौ विकार्यकर्मण्यप्यस्ति, तथापि प्रकृतिवाचकपदासमभिव्याहृतपदोपस्थाप्यत्वे सति निष्पाद्यत्वरूपपारिभाषिक—निर्वर्त्यत्वस्य विवक्षणान्न निर्वर्त्यविकार्ययोः सङ्कीर्णतादोषः। यथोक्तं तेनैव—

"सतीवाऽविद्यमाना वा प्रकृतिः परिणामिनी।
यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते॥" इति

यस्य विकृतिकर्मणो, नाश्रीयते न प्रयुज्यते न विवक्ष्यते इति यावत्। प्रकृतेस्तु विवक्षायां विकार्यमित्येकपक्षमुदाजहार। तदुक्तमभियुक्तैः—यस्य कर्मणः प्रकृतिः समवायिकारणं परिणामितयोपादानतया नोपादीयते तत् क्रियाफलोत्पत्तिमन्निर्वर्त्यं कर्म, यथा 'कटं करोति' इति अत्र कटः; नह्यत्र सदपि कटोपादानं वीरणं तथात्वेन विवक्ष्यते। **यत्र तु** प्रकृतिरुपादीयते तद्विकार्यम्, यथा कनकं कुण्डलं करोतीति

अत्र कुण्डलम्, कनकपदं कनकोपादाने लाक्षणिकम् कुण्डल-पदसमानाधिकरणम् ।

## ( विकार्यकर्मविचारः )

अथ प्रतीयमानप्रकृतिभावकत्वे सति क्रियानिर्वाह्य-विशिष्टासत्त्वोत्पत्त्यन्तरफलवत्त्वम् विकार्यकर्मलक्षणं बोध्यम् । कटं करोतीत्यादिनिर्वर्त्ये क्रियानिर्वाह्योत्पत्तिमत्यपि प्रकृतिविकृतिभावाभानान्नातिप्रसङ्गः । प्रकृतिकर्मणस्ता-दृशविशिष्टासत्त्वाद् विकृति कर्मणश्च तादृशोत्पत्त्या-श्रयत्वाल्लक्षणसमन्वयः ।

अथवा उपादानत्वं साध्यता च कृधात्वर्थः । तत्रो-पादानत्वेन कनकस्य साध्यत्वेन च कुण्डलस्यान्वयः । तथा च कुण्डलोपादानकः कनकसाध्यकः प्रयत्नो न्यायमते वाक्यार्थः । तेन फलद्वयानुकूलव्यापारार्थकत्वं धातोः साधि-तम् । तदुक्तं भाष्ये द्व्यर्थः पचिरिति । अन्यथैकफलैक-व्यापारार्थकत्वस्याकर्मकेष्वपि सत्त्वाद् भाष्ये विशेषोक्तिर-सङ्गताऽऽपद्येत । परेतु तण्डुलान् विक्लेदयन् ओदनं निर्वर्त्तयतीति विवरणात् तण्डुलानोदनं पचतीत्यत्र विक्लित्ति-रुत्पत्तिश्च फलद्वयं पचेरर्थः । यत्त्वत्र तण्डुलवृत्तिक्लिस्त्य-नुकूलव्यापाराश्रयवृत्तिरोदननिष्ठोत्पत्त्यनुकूलो व्यापार इत्युक्तं तदसत्, व्यापारविशेषणकबोधे कारणत्वेन क्लृप्तायाः कृत्प्रत्ययगतवन्धतरजन्योपस्थितेः विशेष्यतासम्बन्धेन आख्या-तार्थे प्रकृतेऽसत्त्वान्निरुक्तबोधासम्भवात् । एकयैव भावनया फलद्वयोत्पत्तिसम्भवेन तादृशवाक्यजन्यबोधस्य व्यापारद्वय-विषयकत्वकल्पनानौचित्याद्; 'आख्यातशब्दान्निवृत्तभेदाया एव क्रियाया अवगमा'दिति कैयटोक्तेश्च । किञ्च, पचेः व्यापारद्वयार्थकत्वे नव्यमते क्रियायां द्वित्वान्वयाबाधेन द्विवचनापत्तिर्निर्बाधा स्यात् । तथा च फलद्वयानुकूल एक एव व्यापारो धात्वर्थत्वेन भाष्यकारसम्मतः व्यापारद्वयार्थ-कत्वोक्तिस्तु भ्रमनिबन्धनैव केषाञ्चिदित्यवधेयम् ।

विकार्ये कर्मणि प्रकृतिर्द्विविधा, क्वचित् सती उपादेय-तुल्यकालिकी, यथा वीरणं कटं करोति, कनकं कुण्डलं करोति, वेणुदलं चक्रं करोतीत्यादौ । क्वचिदविद्यमाना कार्यासहवृत्तिः, काष्ठं भस्म करोति, तण्डुलानोदनं पचति इत्यादौ । अत्र ध्वंस उत्पत्तिश्च फलविधया कृधात्वर्थः । काष्ठध्वंसस्य भस्मोत्पत्तेश्चानुकूलो व्यापारो वाक्यार्थः । पचतावपि तण्डुलविक्लेदिका ओदनोत्पादिका क्रिया वाक्यार्थः । प्रकृतित्वं तु काष्ठादेर्व्यावहारिकमिति तदर्थः । पक्षान्तरमपि हरिराह—

कैश्चिदन्यथा । निर्वर्त्यञ्च विकार्यञ्च कर्म शास्त्रे प्रदर्शितम् ।
यदसज्जायते सद्वेति" विकार्यन्तु द्विधा कर्म व्यवस्थितम् ॥
प्रकृत्युच्छेदसम्भूतं किञ्चित्काष्ठादिभस्मवत् ।

किञ्चिद्गुणान्तरोत्पत्त्या सुवर्णादिविकारवत् ॥" इति पूर्वमसत एव सत्त्वम्, अध्वस्तसमयसम्बन्धस्य समयसम्बन्ध-उत्पत्तिरिति वैशेषिकादयः । कालिकविशेषणतासामान्येन न कोऽपि कुत्रापि संसृष्टः दैशिकसंसर्गभेदेन कालिकविशे-षणतानां भेदावश्यकत्वात् । अत एव गवावयवे संसर्गा-वलीढकालिकसंसर्गेणावलीढप्रतियोगिताकोऽभावो गोमत्यपि काले वर्तते न तु समवायसंसर्गावलीढकालिकविशेषणता-संसर्गेण; इदानीमवयवेषु समवायसंसर्गेण गौर्न तु संयोगेनेति प्रतीत्या काले गोरवयवे ( अवयवावच्छेदेनावयवस्वरूपेणेति यावत् ) गवाभावस्य विषयीकरणात्, अवयवे संयोग-सम्बन्धेन गवाभावस्य व्याप्यवृत्तितया कालावच्छिन्नत्वा-संभवात् । अतएव चिरान्तरितस्याप्यनुभवयागादेः भावना-सुकृतादिसंसर्गावलीढकालिकविशेषणतया स्वर्ग-स्मरणाद्य-वहितपूर्वक्षणवृत्तित्वेन तत्कारणत्वं सूपपदम् । तथा च ध्वंसप्रागभावादिस्वरूपदैशिकसंसर्गावलीढकालिकेन सर्व-स्मिन्नेव काले प्रत्यासीदत्येव सर्वो भाव इति "नाभावो विद्यते सतः" । जन्म च प्रकाश एव, प्रकाशस्तु समवाय-तादात्म्यादिसंसर्गावलीढकालिकविशेषणतया प्रथमसमय-सम्बन्ध इति कापिलाः । यदाह हरिरेव—

"उत्पत्तेः प्रागसद्भावो बुद्ध्यवस्थानिबन्धनः ।
अविशिष्टः सतान्येन कर्ता भवति जन्मनः ।।

कारणं कार्यभावेन यदा वा व्यवतिष्ठते
कार्यशब्दं तदा लब्ध्वा कार्यत्वेनोपजायते ।।

यथाऽहेः कुण्डलीभावो व्यग्राणां वा समग्रता ।
तथैव जन्मरूपत्वं सतामेके प्रचक्षते ।। इति ।

एवञ्चासतः सत्त्वं, तिरोहितस्य सतो वा प्रकाशो भवत्युत्पत्तिः ।

## ( निर्वर्त्यकर्मविचारः )

धात्वर्थफलोत्पत्तिमन्निर्वर्त्यं कर्म । यथा कटं करोति, ओदनं पचतीत्यादौ कटौदनादिः, यथा वा कनकं कुण्डलं करोतीत्यादौ कुण्डलादिः । धात्वर्थफलीभूतविकारसंसृष्टं विकार्यम्, यथा शत्रून् हिनस्ति, काष्ठं भिनत्तीत्यादौ शत्रुकाष्ठादिः । यथा वा कनकं कुण्डलं करोति, तण्डुलानोदनं पचतीत्यादौ कनकतण्डुलादिः । प्रकृत्युच्छेदेत्यादिकारिका तु—"यदुच्छेदेन सम्भूतं निर्वर्त्यं सा प्रकृतिर्विकार्यं कर्म, यथा काष्ठोच्छेदसम्भूतं भस्म निर्वर्त्यम्, इत्यतः काष्ठं विकार्यम् । सत्यामेव यस्यां प्रकृतौ गुणोत्पत्तिर्धातुना प्रत्याय्यते तदपि द्वितीयं विकार्यं कर्म । यथा सदेव शलाकास्वरूपं कनकम् अवयवानामारम्भकसंयोगमात्रविरोधिना कर्मणा भुग्नत्वगुणोत्पत्त्या विकार्यम्; कुण्डलपदस्य भुग्नं द्रव्यमर्थः । धात्वर्थोत्पत्तिस्तु भुग्नत्व एवार्थतोऽन्वेति" इत्याशयिका ।

## ( प्राप्यकर्मविचारः )

प्राप्यलक्षणमाह हरिरेव—

क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते ।
दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते ।।" इति ।

तत्र क्रियाकृतविशेषा उत्पत्तिक्षयोपचयादयो भावविकारा एव गणनीयाः ।

## ( सूत्रे कर्तुर्ग्रहणस्य प्रयोजनम् )

ननु सूत्रे कर्तुरिति व्यर्थम्, कारकाधिकारात्, क्रियाजनकस्यैव कारकत्वात्; केनाप्तुमिष्टमिति सूत्रस्थित-व्याप्यपदार्थजिज्ञासोदये कारकपदसङ्केतघटकत्वेनोपस्थितेः व्यापारलाभे तद्द्वारकफलाश्रयत्वप्रकारकेच्छोद्देश्यत्वरूपे धात्वर्थसम्बन्धे वाच्ये कारकनिष्ठक्रियाप्रयोज्यनिरुक्तसम्बन्धग्रहणेनैवेष्टसिद्धेरिति चेन्न, माषेष्वश्वं बध्नातीत्यत्राश्वरूपकर्मकारकनिष्ठगलविलाधः संयोगानुकूलव्यापारमादाय माषाणां कर्मत्वमापद्येत । न चैतदर्थं कर्तुरित्युक्तावपि न कश्चिल्लाभः, भक्षणकर्तृत्वस्य अश्वे सत्त्वात्; न च कर्तृसंज्ञाश्रयणं प्रकृते कर्तुं शक्यम्, शत्रून् गमयति दिगन्तं मूलराज इत्यादौ शत्रूणां कर्मत्वाद्दिगन्तकर्मत्वानापत्तावकामेनापि धातुवाच्यप्रधानक्रियाश्रयस्य कर्तृपदेन ग्रहणौचित्यात् । नापि 'कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्यय' इति न्यायेनापि संज्ञाऽश्रयितुं युज्यते, 'उभयगतिरिह भवति' इति न्यायादुक्तन्यायप्रवृत्तेर्वक्तृतात्पर्याधीनत्वाद् "इतिवाच्यम् ; कर्तृग्रहणसामर्थ्यात् वाक्यघटकधातुवाच्यत्वेनैव द्वारभूतक्रियाधात्वर्थसम्बन्धघटकफलयोर्ग्रहणात् । अतो न पुष्ट्यर्थं माषक्षेत्रेऽश्वे बद्धेऽपि माषाणां कर्मत्वम्, गलविलाधः संयोगस्य बन्धनक्रियाप्रयोजकत्वेऽपि भक्षणस्य नैव वाक्यघटकधातुवाच्यत्वमित्यदोषात् । फलव्यापारयोः वाक्यघटकधातुवाच्यत्वं प्रत्यासत्तिलभ्यम् । का प्रत्यासत्तिः ? अन्तरङ्गता । कथमन्तरङ्गत्वम् ? प्रेक्षापूर्वकारी क्रमिकोपस्थितकार्यानुरोधी मनुष्योऽयम्प्रातरुत्थाय शरीरकार्याणि करोति, ततः सुहृदाम्, ततः सम्बन्धिनामर्थानामिति भाष्यकृतामुक्तेः ( पूर्वोपस्थितनिमित्तकत्वमेव अन्तरङ्गत्वम् ) । प्रकृते यद्वाक्यविन्यासाय तदीयकर्मकारकसंज्ञारभ्यते तद्वाक्यमेवोपस्थितत्वाच्छरीरम् अन्तरङ्गं परित्यज्य, अनुपस्थित—

बहिर्भूतधातुवाच्यव्यापारफलयोर्ग्रहणम्—'असिद्धं बहिरङ्ग-मन्तरङ्गे' इति न्यायाननुगृहीतमिति वेदितव्यम् । एतन्-मूलकमेवाह—प्रथमोपस्थितिस्तन्त्रमित्यधिकरणम् ; "उप-स्थितं परित्यज्यानुपस्थितग्रहणे मानाभाव" इत्यभियुक्तो-क्तन्यायश्चेति दिक् ॥

## ( ईप्सितार्थलाभविचारः )

ननु पाणिनीये कर्मसंज्ञासूत्रे इच्छार्थकसन्-प्रत्ययघटि-तमीप्सितपदं श्रूयते, अन्यत्रापि तन्त्रे च, प्रकृतसूत्रे च नेत्यत्र किं बीजम् ? वृत्तिग्रन्थे च स्वोपज्ञे 'इष्यते' पदं प्रपूर्य सूत्रार्थो लक्ष्यसंस्कर्तोपादीयते, कथमेवं सूत्रकृतां स्वेच्छा-चारितेति चेत्, उच्यते,- बहवः शब्दा यत्र तत्रार्थे व्युत्पा-दिता अपि अन्यत्रार्थे नियतविषया दृश्यन्ते, यथा गतिकर्मा शवतिः कम्बोजे भाषितो भवति, विकारार्थे चार्या एनं प्रयुञ्जते 'शव' इति, हंमतिः सुराष्ट्रे, रंहतिः प्राच्यमध्येषु; गमिमेवार्या भाषन्ते । दातिर्लवनार्थे प्राच्येषु, दात्रमुदी-च्येषु । एवं सन्नन्ततया आप्नोतेर्व्युत्पादितोऽपि वीप्साशब्दो व्याप्तिमात्रमर्थमभिधत्ते ईप्साशब्दस्त्विच्छामात्रमिति तत्र तत्रत्यलोकव्यवहार एवैषां शरणम् । अतश्च पूर्वे लोकाः पराणि शास्त्राणीति शिष्टाः । एवं च व्याप्य-साप्याना-प्यशब्दान् पारिभाषिकानास्थाय व्याचक्षाण आचार्यः स्वोप-ज्ञवृत्तौ तथा व्याचष्टे स्म । युक्तं चैतत्,—निरुक्तपदानां कृत्यप्रत्ययान्तत्वात् इच्छार्थकसङ्केतवाक्ये 'अस्माच्छब्दादय-मर्थो बोद्धव्य' इत्यादौ शक्तिग्राहके, मणिकृतः कृत्यप्रत्यय-स्येच्छामर्थमनुमेनिरे इति । वयं तु ब्रूमः—व्याप्नोतेरिच्छा-मात्रमर्थः, धातूनामनेकार्थत्वात् ; तदुत्तरकर्मप्रत्ययेन विषयो विषयताश्रयो वाऽभिधीयते ; कर्तुरिति कर्तरि षष्ठी, कर्तृत्वमाधेयत्वस्वरूपमभिधत्ते । अर्हाविशिष्टे विषयेऽर्थे कृत्यप्रत्ययविधानात्—प्रकर्षगतिर्विज्ञास्यते, धात्वर्थस्य त्या-द्यर्थस्य वा व्यापारस्याश्रयः कर्तृशब्दार्थः । एवं च व्यापाराश्रयनिष्ठेच्छायोग्यप्रकृष्टविषयः कर्मसंज्ञावान् भव-तीति सूत्रवाक्यार्थः । इच्छा चोपस्थितत्वा-द्व्यापारजनिका बोध्या ; 'ग्रामसंयोगो भवतु, इतीच्छायां ग्रामसंयोगसाधनं स्पन्द इति ज्ञानात् प्रवृत्त्या गमनोत्पत्त्या गमनप्रयोजकेच्छा-विषयत्वमेव ग्रामे कर्मत्वम् । व्यापारप्रयोजकत्वस्येच्छायां लाभार्थं कर्तुरिति पदम् । तेन माषेष्वश्वं बध्नातीत्यादौ अश्वभोजनेच्छाविषयत्वेऽपि माषाणां न कर्मत्वम्, तुरग-भोजनेच्छाया बन्धनाप्रयोजकत्वात् । कर्मप्रत्ययवाच्य-विषयत्वनिष्ठप्रकर्षश्च, क्रियाजन्ये फले साक्षाद्विशेषणत्व-स्वरूपं प्राधान्यम्—अर्हपदार्थात्मकं बोध्यम् । तेन पयः-सहितौदनकण्ठसंयोगो भवत्वितीच्छाया भोजनव्यापारवृत्ति-प्रयोज्यतानिरूपित-प्रयोजकत्वेऽपि पयसो न कर्मत्वम् । पयसः कण्ठसंयोगे फले, ओदनद्वारकसम्बन्धेऽपि साक्षाद्वि-शेषणतया इच्छाविषयत्वाभावात् । तेन पयोलोभेन प्रवृत्त-श्चैत्रः 'पयसा सहौदनं भुङ्क्ते' इत्यादौ पयः-पदान्न द्वितीया ।

## ( द्वितीयाया अर्थस्यान्यथावर्णनम् )

सर्वमेतादृबलोपलालनं न द्वितीयार्थोपवर्णनम्, द्विती-यातो दर्शितेच्छाविषयकत्वस्य केनाप्यप्रतीयमानत्वात् । एवं 'कारकम्' इति पूर्वसूत्रादनुवृत्तम् । कारकपदार्थः पूर्वमेव परिष्कृतः । तत्सन्नियोगेनैव साक्षात्तदुद्देशेनैव वा कर्मा-दिसंज्ञा । तेन कर्तुर्व्याप्यभिन्नं कारकं न कर्म, तस्य व्याप्यं कारकं कर्मेति निष्कर्षः । तेन कर्मपदसङ्केतोऽत्र प्रकरणे विभक्त्याद्युत्पत्तौ प्रदर्शितो न तु सर्वत्र । तेन कर्मपदार्थस्य उत्क्षेपणादेरप्रदर्शनेन न न्यूनतेति । अतोऽधिकारसूत्रे ( २।२।५ ) कारकमिति प्रथमान्तम् । पाणिनीये कारके ( १।४।२३ ) इति सप्तम्या निर्दिश्य प्रथमार्था सौत्री सप्तमीति प्रमाद एव । ( वस्तुतस्तु कर्मणि द्वितीया (२।३।२ ) इत्यादावनुवृत्तिवासनया आचार्येण पाणिनिना सप्त-म्यन्तं कारकपदमधिकृतम् । तच्च कर्मादिसंज्ञाप्रकरणे प्रथमान्ततया विपरिणम्यते उभयविभक्तिनिर्देशस्यैकदा कर्तु-मशक्यत्वादिति नायं प्रमाद इत्यवधेयम् ) एवमनभिहिते

( पा० सू० २।३।१ ) इत्यधिकारसूत्रसामार्थ्यादभिहिते कर्मादौ द्वितीयादयो निषिध्यन्ते। अभिधानं च तिङ्कृत्त-द्धितसमासैरन्येनापि। अतः पच्यते तण्डुलः, पक्वो वा इत्यादौ त्यादिना, कृता क्तेन वा कर्माभिधानात्तण्डुलपदान्न द्वितीया। नैयायिकः पण्डितः, शत्यः शतिको वा घोटकः; इत्यादौ तद्धितेन कर्माभिधानात् न्यायघोटकपदाभ्यां न सा। प्राप्तानन्दः साधुः इत्यादौ समासेन कर्माभिधानात्साधुपदान्न द्वितीया। समासस्याभिधायकत्वं विशिष्टशक्तिवादिशा-ब्दिकमते। विशिष्टशक्त्यनंगीकर्तृन्यायमते तु आनन्दकर्तृ-कप्राप्तिकर्मणि आनन्दपदं लाक्षणिकं, प्राप्तपदं तात्पर्यग्रा-हकमित्यानन्दपदेनैव कर्मप्रतिपादनात् साधुपदान्न द्वितीया। एवं 'विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्' इत्यादौ निपातेन कर्माभिधानाद् वृक्षपदान्न द्वितीयेति सर्वमेतदुक्ता-र्थानामप्रयोग इति न्यायसिद्धार्थानुवादकं पाणिनीयमिदं सूत्रमिति पर्यालोच्य अर्धमात्रालाघवेन पुत्रोत्सवं मन्यमानेन-आर्हतानुशासनेन लघुनोपायेन महतोऽनन्तशब्दराशीन् व्याचिकीर्षुरयं सूत्रकारः अनभिहिताधिकारं परितत्याज। ( वस्तुतस्तु तत्रत्यानभिहिताधिकारस्थानीयं 'गौणात्' इति-पदं स्वनये विभक्तिविधायकप्रकरणेऽधिक्रियते, इति उक्ता-र्थानामप्रयोग इति लौकिकन्यायानुसरणमत्रापि नावश्यक-मिति ध्येयम् ) युक्तं चैतत्। अत एव धात्वर्थान्तर्भूत-कर्मकधातूनां जीवतीत्यादीनां प्रयोगे प्राणादीनां द्वितीया-न्तानामप्रयोगः उक्तन्यायेनैव पाणिनीयानामपीत्यर्धजरतीय-स्यानौचित्यादिति वृत्तिकृतां भावः प्रतिभाति। एवमुद-यगिरिसंयोगानुकूलव्यापारवाचिन उदयतेर्योगे उदयगिरि-मुदेति पद्मिनीशः इत्यादयो न प्रयोगाः।

न चोक्तार्थानामप्रयोग इति न्यायादभिधेयवचनमिहा-नुक्तमपि व्याकरणान्तरात्प्राचामनुसरणीयम्, शिष्यदयावशं-वदतया लाघवैकपक्षपातिनामाचार्याणामुत्तरोत्तर-शब्दानु-शासनरचनाप्रवृत्तेर्वा कर्मण्यभिहिते द्वितीयानिषेधे पक्व-मोदनं भुङ्क्ते इत्यादिषु कृता कर्माभिधानात् ओदनपदाद्-द्वितीया न स्यात्; न च भोजनकर्मणोऽनभिधानाद् द्वितीयो-पपत्तिः; एवमपि चैत्रेण गम्यमानं ग्रामं मैत्रो गच्छतीत्यत्र गमिकर्मणः कृताभिधानात्तदनुपपत्तेः। न च चैत्रकर्तृक-गमनकर्मणोऽभिधानेऽपि मैत्रकर्तृकगमकर्मणोऽनभिधानाद् द्वितीया न विरुध्यत इतिवाच्यम् एवमपि दृष्टिं कान्तं मुहुः पश्यतीत्यादौ कर्तृपदनिबन्धनक्रियाभेदविरहात् दृशिक्रिया-कर्मणः कृताऽभिधानाद् द्वितीया नोपपद्यते। एवं दृश्यं पश्यति, कृत्यं करोतीत्यादौ द्वितीयानुपपत्तिश्चेति चेत्, सत्यम्, उक्तन्यायस्य अधिकारसूत्रस्य चान्यदेव तात्पर्यम्। अन-भिहिते इति निमित्तसप्तम्याश्रयणात् कर्मण्यनभिहिते सति द्वितीयेत्यर्थः। अतोऽभिधानाभावः कर्मनिष्ठो द्वितीया-वाच्यतां नाधिशेते। तथा हि अर्थं संप्रत्याययामीति शब्दः प्रयुज्यते, अर्थप्रत्ययबाधे शास्त्रानुशिष्टमपि शब्दं न प्रयु-ञ्जते। अर्थप्रत्ययश्च कार्यकारणभावाधीनः। अतो "न घटः कर्मत्वमानयनं कृति" रित्याकाङ्क्षाज्ञानात्मककारण-व्यतिरेकेण ( घटं नानयेति ) बोधविरहात् न प्रयुञ्जते। एवमिहापि द्वितीयार्थविशेषणकान्वययोग्यार्थकपदे कर्मबोधक-शब्दासमभिव्याहृते सति द्वितीया भवतीत्यर्थः। दृश्यं पश्यति कृत्यं करोतीत्यादौ पश्यतिकरोतिपदयोः कर्मबोध-कपदासमभिव्याहृतत्वात् तदर्थयोर्द्वितीयार्थान्वययोग्यत्वाच्च दृश्यकृत्यशब्दाभ्यां न द्वितीयानुपपत्तिरिति विशेषः उक्त-कारकविचारोक्तरीत्यावधेय इति। सकर्मकधात्वर्थो, द्विती-यार्थान्वययोग्यो बोध्यः।

## ( सकर्मकत्वपरिष्कारः )

सकर्मकत्वं च शाब्दिकमते फलाधिकरणावाचकत्वे सति स्वार्थफलव्यधिकरणव्यापारवाचकत्वम्। अतः शब्दोत्प-त्तेरनुकूलव्यापारवाचिना शब्दायतिना शब्दस्य, स्फिग्भू-संयोगानुकूलव्यापारार्थकेनोपविशतिना स्फिग्भूद्वयस्य, अधः-संयोगानुकूलव्यापारवाचिना पततिनाऽधःपदार्थस्य सर्वावय-वाधःसंयोगानुकूलव्यापारार्थकेन शयतिना अधः-सर्वावयव-द्वयस्य, निद्रामनोविभागानुकूलव्यापारवाचिना जागर्तिना

मिद्धामनःसंयोगानुकूलव्यापारार्थकनिद्रातिना च मिद्धामनो-द्वयस्य, अवयवापचयानुकूलव्यापारार्थकेन क्षीयतिनाऽवयवस्य, अवयवोपचयानुकूलव्यापारवाचिवर्धतिना अवयवस्य, प्राणशरीरसंयोगानुकूलव्यापारशक्तजीवतिना— प्राणशरीरात्यन्तवियोगानुकूलव्यापारवाचि-म्रियतिना च प्राणशरीर-द्वयस्य च फलाधिकरणस्याभिधानात् —शब्दायत्युपविशति-पततिशयतिजागर्तिनिद्रातिक्षीयतिवर्धतिजीवतिम्रियतीनां न सकर्मकत्वमिति तेषां व्यावृत्तये सत्यन्तम् । अनुचितकर्मानुत्पादफलकव्यापारो लज्जतेरर्थः, अनुचितं कर्म यद्धेतुकं ततः पञ्चमी । स्वतो लज्जते, परतो लज्जते इति प्रयोगात् । अनुत्पादरूपफलाधिकरणस्यानुचितकर्मणोऽभिधानादेव लज्जतिरकर्मकः । एवं स्वगतानिष्टचिन्तनं बिभेतेरर्थः, चिन्तनसमानाधिकरणस्यानिष्टफलस्याभिधानात् बिभेतिरकर्मकः । आत्मधारणानुकूलव्यापारार्थकस्य भवतेः आत्मधारणस्वरूपफलसमानाधिकरणव्यापारवाचकत्वम् । एवं सुखस्य फलस्य समानाधिकरणं व्यापारमभिदधतो रमतेः, गतिरूपफलसमानाधिकरणनिवृत्तिमभिदधतस्तिष्ठतेश्च फलसमानाधिकरण-व्यापारवाचकत्वमिति भूरमस्थाधातूनां वारणाय फलव्यधिकरणत्वं व्यापारे विशेषणम् । तच्च फलाधिकरणवृत्ति-भेदप्रतियोगितावच्छेदकत्वम् । तेन गम्यादेः ग्रामचैत्र-द्विष्ठसंयोगरूपफलाधिकरणव्यापारवाचित्वेऽपि न सकर्मकत्वहानिः; फलाधिकरणग्रामवृत्तिव्यापारवान्नेति व्यापारवन्निष्ठभेदीयप्रतियोगितावच्छेदको 'व्यापारवान्' इतिपद-घटकविशेषणीभूतव्यापारः तत्र व्यापारे फलव्यधिकरणत्व-सत्त्वात् । एवमन्यत्रापि फलाधिकरण-व्यापाराधिकरणो-भयनिष्ठफलव्यापारवाचिसकर्मकधातुषूह्यम् । गम्यादीनां धात्वन्तरार्थफलाव्यधिकरणव्यापारार्थकत्वेऽपि सकर्मकत्वार्थं फले स्वार्थत्वं विशेषणम् । तेन स्पन्दमभिदधतः स्पन्दतेः, यत्नमभिदधतोयतेः, रुचिमभिदधतो रोचतेः, दुःखमभिदधतो बाधतेः, नाशमभिदधतो नश्यतेः, दीप्तिमभिदधतो दीप्यतेश्च व्यापारमात्रार्थकतया स्पन्दि-यति-रोचति-बाधति-नश्यति-दीप्यतीनां स्वार्थफलाभावान्न सकर्मकत्वमिति ।

अकर्मकधातुपर्यायोऽकर्मक एव धातुः । यथा शब्दायतिपर्यायः पटपटायतिः । लज्जतिपर्यायस्त्रपतिः । रमिपर्यायो दीव्य त्यादिः । बिभेतिपर्यायस्त्रस्यतिः, बाधतिपर्यायो व्यथतिः, रोचतिपर्याय एक एव स्वदतिः । एवमन्योऽपिबोध्याः ।

## ( फलत्वपरिष्कारः )

फलत्वं च— न, धात्वर्थव्यापारजन्यत्वे सति धात्वर्थत्वम्, जन्यताप्रवेशेन गौरवात् । किन्तु धात्वर्थव्यापारे विशेषणतया भासमानत्वे सति धात्वर्थत्वम् ( फलत्वम् ) एवं विषयता ज्ञानं च जानातेः, उद्देश्यत्वमिच्छा चेच्छतेः, साध्यत्वाख्यविषयता यत्नश्च न्यायमते-उत्पत्तिस्तदनुकूलो व्यापारश्च शाब्दिकमते करोतेः, बाध्यत्वाख्यविषयता द्वेषश्च द्विषेः, लौकिकविषयता प्रत्यक्षं च साक्षात्करोतेः, सा घ्राणं च जिघ्रतेः, सा रासनं च रसयतेः सा चाक्षुषं च पश्यतेः सा स्पर्शनं च स्पृशतेः, सा श्रावणं च-विषयता शाब्दं च शृणोतेः विधेयता अनुमितिश्च—तृतीयान्तविधेयबोधकशब्द-योगे उद्देश्यता अनुमितिश्चानुमातेः, विधेयता तर्कश्च—तृतीयान्तविधेयबोधकशब्दयोगे उद्देश्यता तर्कश्चापाद्यतेरर्थः । विषयतादीनां ज्ञानादौ विशेषणतया ऽन्वयित्वान्निरुक्तफलत्वं निराबाधमिति जानात्यादीनां निरुक्तसकर्मकत्वं निष्प्रत्यूहम् । सुखिनमात्मानमिच्छति, सुरभि चन्दनं जिघ्राति, ध्वनन्तं शङ्खं शृणोति-इत्यादौ 'सविशेषणे हि०' इति न्यायेन सुखसौरभनिध्वानानां द्वितीयार्थेऽन्वयः, तस्य च धात्वर्थफलेऽन्वयः । अत एवेदृशस्थले कर्मप्रत्ययोत्पत्तिः । अत एव—"मन्दानिलापूरकृतं दधानो निध्वानमश्रूयत पाञ्चजन्यः" ( शिशुपालवधे तृतीयसर्गे ) इति माघकवि-प्रयोगः । पुष्पं जिघ्रतीत्यादौ घ्राणजानुगुण-घ्राणसन्निकर्षस्तदनुकूलव्यापारश्च शक्त्या भक्त्या वा जिघ्रतेरर्थः इत्युपपत्तिर्बोध्येति, धात्वर्थफलशालित्वं कर्मत्वमिति ।

## ( नञ्समभिव्याहारे कर्मत्वविचारः )

अत्रायं समुदेति प्रश्नः—मैत्रो ग्रामं न गच्छतीत्यादौ नञ्घटितवाक्ये ग्रामस्य गम्यर्थसंयोगरूपफलाश्रयत्वाभावात्–मद्वृत्ति–मैत्रोग्रामं न गच्छतीति वाक्यघटकगमधातुवाच्यप्रधानीभूतव्यापारप्रयोज्यप्रधानीभूतसंयोगाश्रयो ग्रामो भवत्वितीच्छाया अभावात्तादृशेच्छीयोद्देश्यत्वविरहात्, पूर्वमते–ग्रामसंयोगो भवतु ग्रामसंयोगसाधनं स्पन्द इतीच्छा–ज्ञानयोर्व्यतिरेकप्रयुक्तप्रवृत्त्यभावाच्च ग्रामस्य गमनप्रयोजकेच्छाविषयत्वाभावात् कथं कर्मत्वमिति ?

## ( विवक्षायाः विभक्तिप्रयोजकत्वम् )

अत्र नव्याः—मातुः स्मरतीत्यादौ मात्रादीनां निरुक्तेच्छोद्देश्यत्वे सति सम्भवत्यपि कर्मत्वाभावात् 'विवक्षातः कारकाणि भवन्ति' इति नियमोऽवश्यमास्थेयः । एवं च कर्तृवृत्तिनिरुक्तव्यापारप्रयोज्यफलाश्रयत्वप्रकारकेच्छोद्देश्यत्वनिष्ठविशेष्यतानिरूपित–निष्ठत्वसम्बन्धावलीढ–प्रकारताश्रयत्वेन वक्ता विवक्षितो यः स कर्म । उद्देश्यत्वनिष्ठविशेष्यतानिरूपिता, निष्ठत्वसम्बन्धावलीढप्रकारता च विवक्षीया ग्राह्या । प्रकृते च व्यापारप्रयोज्यसंयोगरूपफलाश्रयत्वप्रकारकेच्छीयग्रामनिष्ठद्देश्यत्वाभावविशेष्यकविवक्षानिरूपिताऽभावनिष्ठविशेष्यतानिरूपितप्रकारतासमानाधिकरण विशेष्यता उद्देश्यतानिष्ठा तन्निरूपिता तादृशी प्रकारता अस्ति ग्रामे इत्यदोषः एवं 'ग्रामं गच्छति' इत्यादावपि व्यापारप्रयोज्यफलाश्रयत्व प्रकारकेच्छीयग्रामनिष्ठोद्देश्यत्वविषयिका विवक्षाऽस्त्येवेति अदोष इत्याहुः ।

अन्ये तु कर्मत्वे बोध्ये द्वितीयेति कर्मणि ( २।२।४० ) इत्यादेरर्थः । तच्च व्यापारप्रयोज्यफलाश्रयत्वप्रकारकेच्छोद्देश्यरूपम् । ईदृशकर्मत्वबोधकं यन्नाम तस्मादेव द्वितीयेति नियन्तुं न शक्यते, तद्भिन्नतोऽपि ग्राममध्यास्ते इत्यादिषु बहुत्र दर्शनात्, पथे गच्छतीत्यादौ तत्रोऽदर्शनाच्च । चैत्रो ग्रामं न गच्छतीत्यादौ तु द्वितीयाविभक्तिवाच्य–चैत्रवृत्तिव्यापारप्रयोज्यफलाश्रयत्वेनेच्छोद्देश्यस्वरूप— कर्मभेदो ग्रामेऽप्रसिद्धः - अर्थान्नास्ति; अतस्तथाविधोद्देश्याभिन्नग्रामवृत्तिसंयोगजनकव्यापारश्चैत्रेऽप्यप्रसिद्धोऽर्थान्नास्त्येवेति, नञो द्योतकतया गमधातोरेवारोपिततादृशव्यापारो वा तादृशव्यापाराभावो वाऽर्थः । ग्रामनिष्ठसंयोगानुकूलव्यापाराभावः एकचैत्राभिन्नैकाश्रयवृत्तिर्वर्तमानकालिक इति बोध इत्याहुः । अनया रीत्या ग्रामे चैत्रवृत्तिव्यापारप्रयोज्यसंयोगनिरूपितद्वितीयाविभक्तिवाच्यस्याश्रयत्वस्याभावोऽपि नञा बोध्यत इति केचित् ।

## ( बौद्धार्थविचारः )

वस्तुतस्तु पूर्वोक्तं सर्वं ( सर्वं ) कल्पनामात्रम् प्रकारप्रकारान्तरं मनीषितादार्ढ्यकरं शिष्यबुद्धिवैशद्यार्थम् । नञ् घटितादिवाक्येषु, लोकव्यवहारबाधितार्थेषु च सर्वत्र शब्दज्ञाने अनुपतनशीले यस्यार्थस्य तथाभूतो लौकिकव्यवहारप्रयोजकवस्तुभूतबाह्यार्थशून्यो विकल्पभूतः स बौद्धार्थ एव शब्दवाक्यसंस्कारप्रयोजको बोध्यः । अत एव

"एष बन्ध्यासुतो याति खपुष्पकृतशेखरः" 'अस्य क्षोणिपतेः परार्धपरया लक्ष्यीकृताः संख्यया" इत्यादि 'शशशृङ्गं नास्ति' 'दश दाडिमानि षडपूपाः कुण्डमजाजिनं अधरोरुकपिण्डः एतत्कुमार्याः' इत्याद्यनर्थकवाक्यम्, 'नाध्ययनेन वसति', 'न धनेन कुलम्' 'ग्रामं न गच्छति' इत्याद्यनर्थकादीनां नामसंज्ञा तत्तद्विभक्त्युत्पत्तिश्च सिध्यति। स्वप्नाद्यनुरोधेन बौद्धार्थस्यावश्यकत्वम्, ज्ञानमात्रं प्रति विषयतया घटादिविषयाणां कारणत्वात् । अतीतानागतविषयासत्त्वेन तज्ज्ञानदौर्लभ्यमापद्येतेति बौद्धव्यापारादिकमादाय तत्प्रयोज्यफलवत्त्वेनेच्छोद्देश्यत्वं ग्रामे बौद्धमस्त्येवेत्यत्रैव नञादीनां तात्पर्यम् । तदुक्तं भगवत्पतञ्जलिना पातञ्जलयोगसूत्रे 'शब्दज्ञानानुपाती वस्तुशून्यो विकल्प इति । अतश्च कश्चित् कंचित् कथयति 'वन्ध्यासुतस्त्व–

मसि', तच्छ्रुत्वा स वैरङ्गिको भूत्वा महान्तं केशाकेशि, दण्डादण्डि–खड्गाखड्गि विरोधमाचरतीत्यास्तां विस्तरः ॥

## ( अथ कर्मद्वितीयार्थप्रकाशः )

धात्वर्थफलशालित्वं कर्मत्वमिति व्याकरणमतमनु–सरद्भिः प्राचीनैः आश्रयः कर्मद्वितीयाया वाच्य इत्युच्यते । तथाहि धातूनां फले व्यापारे च शक्तिः, एकपदप्रतिपाद्य–योरपि परस्परमन्वयाभ्युपगमात् स्याद्यर्थानां साधनता–घटकानामधिकरणाभावादीनां स्याद्यर्थकर्तृसंख्ययोरिव एक–स्मिन् द्वयमिति न्यायेनान्वयदर्शनाच्च । तत्र फलं-विक्लित्ति-संयोगादि, ताद्रूप्येण पचिगम्यादिनाऽभिधीयते । वह्निः पचतीत्यत्रोर्ध्वज्वलनत्वेन, चैत्रः पचतीत्यत्राधिश्रयणावता–रणफूत्काराः ताद्रूप्येण व्यापाराः । पाचकः पचतीत्यत्र प्रयत्नत्वेन व्यापाराः पचिनोपस्थाप्यन्ते । रथो गच्छतीत्यत्र स्पन्दत्वेन, तुरगो गच्छतीत्यत्र प्रयत्नत्वेन व्यापारा गमि–नाऽभिधीयन्ते । तत्र सकलव्यापारानुगतस्यैकस्य धर्मस्या-भावात् भावे वा तेन धर्मेण व्यापाराणामप्रतीतेः नानुगतं प्रवृत्तिनिमित्तमिति बुद्धिविशेषविषयत्वोपलक्षित–धर्मविशिष्टे सर्वनाम्नामिव, अथवा फलजनकतावच्छेदकत्वोपलक्षितधर्म–विशिष्टे, धातूनां शक्तिः । येन धर्मेण व्यापारे विक्लित्यादि-फलनिष्ठजन्यतानिरूपितजनकता–यथोर्ध्वज्वलनत्वरूपधर्मेण वह्नेरूर्ध्वज्वलनरूपव्यापारे विक्लित्तेर्जनकतेति तस्या जनकतायाः समनियत ऊर्ध्वज्वलनत्वरूपधर्मोऽवच्छेदको व्यावर्तक इत्युच्यते । प्रायेणैवं व्याप्यता–व्यापकतादिषु सर्वत्र नियम इति न्यायपरिभाषा । अत एव विक्लित्ति–जनकतावच्छेदकतया यो धर्मो गृहीतस्तद्धर्मविशिष्टमेव पचिनोपस्थाप्यते । धात्वर्थव्यापार एव भावनोत्पादना क्रिया चेति व्यपदिश्यते । तत्र प्रधानतया भासमाने व्या–पारेऽधिश्रयणादौ फलस्य विक्लित्त्यादेरनुकूलत्वादिना संसर्गेण स्याद्यर्थस्य–वर्तमानकालस्य कर्तुश्च तत्तत्संसर्गावच्छिन्नाधेय–तयाऽन्वयः । कर्तरि स्याद्युपात्ता संख्या समवायादिना, प्रथमान्तार्थश्च तादात्म्येनान्वेति । प्रथमान्तार्थे स्याद्यर्थ–संख्या चेति । फले द्वितीयार्थस्याश्रयस्याधेयतया, आश्रये नामार्थस्य तादात्म्येन, नामार्थे स्याद्यर्थसंख्यायाः समवाया-दिनाऽन्वयः । एवं चैत्रः तण्डुलं पचतीत्यादौ–एकतण्डुला–भिन्नाश्रयवृत्तिविक्लित्त्यनुकूलाधिश्रयणादिक्रिया वर्तमानकाल-वृत्तिः एकचैत्राभिन्नैकाश्रयवृत्तिश्चेत्यन्वयबोधः । तत्र फलस्य विक्लित्तेः धातुना तण्डुलस्य नाम्ना च लाभादनन्य–लभ्यस्तण्डुलाभेदान्वययोग्य आश्रयो द्वितीयार्थः ।

## ( कर्माख्यातार्थविचारः )

एवं कर्माख्यातस्यापि आश्रयोऽर्थः । इयांस्तु विशेषः–कर्माख्याते चैत्रेण पच्यते तण्डुल इत्यादौ तण्डुलाभिन्नाश्रये स्याद्यर्थसंख्याया अन्वयः । तृतीयार्थ आश्रये चैत्राभेदस्या–न्वयः, न तु संख्यायाः । चैत्रस्तण्डुलं पचतीत्यादौ कर्माख्याते स्याद्यर्थाश्रये स्याद्यर्थसंख्याया अन्वयः, द्वितीयार्थाश्रये न संख्याया अन्वयः इति संख्यातिरिक्ते विषये उभयविध–वाक्यात् समानाकार एव शाब्दबोधः । युज्यते च क्रियायाः प्राधान्यं 'भावप्रधानमाख्यातम्' इति निरुक्तात् । स्याद्यन्त-घटितवाक्ये भावस्य क्रियायाः प्राधान्यमिति तदर्थात् । "धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते" इति परि–भाषया क्रियाया भावपदार्थत्वात् । केवलः कारकाद्यन–वच्छिन्नः, शुद्धः धात्वर्थतावच्छेदकधर्मानवच्छिन्नः । इत एव पचन्तिकल्पं पुरुषा इत्यादौ प्रधानीभूतक्रियायां कल्प–बर्थस्य विशेषणत्वात् विशेष्यभूतक्रियायां लिङ्गसंख्यान्वया–योग्यत्वात् कल्पशब्दस्य 'सामान्ये नपुंसकम्' इति क्लीब–त्वम्, ततः साधुत्वार्थमेकवचनम् । यदि च कल्पबर्थस्य प्रथमान्तार्थे कर्तरि प्राधान्येन नैयायिकसिद्धान्ताभ्युप–गतेऽन्वयोऽभ्युपेयते तदा विशेष्यस्य कर्तुर्लिङ्गसंख्यान्वय–योग्यतया कल्पान्तस्य पुस्त्वं ततो बहुवचनं च स्यात–आचार्यकल्पा द्विजा इतिवत् पचन्तिकल्पाः पुरुषा इत्यपि स्यात् । तथा पश्यमृगो धावतीत्यस्यैकवाक्यतया सकल–

वैयाकरणाभ्युपगतप्रयोगविरोधश्चापद्येत । त्याद्यन्तपदद्वय-घटितवाक्यार्थे क्रियायाः प्राधान्यं यदि स्यात् तदैव व्यपेक्षा-स्वरूपसामर्थ्ये सति एकवाक्यत्वं तादृशप्रयोगश्च सम्भवति । मृगकर्तृकधावनक्रियायाः मृगोधावतीत्यन्तर्भूतवाक्यार्थे — प्रधानीभूतायाः कर्मतासंसर्गेण दर्शनक्रियायामन्वयसम्भवे, धावनरूपक्रियाया धात्वर्थत्वात्– धातोरधातुपर्युदासान्नाम-संज्ञाविरहान्न द्वितीयाप्रसङ्गः । धावनकर्तृमृगस्य प्रधानस्य कर्मतासंसर्गेण दृशिक्रियायामन्वये मृगपदाद् द्वितीया, तत्सामानाधिकरण्यात्त्यादीनां स्थाने शतृप्रत्ययापत्तौ दर्शित-वाक्यप्रयोग एव दुर्लभः स्यात् । एतेन मृगो धावति तं पश्येति तमिति कर्माध्याहारेण प्रयोगं निरुक्तशतृप्रत्यया-पत्तिपरिहारं चोपपादयन्तः प्रत्युक्ताः, वाक्यभेदप्रसङ्गात् । एवमाश्रयस्य द्वितीयार्थतायां तत्तत्संसर्गव्यावृत्ताधेयत्वेन सम्बन्धेन तस्य व्युत्पत्तिवैचित्र्यात् फलेऽन्वये संसर्गविशेष-लाभसम्भवात् । न संसर्गविशेषव्यावृत्तत्वमाश्रये विशेषण-मिति संसर्गभेदेन भिन्नत्वे सत्यपि न शक्त्यानन्त्यम्; शक्तता-व्यावर्तकधर्मभेदाभावात् ॥

## ( अधिकरणताधेयत्वयोर्द्वितीयार्थत्वखण्डनम् )

अधिकरणताया आधेयताया वा द्वितीयार्थता-पक्षस्तु न युज्यते, अधिकरणतात्वादिधर्मस्य सकलाधिकरणता-वृत्तित्वे सत्यधिकरणेतरावृत्तित्वस्वरूपस्य सखण्डस्य शक्यता-( शक्ति )-व्यावर्त्तकत्वे (शक्यतावच्छेदकत्वे) गौरवात्; कालं पचतीत्यनिष्टप्रयोगप्रसङ्गाच्च, कालवृत्त्यधिकरणता-निरूपकत्वस्य विक्लित्तावभिमतत्वात् । तत्तत्संसर्गावलीढा-धिकरणत्वादेः तत्तद्धातुसाकाङ्क्षद्वितीयाशक्यत्वे शक्त्या-नन्त्यमिति । अधिकरणस्य आश्रयरूपस्य द्वितीयार्थत्वे तु अधिकरणत्वं जातिवत् स्वरूपेणैव द्वितीयाप्रवृत्तिनिमित्तं, तच्चाखण्डोपाधिर्गगनाभावस्वरूपोऽतिरिक्तो वेत्यन्यदेतत् । अधिकरणस्य संसर्गविशेषलाभो व्युत्पत्तिवैचित्र्येणेति उक्त-मिति न शक्त्यानन्त्यमिति ।

तण्डुलं पचतीत्यादौ तण्डुलात्मकाधिकरणस्यावयव-शिथिलसंयोगस्वरूपायां विक्लित्तौ समवायघटितसामाना-धिकरण्येन तदवलीढाधेयत्वेन वा सम्बन्धेनान्वयः । ग्रामं गच्छतीत्यत्र ग्रामात्मकाधिकरणस्य धात्वर्थफले संयोगे समवायसम्बन्धावच्छिन्नाधेयत्वेन संसर्गेणान्वयः । घटं जानातीत्यादौ घटात्मकाधिकरणस्य धात्वर्थफले विषयत्वे स्वरूपसंसर्गावलीढाधेयत्वेन संसर्गेणान्वयः । बह्निर्जुहोति तिलान् जुहोतीत्यादौ वह्निसंयोगानुकूलो व्यापारो जुहो-तेरर्थः, वह्नेर्धात्वर्थान्तः- पाताद् ( धातुनोक्तत्वात् ) वह्निपदान्न द्वितीया, वह्निस्तिलाधिरूपाधिकरणस्य धात्वर्थ-फले वह्निसंयोगे समवायव्यावृत्ताधेयतासंसर्गेणान्वयः । पार्थिवद्रव्यप्रतियोगिककण्ठसंयोगानुकूलो व्यापारो भुजेरर्थः । ओदनं भुङ्क्ते इत्यादौ धात्वर्थफले पार्थिवद्रव्यप्रतियोगिक-कण्ठसंयोगे ओदनस्वरूपाधिकरणस्य समवायसंसर्गावलीढा-धेयतासंसर्गेणान्वयः । न च पार्थिवद्रव्यस्य फलाधिकरणस्य धातुनोक्तत्वादोदनपदात् कथं द्वितीयेति वाच्यम्, धातुना फलस्य संयोगस्य प्रतियोगित्वे विशेषणतया अधिकरणस्या-भिधानेऽपि फलेऽधिकरणस्याधेयतया विशेषणत्वेनानभिधानात् ओदनपदाद् द्वितीयोपपत्तेः । भूमावुपविशतीत्यत्र स्फिग्-भूम्योरधिकरणयोः आधेयतया विशेषणत्वेनाभिधानात्- स्फिग्भूमिपदाभ्यां न द्वितीया सम्भवति । एवं द्रवद्रव्य-प्रतियोगिकसंयोगः, तदनुकूलव्यापारश्च सिञ्चतेरर्थः । फलेऽधिकरणस्य जलादेराधेयत्वान्वयविवक्षायां जलमभि-षिञ्चति इत्यादौ जलपदाद् द्वितीयोपपत्तिः । जलादिव्यापार-जन्यत्वस्य फले विवक्षायां जलेनाभिषिञ्चति रोपितवृक्ष-मित्यत्र जलपदात्तृतीयोपपत्तिः, एवमन्यत्रापि धात्वर्थफले संयोगविशेषावच्छिन्नाधेयत्वेन संसर्गेण आश्रयत्वस्यान्वयः सुधीभिरूहनीयः ।

## ( कर्तृकर्मणोरर्थे विशेषः )

एवं कर्तृकर्मणोराश्रयत्वेनार्थेनाविशेषेऽपि धात्वर्थव्या-पारस्याश्रयः कर्ता, तादृशफलस्याश्रयः कर्मेति विशेषः सम्भ-

वति । नन्वेवं गम्यर्थस्य स्पन्दस्य आश्रयत्वेन कर्तृत्वमिव, तादृशस्य संयोगस्याश्रयत्वेन कर्मत्वमपि चैत्रस्य स्यात्, तथा च चैत्रो गमिकर्मेति व्यवहारः, चैत्रश्चैत्रं गच्छति, स्वः स्वं गच्छति इति द्वितीयापत्तिश्च स्यात् इति चेन्न, कर्तृसंज्ञया कर्मसंज्ञाया बाधात् कर्मव्यवहाराप्रसक्तेः, कर्मसंज्ञाया एव द्वितीयाप्रयोजकत्वात्, कर्मसंज्ञाया विरहे द्वितीयाया अप्रसक्तेश्च । न च कर्तृसंज्ञया कर्मसंज्ञायाः परीभूतायाः कथं बाध इति वाच्यम् प्राधान्यात्, प्रधानकार्यं सर्वतो बलवदिति न्यायात् । प्राधान्यं चास्य प्रधानीभूतधात्वार्थाश्रयत्वात्, कारकचक्रप्रयोक्तृत्वाच्चातिरोहितम् । अतो हि कर्मगतस्य फलस्य प्रधानीभूतधात्वर्थत्वेन विवक्षायां तदाश्रयत्वेन कर्मणः कर्तृत्वमेव-यथा पच्यते तण्डुलः स्वयमेवेति । एवमपादानत्वस्य विभागादेः धातुना प्रधान्येन बोधनेऽपादानस्य कर्तृत्वमेव, गिरिरपसरतीत्यादि यथा । एवं सम्प्रदानकरणाधिकरणानामपि कर्तृत्वमाकलनीयम्-अतो विवक्षातः कारकाणि भवन्तीति पदवाक्यप्रमाणज्ञानां प्रवाद इति विशिष्य तत्तत्प्रकरणसूत्रेषु विस्तरेण स्पष्टीकरिष्यते ।। इति वैयाकरणमतम् ।

## ( अथ न्यायमतेन द्वितीयार्थविचारः )

तार्किकास्तु आश्रयो न द्वितीयावाच्यः, आश्रयतात्वविशिष्टाश्रयत्वस्य द्वितीयावाच्यतावच्छेदकत्वे—वाच्यताव्यावर्त्तकधर्मत्वे—गौरवात्, तेन धर्मेण वाच्यत्वासम्भवात् । अयमाश्रयोऽयमाश्रय इत्यनुभवसाक्षिकं शाब्दिकाभिमतमाश्रयत्वं जातिरखण्डोपाधिर्वा गगनाभावादिवदिति न मन्तव्यम्, इति स्वार्थान्धतार्किकवाचाटानामभिमानः इति चेन्न जात्यखण्डोपाध्योः स्वरूपतो भानस्वीकारेऽपि बाधकविरहेऽखण्डोपाधेः स्वरूपतो भानमभ्युपेयम्; अन्यथा पृथिव्यादिचतुष्टयान्यतमत्वस्वरूपस्याखण्डोपाधेः द्रव्यारम्भकतायां व्यावर्तकत्वसंभवे गुरुणः स्पर्शवत्त्वस्य अनवच्छेदकत्वम् (अव्यावर्त्तकत्वमनियन्तृत्वमिति यावत्) स्यात् । स्वीक्रियते च सकलतान्त्रिकैस्तत्त्वम् । यद्यन्यतमत्वस्य पृथिव्यादिभिन्नप्रतियोगिघटितस्य भेदस्य नाखण्डत्वं, तदा गगनादिप्रतियोगिघटितस्य गगनाभावादेः, तथाभूतस्याश्रयत्वादेरपि नाखण्डोपाधिता, तुल्यत्वात् । किञ्चिद्धर्मानवलीढविषयतया (यत्किञ्चिद्धर्माव्यावृत्तधर्मानियन्त्रित—विषयतया) गगनाभावादेरप्रत्ययात् । गगनाभाव इति प्रतीतौ गगनप्रतियोगिकस्य द्रव्यादिषट्कान्योन्याभावस्य विषयत्वात् । न चातिरिक्तमेवाश्रयत्वम्—द्वितीयाप्रवृत्तिनिमित्तमिति वाच्यम्, शब्दप्रवृत्तिनिमित्तानुरोधेन अतिरिक्तवस्तुकल्पनाया अन्याय्यत्वात् । अन्यथासमासप्रवृत्तिवादिना खपुष्प--शशशृङ्गादिशब्दप्रवृत्तिनिमित्ततयाऽतिरिक्तवस्तुकल्पनाप्रसङ्गः । अथ खपुष्पादिकमतिरिक्तं प्रसिद्धमेवेतिचेत्; तर्हि अतिरिक्तखपुष्पादिसदृशस्यातिरिक्तवस्तुनः द्वितीयाशक्यत्वकल्पनापेक्षया खपुष्पं पश्येत्यादौ कर्मत्वेन क्लृप्तस्य खपुष्पस्य लाघवात् द्वितीयार्थत्वं स्यात् । अथाधिकरणताधेयत्वयोरातिरेक्यं न्यायचिन्तामणिदीधितिकारैर्युक्त्या सिद्धान्तितमिति खपुष्पे न कापि तादृशी युक्तिरिति चेत्, तत्रापि तयोरातिरेक्यं दीधितिकारैरङ्गीकृतम्, अन्यथा 'अधिकरणता' इत्याकारकप्रतीत्यनुपपत्तेः, प्रकारत्वानिरूपितविशेष्यतायाः, प्रकारं विना प्रकारतायाश्चासिद्धेः, दर्शितप्रतीतावधिकरणत्वं विनाऽन्यस्य प्रकारत्वायोगात् अगत्या अधिकरणतात्वविशिष्टस्य द्वितीयाप्रवृत्तिनिमित्तत्वमिति चेत्, लाघवादधिकरणतात्वस्यैव द्वितीयाप्रवृत्तिनिमित्तत्वाद्—पतिसम्भवात् । नचाधिकरणतानां तत्तत्सम्बन्धावलीढानां द्वितीयार्थत्वे शक्त्यानन्त्यम्-अधिकरतासामान्यस्य तथात्वे कालं पचतीति प्रयोगप्रसङ्ग इति प्रागेव प्रत्यपादीनि वाच्यम्, अधिकरणतासामान्यस्यैव द्वितीयाशक्यत्वात् । अधिकरणतायाः स्वनिरूपिततत्तत्सम्बन्धावलीढाधेयत्वसंसर्गेण फलेऽन्वयोपगमात् कालिकविशेषणतासम्बन्धावलीढाधेयत्वस्य विक्लित्तिसम्बन्धत्वानभ्युपगमात् । न च तण्डुलं पचतीत्यत्र तण्डुलाधिकरणतायाः स्वनिरूपितत्वेन तण्डुलसामानाधिकरण्यव्यावृत्ताधेयत्वेन सम्बन्धेन फले विक्लित्तावन्वयेन सम्बन्धस्य

स्वनिरूपित्वविशेषणं गौरवमावहति, आश्रयस्य तादृशाधेयत्वसम्बन्धेनान्वये, स्वनिरूपितत्वाप्रवेशान्न सम्बन्धगौरवमित्याश्रयस्यैव द्वितीयार्थत्वं युक्तमिति वाच्यम्, सम्बन्धगौरवस्याकिञ्चित्करत्वात् वाच्यतावच्छेदकगौरवस्य लक्षणाज्ञाने हेतुतागौरवापादकत्वात् । द्वितीयाशक्याधिकरण—सम्बन्धीति लक्षणाज्ञानस्य अधिकरणतात्वविशिष्टाधिकरणत्वावलीढाधिकरणनिष्ठविषयतानिरूपितसम्बन्धविषयताकत्वेन हेतुत्वं वाच्यम् तदपेक्षया—द्वितीयाशक्याधिकरणतासम्बन्धीति ज्ञानस्याधिकरणतात्वावलीढाधिकरणताविषयतानिरूपितसम्बन्धविषयताकत्वेन हेतुत्वं लघुभूतम् इति सम्भवति लघौ, गुरौ ( धर्मे ) न शक्यतावच्छेदकत्वं मन्यन्ते तान्त्रिकाः ।

## ( द्वितीयाया निरर्थकत्वाक्षेपः )

नन्वाश्रयस्याधिकरणताया वा आधेयत्वसम्बन्धेन फलेऽन्वयोपगमे, नामार्थस्य आधेयत्वेन कर्मताख्यसम्बन्धेन धात्वर्थफलेऽन्वयोऽस्तु तत्र द्वितीयासमभिव्याहारस्तन्त्रमित्येवास्तु किमधिकरणस्याधिकरणताया वा द्वितीयार्थत्वकल्पनया । प्रत्युत द्वितीयान्तत्वाद्यन्तवाक्याकांक्षाज्ञानघटितशाब्दबोधसामग्र्यां द्वितीयाजन्याया आश्रयोपस्थितेः प्रवेशेन गौरवमाधीयते; इत्यनया रीत्या सर्वा विभक्तिर्निरर्थिकैव । न च तण्डुलं पचति न जलमित्यादौ जलकर्मकपाकस्याप्रसिद्धेः तत्कर्मकपाकाभावो न प्रत्येतुं शक्यते किन्तु पाके जलकर्मकत्वाभावः, तत्र द्वितीयाया निर्थकत्वे कर्मणोऽनुपस्थितेः न जलकर्मकाभावप्रतीतिः सम्भवतीति वाच्यम्, तत्र कर्मत्वास्याधेयत्वसम्बन्धेनावलीढप्रतियोगिताकस्य जलाभावस्यैव पाके प्रतीतेः आधेयत्वसम्बन्धस्य वृत्त्यनियामकतया प्रतियोगित्वाव्यावर्त्तकत्वे (प्रतियोगितानवच्छेदकत्वे) तु आश्रयस्य द्वितीयार्थतावादेऽपि तत्सम्बन्धावलीढप्रतियोगिताकाभावाप्रसिद्धेर्जलकर्मकत्वाभावप्रतीत्यनुपपत्तेः । न चाश्रयस्य द्वितीयार्थत्वे जलं न पचतीत्यत्र जलभेदस्य आश्रये, तस्य पाकेऽन्वयः, तथा च जलान्यकर्मत्वं पाके प्रतीयते इति नानुपपत्तिरिति वाच्यम्, प्रकृत्यर्थाभावस्य प्रत्ययार्थे प्रत्ययार्थाभावस्य प्रकृत्यर्थे चान्वयस्याव्युत्पन्नत्वात् माषतण्डुलोभयं पचत्यपि तण्डुलं न पचतीति प्रयोगापत्तेश्च; तण्डुलान्यकर्मकत्वस्य माषकर्मकपाके सत्त्वात् ।

अथ द्वितीयाया निरर्थकत्वं न युज्यते—तथा हि कर्मतासंसर्गकशाब्दबोधे द्वितीयासमभिव्याहारो न हेतुः;

"देवाकर्णय संग्रामे चापेनासादिताः शराः ।
शरैरिशिरस्तेन भूमिर्भूम्या भवानपि" ।।

इत्यादौ चापकर्तृकासादनकर्मणां शराणां कर्मतासंसर्गेणाकर्णनेऽन्वयबोधस्य विना द्वितीयां दर्शनात् । न चात्र वाक्यार्थस्य कर्मतयाऽन्वयेऽपि, शब्दान्तरार्थाविशेषितनामार्थस्य कर्मतासंसर्गेणान्वयबोधे द्वितीयासमभिव्याहारो हेतुः प्रकृते आसादितशब्दार्थविशेषितानां शरणामाकर्णने कर्मतयाऽन्वयेऽपि न व्यभिचार इति वाच्यम्, नीलं घटं पश्येत्यादौ नीलपदार्थविशेषितस्य घटस्य कर्मतया दर्शनेऽन्वयबोधादन्वयव्यभिचारस्य सत्त्वात्—इति द्वितीयाया आश्रयोऽर्थोऽङ्गीकार्यः । तेन वाक्यार्थस्य कर्मतासंसर्गेणान्वयबोधे द्वितीयार्थस्य न विशेष्यतया न वा प्रकारतया भानमिति द्वितीयाज्ञानस्य तज्जन्योपस्थितेर्वा न व्यभिचार इति जलं न पचतीत्यत्र जलाश्रयाभावः पाके प्रतीयते, वृत्त्यनियामकसम्बन्धस्य प्रतियोगिताया अव्यावर्त्तकत्वे बीजाभावादिति चेन्न यतो वृत्त्यनियामकसम्बन्धो न प्रतियोगिमत्ताबुद्धिजनकः गगनादिसंयोगस्य मूर्त्ते सत्त्वेऽपि मूर्त्तं गगनादिमत्, गगनादि मूर्त्तवच्चेति प्रतीत्यनुदयात् । तथा च प्रतियोगिताया बुद्ध्यजनकत्वेन व्यधिकरणसम्बन्धतुल्यो वृत्त्यनियामकसम्बन्ध इति व्यधिकरणसम्बन्धावलीढप्रतियोगिताकस्येव वृत्त्यनियामकसम्बन्धव्यावृत्तप्रतियोगिताकस्याप्यभावस्य केवलान्वयित्वमेव वृत्त्यनियामकसम्बन्धस्य प्रकृत्यर्थाभावप्रतियोगित्वाव्यावर्त्तकत्वे बीजमिति नञा तत्सम्बन्धावलीढप्रत्ययार्थाभावो न बोध्यत इति । यदि बोध्येत तदा वृत्त्यनियामकसम्बन्धेन

प्रतियोगितासम्बन्धिनि, यथा—मूर्ते न गगनादि, गगनादौ वा न मूर्तमित्यादिप्रयोगस्तथा तण्डुलं पचत्यपि न तण्डुलं पचतीति प्रयोगः स्यात्। न चैवं द्वितीयाया निरर्थकत्वेऽपि जलं न पचति तण्डुलं न पचतीत्यादावन्वयबोधानुपपत्तिस्तदवस्थैवेति वाच्यम्, आश्रयस्याधिकरणताया वा द्वितीयार्थत्ववादे द्वितीयाया निरर्थकत्ववादे च सर्वपक्षेऽनुपपत्तेः आधेयत्वस्य द्वितीयार्थत्वं युज्यते इति चेत्, एवमेवैतत्।

अत एव परसमवेतधात्वर्थफलशालित्वं कर्मत्वमिति तान्त्रिका वदन्ति। तेषामयमाशयः द्वितीयाकाङ्क्षाप्रयोजकताव्यावर्तकधर्मवत्त्वं सकर्मकत्वम्। तादृशो धर्मो नानाविधः, पचिगम्यादीनामधिकरणाविशेषित—फलव्यापारोभयवाचकत्वम्, तथा शब्दायत्यादेरधिकरणविशेषितफलवाचकत्वान्न द्वितीयाकाङ्क्षा, रमत्यादेः द्वितीयार्थभेदान्वयोग्यार्थकत्वविरहान्न द्वितीयाकाङ्क्षा, यतीप्रभृतीनां व्यापारमात्रवाचकत्वात् फलावाचकत्वात् न द्वितीयाकाङ्क्षा, शीङ्स्थाऽऽसामधिपूर्वकत्वं तथा वसस्तु उपान्वध्याङ्न्यतमपूर्वकत्वम् तथा अधिकरणविशेषितफलवाचकानां द्वितीयार्थभेदान्वयायोग्यार्थकानां रमत्यादीनां फलावाचकानां यत्यादीनां च, कालभावदेशाध्ववाचकशब्दोत्तरद्वितीयाभिन्नद्वितीयानिराकाङ्क्षत्वरूपाकर्मकत्वेन व्यवह्रियमाणानां णिगन्तत्वं, तथा; न तु शाब्दिकोक्तं सकर्मकत्वम् अधिशीङादावकर्मकणिगन्ते चाव्याप्तेः।

## ( भेदोऽपि द्वितीयार्थः )

तत्र धात्वर्थफलस्य धातुना लाभात् परसमवेतत्वं द्वितीयार्थः। तत्रापि परत्वं भेदः, समवेतत्वमाधेयत्वं खण्डशो द्वितीयार्थः। तत्र नामार्थः आधेयत्वे निरूपितत्वसंसर्गेण, भेदे च तत्तद्व्यक्तित्वधर्मावलीढप्रतियोगितासम्बन्धेनान्वेति। आधेयत्वं फले स्वरूपेण भेदो व्यापारे सामानाधिकरण्ये नान्वेति। एवं ग्रामं गच्छति—चैत्र इत्यादौ एकग्रामवृत्तिसंयोगानुकूलाया, एकग्रामभिन्नवृत्तेश्च क्रियाया अनुकूलकृतिमानेकश्चैत्र इति शाब्दबोधः। तत्तद्व्यक्तित्वधर्मावलीढप्रतियोगिताया भेदसम्बन्धोपगमात्—मल्लो मल्लं गच्छति इत्यादौ नान्वयबोधानुपपत्तिः। अन्यथा मल्लत्वावलीढप्रतियोगिताकभेदसमानाधिकरणाया मल्लगमनक्रियाया अप्रसिद्धेः शाब्दधियोऽनुदयः स्यात्। न च शब्दार्थे भेदे ऽन्वयिताव्यावर्तकधर्मव्यावृत्तप्रतियोगितैव सम्बन्धो व्युत्पन्न इति वाच्यम्, नञर्थभेदे एव तथा व्युत्पत्तेः। यद्वा भेदे नामार्थः आधेयत्वसम्बन्धेनान्वेति, भेदः प्रतियोगिताव्यावर्त्तकतासम्बन्धेन व्यापारेऽन्वेति। दर्शितस्थले गम्यमल्लवृत्तिभेदस्य गन्तृमल्लवृत्तिगमने प्रतियोगिताव्यावर्त्तकतायाः सत्त्वाद्, गन्तृभेदस्य गमने सत्त्वात्-नानुपपत्तिरिति।

ननु भेदांशे द्वितीयाशक्तिकल्पनाऽप्रामाणिकी, भेदानुभवस्य विवादग्रस्तत्वात्, कर्तृसंज्ञया कर्मसंज्ञाया बाधात् चैत्रः चैत्रं गच्छतीति प्रयोगप्रसक्त्यभावादिति चेन्न, निषेधप्रतीत्यन्यथानुपपत्तेराख्यातवादे प्रमाणतया शिरोमणिकृतोक्तत्वात्। तथा हि खगो भूमिं गच्छति न तु स्वमिति सर्वजनीनः प्रयोगः, तत्र भूमिकर्मकगमनकर्तृत्वं, स्वकर्मकगमनकर्तृत्वाभावश्चेत्युभयम्, अथवा स्वकर्मकत्वाभाववतो भूमिकर्मकगमनस्य कर्तृत्वं खगे प्रतीयते। तत्र स्वपदोत्तरद्वितीया यदि आधेयत्वमात्रमर्थमभिधत्ते, तदा गमिफले संयोगे स्वाधेयत्वस्य सत्त्वान्न तस्य निषेधः, न वा स्वाधेयसंयोगजनकत्वस्य सत्त्वात्तस्य निषेधः, न वा स्वाधेयसंयोगजनकगमनकर्तृत्वस्य खगे सत्त्वात्तस्य निषेधो नञा बोधयितुं शक्य इति निषेधप्रतीत्यनुपपत्तिः। भेदस्य द्वितीयार्थत्वे तु स्वपदार्थविहगवृत्तिभेदस्य प्रतियोगिताव्यावर्तकताया विहगकर्तृकगमने विरहात् तस्य निषेधो नञा बोधयितुं शक्यते इति निषेधप्रतीतिरुपपद्यते। एवं रूपं न गच्छतीत्यादौ रूपवृत्तित्वाभाव एव गमिफले संयोगे नञा बोध्यते, रूपसमवेतसंयोगस्याप्रसिद्धेः रूपकर्मकगमनकर्तृत्वाभावस्य बोधयितुमशक्यत्वात्। न च गम्यादिसमभिव्याहृतद्वितीयाया समवायादिसंसर्गनियंत्रिताधेयत्वस्य यदि शक्यत्वं तदा शक्यानन्त्यम्, जातिमभावं वा न गच्छतीत्यादौ निषेधप्रती-

त्यसंभवश्च, जातिनिरूपितस्याभावनिरूपितस्य च समवायसङ्कुचिताधेयत्वस्याप्रसिद्धेरिति वाच्यम्, आधेयतात्वेनाधेयतासामान्यस्यैव द्वितीयार्थत्वेन शक्त्यानन्त्यविरहात् । गम्यादिसमभिव्याहारात्तु समवायव्यावृत्ताधेयत्वीयस्वरूपसम्बन्धेन फले संयोगादावाधेयत्वस्यान्वयोपगमात् । दर्शितप्रयोगे जातिनिरूपितस्याभावनिरूपितस्य चाधेयत्वस्य समवायव्यावृत्ताधेयत्वीयस्वरूपसंसर्गावलीढप्रतियोगिताकमभावं संयोगे बोधयता नञा निषेधप्रतीतिसम्भवाच्च । कालिकस्वरूपसम्बन्धावलीढाधेयत्वीयस्वरूपसंसर्गस्य द्वितीयावाच्याधेयताया अनन्वयाप्रयोजकत्वात्—कालं पचतीत्यादयो न प्रयोगाः । अत एव कालिकविशेषणतादिघटितव्यापकत्वार्थं कालाध्वभावेत्यादि (२।२।३३) पृथगनुशासनमित्यादि तत्रैव व्याख्यास्यते । एवं स्वावयवव्यावर्त्याधिकरणतानिरूपितत्वसंसर्गेण प्रकृत्यर्थस्य द्वितीयार्थाधेयत्वेन गम्यादिफलसंयोगाद्यन्वययोग्येऽन्वयो वक्तव्यः । स्वपदं परिचायकम्, अवयवः समवायी, तेन गगनं, दिशं, कालं, क्षेत्रज्ञं गच्छतीति प्रयोगोऽनुपपन्न इति वाच्यम्, इष्टत्वात् । परमाणुमनसोर्मिथः संयोगसत्तायामपि गगनघटयोरिव गम्यगन्तृभावानभ्युपगमात् । गगनं न गच्छतीत्यादौ गगनपदं दर्शितसम्बन्धावलीढप्रतियोगिताकाकाशाभावपरं तादृशाभावस्य स्वरूपसंसर्गेण द्वितीयार्थाधेयत्वेऽन्वय इति ।

यदि च वृक्षादौ संयोगो ऽव्याप्यवृत्तिर्न तु तदधिकरणता तदा द्वितीयार्थाधेयत्वस्य स्वनिरूपकप्रकृत्यर्थात्मकाधिकरणावयवनिष्ठव्यावर्तकतानिरूपितव्यावर्त्यतासमानाधिकरणेन समवायावलीढाधेयत्वीयस्वरूपसंसर्गेण गमिफले संयोगे त्यजिफले विभागे चान्वयः । तेन गगनदिक्कालादिकं गच्छति त्यजतीति न प्रयोगः; दर्शितसंसर्गेण द्वितीयावाच्याधेयत्वस्य संयोगे विभागे च बाधात् । गगनादिकं न गच्छति न त्यजतीति वेत्यादौ द्वितीयार्थाधेयत्वस्य दर्शितसंसर्गावलीढप्रतियोगिताकोऽभावः संयोगे विभागे चान्वेतीति तत्प्रयोगोपपत्तिः । प्राचीं गच्छतीत्यादौ दिगुपाधिमतः उदयगिरिसंनिहितदेशस्य प्राचीपदप्रतिपाद्यत्वान्नानुपपत्तिः । एवं शकुनिः खं गच्छतीत्यत्र खपदेन वायुमण्डलस्य प्रतिपादनान्नानुपपत्तिः । एवं प्रयोक्तृपुरुषाधिष्ठितदेशावधिकगमनकर्तृदेशसमवेतपरत्वनिरूपितापरत्वस्य समानाधिकरणः संयोगः आङ्वर्जितस्य गमेः फलमिति, तेन प्रयागात्काशीमागच्छति इन्द्रप्रस्थं गच्छतीति प्रयोगः, प्रयागाद् इन्द्रप्रस्थमागच्छति काशीं गच्छतीति न प्रयोगः पाटलिपुत्रस्थितानाम् ।

ननु भेदस्य द्वितीयार्थताभ्युपगमेन 'विहगो भूमिं गच्छति न तु स्वम्' इति एवं प्रभृतौ निषेधप्रतीत्युपपादनेऽपि चैत्रो ग्रामं गच्छति ननु मनुष्यमित्यादौ निषेधप्रतीतिर्नोपपद्यते गम्यर्थसंयोगे चैत्रात्मकमनुष्यसमवेतत्वस्य व्यापारे च मनुष्यान्तरवृत्तिभेदस्य प्रतियोगिताव्यावर्तकतायाः सत्त्वात् द्वितीयार्थयोराधेयत्वभेदयोर्निषेधस्य तत्र बोधयितुमशक्यत्वात् चैत्रो मनुष्यं गच्छतीति प्रयोगापत्तिश्च । न च तत्तन्मनुष्यनिष्ठान्योन्याभावप्रतियोगिताव्यावर्तकं तत्तन्मनुष्यवृत्तिसंयोगजनकत्वविशिष्टं यावत्, तावदभावकूट एव नञा प्रतिपाद्यते, तथा च चैत्रात्मकमनुष्यवृत्तिसंयोगजनकत्वविशिष्टं यत् चैत्रात्मकमनुष्यवृत्तिभेदप्रतियोगिताव्यावर्तकत्वं चैत्रकर्मकान्यदीयगमनेऽस्ति तदभावस्य नञा बोधनात् मनुष्यान्तरकर्मकचैत्रकर्तृकगमने यत्किञ्चिन्मनुष्यवृत्तिसंयोगजनकत्वविशिष्टस्य यत्किञ्चिन्मनुष्यनिष्ठभेदप्रतियोगिताव्यावर्तकत्वस्य विरहेऽपि चैत्रो मनुष्यं न गच्छतीति न प्रयोगः, तादृशतावदभावकूटस्य तादृशचैत्रगमनेऽसत्त्वादिति वाच्यम्; भेदस्यैव द्वितीयार्थतया तावद्व्यावर्तकत्वस्यानुपस्थित्या तदभावज्ञानासम्भवात्, तावदभावकूटस्य युगसहस्रेणापि ग्रहीतुमशक्यत्वात् । तस्माद् द्वितीयाया भेदार्थकत्वेऽपि निषेधप्रयोगोपपत्तिर्न सम्भवतीति चेन्न; यतश्चैत्रो ग्रामं गच्छति न तु मनुष्यमित्यादौ स्वसमवेतसंयोगजनकत्वस्वप्रवृत्तिभेदप्रतियोगिताव्यावर्तकत्वोभयसम्बन्धावलीढप्रतियोगिताको मनुष्यसामान्याभावो गमने नञा बोध्यते संयोगेन घटो नास्तीत्यत्र तृतीयान्तसंयोगपदमिव द्वितीया प्रतियोगिताव्यावर्तकसंसर्गानुवादकतयोपयुज्यते अतो न काप्यनुप-

पत्तिः । न च दर्शितसंसर्गोभयस्य वृत्त्यनियामकत्वात् कथं प्रतियोगिताव्यावर्तकत्वं वृत्त्यनियामकसम्बन्धव्यावृत्तप्रतियोगिताकाभावाप्रसिद्धेरिति वाच्यम्, यतः स एव वृत्त्यनियामकः स्वव्यावृत्तप्रतियोगिताकत्वेनाभावस्य जगद्वृत्तित्व (केवलान्वयित्व)—प्रयोजको यः सम्बन्धः, प्रतियोगिवैशिष्ट्यबुद्धिं न जनयति, यथा गगनादिसंयोगो गगनादिवैशिष्ट्यबुद्धिं न जनयति, तदवलीढप्रतियोगिताकोऽभावो जगद्वृत्तिः (केवलान्वयी)। प्रकृते दर्शितसंसर्गोभयस्य गमने मनुष्यात्मकप्रतियोगिवैशिष्ट्यबुद्धिजनकत्वात् न तद्व्यावृत्तप्रतियोगिताकोऽभावो जगद्वृत्तिरिति स्वावलीढप्रतियोगिताकाभावस्य केवलान्वयित्वप्रयोजकत्वस्वरूपस्य वृत्त्यनियामकसम्बन्धप्रतियोगितात्वाऽव्यावर्तकत्वबीजस्य दर्शितोभयसम्बन्धे विरहात् नानुपपत्तिरिति ।

न चैवमधिकरणं द्वितीयार्थोऽस्तु तस्यैव दर्शितोभयसम्बन्धावलीढप्रतियोगिताकोऽभावः प्रकृते प्रतीयेतेति वाच्यम् अधिकरणस्य द्वितीयार्थत्वे वाच्यताव्यावर्तकविशेषणांशे गौरवस्य दर्शितत्वात् । न चैवं दर्शितस्थले संसर्गानुवादकतया साधुत्वे द्वितीया सर्वत्र साधुत्वार्थैवास्तु किमाधेयत्वादौ तस्याः शक्तिकल्पनेन; ग्रामं गच्छतीत्यत्र दर्शितोभयसम्बन्धेन गम्यर्थे व्यापारे नामार्थस्य ग्रामस्य अन्वयः तादृशसंसर्गेण नामार्थप्रकारकशाब्दबोधे द्वितीयान्तप्रातिपदिकजन्या पदार्थोपस्थितिः गम्यादिधातुजन्या व्यापारोपस्थितिश्च कारणम् तेन ग्रामो-ग्रामाद्-ग्रामेण गच्छतीत्यादौ न तथाशाब्दधीः ग्रामोपस्थितेर्द्वितीयान्तपदाजन्यत्वात् । न वा स्वारसिकलक्षणायास्तार्किकैः स्वीकारेऽपि घटपदेन लक्षणया स्पन्दोपस्थितावपि ग्रामो घट इत्यादौ तथा शाब्दधीः स्पन्दोपस्थितेर्धातुजन्यत्वविरहात् । एवं सर्वत्रैव स्ववृत्तिफलसम्बन्धितत्व-स्ववृत्तिभेदप्रतियोगिताव्यावर्तकत्वोभयसंसर्गेण नामार्थप्रकारकशाब्दबोधे द्वितीयान्तपदजन्योपस्थितेः सामान्यतो हेतुत्वम्ः धातुजन्योपस्थितिस्तु विशेषतः कारणम् तेन स्पन्दिजन्योपस्थितेरहेतुत्वेन ग्रामं स्पन्दते इत्यादौ न तथा शाब्दबोधः ।

न च दर्शितोभयसम्बन्धस्य कर्मत्वात्मकत्वात् कर्मतासंसर्गेण नामार्थप्रकारकशाब्दे द्वितीयान्तपदजन्योपस्थितेर्व्यभिचारः "देवाकर्णय संग्रामे चापेनासादिताः शराः" इत्यादौ प्रागेव दर्शित इति कथमीदृशः कार्यकारणभाव इति वाच्यम्, आसादनकर्मत्वविशेषितशराणां वाक्यार्थत्वविरहात् व्यभिचाराप्रसक्तेः । कृदन्ततद्धितान्तसमासानां वाक्यानां नामसंज्ञाविधानात् वाक्यार्थस्यापि तेषामर्थस्य नामार्थत्वमक्षतमेवेति कर्मतासंसर्गेण कृदन्तादिवाक्यार्थप्रकारिका शाब्दधीः नामार्थप्रकारिकैवेति पाचकमानय, दाक्षिं भोजय, स्वेष्टतीर्थङ्करं पूजयेत्यादौ न द्वितीयान्तपदजन्योपस्थितेरन्वयव्यभिचारः । एवं खगो भूमिं गच्छति न तु स्वमित्यत्रापि दर्शितोभयसंसर्गात्मककर्मतासंसर्गेण भूमिप्रकारिकाया तथाविधसंसर्गावलीढप्रतियोगिताकस्वाभावप्रकारिकायाः एव शाब्दधियः समभ्युपगमः, वृत्त्यनियामकसंसर्गस्य प्रतियोगिताव्यावर्तकतायाः तर्कविदैवाभ्युपगमादिति चेन्न, वृत्त्यनियामकसंसर्गस्य प्रतियोगिताव्यावर्तकत्वेऽपि द्वितीयायाः सार्थकताया अवश्याभ्युपेयत्वात्, चैत्रो ग्रामं गच्छति न तु मनुष्यमित्यादौ क्वचित्साधुत्वार्थत्वेऽपि सर्वत्र साधुत्वार्थमात्रतया द्वितीयायाः कर्मत्वाद्यनर्थकत्वे मानाभावात् । न च कर्मत्वाद्यर्थकत्वेऽपि मानाभावात् द्वितीयाया निरर्थकत्वमिति वाच्यम्, द्वितीया न कर्मत्ववाचिकेति ज्ञानेऽपि ग्रामं गच्छतीत्यत्र कर्मतासंसर्गेण ग्रामस्य गमनेऽन्वयप्रसक्तेः, ग्रामीयं न कर्मत्वमिति बाधज्ञानेऽपि कर्मतासंसर्गेण ग्रामस्य गमनेऽन्वयबोधप्रसङ्गाच्च तथाविधबाधस्य कर्मतासंसर्गकग्रामान्वयबुद्धावविरोधित्वात् । एवं गमनं न ग्रामकर्मताकमिति बाधकालेऽपि सति तात्पर्ये कर्मतासंसर्गेण ग्रामस्यान्वबोधः स्यात् ! तत्संसर्गाभाववत्ताज्ञानस्य तत्संसर्गकबुद्धावविरोधित्वात् । किं च द्वितीयाया निरर्थकत्वे-साधुत्वमात्रार्थकत्वे-कर्म गच्छतीति प्रयोगः प्रसज्येत, कर्मणः कर्मतासंसर्गेणान्वयबोधे निष्प्रत्यूहत्वात् । सार्थकत्वे तु न तथा प्रयोगः सम्भवति, कर्मेत्यत्र द्वितीयाया निराकाङ्क्षत्वात् । शाब्दिकमते कर्मणो द्वितीयार्थत्वात् कर्मकर्मत्वभेदान्वयबोधो न

भवति उद्देश्यताव्यावर्तक-विधेयताव्यावर्तकधर्मयोर्भेदस्य तथान्वयबोधे तन्त्रस्य विरहान्न तथान्वयबोधः ।

न्यायमते तु द्वितीयाया आधेयत्वमर्थः, निरूपकतासंसर्गेण कर्मपदार्थ आधेयतावान्, तथा च कर्मेति द्वितीयान्तप्रयोगे द्वितीयार्थाधेयत्वस्योद्देश्यत्वे कर्मपदार्थस्याधेयतावतः तथाविधेयता न सम्भवति, अभेदातिरिक्तसम्बन्धेनोद्देश्यविधेयभावेन प्रकृतिप्रत्ययार्थयोरन्वये प्रकृत्यर्थताव्यावर्तकप्रत्ययार्थयोरन्योन्याभावस्य तन्त्रत्वात्, कर्म गच्छतीति न प्रयोगः अधिकरणाश्रयपदयोर्निरूपकतासम्बन्धेनाधेयतावदर्थकत्वात् । अधिकरणपदस्याधिकरणतावदर्थकत्वे तु आश्रयं श्रयन्तीतिवत् अधिकरणमाश्रयं वा गच्छतीति साधुरेव ।

ननु भवतु द्वितीयाया आधेयत्वमर्थः, खगो भुवं गच्छति न तु स्वमित्यादौ निषेधप्रतीत्यनुरोधेन भेदोऽप्यर्थः स्यात् । अथ यन्मते वृत्त्यनियामकः सम्बन्धः प्रतियोगिताव्यावर्तको भवति 'गगनं न पारिमाण्डल्यात्' इति वाक्यप्रामाण्यात्तत्प्रतीत्यनुरोधाच्च; तन्मते खगो भुवमित्यादौ दर्शितस्थले, ग्रामं गच्छति न तु मनुष्यमित्यादौ च कथं निषेधप्रतीतिः, प्रतीयोगिताव्यावर्तकत्वसंसर्गस्य वृत्त्यनियामकतया तत्संसर्गावलीढप्रतियोगिताकस्य स्ववृत्तिभेदाभावस्याप्रसिद्ध्या खगकर्तृकगमने तत्प्रतीतेरसंभवात् । एवं मनुष्यवृत्तिभेदप्रतियोगिताव्यावर्तकोभयसंसर्गस्य वृत्त्यनियामकतया तत्सम्बन्धावलीढप्रतियोगिताकमनुष्यसामान्याभावाप्रसिद्ध्या चैत्रकर्तृकगमने तत्प्रतीतेरसम्भवादितिचेन्न, तन्मते द्वितीयार्थभेदस्य स्वसमानाधिकरणफलसम्बन्धितत्व- प्रतियोगितावच्छेदकत्वोभयसम्बन्धेन व्यापार एवान्वयः । तथा च खगो भुवं गच्छति न स्वमित्यादौ स्ववृत्तिभेदस्य स्वसमानाधिकरणसंयोगजनकत्वसम्बन्धेनावच्छिन्नया विशेषणतया खगकर्तृके गम्यर्थव्यापारे सत्त्वेऽपि प्रतियोगिताव्यावर्तकत्वसम्बन्धावलीढया विशेषणतयाऽसत्त्वात् । तादृशोभयसंसर्गावच्छिन्न-विशेषणतासंसर्गावच्छिन्नप्रतियोगिताकस्य स्ववृत्तिभेदाभावस्य गम्यर्थव्यापारे निराबाधत्वात्तत्प्रतीत्युपपत्तेः । चैत्रो ग्रामं गच्छति न तु मनुष्यमित्यत्र चैत्रात्मकमनुष्यवृत्तिभेदस्य प्रतियोगिताव्यावर्तकत्व—(प्रतियोगितावच्छेदकत्व)— संसर्गेणावच्छिन्नया – मनुष्यान्तरवर्तिभेदस्य तादृशसंयोगजनकत्वसंसर्गेणावच्छिन्नया— विशेषणतया चैत्रकर्तृके व्यापारे सत्त्वात्तदुभयसम्बन्धावच्छिन्नविशेषणतासम्बन्धावच्छिन्नप्रतियोगिताकस्य मनुष्यवृत्तिभेदसामान्याभावस्य तथाविधगम्यर्थव्यापारे निराबाधत्वात्तत्रापि तत्प्रतीत्युपपत्तिः । भूवृत्तिभेदाय ग्रामवृत्तिभेदस्य च दर्शितविशेषणतया खगकर्तृके चैत्रकर्तृके च गमने सत्त्वात् तत्प्रतीत्युपपत्तिः । विशेषणता तु तत्तदधिकरणस्वरूपा अतिरिक्ता वाऽस्तु उभयथैव तस्या वृत्तिनियामकत्वमेव ।

## ( अथ भाट्टमतम् )

मीमांसकैः कर्मत्वमखण्ड एव पदार्थः कारकत्वेन स्वीक्रियते । तेषामयमभिप्रायः—'भावप्रधानमाख्यातम्' इति निरुक्तोक्तयास्कवचने भावपदस्य भावनापरपर्यायकृतिपरतया भावनाविशेष्यक एव बोध आख्यातसमभिव्याहारे उपेयते । तथा च पचेत्, न पचेच्चैत्रः; चैत्रः शुक्लं तण्डुलं काष्ठैः स्थाल्यां पचति, न पचति,—इत्यादौ सर्वत्रैव लिङर्थ—( विध्यर्थ )—प्रवर्तनायाः स्वज्ञानजन्येष्टसाधनत्वाद्यनुमितिजन्यत्वस्वरूपप्रयोज्यत्वसंसर्गेण आधेयत्वस्वरूपस्वकर्तृत्व संसर्गेण, प्रथमान्तार्थचैत्रादेः विषयताविशिष्टानुकूलत्वसंसर्गेण करणत्वेन वा यागादेः स्वसाध्यतृप्त्यादिफलोद्देश्यकत्वरूपेण आख्यातार्थकृतौ; नञ्समभिव्याहारस्थले च लिङर्थनिवर्तनायाः स्वज्ञानजन्येष्टसाधनत्वाद्यनुमितिप्रयोज्यत्वेन संसर्गेण तस्यामेव, प्रथमान्तार्थचैत्रस्य स्वकर्तृकत्वेन द्वितीयान्तार्थतण्डुलकर्मत्वस्य शुक्लकर्मत्वस्य च स्वनिरूपकपाकविषयकत्वसंसर्गेण, तस्यामेव चैत्रस्याधेयतया, नञर्थसमभिव्याहारे नञर्थाभावे तस्य प्रतियोगितया तस्यामेव तण्डुलकर्मत्वादीनां च प्रतियोगितयाऽभावे तस्य स्वाश्रयपाकविषयकत्वेन तस्यामेवान्वयः । कर्माख्यातस्थलेऽपि यथाख्यातस्य कर्तरि लक्षणा (कर्त्राख्यातस्थले) तथैव कर्मण्यपीति भावना

तत्र प्रतीयत एव। तस्यामेव तण्डुलादेः स्वकर्मतानिरूपकपाकविषयत्वसंसर्गेण, चैत्रकर्तृकत्वस्य चान्वय इति सर्वत्राख्यातार्थस्यैव विशेष्यतया भानम्। तथा च भावनाविशेष्यकान्वयबोधं प्रति आख्यातजन्योपस्थितित्वेनैकमेव कारणत्वम् तादृशी व्युत्पत्तिरप्येकैवेति न न्यायमतवद्गौरवं किन्तु महल्लाघवम्। धात्वर्थस्यापि भावनायामेवान्वयाद् भावनान्वितत्वस्यैव तन्मते कारकत्वात् "गुणानाञ्च परार्थत्वात् परस्परमसम्बन्धः समत्वात्स्यात्" इति न्यायेन कारकाणामपि परस्परमन्वयायोग्यत्वेन भावनायामन्वयस्यौचित्यम्। ननु तन्मते फलव्यापारोभयवाचित्वस्यैव सकर्मकधातुत्वात् तदाश्रयस्यैव कर्मकारकान्वययोग्यत्वात् प्रकृते भावनामात्रवाचकस्याख्यातस्य सकर्मत्वाभावात्, तत्र कथं कर्मकारकस्यान्वय इति चेन्नैवम्; लिङ्प्रत्ययः (आख्यातम्) तावदुत्पत्त्यनुकूलव्यापारे उत्पत्तिव्यापारयोर्वाऽर्थयोर्वर्तते; एकपदार्थयोरन्वयबोधार्थमनुकूलत्वस्य संसर्गविधयैव लाभसंभवात्। अत एवोत्पत्तिपरिच्छिन्नव्यापारवाचिनः करोत्यादयः (पचतीत्यादौ पाकं करोति-पाकमुत्पादयतीत्यादिरूपेण विवरणदर्शनात्) आख्यातं विवृण्वते। तथा विव्रियमाणे आख्यातार्थ उत्पत्तौ तदेकदेशीभूतायाम् आधाराधेयभावेनान्वितः पाको धात्वर्थ एव कर्म। अत एव विवरणवाक्ये (पाकं करोतीत्यत्र) पाकपदात् कर्मत्वानुवादिका द्वितीया दृश्यते। यत्र चौदनं पचतीत्यत्राख्यातार्थीभूतायामुत्पत्तौ अन्वययोग्यमोदनादिवृत्तित्वं (कर्मत्वं) द्वितीययोपात्तं, तत्र नाम्नामर्थ एव कर्म; धात्वर्थस्य (पाकस्य) तत्र करणत्वेनौदनोत्पत्तावन्वयः। पाकेनौदनं भावयतीति विवरणं तादृशवाक्यस्य बोध्यम्। आख्यातस्य फलव्यापारोभयवाचकत्वादेव, नित्याग्निहोत्रस्य-फलाजनकत्वेऽपि अग्निहोत्रं जुहोतीत्यादौ यत्र फलान्तरं न भावनान्वययोग्यं तत्र नित्यतया प्राप्तकर्तव्यताको जुहोतिधात्वर्थ एव भाव्यतया कर्म। अत एव जुहोतिसमानाधिकरणे कर्मनामधेयेऽग्निहोत्रपदे द्वितीया; यथा नीलं घटमानयेत्यादौ घटविशेषणे नीलपदे सा। तथा चाग्निहोत्राभिन्नं होमं भावयतीति वाक्यार्थबोधः। काम्यस्थले तु स्वर्गादिभाव्यं विना निष्फलत्वेन विध्युपात्तप्रवर्तनायाः अन्वयासम्भवः तत्र क्रियाया न कर्मत्वेनान्वयोऽपि तु करणत्वेन, कर्मावरुद्धे कर्मान्तरस्यानाकांक्षितत्वात्। अत एव सोमेन यजेत स्वर्गकामः इत्यत्र स्वर्गस्वरूपेण स्वर्गकामपदोपात्तेनाक्षिप्तेन वा भाव्येन )कर्मणा) सकर्मिकायां भावनायां यागादेर्धात्वर्थस्य करणतयाऽन्वयः। तथा च स्वर्गवृत्तेर्यागकरणिकाया उत्पत्तेरनुकूलो व्यापारः प्रवर्तनाविषय इत्येव तत्र वाक्यार्थः। अत एव यजेतेत्यस्य यागेन स्वर्गं भावयेदिति विवरणं दृश्यत इति तन्मतदिग्दर्शनम्।

## ( पुनर्द्वितीयार्थकर्मत्वे आक्षेपस्तत्परिहारश्च )

स्यादेतत्, मतत्रयेऽपि—पूर्वदर्शित—तार्किकशाब्दिकमीमांसकमतत्रयेऽपि—घटं जानातीत्यादावावरणभङ्गः, प्राकट्यं, विषयतास्वरूपं वा फलम् धातुवाच्यम्। तत्र यद्यपि विषयताया अजन्यत्वेन धात्वर्थव्यापारप्रयोज्यत्वं न संभवति तथापि धात्वर्थे विशेषणतया भासमानत्वमेव फलत्वमिति परिभाषणात्, तादृशफलाश्रयत्वमाश्रित्य कर्मसंज्ञाप्रवृत्तेः। एवं तत्र निर्वाहेऽपि आत्मानमात्मना जानातीत्यादौ व्यापारफलयोस्तुल्याधिकरणत्वात् कथमेकत्रैव कर्तृत्वं कर्मत्वञ्च, तत्र परया कर्मसंज्ञया कर्तृसंज्ञायाः कुतो न बाधः, कथं वा तत्र क्रियायाः परसमवेतत्वम्। यत्त्ववच्छेदकभेदेनैकस्यापि कर्तृत्वं कर्मत्वञ्चेत्युभयमपि न विरुध्यत इति तन्न; भेदाभेदवादोपगमे चैत्रश्चैत्रं गच्छतीत्यादिप्रयोगापत्तेस्तथापि दुर्वारत्वात् इतिचेत्, सत्यम्, तादृशस्थले द्वितीयार्थभेदांशस्य त्यागात्—भागत्यागलक्षणया—आधेयत्वमाश्रयत्वमात्रं वा द्वितीयार्थ इति स्वीक्रियते। यद्यपि त्वमेव त्वां जानासीत्यादौ—आत्मानमात्मना जानासीत्यादौ वा विषयतास्वरूपफलगाम्याधेयत्वमात्रं द्वितीयया प्रतिपादयितुं न शक्यते, तस्याः पुष्पवन्तादिपदवत् एकयोक्त्या फलगाम्याधेयत्वं कर्त्रादिगाभिभेदं च युगपदेवाभिधातुं सामर्थ्यात्, तथापि भेदांशपरिहारेणाधेयत्वमात्रे

द्वितीयाया लक्षणा सम्भवत्येव, श्येनेनाभिचरन् यजेत' इत्यादिस्थले बलवदनिष्टाननुबन्धीष्टसाधनत्वरूपे विध्यर्थे बलवदनिष्टाननुबन्धित्वांशपरित्यागेन इष्टसाधनत्वमात्रे विधेर्लक्षणाया मीमांसकैरभ्युपगमात्। तथा चात्र भेदहानेन वाक्यार्थधीरिति तार्किकसरणिरेव ज्यायसी। ननु लोके पदे लक्षणायाः स्वीकारेऽपि विभक्तौ (द्वितीयायां) कथं लक्षणा, तथा च तत्र आधेयत्वमात्रबोधार्थं लक्षणेति यदुक्तं तन्न विचारसहम्। तथा हि वार्त्तिकम्—

"सुपां कर्मादयोऽप्यर्थाः संख्या चैव तथा तिङाम्।
प्रसिद्धो नियमस्तत्र, नियमः प्रकृतेषु वा" इति।

अस्येदं व्याख्यानम्—सुपां (स्वादीनां) तिङां (त्यादीनां) च यथानुशासनं कर्मादिकारकमेकत्वसंख्या चार्थः। तत्र कर्मणि द्वितीयेत्यादीन्यनुशासनानि नियमपर्यवसायीनि। स च नियमः—एकवचनमेवैकत्वं द्विवचनमेव द्वित्वं, द्वितीयैव कर्मत्वं-प्रतिपादयतीत्येवमाकारः। तेन द्वितीयाभिन्नविभक्तौ कर्मत्वबोधकत्वाभावः फलति। न चैवं द्वितीयायाः कर्मत्वभिन्नबोधकत्वस्यालाभात् कर्मभिन्नं गमनादिकमपि सा चेद्बोधयेत्तदा नोक्तनियमभङ्गप्रसङ्ग इति वाच्यम् तत्राह 'नियमः प्रकृतेषु वेति। प्रकृतेषु—प्रत्ययविषय एव वा नियमः,—द्वितीया कर्मैव बोधयेदित्येवंरूप इत्यर्थः। तथा च यावन्तोऽनुशासनसिद्धा द्वितीयार्थास्तदन्यमर्थं द्वितीया न प्रतिपादयतीति—न गमनादिबोधकत्वमिति कथमननुशिष्टे कर्मैकदेशे आधेयत्वे तस्या लक्षणयाऽपि बोधकत्वमिति चेत्, न; कर्मणि द्वितीया' इत्याद्यनुशासनेन, भेद आधेयत्वं प्रातिस्विकरूपेणैव बोध्यते, न यौगपद्येन पुष्पवन्तादिपदवदिति भेदे आधेये च खण्डशः शक्तिस्वीकारात्। तत्र यत्र भेदांशो बाधितस्तत्राधेयत्वांशमात्रे—आश्रयत्वांशमात्रे—वा शक्तिरेव न लक्षणेति स्वीकारे दोषाभावात्। आकाङ्क्षावैचित्र्याच्चैकपदोपस्थितयोरपि भेदाधेयत्वयोर्यौगपद्येन अन्वयबुद्ध्यनुप्रवेशोऽपि स्वाभाविक एव। यत्र कर्तृकर्मणोर्भिन्नयोः फलं कर्तृभिन्ने वा फलं तत्र द्वितीयया भेदाधेयत्वयोर्व्यापारफलान्वयबोधो जायते। यत्र तु फलं व्यापाराधिकरणमात्रगतं भेदान्वयस्य च बाधः तत्राधेयत्वमात्रस्य बोधो द्वितीयया जायते। इति बाधसापेक्षबोधजनकत्वमात्रेण तत्र लक्षणाव्यपदेशः परैः क्रियते। बाधश्चात्र फलाधिकरणभिन्ने व्यापारो न वर्त्तते इतिसामान्यरूपेणैवोपतिष्ठते। द्व्यनियतस्थितौ संयोगादिरूपे फले च धात्वर्थे सति, नियमेनोभयान्वय एवेति तत्र भेदांशस्यापि भानमावश्यकमिति—ग्रामं गच्छतीत्यादौ फलाधिकरणयत्किञ्चिद्ग्रामभिन्ने चैत्रादिरूपे कर्तरि व्यापारस्य वर्तमानत्वात्, न तत्र द्वितीयाशक्तेर्बाध इति नैकार्थाधेयत्वमात्रतात्पर्येण संयोगाद्यर्थकधातुसमभिव्याहृत द्वितीयायाः साधुत्वमिति चैत्रश्चैत्रं गच्छतीत्यादयो न प्रयोगाः। त्वं त्वां जानाति, आत्मानं जानतीत्यादौ तु फलाधिकरणभिन्ने व्यापारस्यावृत्तेस्तत्र भेदांशशक्तेर्बाध इति बाधसापेक्षतया आधेयत्वमात्रबोधाद्बाधसापेक्षत्वोक्तिः। यद्वा त्वर्थव्यापारे भेदांशे वृत्तेर्बाधे सापेक्षत्वं तद्धातुसमभिव्याहार एव द्वितीयाया एकार्थबोधकत्वोपगम इत्याशयः॥ नन्वेवमपि पच् धात्वर्थतावच्छेदकफलस्य विक्लित्तिरूपस्यैकमात्रवृत्तितया—(कर्ममात्रसम्बन्धित्वेन) तत्रोभय—(भेदत्वाधेयत्वद्वय) बोधस्यानियतत्वप्रसङ्गेन तण्डुलगत (विक्लत्ति) फलजनकतण्डुलव्यापारविवक्षायां तण्डुलस्तण्डुलं पचतीति प्रयोगापत्तिरिति चेन्न, तादृशस्थले कर्तृकर्मवद्भावविधानेन द्वितीयायाः फलतः प्रतिषेधात्—तण्डुलः पच्यते स्वयमेवेत्यादिप्रयोगस्यैवानुशासनिकत्वात्। कर्मवद्भावविधायकस्य सूत्रस्य साक्षाद् द्वितीयानिषेधकत्वविरहेऽपि कर्मवद्भावातिदेशस्य कार्यातिदेशत्वेन कर्माख्याते विधीयमानानां क्यादीनामतिदेशकत्वमिति कर्माख्यातस्थले कर्मण उक्तत्वाद्यथा द्वितीया न भवति तथा तत्रापि नेति फलतः कर्मवद्भावस्य द्वितीयानिषेधकत्वोक्तिः। चैत्रः स्वंजानाति आत्मानमात्मना जानातीत्यादौ तु कर्तुः कर्मणा तुल्यक्रियत्वेऽपि न कर्मवद्भाव इति तत्र द्वितीया भवत्येव। न च तत्र कथं न कर्मवद्भाव इति शङ्क्यम्, निर्वर्त्यविकार्ययोरेव कर्मणोर्विषयो कर्मवद्भावस्य इष्टत्वात्। तदुक्तम्—

निर्वर्त्ये च विकार्ये च कर्मवद्भाव इष्यते।
न तु प्राप्ये कर्मणीति सिद्धान्तोऽत्र व्यवस्थित "इति"॥

अत्र तु जानात्यादेः प्राप्यफलकत्वेन निर्वर्त्यविकार्यकर्माभावान्न कर्मवद्भाव इति द्वितीया भवत्येव। ननु तथापि स्वं जानातीत्यादौ कर्मसंज्ञा कथं प्रवर्तेत, कर्तुः क्रियया आप्तुमिष्टस्यैव—कर्तृभिन्नस्य–कर्मसंज्ञाविधानात्, कर्मसंज्ञाया अभावे च द्वितीया कथमुपपद्यत इति चेत्सत्यम्, ज्ञाधातोर्बुद्धिः फलम्, तदनुकूलो व्यापारः क्रिया; बुद्ध्यन्वयिनि विषयत्वे द्वितीया लाक्षणिकी न कर्मसंज्ञामपेक्षते। अतः स्वं जानातीत्यादौ कर्मसंज्ञाविरहेऽपि द्वितीया नानुपपन्ना। तत्रैव हि द्वितीयायाः कर्मसंज्ञापेक्षा यत्र स्वशक्यार्थस्य धात्वर्थेऽन्वयो विवक्षित इति न दोषः। न चैवं द्वितीयाया लाक्षणिकत्वस्वीकारे पूर्वोक्तः "नियमः प्रकृतेषु वा" इति वार्तिकसूचितः प्रत्ययनियमपक्षः 'कर्मण्येव द्वितीया' इत्येवं रूपः कथं न विरुध्यत इति वाच्यम्, निरूढलक्षणाया एव तादृशनियमेन प्रतिषेधात्। इयन्तु स्वारसिकी विषयत्वादौ विभक्तेर्लक्षणेति तत्र नियमाप्रसरात्। एवमेव स्वं हिनस्तीत्यादौ ध्वंसं तदनुकूलव्यापारं चाभिदधतो हिनस्तेः ध्वंसरूपेऽर्थे फले द्वितीयालक्ष्यं प्रतियोगित्वमप्यन्वेति न चापेक्षते प्रतियोगिनि कर्मसंज्ञाम्, एकसंज्ञानियमेन कर्तरि स्वस्मिन् कर्मसंज्ञाया असंभवात्। न च आधाराधेयभावमात्रं द्वितीयाऽभिधातुं प्रभवति, भेदमादायैव तस्याः स्वाभिधेयप्रतिपादकत्वस्वीकारात्। ततश्च स्वारसिकलक्षणां विना नोदाहृतस्थले निर्वाहः। नचैवं स्वारसिकलक्षणाया इच्छामात्रहेतुकत्वेनानियम्यत्वात् द्वितीया कदाचिद् गमनमपि प्रतिपादयेदिति शङ्कनीयम्, स्वारसिकलक्षणाया अपि पूर्वपूर्वप्रयोगस्यैवानुसरणीयत्वात्। उक्तञ्च भट्टपादैः।

"निरूढा लक्षणाः काश्चित्प्रसिद्धा अभिधानवत्।
क्रियन्ते साम्प्रतं काश्चित्-काश्चिन्नैवाप्रयोगतः"।

इति ( तन्त्रवार्तिके अरुणाधिकरणे ) काश्चित् निरूढालक्षणाः **अभिधानवत्** वाचकताशक्तिवत् **प्रसिद्धाः**, परम्परया प्रसिद्धिं गताः। **काश्चित्** लक्षणाः साम्प्रतं अस्मदादिभिरस्मिन्नेव समये—**क्रियन्ते** स्वरसतः प्रयुज्यन्ते। **काश्चित्** –स्वरसप्राप्ता अपि लक्षणाः **न क्रियन्ते** कुत इति चेदत्राह **अप्रयोगतः** इति पूर्वपूर्वेषां तादृशप्रयोगविरहादित्यर्थः; 'अप्रयोगतः' इत्यस्य स्थाने काव्यप्रकाशे 'अशक्तितः' इति पाठोऽपि दृश्यते। तत्राशक्तिः –तदर्थबोधकतया पूर्वमप्रयोग एवेति नार्थान्तरम्। उदाहृतं च भट्टपादैरेव "रक्तं वस्त्रमिति प्रयोगतः क्रियते, रूपं वस्त्रमित्यप्रयोगतो न क्रियते" इति। अयमाशयः, रक्तरूप–वाचिना रक्तशब्देन वस्त्रस्य सामानाधिकरण्येन प्रयोगो यद्यपि बाधितः, रक्तरूपवस्त्रयोः तादात्म्यविरहात्। तथापि पूर्वेषां रक्तरूपवति रक्तपदस्य स्वारसिकं प्रयोगमनुसृत्य तथाऽद्यत्वेऽपि प्रयुज्यते, भवति च रक्तरूपवत्तादात्म्यं वस्त्रे समुपपन्नम्। एवं रूपशब्दस्यापि रूपवति लक्षणामाश्रित्य रूपं वस्त्रमिति प्रयोगः प्राप्नोति, किन्तु पूर्वेषां तादृश–प्रयोगविरहात् साम्प्रतं तादृशी स्वारसिकलक्षणा न क्रियते इति।

अप्रयुक्तस्थलेऽपि स्वारसिकलक्षणामाश्रित्य प्रयोगे कृते एव नेयार्थता नाम काव्यदोषः काव्यानुशासन-काव्य–प्रकाशादौ प्रतिपादितः अप्रयोगप्रतिहता लक्षणैव नेयार्थता नाम। **नेयः** न्यायपरिहारेण कवेः स्वेच्छया बोधनीयोऽर्थो यया सा नेयार्था ( लक्षणा ) तस्या भावो नेयार्थतेति व्युत्पत्तेः। नेयार्थतादोषस्योदाहरणं च—

"शरत्कालसमुल्लासि-पूर्णिमाशर्वरीप्रियम्।
करोति ते मुखं तन्वि, चपेटापातनातिथिम्" इति।

अत्र—शरत्समयशोभिचन्द्रस्य तन्वीमुखेन निर्जितत्व–सूचनार्थंव 'चपेटापातन' पदस्य प्रयोगः क्रियत इति तस्य निर्जितत्वे या स्वारसिकलक्षणा सा पूर्वप्रयोगविरहादेव नेयार्थतामावहतीति प्रकृतवक्तुरभिप्रायः। वस्तुतस्तु, प्रयोजनविरह एव स्वारसिकलक्षणायां बाधक इति–आलङ्कारिकसरणिः। अत एव 'अप्रयोगतः' इत्यस्य स्थाने 'अशक्तितः' इति पाठः काव्यप्रकाशादौ दृश्यते। तस्याय-

माशयः– रूढिः प्रयोजनञ्च लक्षणायां हेतुरित्यविवादम् । तत्र ताभ्यां विनैव यदि अशक्तिमात्रेण लाक्षणिकः प्रयोगो विधीयते तदैव नेयार्थता नाम दोषः । प्रकृते च नास्ति रूढिः, नवा तथाप्रतिपादने किमपि प्रयोजनमिति चपेटा–पातनपदे लक्षणा नोचितेति; कृता चेन्नेयार्थतां नाति–क्रामति । प्रकृतमनुसरामः, स्वं हिनस्तीत्यादौ अज्ञत्वा–ध्यतिशयप्रतीत्यर्थं तथा लक्षणया द्वितीयायाः प्रतियोगि–त्वार्थकत्वेऽपि गमनाद्यर्थलक्षकत्वे तथाप्रयोजनविरहात्–पूर्वेषां प्रयोगविरहादेव वा न लक्षणेति न कश्चिद्दोषः ।

## ( द्वितीयाया विषयत्वादौ शक्तिरपि )

अथ यदि स्वारसिकलक्षणया स्वं जानातीत्यादौ द्विती-याया विषयत्वार्थत्वे, स्वं हिनस्तीत्यादौ तस्याः प्रतियो–गित्वार्थकत्वे न सम्प्रतिपत्तिः तदा कारकान्तरत्वेनाविव–क्षितस्य कर्मसंज्ञा यथाऽन्यैः 'अकथितं च' त्यादिसूत्रेण स्वीक्रियते तथा प्रतियोगिनो विषयस्यापि च कर्मत्वेन विवक्षणादेव तत्र कर्मसंज्ञा तदधीना द्वितीयोत्पत्तिश्चास्तु, तथा च द्वितीयाया विषयतादौ शक्तिरेव स्वीकरणीयेति न किञ्चिदनुपपन्नम् । नन्वेवं करोतिपर्यायत्वाद् यतेरपि समभिव्याहारे विषयस्य कर्मसंज्ञायाः प्रसक्तौ घटं यतते इति प्रयोगः स्यादिति चेन्न; करोतेरुत्पत्त्यनुकूलयत्नवाचित्वेन, यतेश्च प्राधान्येन यत्नमात्रवाचकत्वात् धात्वर्थफलाभावेना–कर्मकत्वान्न तस्य विषयो कर्मसंज्ञेत्यदोषात् । वस्तुतस्तु द्वितीयार्थस्य विषयत्वस्य फलान्वयित्वे बुद्धेः फलत्वासंभवेन जानात्यादियोगे ( स्वं जानातीत्यादौ ) द्वितीयानुपपत्तिः । व्यापारान्वयित्वे च घटं यतते इत्यस्यापि साधुत्वं स्यादिति भेदांशमपहाय आधेयत्वमात्रे द्वितीयाशक्तिरुपेया । तथा–चोक्तप्रयोगे द्वितीयोपपत्तिरपि भवति ॥

## ( शारीरकभाष्यविरोधपरिहारः )

नन्वेवमेकस्यैव कर्मकर्तृभावस्य ज्ञातृज्ञेयभावस्य चोप–गमे मनोमयः प्राणशरीर इति वाक्यात् मनोमयस्याब्रह्मत्व–शङ्कानिरासाय भगवता बादरायणेन "कर्तृकर्मव्यपदेशाच्च ( ब्र० सू० अ० १ पा० २ सू० ४ ) इति सूत्रितम् । तत्र "एतमितः प्रेत्याभिसम्भवितास्मि" इति श्रुतिवाक्ये एत–च्छब्देन मनोमयस्याभिधानात् तस्य जीवत्वे प्राप्तिकर्मत्वं द्वितीयया प्रतिपादितं, जीवस्य कर्तृत्वं चाख्यातेनोक्तम्–इत्येकस्य कर्तृकर्मव्यपदेशो विरुद्धः इति तस्य सूत्रस्यार्थः । एवं ज्ञातृज्ञेययोर्विरोधोपपत्तये तेनैव महर्षिणा "भेदव्यप–देशाच्च" इति सूत्रितम् । तत्र "तमेवैकं विजानथ आत्मानम्" इत्यत्र तच्छब्देन द्युभ्वाद्यायतनस्याभिधानात् तस्य ज्ञेयत्वं द्वितीयया प्रतिपादितम्, जीवस्य कर्तृत्वं चाख्यातेनोक्तमिति ज्ञातृज्ञेयभावेन भेदेन व्यपदेशात्–मुमुक्षोः प्राणभृतः सकाशात् ज्ञेयस्य द्युभ्वाद्यायतनस्य भेद इति तत्सूत्रार्थः शारीरकभाष्यरीत्या प्रतीयते । तत्र कर्तृत्व-कर्मत्वयोर्ज्ञातृत्वज्ञेयत्वयोरेकधर्मिवृत्तित्वे पूर्वोक्तरीत्या समु-पपन्ने विरोधाभावात्कथं भेदकत्वमुक्तमिति चेत्, सत्यम् ; ज्ञातृज्ञेयभावस्य परस्परं विरोधे न तद्भाष्यस्वारस्यम् अपि तु विरुद्धधर्मविशिष्टयोर्ज्ञेयत्वज्ञातृत्वयोरिति तद्भाष्य एवाग्रे स्पष्टं प्रतिपादनात् । एवञ्च द्युभ्वाद्यायतनत्वेन ज्ञेयत्वं ब्रह्मण्येव मुमुक्षुतया ज्ञातृत्वं जीवेष्वेवेति स्पष्टो विरोधः । एवं च केवलयोः कर्मत्वकर्तृत्वयोर्ज्ञेयत्वज्ञातृत्व–योर्वा न परस्परं विरोधे तद्भाष्यस्वारस्यमिति ।

## ( द्वितीयाया आधेयत्वार्थकत्वेऽनुपपत्तिपरिहारः )

ननु पूर्वोक्तरीत्या द्वितीयाया आधेयत्वार्थकत्वे व्यापारे तदन्वयतात्पर्येण सप्तम्या इव द्वितीयाया अपि प्रयोगापत्तिः । तथा हि गृहे पचतीत्यादिवत्– गृहं पचतीत्यपि प्रयोगः स्यात् इति चेत्, मैवम् धात्वर्थतावच्छेदकफलांशे आधेय–त्वान्वयविवक्षायामेव तादृश–( आधेयत्वार्थक )–द्विती–यायाः साकांक्षत्वकल्पनात्– व्यापारे तदुपस्थापिताधेयत्वा–न्वयासम्भवात्तादृशप्रयोगापत्तिविरहात् । सप्तम्यधीनाधेय–त्वोपस्थिति – सप्तमीसमभिव्याहारज्ञानघटिताया एव

सामग्र्याः तादृशान्वयबोधे तन्त्रत्वात् । द्वितीयासप्तम्योः समानार्थकत्वेऽपि व्युत्पत्तिवैचित्र्यज्ञापनायैव पृथक् पृथक् सूत्रेण तयोर्विधानात् ।। नन्वेवमपि अधः संयोगावच्छिन्न-स्पन्दस्य 'पत' धात्वर्थतया धात्वर्थतावच्छेदकीभूतेऽधः संयोगरूपे फले आधेयत्वान्वयतात्पर्येण भूमिं पततीति प्रयोगापत्तिः—फलविशेष्यकान्वयबोधं प्रति द्वितीयासमभिव्याहारज्ञानस्य कारणतायाः पूर्वोक्तव्युत्पत्तिसिद्धत्वात् । न च द्वितीयोपस्थिताधेयत्वप्रकारकफलविशेष्यकान्वयबोधे गम्यादिजन्यफलोपस्थिति— तत्समभिव्याहारज्ञानघटितसामग्र्येव प्रयोजिका न तु 'पत'—धातुजन्यतदुपस्थितिघटिता सामग्रीति न पूर्वोक्तातिप्रसङ्ग इति वाच्यम्; पतधातुनैव यत्र भागत्यागलक्षणया संयोगवच्छिन्नगमनमुपस्थापितं तत्र द्वितीयार्थाधेयत्वान्वयस्येष्टतया तथाविधकार्यकारणभाव कल्पनायोगात् । तथा च भूमिं पततीति प्रयोगो दुर्वार इति चेत्—अत्राहुः— धातुजन्यशुद्धसंयोगावच्छिन्नस्पन्दोपस्थितेः शाब्दबोधकारणताया अवच्छेदकघटकसंयोगविषयतायाम्— अधिकरणानवच्छिन्नत्वं विशेषणं देयम् । तथा च तादृशविषयताशक्तिसंयोगाद्युपस्थित्यादिघटितसामग्र्या एव संयोगविशेष्यकद्वितीयोपस्थाप्याधेयत्वान्वयप्रयोजकत्वोपगमादुक्तातिप्रङ्गवारणसंभव इति । न चैवमपि फलावच्छिन्नव्यापारबोधकतया पतेः सकर्मकत्वव्यवहारापत्तिर्दुर्वारैवेति वाच्यम्, आश्रयानवच्छिन्नफलावच्छिन्नव्यापारबोधकत्वस्यैव सकर्मकत्वव्यवहारनियामकत्वोपगमात् । उत्तरदेशानवच्छिन्नसंयोगः ( शुद्धसंयोगः ) गम्यर्थतावच्छेदकं फलमिति नानुपपत्तिः । पतधातोरधःसंयोगावच्छिन्नव्यापारार्थकतया तज्जन्योपस्थितिविषयतावच्छेदकतायां संयोगनिष्ठायामधोदेशावच्छिन्नत्वेनाधिकरणानवच्छिन्नत्वाभावात् । अत एव (संयोगविषयतायामधिकरणानवच्छिन्नत्वविशेषणादेव) अग्निसंयोगावच्छिन्नक्रियानुकूलव्यापारस्य जुहोत्यर्थतया धात्वर्थतावच्छेदकसंयोगाश्रयस्याप्यग्नेः न तत्कर्मता । ततश्चाग्निं जुहोतीति प्रयोगो न, अपि तु अग्नौ जुहोतीत्येव । आश्रयानवच्छिन्नावच्छेदकताश्रयफलवत्त्वविरहात् । संयोगनिष्ठाया अवच्छेदकताया आश्रयेणाग्निनाऽवच्छिन्नत्वात् । न चैवं ( अग्निसंयोगावच्छिन्नव्यापारस्य जुहोत्यर्थतायाम् ) 'जलेऽन्नाहुतिद्वयं जुहुयात्' इति पार्वणहवनविधौ-जुहोतिप्रयोगानुपपत्तिः तत्रत्यसंयोगस्याग्न्यविशेषितत्वादिति वाच्यम्, तत्राधारावच्छिन्नसंयोगानुकूलव्यापारानुकूलव्यापारे हुधातोर्लक्षणोपगमात् । ननु यदि अग्नौ घृतं जुहोतीत्यादौ अग्निवृत्तित्वं धात्वर्थतावच्छेदकघटकं तदा तद्विशिष्टे संयोगे सप्तम्यन्तार्थस्याग्निवृत्तित्वस्यान्वयो न सम्भवति उद्देश्यतावच्छेदकविधेययोरैक्यात् । यदि च सप्तम्यर्थाधेयत्वस्य संसर्गविधयैव भानं तदा विनिगमकाभावात्— धात्वर्थघटकाग्निसंयोगोऽपि —आधेयत्वसम्बन्धेनाग्निविशिष्टसंयोग एव विवक्षणीयः, तथा चोद्देश्यतावच्छेदकस्य विधेयस्य चाग्नेरैक्यादन्वयबोधानुपपत्तिरिति चेन्न, तत्र संयोगनिष्ठायामुद्देश्यतायां वह्नेराधेयतासंसर्गेणावच्छेदकतया सप्तम्यर्थस्याग्निवृत्तित्वस्य न विधेयतया उद्देश्यतावच्छेदकविधेययोरैक्यानवकाशात् । ननु व्यापारे एव सप्तम्यर्थाधेयत्वान्वयस्य पूर्वमुक्तत्वादिह— संयोगे ( संयोगनिष्ठायामुद्देश्यतायां ) तदन्वयाभिधानमयुक्तमिति चेन्न, द्वितीयार्थाधेयत्वस्य फलेऽन्वयबोधं प्रति स्वप्रकृत्यर्थरूपाधिकरणानवच्छिन्नफलनिष्ठविषयताकोपस्थितित्वेन कारणत्वस्य प्रदर्शितत्वेऽपि, सप्तमीघटितस्यैव प्रयोगस्यात्र ( अग्नौ जुहोतीत्यादौ ) प्रामाणिकतया, तदुपपत्तये सप्तम्यर्थाधेयत्वस्य फलेऽन्वयबोधं प्रति स्वप्रकृत्यर्थरूपाधिकरणावच्छिन्नफलनिष्ठविषयताकोपस्थितित्वेन कारणत्वस्य कल्पनीयतया अत्र ( अग्नौ घृतं जुहोतीत्यत्र ) अग्निसंयोगेऽन्वये अनुपपत्तिविरहात् । किञ्च तत्र वह्नेरनन्वयेऽपि न क्षतिः । व्युत्पन्नानां तादृशप्रयोगस्याप्रामाणिकत्वात्, केवलं 'घृतं जुहोति' 'हविर्जुहोति' इत्यादीनामेव प्रयोगाणां प्रामाणिकत्वात् । 'संस्कृते वह्नौ जुहुयात्' इत्यादिस्थले च विधेयांशेऽधिकावगाहनान्नानुपपत्तिः । धृतादेश्चाश्रयानवच्छिन्नधात्वर्थतावच्छेदकक्रियारूपफलाश्रयत्वात् कर्मत्वोपपत्तिः ; संयोगनिष्ठायां धातुशक्यतानिरूपितावच्छेदकतायाम्—

आश्रयावच्छिन्नत्वेऽपि व्यापारात्मकफलनिष्ठावच्छेदकतायां साक्षादाश्रयावच्छिन्नत्वविरहेण व्यापारात्मकफलाश्रयत्वात् ।

यत्तु धात्वर्थतावच्छेदकत्वं धातुवृत्तिग्रहविशेष्यांशे साक्षात्प्रकारत्वं तच्च क्रियायामेव न संयोगांशेऽपीति नाग्ने- र्जुहोतिकर्मतापत्तिरिति समाधानान्तरं केचिदाहुः, तदसत्; अजां ग्रामं नयतीत्यादौ संयोगावच्छिन्नक्रियानुकूलव्यापा- रादिरूपे धात्वर्थे संयोगादेः साक्षादप्रकारतया तदाश्रयी- भूतग्रामादेः कर्मत्वानुपपत्त्या नीवह्यादेर्द्विकर्मकत्वव्याघा- तात् । किञ्चैवं भूमौ पततीत्यादौ पतधातुवृत्तिग्रहविशे- ष्यांशे साक्षात्प्रकारीभूतस्य संयोगरूपफलस्य भूमौ सत्त्वात् भूम्यादावपि कर्मत्वापत्तिः । यदि चोक्तदोषवारणाय अधिकरणानवच्छिन्नत्वं साक्षात्प्रकारांशे विशेषणमुपादीयते तदा तेनैव अग्नौ घृतं जुहोतीत्यादावग्न्यादेः कर्मत्वापत्ति- वारणात्- साक्षात्प्रकारत्वनिवेशादिरूपोक्तप्रयासस्य वैफ- ल्यमेव ।

यत्तु अधःसंयोगावच्छिन्नस्पन्दो न पतधात्वर्थः, किन्तु गुरुत्वजन्यतावच्छेदकजातिविशेषावच्छिन्नस्पन्द एव; अत एव फलावच्छिन्नव्यापाराबोधकत्वान्न तस्य सकर्मकत्वमिति, तन्न; फलस्य धात्वर्थाघटकत्वे स्पन्द एव सप्तम्यर्थान्वय- स्योपगन्तव्यतया पर्णादिनिष्ठस्य तस्य भूतलावृत्तितया भूतले पततीति प्रयोगानुपपत्तिः । पर्णादिगतस्पन्दस्य परम्परया भूतलादिवृत्तित्वमिति चेत्तर्हि वृक्षात्पततीतिवद् वृक्षे पततीत्यपि स्यात् । स्वाश्रयप्रतियोगिकविभागवत्त्व- रूपपरम्परासम्बन्धेन पर्णवृत्तिस्पन्दस्य वृक्षेऽपि सत्त्वात् । अस्मन्मते चान्यत्र व्यापारे सप्तम्यर्थान्वयेऽपि अत्र ( भूमौ पततीत्यादौ ) व्युत्पत्तिवैचित्र्यात् अधःसंयोगरूपधात्वर्थ- तावच्छेदक एव तदन्वय इत्यदोषः । अन्ये तु भूम्यादेः कर्मत्वाविवक्षायां भूमिं पततीति प्रयोग इष्ट एव । अत एव नरकं पतित इत्यादिविग्रहे द्वितीयासमासविधानमुप- पद्यते । एवं च धात्वर्थतावच्छेदकतावच्छेदकफले द्वितीयार्थान्वय एव आश्रयानवच्छिन्नफलोपस्थितेरपेक्षा अग्निं जुहोतीति वारणाय स्वीकरणीयेति वदन्ति, तदपि न विचारचारु; तथा सति भूम्यादिपदोत्तरं कदाचित्सप्तमी कदाचिद्द्वितीयेत्यनियमप्रसङ्गात् । व्यापारांशे आधेयत्वा- न्वयविवक्षायां सप्तमी फलांशे तदन्वयविवक्षायां द्वितीयेति- नियमस्य- भूतले पततीतिप्रयोगानुपपत्त्युक्तयुक्त्या फलांश एव सप्तम्यर्थान्वयस्यावश्यं स्वीकरणीयतया- वक्तुमशक्य- त्वात् । अथैवमपि नरकं पतित इति प्रयोगस्य कथमुप- पत्तिः, नरकस्य अधिकरणानवच्छिन्नधात्वर्थतावच्छेदक- फलाश्रयत्वाभावात् । न च तत्र नरके पतित इत्येव प्रयोगः साधुरिति वाच्यम्, द्वितीयान्तस्य पतितशब्देन समासविधायकानुशासनविरोधात्- इति चेदत्राहुः ---अधः- संयोगावच्छिन्नस्पन्दार्थकपतधातुसमभिव्याहृतात् सुखास- म्भिन्नदुःखभोगावच्छेदकप्रदेशविशेषार्थकनरकपदाद् द्वितीया नेष्यत एव, तत्र सप्तम्या एवेष्टत्वात्; किन्तु भोगानुकूल- पातित्यार्थकपतधातुसमभिव्याहृतात् सुखासम्भिन्नदुःखार्थ- कनरकपदादेव विषयत्वरूपकर्मत्वार्थिका द्वितीया इष्यते, तस्य च विषयत्वस्य भोगेऽन्वयात् नरकं पतित इत्यतो दुःखविशेषविषयकभोगानुकूलपातित्यवानित्यर्थः प्रतीयते । एतादृशार्थे एव च द्वितीयान्तस्य पतितशब्देन सह समासा- नुशासनमपीति ।

## ( कतिपयधातुसमभिव्याहारे द्वितीयार्थान्वयविवेकः )

ब्राह्मणाय धनं ददातीत्यादौ स्वस्वत्वध्वंसविशिष्ट- परस्वत्वानुकूला इच्छा दाधात्वर्थः, तत्र तादृशस्वत्व ( विशिष्टपरस्वत्व ) रूपधात्वर्थतावच्छेदकफल एव द्वितीयार्था ( धेयत्वा ) न्वयः । उपेक्षायामतिव्याप्ति- वारणाय परस्वत्वनिवेशः । स्वत्वं च यथेष्टविनियोगार्ह- त्वम् । यत्र स्वधनस्य परसाधारणीकरणं तत्रापि परस्व- त्वानुकूलेच्छायाः सत्त्वाद् दानव्यवहारापत्तिरतःस्वस्वत्व- ध्वंसविशिष्टेत्युक्तम्, तथा च तत्र स्वस्वत्वस्यापि सत्त्वा- न्नोक्तापत्तिः । उपेक्षा च ममेदं माभूदित्याकारिका, तत्र

स्वस्वत्वनिवृत्तीच्छायाः सत्त्वेऽपि परस्वत्वानुकूलाया इच्छाया विरहान्नोक्तापत्तिः ( न दानव्यवहारापत्तिः ) । दानं न सम्प्रदानस्वत्वजनकं किन्तु तत्स्वीकार एवेति मते तु स्वस्वत्वध्वंसानुकूला परस्वत्वप्रकारिकैवेच्छा धात्वर्थः । तत्र स्वस्वत्वध्वंसरूपफलाश्रयत्वाद्धनस्य कर्मता । अत्र 'चैत्रस्यैतद्धन भवतु' इतीच्छायां परसाधारण्यप्रयोजिकायां दानव्यवहारातिप्रसङ्गवारणाय स्वस्वत्वध्वंसानुकूलत्व-निवेशः । उपेक्षायां पूर्वोक्तरूपायामतिप्रसङ्गवारणाय परस्वत्वप्रकारिकेत्युक्तम् । अथ गौर्मम मास्तु हिरण्यं चैत्रस्य भवत्विती्च्छाया उपेक्षात्मिकाया गोनिष्ठस्वस्वत्व-ध्वंसानुकूलाया हिरण्यधार्मिकचैत्रस्वत्वप्रकारिकायाः सत्त्वे चैत्राय गांददातीति प्रयोगापत्तिरिति चेन्न, स्वत्वप्रकार-कत्वविशिष्टेच्छायां स्वत्वध्वंसानुकूलत्वेन शाब्दबोधे भाने सामानाधिकरण्यसम्बन्धेन स्वत्वेऽपि स्वत्वध्वंसस्य भानो-पगमात् । प्रकृते गोनिष्ठस्वस्वत्वध्वंस-समानाधिकरणं यत् स्वत्वं तत्प्रकारकेच्छाविरहेणोक्तदोषासम्भवात् ।

धनं प्रतिगृह्णातीत्यादौ स्वस्वत्वजनकेच्छारूपस्वीकारो धात्वर्थः । स्वस्वत्वरूपफले च द्वितीयार्थान्वयः । तण्डुलं पचतीत्यादौ रूपादिपरावृत्तिजनकतेजः संयोगः ( विक्लित्य-नुकूलव्यापार इति यावत् ) धात्वर्थः । रूपादिपरावृत्ति-( विक्लित्ति ) रूपफले च तण्डुलादिवृत्तित्वरूपद्वितीया-र्थान्वयः । ओदनं भुङ्क्ते इत्यादौ गलाधोनयनं धात्वर्थः । तच्च गलाधः संयोगावच्छिन्नक्रियानुकूलव्यापारः । तादृश-क्रियारूपधात्वर्थतावच्छेदकफल एव ओदनवृत्तित्वान्वयः । अधिकरणानवच्छिन्नफलाश्रयस्यैव कर्मत्वव्यवस्थाया उक्ततया च गलाधोदेशस्य न कर्मत्वम् । एवमन्येष्वपि सकर्मकधातुषु तदर्थाः, तत्तदवच्छेदके फले च द्वितीयार्थान्वयः स्वय-मूहनीयः ।

## ( पुनः कर्मणस्त्रैविध्यम् )

इत्थं निर्वर्त्यादित्रिप्रकारेषु कर्मसु द्वितीयार्थविचारः साधारण्येनोक्तः । प्रकारान्तरेण कर्मणस्त्रैविध्यं वृत्या वर्णयति त्रिविधमप्येतत्पुनस्त्रिविधमित्यादिना । स्पष्टार्था वृत्तिः विवृता च न्यासेन । परे तु ईप्सिततमं तद्भिन्नं चेति भेदेन पूर्वं कर्मणः प्रकारद्वयं कृत्वा, ईप्सिततमस्य कर्मणो निर्वर्त्यविकार्य-प्राप्य-भेदेन त्रैविध्यं वर्णयन्ति । तद्भिन्नस्य च चतुर्विधत्वमाहुः तथा हि वाक्यपदीये—

> निर्वर्त्यञ्च विकार्यञ्च प्राप्यञ्चेति त्रिधामतम् ।
> तच्चेप्सिततमं कर्म, चतुर्धान्यत्तु कल्पितम् ।।
>
> औदासीन्येन यत्प्राप्तं यच्च कर्तुरनीप्सितम् ।
> संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम्"मिति ।।

तत्र औदासीन्येन प्राप्तं स्वमते इष्टानिष्टभिन्नतया अनुभयमितिशब्देन संगृहीतम् कर्तुरनीप्सितं च अनिष्टपदे-नोक्तम् । संज्ञान्तरैरनाख्यातं च प्रधानेतरभेदेन संग्रहीष्यते अनुपदमेव । अन्यपूर्वकञ्च, संज्ञान्तरप्रसङ्गे विशिष्य विहितम् । यथा 'क्रूरमभिक्रुध्यति' अत्र क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः ( २।२।२७ ) इति सूत्रेण सम्प्रदानसंज्ञायाः प्राप्तायाः 'नोपसर्गाद् क्रुद्द्रुहा' ( २।२।२८ ) इति निषेधे सोपसर्गस्य सकर्मकत्वं भवतीति द्वितीया विधीयते । अन्ये च तत्र कर्मसंज्ञामेव विदधतीति प्रक्रियाभेदः । यथा वा 'अधेः शीङ्स्थाऽऽस आधारः । ( २।२।२० ) इत्यादिना पूर्वमाधारस्य सतः कर्मसंज्ञा विधीयते । एतच्च स्वमतेऽग्रे वक्ष्यमाणप्रधानेतर-भेदेऽप्रधानशब्देन संग्रहीष्यत इति न किञ्चिन्न्यूनम् ।

## ( द्विकर्मकविवेकः )

इत्थं कर्मणो भेदान् द्विविभज्यापि प्रकारान्तरेण पुनर्वि-भजते– पुनस्तत् कर्म द्विविधं प्रधानेतरप्रभेदादिति । केषांचिद्धातूनां व्यापारद्वयार्थकत्वेन तत्तद्व्याप्यस्य कर्मणोऽपि द्वैविध्यमुचितमेवेति–तत्रैकं प्रधानं–मुख्यम् , परम् अप्रधानम्

गौणमिति तदनुसारिणी– उक्तानुक्तत्वव्यवस्था भवति। क्वेदृशद्विविधकर्मसंभव इति चेदत्राह–तत्र द्विकर्मकेष्वति। कर्मपदं तन्त्रेण क्रियापरमपि, तथा च व्यापारद्वयवत्त्वेनैव तेषां कर्मद्वयवत्त्वमिति तद्योगे विशिष्य कर्मसंज्ञाविधानार्थं यत् परैः सूत्रादि विधीयते तदनावश्यकमित्याकूतम्। तादृशधातून् परिगणयति– **दुहि–भिक्षी**त्यादिना। स्पष्टार्था वृत्तिः, न्यासेन सुस्पष्टीकृता च। अन्ये च फलद्वयसहितव्यापारवाचकत्वेनैषां त्र्यर्थकत्वमित्याचक्षते। तथा हि पदवाक्यरत्नाकरे म० म० गोकुलनाथोपाध्यायाः—

"धातोरुत्सर्गतो वृत्तिः फलव्यापारयोर्द्वयोः।
विद्यन्ते केचन त्र्यर्था दुह्याच्प्रच्छिरुधादयः" ॥

*इति स्वकीयां कारिकां विवृण्वन्त आहुः*— उत्सर्गतो धातूनां फलव्यापारावर्थौ द्वावेवेति प्रपञ्चितप्रायम्। दुहादयस्त्र्यर्थाः। तथा हि विभागः स्यन्दनं व्यापारश्च दुहेरर्थः। स्यन्दनत्वं द्रवद्रव्यजन्यतावच्छेदिका क्षीरादिक्रियावृत्तिर्जातिः। गां दोग्धि दुग्धं गोपाल इत्यत्र गोविभागो जनकतया स्यन्दने तच्च तथैव ( जनकतयैव ) गोपालव्यापारेऽन्वेति" इति तथा च पयोवृत्तिगोविभागजनकस्यन्दनजनकव्यापारवान् गोपाल इति गां दुग्धं दोग्धि गोपाल इत्यतोऽन्वयबोधः।

नैयायिकास्तु गां दोग्धि पयो गोपाल इत्यादौ द्विकर्मकधातुसमभिव्याहृतगवादिपदोत्तरद्वितीया क्रियाजन्यफलशालित्वादन्यदेव कर्मत्वं बोधयति। अपादानत्वादिधर्मान्तरावच्छिन्नस्यापि– अनुशासनेन ( अकथितं च पा० सू० १।४।५१ ) कर्मसंज्ञाभिधानात्। गवां पयो दोग्धिइत्यादौ धात्वर्थान्वयिनो दुग्धादेर्गवादिसम्बन्धो न विवक्षितोऽपि तु जन्यजनकभावसम्बन्ध एवेति तत्र कर्मत्वाविवक्षया शैषिकी षष्ठ्येव। अत्र धात्वर्थत्वं धात्वर्थतावच्छेदककोटिप्रविष्टसाधारणम्। गां पयो दोग्धीत्यादौ धात्वर्थतावच्छेदककोटिप्रविष्ट एव द्वितीयार्थान्वयात्। तथा हि क्षरणानुकूलो व्यापारो दुहेरर्थः। द्वितीयार्थश्च जनकत्वसम्बन्धेन क्षरणान्वयी विभागः, विभागे चाधेयतया प्रकृत्यर्थगवादेरन्वयः। एवं च धात्वर्थतावच्छेदकक्षरणरूपफले प्रधानकर्मक्षीराद्यन्वितद्वितीयार्थवृत्त्यन्वयः इति गोनिष्ठविभागानुकूलपयोनिष्ठक्षरणानुकूलव्यापारकर्ता गोपाल इति गां पयो दोग्धि गोपाल इति वाक्यतो बोधः। न च विभागोऽपादानत्वमेवेति तद्विवक्षायां द्वितीयानवकाशेति वाच्यम्– धातुवृत्तिग्रहविशेष्यान्वयिनो विभागस्यैवापादानत्वात्। वृक्षात्पर्णं पततीत्यादौ स्पन्दरूपविशेष्यांश एव पञ्चम्यर्थविभागान्वयात्।

वस्तुतो विभागावच्छिन्नक्षरणानुकूलो व्यापारो दुहेरर्थः। गोपदोत्तरद्वितीयार्थश्च विभागान्वयिनी वृत्तिरेव। न चैवं धात्वर्थतावच्छेदकफलशालित्वरूपं कर्मत्वमेवेहापि प्रतीयत इति न विशिष्य कर्मसंज्ञाविधानस्य विषय इति वाच्यम्, *धात्वर्थतावच्छेदकत्वस्य धातुवृत्तिग्रहविशेष्यांशे साक्षा*द्विशेषणत्वरूपत्वात्। यत्र च क्षरणानुकूलव्यापारमात्रं धात्वर्थतया विवक्षितं, क्षरणान्वयि–विभागश्च विभक्त्यर्थतया तत्रापादानत्वबोधिका पञ्चमी, तथा च कदाचिद् गां दोग्धि पयः, कदाचिद् गोभ्यो दोग्धि पयः इत्यनयोः प्रयोगयोर्व्यवस्थितत्वमेव।

अथवा गोभ्यो दोग्धि पय इत्यत्रापि विभागो धात्वर्थतावच्छेदककोटिप्रविष्ट एव वृक्षाद्विभजते इत्यत्रेवावधित्वरूपापादानत्वविवक्षायां पञ्चमी, आश्रयत्वविवक्षायां च द्वितीया। अवधित्वं चाश्रयत्वादन्यदेव सम्बन्धविशेषः। अत्र क्षरणान्वयिनः परसमवेतत्वस्य द्वितीयार्थत्वात् पयोनिष्ठक्षरणस्य पयोनिष्ठविभागजनकत्वेऽपि न पयः पयो दोग्धीति प्रयोगः। परत्वं विभागान्वयितावच्छेदकावच्छिन्नापेक्षया बोध्यम्। दुह्यते गौः क्षीरमित्यादौ क्षरणजन्यविभागाश्रयत्वं गवादिनिष्ठमप्रधानमाख्यातार्थः— 'अप्रधाने दुहादीना' मित्यनुशासनात्। क्षीरवृत्तित्वस्य धात्वर्थक्षरण एवान्वयः। तथा च विभागावच्छिन्नक्षीरनिष्ठक्षरणानुकूलव्यापारजन्यक्षरणजन्यविभागाश्रयो गौरित्याकारको बोधः। अथवा विभागक्षरणव्यापारेषु विशकलितेषु धातोः शक्तित्रयम्; विशिष्टलाभोऽन्वयबलात्। कर्माख्यातस्थले

चाकाङ्क्षावैचित्र्येण तेषां विशेष्यविशेषणभाववैपरीत्यात् व्यापारजन्यक्षरणजन्यविभागपर्यन्तस्य धातुत एव लाभः, आश्रयत्वमेवाख्यातार्थः । एवं च क्षरणविभागयोर्न द्विधा भानम् । गौणकर्मासमभिव्याहृते 'दुह्यन्ते क्षीराणि' इत्यादौ आत्मनेपदेन केवलेन धातुसहितेन वा विभागावच्छिन्नक्षरणाश्रयत्वरूपप्रधानकर्मत्वस्य बोधनेऽपि एकदा उभयविधकर्मत्वबोधनस्याव्युत्पन्नतया दुह्यन्ते क्षीराणि गौरित्यादयो न प्रयोगाः ।

दानं प्रतिश्रवो व्यापारश्च भिक्षेर्याचेर्वाऽर्थः । याचेर्यद्यप्यनुनये स्वव्यापारजन्यत्वप्रकारकेच्छायां वापि प्रयोगस्तथाऽप्युक्तरूपोऽर्थ उभयोः निर्विवादः । तदर्थग्रहणस्य वृत्तावुक्तत्वे एकेनैवोभयोर्ग्रहणे सिद्धेऽपि उभयोर्ग्रहणाद्भिक्षार्थस्यान्यस्य चेद्याचेरेव, याचेरेव चानुनयार्थस्य ग्रहणमित्यर्थद्वयं ज्ञाप्यत इति साम्प्रदायिकाः । तत्र देयत्वेनाभ्युपगमः प्रतिश्रवः । राजानं कनकं याचते इत्यत्र राजसमवेतं दानमनुकूलतया कनकविषये प्रतिश्रवे, स च स्वलिप्साप्रकाशके देहीत्यादिरूपे वाक्ये भिक्षुव्यापारे संसृज्यते । कनकविषयतैव द्वितीयार्थः । समवायेन दानप्रतिश्रवयोः समानाधिकरण्येऽपि समवायविषयत्वाभ्यां वैयधिकरण्यमस्तीति भवति प्रतिश्रवांशे धातोः सकर्मकत्वम् इति शाब्दिकाः ।

तार्किकाश्च स्वोद्देश्यकदानेच्छा याचेरर्थः । प्रधानकर्मगवाद्यन्वितद्वितीयार्थः विषयत्वम्, धात्वर्थतावच्छेदकदानेऽन्वेति । अथैवं यद्वस्तुविषयकं दानमप्रसिद्धं तद्वस्तुरूपकर्मसमभिव्याहृतधातुघटितवाक्यस्य का गतिरिति चेद्, 'गगनं दिदृक्षते' इत्यादिभ्रान्तपुरुषीयगगनादिप्रकारकदर्शनेच्छाबोधकवाक्यस्य या गतिः सैवेति गृहाण । गगनविषयकत्वप्रकारकदर्शनेच्छाबोधस्तत्रेति चेदत्रापि तादृशवस्तु (अदेयवस्तुविशेष) विषयिताप्रकारतानिरूपितस्वत्वेच्छानिष्ठविषयताशालीच्छाबोधः । तद्वाक्यस्य विशेषादर्शिविषयता च समानैव । 'पौरवं गां याचते' इत्यादौ पौरवपदोत्तरद्वितीयायास्तु वृत्तिरेवार्थः । तस्या दानेऽन्वयः । पौरवस्य तादृशदानाश्रयत्वमेवाप्रधानकर्मत्वम् । न चैवमिच्छाविशेषरूपदानस्याश्रयत्वं कर्तृत्वमेवेति वाच्यम्, धातुजन्यप्रतिपत्तिविशेष्यीभूतदानाश्रयस्यैव तत्कर्तृत्वरूपत्वात् । अत्र च दानस्य तादृशप्रतिपत्ताविच्छारूपधात्वर्थे विशेषणत्वात् । 'चैत्रेण पौरवो गां याच्यते' इत्यादावपि उक्तक्रमेण चैत्रवृत्तीच्छाविषयगोकर्मकदानाश्रयः पौरव इति बोधः ।

अत्र– राजानं कनकं याचते भिक्षुः, राजा च भिक्षवे न प्रतिशृणोति' इत्यत्र राजसमवेतप्रतिश्रवस्याप्रसिद्ध्या धात्वर्थान्वयबोधानुपपत्तिरिति दानं प्रतिग्रह इच्छा चेति त्रयो याचतेरर्थाः । तत्र प्रतिग्रहो ममेदमित्याकारकज्ञानविशेषः स्वीकारापरपर्यायः । द्वितीयाद्वयार्थःविषयता, आश्रयत्वञ्च । राजसमवेतं दानं प्रयोज्यतया प्रतिग्रहे सचोद्देश्यत्वाख्यविषयतया इच्छायामन्वेति । राजसमवेतदानप्रयोज्यस्य कनकविषयकस्य प्रतिग्रहस्योद्देश्यिनी येच्छा तदाश्रयो भिक्षुरित्येव तत्रान्वयबोधः । इच्छायां ज्ञाप्यमानत्वं विशेषणं बोध्यम् । तेन राज्ञः कनकं जिघृक्षति जिघृक्षाबोधकं देहीतिवाक्यमप्रयुञ्जाने जने 'राजानमयं कनकं याचते' इति न प्रयोगः, तत्रेच्छाया ज्ञाप्यमानत्वाभावात् । अत एव तत्र राज्ञो याचितं कनकं जिघृक्षतीत्येव प्रयोगः । प्रतिश्रवविरहेऽपि प्रतिग्रहस्यादेर्वोक्तस्थले नानुपपत्तिरिति । केचित्तु याचेः पृथग् भिक्षिग्रहणादेवार्थनिबन्धनेयं संज्ञेति ज्ञापयन्ति । तेन प्रार्थयतेरपि योगे द्विकर्मकत्वं दृश्यते– चैत्रं शतं प्रार्थयते इत्यादि । याचतेरर्थान्तरे ऽपि द्विकर्मकत्वख्यापनार्थं पृथग्ग्रहणमिति स्वमतमुक्तं प्राक् । तदपरे न मन्यन्ते– भिक्षतेरप्यर्थान्तरेऽपि द्विकर्मकत्वदर्शनात् । तथा हि 'भिक्षिता शतमखी सुकृतं यत्' इत्यादिनैषधीयप्रयोगादिषु– सकलाङ्गसाहित्यपूर्वकार्जनेऽपि प्रयोगो दृश्यतेऽतो भिक्षेरर्थान्तरेऽपि द्विकर्मकत्वम् ।।

नन्वेवं सर्वत्रैव प्राप्तीच्छाव्यापाराणां त्रयाणां याचत्यर्थत्वमस्तु राजानं कनकं याचते इत्यादावप्येतावतैव

चरितार्थत्वात् । व्यापारस्तु क्वचिद्दानं क्वचिदन्यादृशः । प्राप्तिस्तु सम्बन्धः । प्रकृते राजसमवेतं दानं प्रयोज्यतया कनकवृत्ति स्वस्वत्वरूपे सम्बन्धे स उद्देश्यितयेच्छाया-मन्वेति । 'याचमानः शिवं सुरान्' इत्यादौ सुरवृत्तिः-कृपाव्यापारः, शिव ( कल्याण ) वृत्तिस्वसमवेतत्वं प्राप्तिः, तयोरन्वयः पूर्ववत् । 'भिक्षिता शतमखीत्यत्र' सकलाङ्ग-साहित्यं शतमखीव्यापारः, तदाश्रयः कर्मप्रत्ययस्यार्थः, सुकृतवृत्तिस्वसमवेतत्वं प्राप्तिः, इच्छाया उद्देश्यतया सुकृतवृत्तिस्वसमवेतत्वे, तस्य प्रयोजकतया सकलाङ्गसाहि-त्यरूपे व्यापारे, तस्याश्रये विशेषणतया अन्वयः, आश्र-यस्याभेदेन शतमख्यामन्वयः, इति । 'कृपणं याचते' 'दण्डकावनतरून् सीतां याचते' इत्यादौ कृपणवृत्तिव्यापा-रस्य कनकवृत्तिस्वत्वरूपप्राप्तौ, दण्डकावनतरुवृत्तिव्यापा-रस्य सीतावृत्तिस्वसन्निधानस्वरूपप्राप्तौ,—प्रयोज्यत्वबा-धेऽपि, बाधितस्य प्रयोज्यत्वसम्बन्धस्येच्छयावगाहन-सम्भ-वात् नान्वयानुपपत्तिः, इच्छाया बाधितार्थविषयकत्वस्य स्वीकृतत्वात् । सन्निधानं तु संयोगः, स्वल्पतरसंयोग-घटितपरम्परासम्बन्धावच्छिन्नसामानाधिकरण्यं वा । न चैवं दण्डव्यापारप्रयोज्याया घटप्राप्तेः इच्छा कुलालेऽस्तीति दण्डं घटं याचते कुलाल इति प्रयोगः स्यादिति वाच्यम्, इच्छायां पूर्ववत् ज्ञाप्यमानत्वविशेषणेन तद्वारणात् । न च ज्ञाप्यमानत्वं ज्ञानविषयत्वमेव; तस्य विशेषणत्वं न सम्भ-वति अव्यावर्तकत्वात्; भगवज्ज्ञानविषयत्वस्य सर्वत्र सत्त्वात्; याचत्यर्थव्यापाराश्रयज्ञानविषयत्वस्य तत्त्वे, 'दण्ड-कावनतरून् याचते' इति प्रयोगानुपपत्तिः; व्यापाराश्रय-दण्डकावनतरुज्ञानाप्रसिद्धेः-इति वाच्यम्, व्यापाराश्रयज्ञाने-च्छास्वरूपजिज्ञापयिषाविषयत्वस्येच्छाविशेषणत्वोपगमात् । इच्छाया बाधितार्थविषयकत्वसम्भवेन तरुज्ञानाप्रसिद्धावपि तरुजिज्ञापयिषाविषयत्वस्य स्वसम्बन्धेच्छायां सम्भवान्नानु-पपत्तिः । घनं जलं याचन्ते सस्यानीत्यादावचेतनसस्या-दिकर्तृकयाचनप्रयोगे याचतेरिच्छास्थाने पुष्टिरर्थः । तत्र घनवृत्तिव्यापारप्रयोज्यजलसम्बन्धप्रयोज्यपुष्टिस्वरूपयोग्यानि सस्यानीत्यादिरूपेणान्वयबोधः इति चेद्;—अस्तु व्यापा-रादित्रिकं याचतेस्तत्पर्यायस्य भिक्षत्यादेश्चार्थः । यथा-प्रयोगं तद्व्यवस्थायाः सुकरत्वादिति । उत्तरमनुशास्यत्व-मनुयोगश्च पृच्छेरर्थः । सामान्यवति विशेषबोधकं वचन-मुत्तरम् । जिज्ञास्यत्वेन प्रतिपत्तिरनुशास्यता । किमादि-शब्दघटितवाक्यादिरनुयोगः । 'जानपदं पन्थानं पृच्छति पथिक' इत्यत्र परम्परया जानपदाश्रितमुत्तरं पथविषयक-जिज्ञासितत्वप्रतिपत्तौ सा च 'कः पन्थाः' इत्यादिप्रश्नवाक्ये जनकतयान्वेति । अत्रोत्तरमात्रं फलम् । तच्च कृति-द्वाराधिकरणेन, ज्ञानद्वारा विषयेण कर्मणान्वितमिति ।

अत्र—'जानपदं पन्थानं पृच्छति' जानपदः पथिकाय न किञ्चिदुत्तरयतीत्यत्रोत्तरस्याप्रसिद्ध्या पूर्ववद्धात्वर्था-न्वयबोधानुपपत्तिरिति व्यापारप्रयोज्यविशेषज्ञानेच्छैव धात्वर्थः । तत्र त्रिषु खण्डश एव शक्तिः । द्वितीययोश्च, क्रमेण व्यापारीयविषयत्वसंसर्गावच्छिन्नत्वं, विषयत्वसंसर्गा-वच्छिन्नं चाधेयत्वमर्थः । व्यापारस्य प्रयोज्यतया विशेष-ज्ञाने तस्योद्देश्यितया इच्छायामन्वयात्— जानपदवृत्तिव्या-पारप्रयोज्यस्य पथविषयकस्य विशेषधर्मप्रकारकज्ञानस्य उद्देश्यिनी येच्छा तदाश्रयः पान्थ इति बोधः, इच्छायां पूर्ववत्- ज्ञाप्यमानत्वविशेषणात् प्रतिवादिनो विशेषेण शास्त्रार्थं ज्ञातुमिच्छति किंशब्दादिघटितवाक्यमप्रयुञ्जाने जनेऽप्रतिवादिनं शास्त्रार्थं पृच्छतीति न प्रयोगः । एवमेव महावीरचरितनाटके- सीतान्वेषणार्थं दण्डकारण्ये परि-भ्रमतः शोकाकुलचित्तस्य श्रीमतो रामचन्द्रस्य- वाक्ये—

"रक्ताशोक ! कृशोदरी क्व नु गता त्यक्त्वानुरक्तं जनम्;
नो दृष्टेति मुधैव चालयसि किं वातावधूतं शिरः ।
उत्कण्ठाघटमानषट्पदघटासंघट्टदष्टच्छदः;
तत्पादाहतिमन्तरेण भवतः पुष्पोद्गमोऽयं कुतः ?"

इत्येवं प्रयोगदर्शनात् कल्पिते 'रक्ताशोकं कृशोदरीं पृच्छति रामचन्द्र इति वाक्ये, रक्ताशोकव्यापारस्य व्यधि-करणीभूतप्रयोज्यत्वस्वरूपसंसर्गस्य कृशोदरीकर्तृकगमनकर्म-देशीयविशेषज्ञाने इच्छयावगाहनसम्भवान्नानुपपत्तिरिति ।

तार्किकास्तु जिज्ञासाबोधकव्यापारः पृच्छेरर्थः। जानपदं पन्थानं पृच्छति इत्यत्र बोधे जानपदवृत्तित्वस्य जिज्ञासायां पथिविषयकत्वस्यान्वय इत्याहुः।

विभागानुत्पादः कर्मानुत्पादो व्यापारश्च रुधेरर्थः। 'व्रजं गामवरुणद्धि' इत्यत्र व्रजविशेषितो विभागानुत्पादो गोः कर्मानुत्पादे प्रयोज्यप्रयोजकभावेन स्वरूपसम्बन्धविशेषेण जनकतयान्वेति। व्रजपदादिसमभिव्याहृता द्वितीया भेदमाधेयत्वं चाभिधत्ते। तेन गां गां रुणद्धीति न प्रयोगः। अन्यथा गोनिष्ठविभागानुत्पादस्य गोनिष्ठकर्मानुत्पादे दर्शितजनकत्वेनान्वयस्य निराबाधतया तादृशकर्मानुत्पादकृतिमान् देवदत्त इति बोधस्तत्र दुर्वार एव स्यात्। भेदस्य तदर्थत्वे तु गोनिष्ठभेदप्रतियोगितावच्छेदकत्वस्य गोनिष्ठव्यापारे सत्त्वात् न तथा प्रयोगः। अत्र च विभागानुत्पादस्य धात्वर्थव्यापारविशेषणीभूतकर्मानुत्पादे विशेषणत्वात् गौणफलत्वेन तद्वतो व्रजस्य गौणकर्मत्वं गोश्च प्रधानकर्मत्वम् इति शाब्दिकाः।

तार्किकास्तु देशान्तरसंचारविरोधिव्यापारो रुधेरर्थः। 'गां व्रजमवरुणद्धि' इत्यत्र– संचारविरोधित्वं संचारानुत्पादप्रयोजकत्वम्। अनुत्पादे प्रधानकर्मगोवृत्तित्वान्वयः देशविशेषणभेदे व्रजमितिद्वितीयान्तार्थव्रजप्रतियोगित्वान्वयः। तथा च गोवृत्तिर्यो व्रजान्यदेशसंचारानुत्पादस्तत्प्रयोजकव्यापारानुकूलकृतिमान्– इति बोधः। रुध्यते गां व्रज इत्यादिकर्मप्रत्ययस्थले च कर्तृवृत्तिव्यापारप्रयोज्यो यो गोवृत्तिसंचारानुत्पादस्तदधिकरणदेशभिन्नो व्रज इति बोधः।

प्रतियोग्युत्पत्तिद्वितीयक्षणोत्पन्नसंयोगस्य प्रतिद्वन्द्वी विभागः कर्मव्यापारश्च चिनोतेरर्थाः। अवयवसंयोगजसंयोगस्य प्रतियोग्युत्पत्तिद्वितीयक्षणेऽप्युत्पत्तिसंभवान्नानुपपत्तिः। वृक्षमवचिनोति फलानि भिक्षुरित्यादौ वृक्षवृत्तितादृशविभागः फलवृत्तिकर्मणि भिक्षुव्यापारे प्रयोजकतयाऽन्वेति इति नैयायिकाः। संयोगध्वंस उत्क्षेपणत्वजात्याश्रयाकर्षणकर्म व्यापारश्च चिनोतेरर्थाः। वृक्षं फलमवचिनोतीत्यत्र वृक्षसंयोगध्वंसः उत्क्षेपणत्वजात्याश्रये तदाकर्षणकर्मणि फले, तच्च पुरुषव्यापारे जनकतया विशेषणम्। आकर्षणकर्मण उत्क्षेपणत्वजात्याश्रयरूपेण विवक्षणात् घटं जलं चिनोतीति न प्रयोगः। अन्यथा घटवृत्तिसंयोगध्वंसानुकूलजलवृत्तिकर्मानुकूलव्यापारस्य पुरुषे सत्त्वात् दुर्वार एव तादृश–( घटं जलं चिनोति ) प्रयोगः स्यात्। यदि चैवं सत्यपि कूपं जलं चिनोतीत्यस्यापत्तिः, अनुपपत्तिश्च पुष्पस्याधाराकर्षणे वृक्षं पुष्पं चिनोतीत्यस्येति विभाव्यते तदा विभागकर्म, ग्रहणव्यापारश्चेत्युभयमेव चिनोतेरर्थो वाच्यः। तथा विभागः कर्मणि प्रयोजकतयान्वेति, कर्म च ग्रहणव्यापारेऽन्वेति। तच्च ( कर्म ) सांसिद्धिकद्रवत्वासमानाधिकरणमेव ग्राह्यं व्युत्पत्तिवैचित्र्यात्। तेन जलं चिनोतीत्यस्य नापत्तिः, न वा क्षेत्रं खलं वा धान्यं चिनोति, वनं शुष्कगोमयानि चिनोतीत्यस्य चानुपपत्तिः। कूपं जलं चिनोतीत्यस्य पृथवीवृत्तित्वस्य कर्मणि विशेषणत्वेऽपि वारणसम्भवात्। 'भाण्डं तैलं चिनोति' इत्यापत्तेः;

"अयमपि खरयोषित्कर्णकाषायमीषद्–
विसृमरतिमिरौर्णाजर्जरोपान्तमर्चिः।
मदकलकलविङ्कीकाकुनान्दीकरेभ्यः,
क्षितिरुहशिखरेभ्यो भानुमानुच्चिनोति"

इति कविवाक्यानुसारं 'क्षितिरुहशिखरेभ्यो भानुमानर्चिरुच्चिनोति' इति प्रयोगस्यार्चिषस्तैजसत्वेन तत्कर्मणः पृथिव्यवृत्तित्वादनुपपत्तेश्च वारणाय सांसिद्धिकद्रवत्वासमानाधिकरणत्वं विशेषितम्। पञ्चमी चात्र ( क्षितिरुहशिखरेभ्य इत्यत्र ) विभागात्मकगुणफलस्यावधित्वविवक्षायां गोभ्यः पयो दोग्धीत्यत्रेव साधुः। पूर्वोक्तस्य संयोगध्वंसस्य गुणफलत्वे तु तस्य सावधित्वाभावादुक्तपद्यपञ्चम्यनुपपत्तिरेव स्यात्। यदि चैवं सत्यपि इष्टकां चिनोतीत्यस्यानुपपत्तिः, तत्र संयोगस्यैव सत्त्वेन विभागाभावादिति कथ्यते तदा सजातीयसंयोग उत्पत्तिर्व्यापारश्च

चिनोतेरर्थाः । इष्टकावृत्तिसजातीयप्रतियोगिकसंयोगो व्यापारे प्रयोजकतयाऽन्वेति । यदि च इष्टकां भित्ति चिनोतीति प्रयोगस्तदा इष्टकावृत्तितादृशसंयोगस्य भित्तिवृत्त्युत्पत्तौ तस्याः प्रयोजकतया व्यापारेऽन्वयादिष्टकावृत्तिसजातीयसंयोगप्रयोज्यभित्तिवृत्त्युत्पत्तिप्रयोजकव्यापारकर्ता इति भित्तिमिष्टकां चिनोतीत्यतः शाब्दबोधः । तथा च चिनोतेरर्थान्तरेऽपि द्विकर्मकत्वमेषितव्यमेवेति निष्कर्षः ॥

शाब्दबोधः स्मरणं शब्दश्च ब्रुवेरर्थः । शिष्यं धर्मं ब्रवीतीत्यत्र शिष्यसमवेतशाब्दबोधो धर्मविषयकस्मरणे, तच्च वचने जनकतयाऽन्वेति । यदि शब्दाभावेऽप्यभिनयादिना बोधनेऽपि ब्रुवेः प्रयोगः प्रामाणिकैरादृतस्तदा शाब्द–बोध–शब्दयोः स्थाने ज्ञानसामान्यव्यापारौ निवेश्यौ । शब्दानुकूलव्यापारमात्रस्य तदर्थत्वं पूर्ववत्, शाब्दबोधस्य फलीभूतस्य समवायेन शिष्ये, विषयतया धर्मे सत्त्वाद् द्विकर्मकत्वं ब्रुवेरिति शाब्दबोध एव ब्रवीतिफलम् । स च समवायविषयोभयगामीत्यन्यत् । ब्रुविपर्याया वदत्यादयोऽपि द्विकर्मका एव । तेन "शिलोच्चयोऽपि क्षितिपालमुच्चैः प्रीत्या तमेवार्थमभाषतेवे"ति ( रघुवंश द्वि० स० ) प्रयोगोऽपि व्याख्यातः । यत्तु ज्ञानानुकूलः शब्दो ब्रुवेरर्थः । शिष्यं धर्मं ब्रवीतीत्यत्र ज्ञानरूपफले शिष्यसमवेतत्वं, धर्मविषयकत्वं च द्वितीयान्तार्थद्वयमन्वेति इति तदसत्, ज्ञानस्यकस्यैव फलतया गुणफलाभावेन शिष्यादेर्गौणकर्मत्वानुपपत्तेः, शिष्यं धर्मं ब्रवीति, शिष्यस्तु न शृणोतीति प्रयोगानुपपत्तेश्च ॥

कृतिरुपदेशो व्यापारानुगुणेच्छा च शास्तेरर्थः । कृतिः प्रवृत्तिर्निवृत्तिश्च । उपदेश इष्टसाधनत्वेनानिष्टसाधनत्वेन वा ज्ञानं बोध्यम् । शिष्यं धर्ममधर्मं वा शास्ति गुरुरित्यत्र शिष्यसमवेता प्रवृत्तिर्निवृत्तिर्वा विषयतया धर्मवृत्तावधर्मवृत्तौ वा, इष्टसाधनत्वेनानिष्टसाधनत्वेन वा ज्ञाने प्रयोजकतयोद्देश्यतया वाऽन्वेति । इच्छाया धात्वर्थे निवेशात् शिष्यं धर्मं शास्ति, शिष्यो धर्मे न प्रवर्तते न वा तमिष्टसाधनत्वेन जानातीत्यादिप्रयोगस्य नानुपपत्तिः ॥

भङ्गस्त्यागो ग्रहणव्यापारश्च जयतेरर्थः । भङ्गो द्यूतादौ समीहिताक्षदायाद्यनुपहितेच्छा, युद्धादौ पलायनादिः । आक्षिकं शतं जयतीत्यत्र आक्षिकसमवेताक्षदायाद्यनुपहितेच्छाविषयतया शतवृत्तौ त्यागे, स च ग्रहणव्यापारे प्रयोज्यतयाऽन्वेति । शत्रुं महीं जयतीत्यत्र शत्रुवृत्तिपलायनादिकं विषयतया महीवृत्तौ त्यागे, स च ग्रहणव्यापारे प्रयोज्यतयाऽन्वेतीति ॥

स्वस्वत्वनिष्ठानिष्टसाधनज्ञानप्रयोज्यद्वेषः, त्यागो, ग्रहणव्यापारश्च दण्डयतेरर्थः । गर्गान् शतं दण्डयतीत्यत्र गर्गवृत्तिस्तादृशद्वेषो विषयतया शतवृत्तौ त्यागे, स च ग्रहणव्यापारे प्रयोज्यतयाऽन्वेति । शतानर्पणजन्यदण्डताडनादिसम्भावनया शतस्वत्वे द्वेषः, ततः शतस्वत्वनाशेच्छारूपः त्यागः, इति धात्वर्थसङ्गमनोपपत्तिरिति ॥

अवयवसंयोगनाश उद्गमनकर्म, व्यापारश्च मथ्नातेरर्थः । दधि घृतं मथ्नातीत्यत्र सामानाधिकरण्येन दधिवृत्तिरवयवसंयोगनाशो घृतसमवेतोद्गमनकर्मणि प्रयोज्यतया, उद्गमनकर्म प्रयोजकतया विलोडनव्यापारेऽन्वेति । घृतस्य दधिनाशजन्यत्वाद्दध्यवयवसंयोगनाशस्य घृतकर्मप्रयोजकत्वाद्भवति धात्वर्थोपपत्तिः । एवं क्षीरसागरं सुधां मथ्नातीत्यत्रापि क्षीरसागरावयवसुधासंयोगानां सुधोद्गमनप्रतिबन्धकानां नाशे सति मन्दरादिसंयोगजन्यं सुधोद्गमनं भवति– इति तादृशावयवसंयोगनाशप्रयोज्यत्वं सुधोद्गमने सम्भवतीति नानुपपत्तिरिति ॥

विक्लित्तिरुत्पत्तिर्व्यापारश्च पचेरर्थः । 'तण्डुलानोदनान् पचति इत्यत्र तण्डुलवृत्तिविक्लित्तिरोदनवृत्तावुत्पत्तौ सा च प्रयोजकतया व्यापारेऽन्वेति, विक्लित्तिकर्मत्वं तण्डुलानाम् उत्पत्तिकर्मत्वं चौदनानाम् ॥

स्वामित्वे सति विनियोगानुत्पादोऽस्वामिसम्बन्धो व्यापारश्च मुष्णातेरर्थः । वणिजं हिरण्यं मुष्णातीत्यत्र स्वामिवणिग्वृत्तिः विनियोगानुत्पादो हिरण्यवृत्तावस्वामिस्वसम्बन्धे, स च तस्करव्यापारे प्रयोजकतयान्वेति । विनियोगो दानविक्रयादिः । सम्बन्धः संयोगसामानाधिकरण्यादिरिति ॥

प्रेरकपुरुषदेशावधिकप्रेर्यदेशवृत्ति–परत्वनिरूपितापरत्वासमानाधिकरणसंयोगः कर्म व्यापारो नयतेर्वहतेश्चार्थः। वहतेरर्थे प्रेरकप्रेर्ययोः स्थाने वोढृवोढव्यौ वा समावेशनीयौ। तादृशापरत्वसमानाधिकरणः संयोग आङ्पूर्वस्य नयतेरर्थे निविशते। व्यापारस्तु नयतेः प्रेरणादिः, वहतेराधेयकर्मानुकूलाधारकर्मादिः। ग्राममजां नयतीत्यत्र ग्रामवृत्तिस्तादृशसंयोगोऽजावृत्तिकर्मणि तच्च पुरुषप्रेरणास्वरूपे व्यापारे कर्मणि प्रयोजकतयाऽन्वेति। 'ग्रामं भारं वहति पुरुषो,' द्वीपं सांयात्रिकं वहति नौः' इत्यादौ ग्रामवृत्तिसंयोगो भारवृत्ति कर्मणि, तच्च पुरुषव्यापारे कर्मणि प्रयोजकतयाऽन्वेति। वहतेस्तु क्वचित्– सम्बन्धप्रतियोगित्वे अप्यर्थो। यथा "वहति यः परितः कनकस्थलीः सहरितालसमानमहाद्युतिः" इत्यादिमाघकविप्रयोगे (शिशुपालवधे रैवतकगिरिवर्णनप्रसङ्गे)। अत्र हि कनकस्थलीवृत्तिः संयोगः स्वरूपेण प्रतियोगित्वे, तच्च निरूपकतया तिङर्थाश्रयत्वेऽन्वेति। एवमन्यत्रापि साक्षात्परम्परास्वरूपः सम्बन्धो बोध्यः। परम्परासम्बन्धो यथा गन्धं वहति वायुः इत्यादौ ॥

कर्षकदेशावधिककर्षणीयदेशवृत्तिपरत्वनिरूपितापरत्वसमानाधिकरणसंयोगः, कर्म, व्यापारश्च कर्षतेरर्थः। भूमिं शाखां कर्षति फलार्थीत्यत्र भूमिवृत्तिस्तादृशसंयोगः शाखावृत्तिकर्मणि तच्च फलार्थिव्यापारे प्रयोजकतयाऽन्वेति। एवमजां ग्रामं कर्षतीत्यादावपि बोध्यम् ॥

संयोगः कर्म व्यापारश्च हरतेरर्थः। स्वगृहं परधनं हरति तस्करः इत्यादौ स्वगृहवृत्तिसंयोगः परधनवृत्तिकर्मणि तच्च तस्करव्यापारे प्रयोजकतयाऽन्वेति। तथा च स्वगृहवृत्तिसंयोगप्रयोजकपरधनवृत्तिव्यापारानुकूलव्यापारकर्ता तस्कर इति बोधः।

उपादानव्यापार उत्पत्तिर्व्यापारश्च करोतेरर्थः। उपादानव्यापारस्तु क्वचित् संयोगः– यथा वीरणं कटं करोतीत्यत्र वीरणवृत्तिसंयोगः कटवृत्तावुत्पत्तौ प्रयोज्यतया सा च पुरुषव्यापारे प्रयोजकतयाऽन्वेति। क्वचिच्च क्रियारूपः, यथा कनकं कुण्डलं करोतीत्यत्र कनकवृत्तिक्रिया कुण्डलवृत्तावुत्पत्तौ प्रयोज्यतयाऽन्वेति। क्वचित्पुनः अवयवसंयोगनाशः, यथा काष्ठं भस्म करोतीत्यत्र परम्परया काष्ठवृत्तिः अवयवसंयोगनाशः भस्मोत्पत्तावन्वेति ॥

एतत्सूत्रवृत्तौ–दुहि–भिक्षि–रुधि–प्रच्छि–चिञ्–ब्रू–शास्, याचि–जि–इत्येवं रूपेण नव धातव एव पूर्वमुक्ताः, तथापि प्रभृतिग्रहणेन ततोऽन्येऽपि–दण्ड–पचि–मुष्णातयः, ग्राह्याः। न्यादयश्च चत्वारः नी–वह हृ–कृषः इति मिलिताः षोडशधातवः एतदर्था अन्येऽपि च द्विकर्मकाः। स्वमते च वृत्तौ ग्रहेरपि द्विकर्मकत्वं दर्शितम्– तथा हि शतानीकं शतं गृह्णातीति प्रयोग उदाहृतः। अन्ये च वैयाकरणाः केचिदिदं न मन्यन्ते तथाहि– तैः परिगणिता एव धातवः।

"दुह्–याच् पच्–दण्ड–रुधि–प्रच्छि–चि–ब्रू–शासु–जि–मथ्–मुषाम्।
कर्मयुक् स्यादकथितं तथा स्यान्नी– हृ–कृष्– वहाम् ॥

इति (सिद्धान्तकौमुद्यां भट्टोजिदीक्षिताः) एषु ग्रहेर्नोपादानम्। न च जयत्यर्थतया ग्रहेर्ग्रहणम्, तस्य तदर्थत्वानुभवाभावात् ॥

एषु धातुषु प्रधानाप्रधाने द्वे कर्मणी। तत्र यदुद्देशेन क्रियाप्रवृत्तिस्तत्प्रधानं कर्म। पयः प्राप्तुमिच्छन् हि गां दोग्धीति पयः प्रधानं कर्म। एषु न्यादयश्चत्वार एव वस्तुतो द्विकर्मकाः। अन्ये तु अपादानादिविशेषाविवक्षायामेव द्विकर्मकत्वं लभन्ते। अत एव परैः (पाणिन्यादिभिः। गवादीनां कर्मसंज्ञाविधानार्थम् अकथितञ्च (१।४।५१) इति सूत्रमन्वाख्यायते। स्वमते चैषां व्यापारद्वयार्थकत्वेन फलद्वयसम्बन्धान्मुख्यफलाश्रयस्येव गौणफलाश्रयस्य गवादेरपि कर्मत्वं स्वाभाविकमेवेति न तादृशं सूत्रमारभ्यते। अन्ये तु तत्सूत्रसार्थक्यमित्थमुपपादयन्ति कर्तृप्रत्ययान्तेन धातुना स्वार्थविशेष्यतया प्रतिपाद्यमानो व्यापारः, स्वार्थविशेषणतया प्रतिपाद्यमानं फलम्। स्वजन्यस्मरणमुख्यविशेष्यतया भासमानः स्वार्थः। तत्र विशेष्यविशेषणते आकाङ्क्षानियम्ये, न तु प्राकृते (स्वाभाविके) अर्थात्– यन्निष्ठविशेषणतानिरूपितयन्निष्ठविशेष्यतानिरूपकान्वयबोधो यत्तद–

समभिव्याहृतयत्तदाभावप्रयोज्यस्तयोः क्रमेण विशेषणत्वं विशेष्यत्वं चेति नियमविषयीभूते एव विशेष्यविशेषणत्वे अत्र लक्षणे प्रविष्टे न तु स्वाभाविके। धातौ कर्तृप्रत्ययान्तत्वोपादानेन कर्मप्रत्ययान्तेन धातुना फलस्य प्राधान्येन प्रतिपादनेऽपि न तस्य व्यापारत्वम्। स्वार्थविशेष्यतयेति ( व्यापारलक्षणे ) दानात् कर्मप्रत्ययान्ते गुणतया भासमानस्य व्यापारस्य न फलत्वम्। विशेष्यतायां स्वार्थनिरूपितत्वनिवेशेन फलतावच्छेदकविशेष्ये फले न व्यापारत्वम्, न वा व्यापारविशेषणे व्यापारतावच्छेदके फलत्वम्। स्वजन्यस्मरणविषयमात्रस्य स्वार्थत्वे फलतावच्छेदकेऽपि तादृशस्मरणीयप्रकारतारूपविशेषणतायाः सत्वादुक्तदोषः स्यादिति तदपहाय मुख्यविशेष्यत्वस्य स्वार्थलक्षणे निवेश इति भावः। किं च तादृशस्मरणविशेष्यतया व्यापारस्य स्वार्थत्वात् तत्र विशेषणीभूतस्यापि व्यापारतावच्छेदकस्य विशेषणत्वमवच्छेद्यस्य च विशेष्यत्वमित्यस्य तयोः स्वभावतया तद्विशेषणताया नाकांक्षाप्रयोज्यत्वमिति 'न प्राकृते' इत्युक्तमिति च बोध्यम्।

फलव्यापारयोरुक्तरूपतया च गां दोग्धि दुग्धं गोपाल इत्यत्र स्यन्दनं पुरुषव्यापारश्च क्रिये, स्यन्दनं विभागश्च फले। धात्वर्थे विभागे फले विशेष्यतया स्यन्दनस्य, स्यन्दने विशेष्यतया पुरुषव्यापारस्य क्रियात्वम् (उक्तलक्षणव्यापारत्वम्) पुरुषव्यापारे विशेषणतया स्यन्दनस्य स्यन्दने विशेषणतया विभागस्य च फलत्वमिति भावः। दर्शितरीत्या तयोः ( स्यन्दनपुरुषव्यापारयोः ) क्रियात्वे च मुख्यव्यापारशालितया गोपालस्येव स्यन्दनरूपगुणव्यापार-वत्तया दुग्धस्यापि कर्तृत्वप्रसक्त्या तदपवादाय अकथितञ्च (१।४। ६३)इति पाणिनीयसूत्रमारब्धव्यमेवेति। स्वमते तु विवक्षयैव द्वयोरपि कर्मसंज्ञेति न कर्तृसंज्ञाप्रसक्तिरिति तत्सूत्रं नारब्धं विवक्षातः कारकाणि भवन्तीत्युक्तेः। अत एव अपादानत्वविवक्षायां गोः पयो दोग्धीत्यपि प्रयोगः। सम्बन्धमात्रविवक्षायां च तत्र षष्ठ्यपि प्रयोक्तव्येति विज्ञेयम्।

## (अथैषु, कुतः कस्मिन् कर्मणि प्रत्यय इति विचार्यते)

अत्र द्विविधा धातवः पठिताः दुह्यादयः न्यादयश्च। तत्र दुह्यादिभ्यो द्वादशभ्यो धातुभ्यः, प्रधानकर्मविवक्षायामविवक्षायामपि वा कर्मप्रत्ययेन गौणकर्मैवाभिधीयते। यथा गौः पयांसि दुह्यते दुग्धा वेत्यत्राप्रधानकर्मणो गोरेव प्रथमा, तद्वृत्तिकर्मत्वस्य आख्यातेन, क्तेन वोक्तत्वात्। प्रधानकर्मणो दुग्धस्याविवक्षणे तु गौर्दुह्यते दुग्धमित्येवम्। प्रधानकर्मण एव विवक्षायां गौणकर्मणोऽविवक्षायां च कर्मप्रत्ययेन प्रधानकर्मैवाभिधीयते यथा— पयांसि दुह्यन्ते दुग्धानि वा। न्यादीनां चतुर्णां पञ्चानां वा कर्मप्रत्ययसमभिव्याहारे गुणकर्मणोऽपि विवक्षायां प्रधानकर्मैवाभिधीयते यथा अजा ग्रामं नीयते नीता वा। प्रधानकर्मणोऽविवक्षायां तु तेभ्योऽपि विहितेन कर्मप्रत्ययेन गौणकर्मैवाभिधीयते यथा अजा नीयते। एवं 'राजा कनकं याच्यत' इति गौणकर्मण उक्तत्वात्प्रथमा। अत्रापि गुणकर्मणोऽविवक्षायां कनकं याच्यते, याचितं वेत्यत्र प्रधानकर्मैवाभिहितम्। एवं व्रजो गामवरुध्यते, अवरुद्धो वा, प्रधानमात्रविवक्षायां गौरवरुध्यतेऽवरुद्धा वेति। जानपदः पन्थानं पृच्छ्यते पृष्टो वा, पन्था पृच्छ्यते पृष्टो वेति। चुदिरपि प्रच्छि-पर्यायतया प्रयुज्यते। अत एव 'अहमपीदमचोद्यं चोद्ये' इति भाष्यप्रयोगः। अत्रापि गुणकर्मणोऽस्मद एवोक्ततया तत्रैव प्रथमा। तरुः पुष्पमवचीयतेऽवचितो वा प्रधानाविवक्षायां पुष्पमवचीयते अवचितं वेति। अत एव 'अवचितकुसुमा विहाय वल्ली'रिति माघकविप्रयोगेऽवचितशब्दस्य कर्मणा ( प्रधानेन ) समासः। शिष्यो धर्ममुच्यते, उक्तो वा। शिष्यस्याप्रधानकर्मणोऽविवक्षायां उच्यते धर्मो गुरुणा, उक्तो वा। एवमनुशास्यते शिष्यः, धर्मो वेति पूर्ववद्विज्ञेयम्। आक्षिकः शतं जीयते, जितो वा, प्रधानाविवक्षायां जीयते जितं वा शतम्। अत एव--

"कृतप्रणामस्य महीं महीभुजे,
जितां सपत्नेन निवेदयिष्यतः।

न विव्यथे तस्य मनो, न हि प्रियं,
प्रवक्तुमिच्छन्ति मृषा हितैषिणः ॥"

इति (किरातार्जुनीय–प्रथमसर्गे) भारविप्रयोगे प्रधानकर्मण्येव क्तप्रत्ययो विहितः। 'गर्गाः शतं दण्ड्यन्ते' इति दण्ड्यते वा शतमित्यपि। क्षीरनिधिः कौस्तुभं मथ्यते, कौस्तुभो मथित इति वा 'देवासुरैरमृतमम्बुनिधिर्ममन्थ' इति च कविप्रयोगेऽप्रधानकर्मण्येव प्रत्ययः। तण्डुलः ओदनं पच्यते, पक्वो वा, प्रधानकर्ममात्रविवक्षायां 'पच्यते ओदन इत्यपि। वणिक् हिरण्यं मुष्यते मुषितो वा, मुष्यते हिरण्यमित्यपि। भारो ग्राममुह्यते, ऊढो वा अत्र मुख्य एव कर्मणि प्रत्ययः। परधनं स्वगृहं ह्रियते, हृतं वा परधनम्। प्रधानकर्मणस्त्वविवक्षा न सम्भवतीति न तथा प्रयोगः। शाखा भूमिं कृष्यते कृष्टा वा। कटो वीरणं क्रियते, कृतो वा। कृतः कट इत्यपि। एतच्च—

"प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्।
अप्रधाने दुहादीनाम्"

इति कारिकया संगृहीतम्। द्विकर्मकाश्च परिगणिता महाभाष्ये—

"नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च।
द्विकर्मकेषु ग्रहणं द्रष्टव्यमिति निश्चयः"

इति कारिकया। तद्भिन्नाश्च दुह्यादयोऽपि विवक्षाव-शाद्द्विकर्मका भवन्तीति तथैव समुदाहृताः॥

## ( अथ सन्प्रत्ययान्तधातुसमभिव्याहारे कर्मत्वविचारः )

"सन्प्रत्ययान्तस्य धातुत्वेन सन्नर्थेच्छाविषयस्य कर्मत्वं भवति। यथा पाकं चिकीर्षतीत्यत्र पाकस्य, ओदनं बुभुक्षते इत्यत्रौदनस्य च कृतिभोजनयोर्धात्वर्थयोः सन्नर्थेच्छायां विशेष्यतासमानकर्तृकत्वाभ्यां सम्बन्धाभ्यामन्वयः। तेन अन्यसम्बन्धिकृतिभोजनविषयकेच्छासत्त्वे न चिकीर्षति बुभुक्षते इति वा प्रयोगः समानकर्तृकत्वस्याभावात्।" इति केचित्, तन्न, विषयतामात्रेण कर्मत्वस्वीकारे पाकत्वं चिकर्षतीति प्रयोगापत्तेः। उद्देश्यतया तथात्वे तु ओदनं बुभुक्षते इत्यादौ ओदनस्येच्छानुद्देश्यत्वात् कर्मत्वानुपपत्तिरित्यादिकं चिन्तनीयम्।

चिन्तामणिकारास्तु चिकीर्षा–कृतिसाध्यत्वप्रकारिका कृतिसाध्यक्रियाविषया इच्छा, पाकं चिकीर्षामीत्यतः पाकं कृत्या साधयितुमिच्छामीत्यनुभवात्। कृतिसाध्यत्वप्रकारक-फलेच्छावारणाय क्रियाविषयकत्वं विशेषणम्। कृति-साध्यत्वभ्रमजन्यायाः कृत्यसाध्यक्रियाविषयिण्या इच्छायाः वारणाय कृतिसाध्यत्वं वस्तुसद् विशेषणम्। अनुभवस्तु कृतिसाध्यत्वेन पाकमिच्छामीत्याकारक एव। पाकं चिकीर्षामीत्यत्र प्राधान्येन पाकस्येच्छाविषयत्वमनुभूयते, न तु कृतेः। प्राधान्यमुद्देश्यत्वम्। धातोश्च सन्प्रत्ययाभिधेये-च्छाप्रकारवाचित्वं, तेन कृञः कृतिसाध्यत्वं तत्प्रकारकत्वं वाऽर्थः। तच्च प्रकारितया स्वरूपेण वा सम्बन्धेनेच्छायां सन्प्रत्ययार्थेऽन्वेति। ओदनं बुभुक्षत इत्यत्र भोजनविशेष्य–तयौदनस्यानुभवात्, भोजनस्य कर्मतासंसर्गेण ओदनेऽन्वयः, तस्य च विषयतया सन्नर्थेच्छायामन्वयः। अत्र कृतिसाध्य–त्वस्य स्वनिरूपककृतिसामानाधिकरण्येन, ओदनस्य स्वक–र्मकभोजनजनककृतिसामानाधिकरण्येनापि सन्नर्थेच्छाया–मन्वयः, तेनान्यदीयकृतिसाध्यत्वभोजनीयकर्मत्वविषयके–च्छायां सत्यां न तथा प्रयोगः इति वदन्ति।

उपाध्यायास्तु– पाकं चिकीर्षतीत्यादौ सन इच्छामात्र-मर्थः, तत्र धात्वर्थस्य कृत्यादेरुद्देश्यत्वसमानकर्तृत्वाभ्यां सम्बन्धाभ्यामन्वयः। धात्वर्थकृत्यादौ तत्फले साध्यत्वविष-यत्वे वा पाककर्मत्वस्य विषयित्वस्याधेयत्वस्य वा अन्वयः। समानकर्तृकत्वनिवेशादन्यदीयकृतीच्छायां चिकीर्षतीति न प्रयोगः। उद्देश्यत्वनिवेशात कृतिज्ञानेच्छायां न तथा प्रयोग "इति वदन्ति। युक्तं चैतत्– तथा हि सन्नर्थेच्छायां पाकादिविषयत्वस्य नान्वयः, धात्वर्थस्यैवोद्देश्यतया-

ऽन्वयात् । न च विषयत्वसामान्यस्य द्वितीयार्थतयाऽन्वयः, तथा सति पाकत्वं चिकीर्षतीति प्रयोगप्रसङ्गात् । उद्देश्यता तु नामार्थे सन्नर्थेच्छाया न व्युत्पत्तिसिद्धा, तण्डुलं पिपक्षतीत्यादौ तण्डुलस्य सिद्धतया उद्देश्यत्वासम्भवात् । न च पाकीयस्तण्डुलो भवत्वितीच्छायामपि तण्डुलं पिपक्षतीति प्रयोगात् नामार्थस्य विषयतया तत्रान्वय इति वाच्यम्, तथा सति पाकीयज्ञानं भवत्वितीच्छायां ज्ञानं पिपक्षतीति प्रयोगापत्तेः । विषयतामात्रेणान्वयोपगमेऽतिप्रसङ्गस्य दर्शितत्वाच्च । न चौदनं बुभुक्षत इत्यत्र भोजनविशेष्यतयौदनस्यानुभवादिति पूर्वोक्तचिन्तामणिकृद्वचनविरोधः, भोजनविशेष्यतयेत्यत्र बहुव्रीहिणा ओदनं विशेष्यं यस्य तत्तयेत्यर्थेन विशेषणत्वानुभवस्य विवक्षितत्वात् । ननु कथं तर्हि "पाकं चिकीर्षतीत्यत्र प्राधान्येन पाकस्येच्छाविषयत्वमनुभूयते नतु कृतेः" इति मणिकृदुक्तिसङ्गतिरिति चेत् ; प्रवृत्तिहेतुभूतायाश्चिकीर्षायाः कृतिसाध्यत्वप्रकारकतया पाकस्योद्देश्यत्वसम्भवात्तथैव तन्निर्वचनमुक्तम् इत्यदोषात् । धातुप्रत्ययार्थयोरन्वयेन कृतीच्छैव सामान्यतश्चिकीर्षाशब्दार्थः । न च तत्र विषयितामात्रेण पाकस्यान्वयः, दर्शितातिप्रसङ्गसद्भावात् । किन्तु उद्देश्यितया धात्वर्थकृतेरेव तत्रान्वयः, पिपक्षतीत्यादौ तथादर्शनात् । एवं धात्वर्थफले द्वितीयान्तार्थस्यान्वयः, न तु सन्नर्थे । अत एव गृहं तिष्ठासतीति न प्रयोगः । अन्यथा गृहे स्थितिः स्यादितीच्छायाः गृहविषयत्वात्तथाप्रयोगो दुर्वारः स्यात् ।

अथैवं पाकश्चिकीर्ष्यते, ओदनो बुभुक्ष्यते इत्यादौ पाकौदनादेस्त्याद्यर्थकर्मत्वस्यान्वस्यान्वयानुपपत्तिः सन्नर्थकर्मत्वाभावेन सन्नर्थाविशेषितस्य, धात्वर्थविशेषितस्य तस्य तत्रान्वयस्याशक्यत्वात्—प्रकृत्यर्थविशेषितस्यैव प्रत्ययार्थस्यान्यत्रान्वेतुं योग्यत्वात् । एवं सति धात्वर्थकर्मत्वस्यानभिधानादुक्तप्रकारककर्माख्यातस्थले ( पाकश्चिकीर्ष्यते इत्यादौ ) पाकौदनादिपदाद् द्वितीयोत्पत्तिप्रसङ्गश्च स्यात् । तस्मात् पाकौदनादिनामार्थस्य धात्वर्थकर्मत्वं न युज्यते, युज्यते च सन्नर्थकर्मत्वमिति न दर्शितातिप्रसङ्गः । कर्मतासम्बन्धेन धात्वर्थविशिष्टनामार्थस्य सन्नर्थकर्मत्वोपगमात् तिष्ठासतियोगे, न द्वितीयाप्रसङ्गः, तिष्ठतेरकर्मकत्वात्, तत्र कर्मतासम्बन्धेन धात्वर्थविशिष्टनामार्थस्यासम्भवात् । 'तण्डुलं पिपक्षति' इत्यादौ तण्डुलादेः सिद्धत्वेऽपि कर्मतया पाकविशिष्टतण्डुलस्येच्छोद्देश्यत्वं नानुपपन्नम्, सुखवन्तमात्मानमिच्छतीत्यादौ सुखविशिष्टस्यात्मनः इच्छोद्देश्यत्वदर्शनात् । अत एवौदनं बुभुक्षत इत्यादौ भोजनविशेष्यतयौदनस्यानुभवात् इत्युक्तं मणिकृता । पाकविशिष्टतण्डुलादेः सन्नर्थकर्मत्वसम्भवात् तण्डुलं पिपक्षतीत्यादिप्रयोगोपपत्तिः । पाकज्ञानेच्छायां तु 'ज्ञानं पिपक्षति' इति न प्रयोगः, तत्र कर्मतया पाकवैशिष्ट्यस्य ज्ञाने विरहात् । किन्तु ज्ञानवैशिष्ट्यस्य पाके सत्त्वात् पाकं जिज्ञासतीत्येव प्रयोगः इति चेत्, न; तथा सति गुडपाकस्य कर्मतया तण्डुले वैशिष्ट्यमवगाहमानायां 'गुडपाकीयस्तण्डुलो भवत्वितीच्छायां 'गुडं तण्डुलः पिपक्ष्यते' इत्यादिकर्माख्यातप्रयोगप्रसङ्गः, सन्नर्थकर्मत्वस्य तण्डुलगतस्याख्यातेनाभिधानेऽपि, गुडगतस्य धात्वर्थपाककर्मत्वस्यानभिधानात्—गुडपदाद्द्वितीयाप्रसङ्गस्य दुर्वारत्वात् ।

ननु धातोरप्रकृतित्वात्, सन्प्रकृतिकेन कर्माख्यातेन 'तण्डुलः पिपक्ष्यते' इत्यादौ तण्डुलादिगतं धात्वर्थकर्मत्वं कथं बोधनीयमिति चेत्, न, कर्माख्यातस्थले प्रथमान्तार्थस्य मुख्यविशेष्यत्वानुरोधेन सन्नर्थस्य धात्वर्थविशेषणतयाऽन्वयावश्यकत्वे सन्नर्थविशेषितधात्वर्थकर्मत्वस्यैव कर्माख्यातेन प्रतिपादनसंभवात् इष्टपाककर्मत्वस्य तण्डुलेऽन्वयबोधोपपत्तेः । यथा गुरुणा शिष्येण पाच्यते तण्डुल इत्यादौ णिच्प्रकृतिकेन कर्माख्यातेन प्रयोज्यतासम्बन्धेन णिजर्थप्रयोजकव्यापारेण विशेषितस्य पाकस्य तण्डुलान्वयि कर्मत्वं प्रत्याय्यते, न हि तत्र णिजर्थप्रयोजकव्यापारकर्मत्वं प्रत्याययितुं शक्यते; एवं द्वितीयाकर्माख्यातार्थयोः कर्मत्वयोः विशेषणत्वविशेष्यत्वाभ्यां सन्प्रकृतिधात्वर्थ एवान्वयोपगमात्— गृहान्— तिष्ठासति, गृहास्तिष्ठास्यन्ते इति वा न प्रयोगः । अत एव सन्नन्तादात्मनेपदव्यवस्थायां पूर्वस्य

प्रकृतिभूतधातोः साम्यस्याश्रयणेन, सकर्मकाकर्मकत्वयोरपि प्रकृतिभूतधातुसाम्यं विज्ञायते इति दिक् ।

## ( अथ विशिष्यविहितकर्मसंज्ञास्थलेषु वाक्यार्थबोधो विचार्यते )

गतिबोधेतिसूत्रेण शब्दकर्मणामणिक्कर्तुः कर्मत्वं विधीयत इति– पुत्रमक्षराणि जल्पयतीत्यादिप्रयोगो भवति। तत्र जल्पतेः वर्णेतरावृत्तित्वेन विशेषिता उत्पत्तिरर्थः । न च फलविषया वर्णोत्पत्तिरेवार्थ इति वाच्यम्, तथा सति धात्वर्थान्तिर्भूतकर्मत्वात् शब्दायतिवत् जल्पतेरकर्मकत्वापत्तेः । ततश्च वर्णान् पदं वा जल्पतीति प्रयोगानापत्तेः। अथ वा उत्पत्तिः फलतया, विवृतादिरूपेण प्रयत्नाः व्यापारतया जल्पतेरर्थः । एवं ब्रुवि-वचि-वदि-गदिप्रभृतयो बोध्याः । पुत्रमक्षराणि जल्पयति पितेत्यत्र पुत्रपदोत्तरद्वितीयाया विवृतादिव्यापारान्वयिसमवेतत्वमर्थः, णिचः शिक्षणाज्ञादिः प्रयोजकव्यापारोऽर्थः । एवं च अक्षरनिष्ठोत्पत्त्यनुकूलस्य पुत्रसमवेतविवृतादिव्यापारस्य अनुकूलो यः शिक्षणादिः तदाश्रयः पितेति वाक्यर्थबोधः । एवं श्रावकं सूक्तं श्रावयतीत्यत्र श्रावकपदोत्तरद्वितीयायाः श्रावणप्रत्यक्षान्वयि समवेतत्वमर्थः, अत्रादिश्रावकसमवेत–धर्मबोधकशब्दश्रावणप्रत्यक्षानुकूलव्यापारस्यानुकूलो यः वाक्यप्रयोगादिस्तदाश्रय आचार्य इति वाक्यार्थबोधः । सूत्रे बोधार्थत्वेन ज्ञानसामान्यवाचिनामेव ग्रहणं न तु तद्विशेषवाचिनामिति केचित् तत्र ज्ञानविशेषार्थस्य दृशेरपि अणिक्कर्तुः; "दर्शयति रूपतर्कं कार्षापणं वणिक्" इत्यादावणिक्कर्तुः कर्मत्वदर्शनात् । किञ्च ज्ञानातिरिक्तेऽवगाहनाद्यर्थेऽपि दृशेः प्रयोगस्य—

"अत्पथावधिरणुः परमः सा योगिधीरपि न पश्यति यस्मात् ।
बालया निजमनः— परमाणौ ह्रीदरीशयहरीकृतमेनम्" ॥

इत्यादिनैषधप्रयोगेषु दर्शनात् दृशिधातोरणिक्कर्तुः कर्मत्वं पृथगेव विदधति केचन वैयाकरणाः । तेन योगिधियं परमाणुं दर्शयति योगाभ्यासः इति प्रयोगोपपत्तिरित्याहुः । अत एव स्मरयत्येनं वनगुल्मः स्वयमेवेत्यादौ इदंपदाद् द्वितीयोपपत्तिः । स्मरतेर्बोधार्थकतया स्मरणकर्तरि गतिबोधादिसूत्रेणैव कर्मत्वसूचनात्; अन्यथा कर्मत्वानुशासनदौर्लभ्यापत्तेः । नन्वयं कुत्रत्यः प्रयोगो यदर्थं गतिबोधेति सूत्रे बोधपदेन सामान्यज्ञान–विशेषज्ञानोभयवाचिधातूपसंग्रहः साध्यत इति चेत्–अणिकर्मणिक्कर्तृकाण्णिणोऽस्मृतौ ( ३।३।८८ ) इति सूत्रे प्रत्युदाहरणत्वेन ( अस्मृताविति पदस्य सार्थक्यप्रतिपादनाय ) प्रकृतप्रयोगस्याचार्यैरेव कृतत्वात् । णेरणौ यत्कर्म स चेत्कर्ताऽनाध्याने ( पा० सू० १।३।६७ ) इति सूत्रे महाभाष्येऽपि प्रकृतप्रयोगस्य प्रत्युदाहृतत्वाच्च ।

धर्ममर्थं वा ग्राहयति शिष्यमित्यत्र गृह्णातेर्ज्ञानार्थकत्वे शिष्यपदोत्तरद्वितीयायाः समवेतत्वमर्थः । संयोगादिलक्षण–सम्बन्धानुकूलव्यापारार्थकत्वे तु तस्य ( गृह्णातेः ) कृतिरर्थः । तत्र ग्रहिकर्तरि कर्मत्वं न प्रयोगसाधुत्वं सम्पादयति, तथा सति "जायाप्रतिग्राहितगन्धमाल्याम्" इति रघुवंश–महाकाव्यद्वितीयसर्गस्थ–कालिदासप्रयोगे समासानुपपत्तिः । नह्यत्र जायया प्रतिग्राहिते गन्धमाल्ये यामिति विग्रहः सम्भवति–"ण्यन्ते कर्तुश्च कर्मणः" इत्युक्ततया, अण्यन्तकर्तरि ण्यन्तावस्थायां कर्मभूते एव कर्मप्रत्ययस्य साधुत्वज्ञापनात्; धात्वर्थकर्मगन्धमाल्यादिसामानाधिकरण्येन कर्मक्तस्यासाधुत्वात् । न वा 'जायया गन्धमाल्ये प्रतिग्राहिताम्' इत्यश्वपिप्पल्यादिवदयं समासो भवितुमर्हति, तथा सति तत्पुरुषस्योत्तरपदलिङ्गतानुशासनेन–आपोऽनुत्पादप्रसङ्गात् । इत्थं ग्रहिकर्तुर्ण्यन्ते न कर्मत्वं किन्तु ग्रहिकर्मण एव । ततश्चात्र जायया प्रतिग्राहिते गन्धमाल्ये ययेत्येव साधुः तत्रैव च बहुव्रीहिसमासः । तत्र विग्रहवाक्यात्–जायाप्रयोजितयत्कर्तृकप्रतिग्रहकर्मणी गन्धमाल्ये इति शाब्दबोधः । समासे तु जायापदस्य जायाप्रयोजकगन्धमाल्यकर्मकप्रतिग्रहकर्तरि लक्षणा, प्रतिग्राहितादिपदानां तात्पर्यग्राहकत्वम् इति विज्ञेयम् ।

'दृश्यभिवदोरात्मने' (२।२।९) इति सूत्रेण दृशेरभिवदेश्चात्मनेपदविषये अणिकर्तुर्णौ कर्मत्वविधानेन "अभिवादयते शिष्यं शिष्येण वा गुरुः" इति प्रयोगः। तत्राभिवादेर्नमस्कारोऽर्थः। स चोत्कर्षवत्तया ज्ञापनस्वरूपः। तत्रोत्कर्षप्रकारज्ञानं व्यापारश्च खण्डशोऽर्थः। तत्राभिवाद्यप्रयोजकगुरुविशेषितमाधेयत्वमुत्कर्षविशिष्टसमवायावच्छिन्नाधेयत्वीयस्वरूपसम्बन्धेन ज्ञानेऽन्वेति, ज्ञानं तु प्रयोजकतया व्यापारे त्वत्तोऽहमपकृष्ट इत्यादिवाक्यस्वरूपेऽन्वेति। उत्कर्षस्तु व्यापाराश्रयाभिवादकावधिको बोध्यः। शिष्यपदोत्तर- द्वितीयातृतीययोर्व्यापारान्वयिनी कृतिरर्थः। व्यापारस्तु प्रजोजकतया णिजर्थे कर्मकर्तृगुरुव्यापारेऽन्वेति। द्वितीयार्थाधेयत्वस्य उक्तरूपसम्बन्धेन ज्ञानेऽन्वयोपगमात्— अभिवाद्यान्यस्याभिवाद्यगतोत्कर्षज्ञानेऽपि तमभिवादयते इति न प्रयोगः। यदि चोत्कर्षप्रकारकज्ञानं भ्रमोऽपि धात्वर्थस्तदा उत्कर्षप्रकारतानिरूपितविशेष्यतया समवायेन च द्वाभ्यां सम्बन्धाभ्यामवच्छिन्नमाधेयत्वमभिवाद्यवाचिपदोत्तरद्वितीयायाः (कर्मकर्तरि प्रथमाया वा) अर्थः इति न काप्यनुपपत्तिः। यदि चाभिवाद्यस्य व्यासङ्गवशादुत्कर्षाज्ञानेऽपि अभिवादिप्रयोगस्तदा उत्कर्षवत्ताजिज्ञापयिषा धात्वर्थः। फलं व्यापारस्तु पूर्वोक्त एव। तत्रोत्कर्षप्रकारकज्ञाननिष्ठोद्देश्यतावच्छेदकीभूतयोरुत्कर्षप्रकारतानिरूपितविशेष्यताकत्व- समवेतत्वयोर्वर्तमानाभ्यामवच्छेदकत्वाभ्यां निरूपितयाऽवच्छेदकतया सम्बन्धेनावच्छिन्नमाधेयत्वमभिवाद्यवाचिपदोत्तरद्वितीयायाः (कर्मकर्तरि प्रथमाया वा) अर्थः— उत्कर्षजिज्ञापयिषायां प्रकृते फलीभूतायामन्वेति। सा च प्रयोज्यतया दर्शितव्यापारे ऽन्वेति। अन्यत् पूर्ववदेव। एवमेवाभिवादिपर्यायानां नमस्करोत्यादीनां प्रयोगेऽपि। एवं 'दर्शयते राजा भृत्यान् भृत्यैर्वा' इत्यादौ भृत्यपदोत्तरद्वितीयातृतीययोः दर्शनान्वयिसमवेतत्वमर्थ इति पूर्ववदेव बोध्यम् इति दिक्।

## अथ ण्यन्तस्थले कर्मप्रत्ययोत्पत्तिः कुत इति विचारः॥

धात्वर्थकर्मणः प्रयोगेऽप्रयोगे वा धात्वर्थकर्तरि णिजर्थकर्मणि स्यादयः— कर्मप्रत्यया भवन्ति। यथा— 'दिगन्तं गम्यते गमितो वा रिपुः' इति धात्वर्थकर्मणः प्रयोगे, तस्याप्रयोगेऽपि— 'गम्यते गमितो वा रिपुः' इति। एवं, धर्मं बोध्यते बोधितो वा श्रावकः, बोध्यते बोधितो वा श्रावक इति वा। मिष्टं भोज्यते भोजितो वा भिक्षुः, भोज्यते भोजितो वा भिक्षुरिति वा। पयःपाय्यते पायितो वा शिशुः, पाय्यते पायितो वा शिशुरिति वा। मासमास्यते, आसितो वा साधुः, आस्यते आसितो वा साधुरिति वा। तथाचोक्तमभियुक्तैः —

"प्रधानकर्मण्याख्येये स्या(ला)दीनाहुर्द्विकर्मणाम्।
अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः॥" इति।

यत्र यादृशकर्तृत्वं द्वितीयार्थस्तत्र तादृशकर्तृत्वमेव कर्माख्यातार्थः, तद्वान् कर्मकृदर्थः इति विज्ञेयम्। यत्र धात्वर्थकर्तृणिजर्थकर्मणो न प्रयोगस्तत्र धात्वर्थकर्मण्यपि कर्मप्रत्यया भवन्ति, यथा गमितो गिरिः, बोधितो धर्मः, भोजितं पायसम्, पायितं पयः, पाठित आगमः आसितो मासः इत्यादि। यद्धात्वर्थकर्तरि णिजर्थप्रयुक्तकर्मत्वं वैकल्पिकं तत्रापि णिजर्थकर्मण्येव कर्मप्रत्ययाः भवन्ति, अभिवाद्यतेऽभिवादितो वा शिष्यः; भारं हार्यते हारितो वा भृत्यः, दर्शितः सूर्यः इत्यादयः प्रयोगा अनुसन्धेयाः।

## अथ कारकान्तराणां कर्मसंज्ञायां द्वितीयार्थविचारः।

अधिपूर्वकाणां शीङ्-स्था-आस्-धातूनामाधारस्य कर्मसंज्ञा विधीयते इति तत्र द्वितीयाप्रयोगेऽपि— कर्तृघटितपरम्परासंसर्गावच्छिन्नमाधेयत्वं द्वितीयार्थः धात्वर्थव्यापारेऽन्वेति। उप-अनु-अधि-आङ् पूर्वस्य वसतेराधारस्य कर्म-

संज्ञाविधानात्तत्रापि द्वितीया विधीयते– उपवसति-अनुवसति-अधिवसति आवसति वा ग्रामं देवदत्तः इति प्रयोगः । तत्र भूयः कालावच्छिन्नसत्त्वं वसतेरर्थः । कर्तृसम्बन्धघटितपरम्परासम्बन्धावच्छिन्नमाधेयत्वं द्वितीयार्थः धात्वर्थेऽन्वेति । अन्वाद्युपसर्गसाहचर्यादुपपूर्वकस्यापि वसतेः पूर्वोक्तार्थस्य ( भूयःकालावच्छिन्नसत्त्वार्थस्य ) एव ग्रहणमिति भोजननिवृत्त्यर्थस्य तस्याधारः कर्मसंज्ञो न भवति । अन्ये तु वैयाकरणास्तदर्थं निषेधसूत्रमारभन्ते, तच्च नावश्यकं साहचर्यन्यायेनैव वारणात् तथा च ग्रामे उपवसतीत्येव प्रयोगः । "एकादशीमुपवसेत्, द्वादशीमथवा पुनः" इत्यादौ तु उपवसतेर्भोजननिवृत्तिर्नार्थः, किन्तु दोषेभ्य उपावृत्तस्य गुणैः सह स्थितिरेव । तदुक्तम्—

"उपावृत्तस्य दोषेभ्यो यस्तु वासो गुणैः सह ।
उपवासः स विज्ञेयः सर्वभोगविवर्जितः ।। इति ।

वस्तुतस्तु–उपवसतेरभोजनार्थकत्वेऽपि अकर्मकत्वमक्षतमेवेति कालाध्वभावदेशं वाऽकर्म चाकर्मकाणाम् (२।२।–२३ ) इत्यनुशासनेन कालदेशादीनां तत्र कर्मत्वमानुशासनिकमेवेति एकादशीमुपवसेत्– इत्यादौ कालिकाधेयत्वस्य द्वितीयार्थत्वं न तु कर्तृसम्बन्धघटितपरम्परावच्छिन्नाधेयत्वस्येति ।

अभिनिविशतेराधारस्यापि व्यवस्थया कर्मसंज्ञा विधीयते । तत्राभिनिवेशो धारापन्नज्ञानं तज्जन्मा दृढतरसंस्कारो वाऽभिनिविशतेरर्थः । यतिवत् फलावाचकत्वादकर्मकत्वम् अस्य । सन्मार्गादिविशेषितं विषयतासम्बन्धावच्छिन्नमाधेयत्वं द्वितीयार्थः, तादृशे ज्ञाने संस्कारे वा धात्वर्थेऽन्वेति । यदि च साक्षात्सम्बन्धावच्छिन्नाधेयत्वस्य सप्तम्यर्थस्येव सप्तम्यर्थानुशिष्टद्वितीयार्थस्यापि धात्वर्थेऽन्वयो नाभ्युपेयते तदा व्यापारानुबन्धिविषयतास्वकर्तृसम्बन्धघटितपरम्परासम्बन्धावच्छिन्नमाधेयत्वं द्वितीयार्थ इति विज्ञेयम् । केवलं विशतेस्तु अन्तरवयवावच्छिन्नसंयोगानुकूलो व्यापारोऽर्थः । अत एवायं सकर्मकः । अन्तरवयवास्तु विजातीयारम्भकसंयोगवदवयवाः, आरब्धेकावयविभिन्नावयव्यारम्भकसंयोगानधिकरणावयवा वा । गृहादेर्बहिरवयवानामलिन्दादीनां गृहान्याङ्गनाद्यवयवारम्भकसंयोगवत्त्वान्नान्तरवयवत्वमिति अन्तर्विशतीत्यादौ अन्तरिति लुप्तद्वितीयान्तम्, अधःपततीत्यादौ अधःपदवदिति नानुपपत्तिरिति बोध्यम् । निविशतेस्तु तथाविधः संयोग एवाऽर्थोऽत एवायमकर्मकः । यत्र तु 'कारणतायां प्रविशति' 'निविशते' वा इति प्रयोगः, तत्र प्रपूर्वस्य निपूर्वस्य वा विशतेः घटकत्वलक्षणः सम्बन्धोऽर्थः । तत्र कारणताविशेषितस्य सप्तम्यर्थस्य निरूपकत्वेन निरूपकनिरूपकत्वेन वा सम्बन्धेन अवच्छिन्नस्याधेयत्वस्यान्वय इति एष्वर्थेष्वभिनिविष्टानामिति पातञ्जलमहाभाष्यप्रयोगादवसीयते । अत्र प्रकरणे शीङादीनां विशन्तामनुपसृष्टानामाधारस्याधिकरणसंज्ञा, तत्तदुक्तोपसर्गसम्बन्धानामाधारस्य च कर्मसंज्ञेत्यन्यपूर्वकं कर्मेदमिति विज्ञेयम् ।।

( एवं कारकद्वितीयाविभक्त्यर्थो विवेचितः संक्षेपेण )

## (अथाकारकद्वितीयाविभक्त्यर्थविचारः प्रस्तूयते)

नामार्थान्वय्यर्थप्रतिपादिका विभक्तिरकारकविभक्तिपदेनोच्यते । 'गौणात् समयानिकषा०' ( २।२।३३ ) इति सूत्रादारभ्य 'उत्कृष्टेनूपेन' ( २।२।३९ ) इति पर्यन्तं सूत्रैर्विहिता द्वितीया अकारकविभक्तिरेवेति तदर्थस्तत्र तत्र प्रयोगार्थश्च परैर्दर्शितरीत्या शिष्यबुद्धिवैशद्याय प्रदर्श्यते । स्वमते चासां सम्बन्धसामान्यमेवार्थ इति प्रतिपादितं शब्दमहार्णवन्यासे । तच्च साधारणतः सर्ववादिसम्मतमेव । तत्र 'समया' 'निकषा' शब्दौ सामीप्यार्थकौ । तयोर्योगे द्वितीया गौणात्० ( २।२।३३ ) इति सूत्रेण विहिता सम्बन्धार्थिकैव । हाशब्दः शोकद्योतकः, स च विपद्गोचरो द्वेषविशेषः, तत्र आलम्बनत्वेन विषयित्वं तद्योगे विहिताया द्वितीयाया अर्थः । तथा च हा मैत्रमित्यत्र मैत्रविषयिताको विपद्द्वेष इत्येवार्थबोधः । "हा

राम ! हा देवर ! तात ! मातः"। इत्यादि सीताकृते रोदनपद्ये तु सीतायाः स्वविपद्द्वेषे रामादेर्विषयितया नान्वयोऽपि तु तत्सम्बोध्यत्वस्येति न रामादिपदाद् द्वितीयेति समादधति। विपद्द्वेषश्च शोकातिरिक्त एव। अत एव 'कपयो रामं शोचन्ति' इति प्रयोगो न साधुः, किन्तु रामस्य शोचन्तीत्येव। शोकस्तु– अनिर्वचनीयः खेद एव। तत्र द्वितीयार्थः समवेतत्वमिति केचित्। 'धिग्जाल्मान्' इत्यत्र निन्दिताचारो जुगुप्सा वा धिक्शब्दार्थः। जुगुप्सा तु द्वेषविशेषः। निन्दिताचारान्वयि आधेयत्वं, जुगुप्सान्वयि विषयित्वं वा द्वितीयार्थः। जाल्मवृत्तिनिन्दिताचारः जाल्मविषयिणी जुगुप्सा वेति वाक्यार्थबोधः—

"धिगस्तु तृष्णातरलं भवन्मनः,
समीक्ष्य पक्षान् मम हेमजन्मनः।
तवार्णवस्येव तुषारशीकरैः,
भवेदमीभिः कमलोदयः कियान्॥"

इति नैषधीयद्वितीयसर्गे नलं प्रति तद्गृहीतहंसवाक्ये 'मन' इति द्वितीयान्तम्, धिगित्यस्तिक्रियायामन्वेति कर्तृत्वेन। अथ वा धिगिति केवलमस्तिक्रियायामेवान्वेति न तु मनसि, तथा च जुगुप्सितसत्तावत्– मनः इत्यन्वयबोधः। धिङ् मूर्खेत्यत्र जुगुप्सायां मूर्खसम्बोध्यत्वस्यान्वयः। व्युत्पत्तिवैचित्र्येण विषयितासम्बन्धेन मूर्खस्यापि जुगुप्सायामन्वयः पार्श्विकः। तेनान्यविषयजुगुप्सायां मूर्खसम्बोध्यत्वान्वयविवक्षायां न तथाप्रयोगः। आक्षिप्ते भवसि– पदार्थे सम्बोध्यत्वस्यान्वयो धिगिति भवनक्रियायामन्वेतीति कश्चित् यदि च स्वविषयकद्वेषो न भवतीति धिङ् मामित्यादौ नैषा गतिरिति विभाव्यते तदा गुणाभावदोषान्यतरस्वरूपोऽपकर्षो धिक्शब्दार्थः द्वितीयायाः सम्बन्धोऽर्थः अपकर्षो मत्सम्बन्धीत्यन्वयबोधः। गुणः पाण्डित्यकारुण्यादिः, दोषः क्रोधलोभादिः। एवं धिङ् मूर्खेत्यत्र शास्त्रानभिज्ञस्य मूर्खपदार्थस्य सम्बोध्यत्वं– वस्तुविवेकराहित्यस्वरूपेऽपकर्षेऽन्वेति, दर्शितेऽपकर्षे मूर्खस्यानन्वयेऽपि न क्षतिः, अस्यापकर्षस्य मूर्खसाधारणत्वात्। यत्र तु सम्बोध्यसाधारणो नापकर्षः, तत्र द्वितीयान्तपदापेक्षाऽऽवश्यकी। यथा "कृष्ण त्वत्सेवका धन्या धिगन्यान् प्राकृतान् जनान्" इत्यादौ। एतेन धिगर्थे नामार्थस्य साक्षादन्वयोपगमे धिक् चैत्रश्चैत्रेण वेत्यादिकः प्रयोगः स्यादित्यपास्तम्, साक्षादन्वयानुपगमात्। एवं धिगध्ययनहीनं जनम्– इत्यत्र पाण्डित्याभावः, धिग्व्याधमित्यत्र कारुण्याभावः, अक्षान्तं धिक्– इत्यत्र क्रोधः, 'स्वस्तिवाचनिकान् धिक्' इत्यत्र लोभः– यथायथं धिक्पदार्थः तत्र द्वितीयार्थसम्बन्धस्यान्वयः। 'अकरुणं धिक्' इत्यत्र परकीयस्य सुखस्य दुःखहानेर्वा द्वेषः, 'धिक् क्रुद्धम्' इत्यत्र हन्तृत्वम् 'धिक् लुब्धम्' इत्यत्र परस्वापहारित्वम् धिक्पदार्थः इत्येवं प्रातिस्विकरूपेणोहनीयम्। सर्वनाम्नामिव बुद्धिविशेषप्रकारत्वोपलक्षितधर्मवति धिक्पदस्य शक्तिरिति नानुगमः कर्तुं शक्यते।

अन्तराशब्दयोगेऽपि द्वितीयाऽनुशिष्टा। अन्तराशब्दश्चाधिकरणशक्तिप्रधान–'मध्ये' शब्दार्थकः इति बृहट्टीकस्यादिपर्यालोचनयाऽवगम्यते। अन्तरा निषधं नीलं च विदेहाः' इति प्रयोगः। निषधनीलजनपदयोर्मध्ये विदेहाख्यो जनपदइति ततोऽर्थबोधः स्वमते। तार्किकाश्च– परत्वद्वयनिरूपितापरत्वद्वयं, तदधिकरण (परत्वद्वयनिरूपितापरत्वद्वयाधिकरण) देशो वा अन्तराशब्दार्थः। द्वितीयाविभक्त्योश्च प्रत्येकं परत्वद्वयमपरत्वद्वयं चार्थः। तथा च मगधसमवेतेन नीलावधिकेन– नीलसमवेतेन विदेहावधिकेन च प्रत्येकेन परत्वेन निरूपितं यदपरत्वद्वयं तद्वन्तस्तद्देशवर्त्तिनो वा विदेहा इत्येवं वाक्यार्थबोधः। क्वचिदप्राप्तिरन्तराशब्दार्थः। प्रापणं प्राप्तिः– ज्ञापनं गमनं चेति द्विधा। तथा हि—

"अनुरागमयेन भूयसा मधुरेणापि रसेन को गुणः।
प्रियसङ्गमभूमिमन्तरा यदि विच्छिन्नपदा सरस्वती॥"

इत्यत्र भारत्या अनुरागप्रकृतिकेनापि भूयसा शृङ्गार-रसेन को गुणो यदि प्रिययोः सङ्गमपर्यन्तमज्ञापयित्वा विच्छिन्नप्रबन्धा भवति । यदि कश्चित्प्रबन्धः मधुरेण शृङ्गाररसेन पूर्णोऽपि नायकस्य नायिकायाश्च सङ्गममज्ञाप-यित्वा विच्छिद्येत तदा तदीयो रसः सर्वोऽपि विफल एवेति कवेः प्रकृत आशयः । श्लेषेण तु– सरस्वत्या नदीविशे-षस्य स्वनाम्ना ख्यातस्य लौहित्यबहुलेन भूयसा मिष्टेन जलेन को गुणो यदि प्रियस्य समुद्रस्य सङ्गमस्थानमप्राप्यैव मध्ये विलीनगतिरसौ जातेत्यप्राकरणिकोऽर्थ उपमाध्वनये प्रतीयत इति पदवाक्यरत्नाकरे गोकुलनाथोपाध्यायाः । अत्रान्तराशब्दोऽप्राप्त्यर्थक इति स्पष्टम् । अन्तराशब्दो विनार्थकोऽपि 'अध्ययनमन्तरा न पाण्डित्यम्' इत्यादाविति केचित् ।

अन्तरेण–शब्दस्य योगेऽपि द्वितीयाविभक्तिरनुशिष्टा । तस्य च 'मध्ये विना' इति चार्थद्वयम्–इति स्वमतम् । तथा च अन्तरेण गन्धमादनं माल्यवन्तं चोत्तराः कुरव इत्यत्र मध्ये इत्यर्थकमिति गन्धमादनमाल्यवत्पर्वतयोर्मध्य-देशवर्त्तिनः कुरव इत्यर्थः । अन्तरेण धर्मं न सुखमित्यत्र विनार्थक इति धर्मं विना सुखं न भवतीति वाक्यार्थबोधः । अन्ये तु अन्तरेणशब्दस्याभाव एवार्थः । प्रतियोग्यनुयोगि-भावस्तु द्वितीयाविभक्त्यर्थः । 'धर्ममन्तरेण न सुखम्' इत्यत्र द्वितीयार्थप्रतियोगित्वे धर्मस्य– स्ववृत्तिधर्मत्वावच्छिन्नत्वा-धेयत्वाभ्यां सम्बन्धाभ्यां व्युत्पत्तिवैचित्र्येणान्वयोपगमात्– धर्मसामान्याभावप्रतीतिः । अभावयोः प्रयोज्यप्रयोजकभावो योगक्षेमसाधारणः । तथा च धर्मसामान्याभावप्रयुक्तः सुखसामान्याभाव इति बोधः । इत्थमेव–'अति–तेन–येन– इत्यादिशब्दयोगेऽपि द्वितीया विधीयते तत्र सर्वत्र वा ईदृशाकारकद्वितीयास्थले सम्बन्ध एव द्वितीयार्थ एति स्वमतं, तार्किकाश्च तत्र तत्र व्युत्पत्तिवैचित्र्याद् अर्थान्तरं वर्णयन्ति तच्च वाग्जालमात्रम् ।

## अथ क्रियाविशेषणद्वितीयाविभक्त्यर्थो विचार्यते

क्रियाविशेषणात् ( २।२।४१ ) इति सूत्रेण क्रिया-व्यवच्छेदकान्नाम्नो द्वितीयाविभक्तिरनुशिष्यते । अन्ये च वैयाकरणाः 'क्रियाविशेषणानां कर्मत्वं क्लीबत्वं च'त्याहुः । तच्च स्वमते न स्वीक्रियते । कर्मत्वस्य क्रियाविशेषणे प्रतीतेरनभ्युपगमात्; स्तोकं पचतीत्यस्य कर्मवाच्यतायां स्तोकः पच्यते इति प्रयोगापत्तेः । क्लीबत्वं च तत्र 'सामा-न्ये नपुंसकम्' इति साधारणनियमादेव लभ्यमिति–द्वितीया-विभक्तिविधानमात्र एवानुशासनव्यापारः। विशेषणविभक्तेर-भेदार्थत्वेनास्या द्वितीयाया अपि अभेद एवार्थः । अभेदश्च तादात्म्यमेव । यदि च तादात्म्यं न द्वितीयावाच्यमपि तु संसर्गविधयैव भासत इत्युच्यते, तदाऽन्यत्र–(नीलो घटः इत्यादौ) यथा विशेषणविभक्तेस्तन्मते साधुत्वार्थत्वं तथाऽत्र द्वितीयाऽपि साधुत्वार्थैव । प्रथममते–(द्वितीयायास्तादा-त्म्यार्थत्वे) तादात्म्यस्य फलान्वयेऽपि न कर्मत्वम्, फलान्व-यिन आधेयत्वस्यैव कर्मत्वात् । अन्यथा जलं न पचतीत्यत्र जलाधेयत्वाभावस्य विक्लित्त्यन्वये जलाधेयत्वाभावः पच्यत इति प्रयोगप्रसङ्गात् । द्वितीयपक्षे ( तादात्म्यं संसर्ग एव, द्वितीया च साधुत्वार्थिकेति पक्षे )ऽपि तादात्म्येन फला-न्वयिनोऽपि न कर्मत्वम्, न हि सम्बन्धमात्रेण फलान्वयि कर्म भवति, कालोपाधेः सकर्मकमात्रकर्मत्वापत्तेः । किन्तु तत्तत्संसर्गविशेषेण फलान्वयिन एव कर्मत्वम् । तत्र तादा-त्म्यसंसर्गः संसर्गविशेषकोटौ नान्तर्भवति–तेन क्रियाविशेषण-स्तोकादौ कर्मणि, लकारो न प्रसज्यते । यत्र क्रियाविशेष-णस्य फलेऽन्वयस्तत्र कर्मत्वमिति तादृशस्थले द्वितीया– यथा स्तोकं पचतीति । यत्र च व्यापारे एव क्रियाविशेषण-स्यान्वयस्तत्र तस्य कर्तृत्वमिति तत्र प्रथमैव– यथा स्तोकः पाक इति तार्किकाः । वैयाकरणास्तु धात्वर्थान्वये स्तोकादि-विशेषणशब्देभ्यो द्वितीया घञर्थान्वये प्रथमा पुल्लिङ्गता चेत्याहुः । अथवा यथा ज्योतिष्टोमेन यजेतेत्यत्र करणानु-वादिका तृतीया, यथा वा अग्निहोत्रं जुहोतीत्यत्र द्वितीया,

तथा स्तोकं पचतीत्यत्रापि भावनाकर्मपाकविशेषणस्तोकादिपदात् कर्मानुवादिका द्वितीया। न च क्रियाविशेषणस्य कर्मत्वपक्षे तत्र कर्मणि लकारः स्यादिति वाच्यम्, "अस्तीत्युत्पन्नस्यात्मधारणमुच्यते" इति निरुक्तस्मृत्या आत्मधारणानुकूलव्यापारार्थकस्यास्तेरप्यात्मनि कर्मणि कर्मलकारप्रसक्त्या व्युत्पत्तिवैचित्र्याभ्युपगमात्। तथा हि येन कर्मणा सकर्मको धातुः, तत्रैव कर्मणि कर्मप्रत्ययस्य साधुत्वम् आत्मनः कर्मणो धात्वर्थान्तिर्भूतत्वात्– धातुनैवाभिधानात् न तेन कर्मणाऽस्तेः सकर्मकत्वमिति, न तत्र कर्मलकारप्रसङ्गः, तथा फलात्मकस्तोकस्य धातुनाभिधानात् न तेन कर्मणा सकर्मकत्वमिति न तत्र कर्मणि लकारप्रसक्तिः। द्वितीया तु न तेन कर्मणा सकर्मकत्वमपेक्षते, यतः, तारं शब्दायति दीर्घमस्तीत्यादौ धात्वर्थान्तिर्भूतकर्मणः शब्दात्मादेर्विशेषणे कर्मानुवादिका द्वितीया दृश्यते, अत एव क्रियाविशेषणपदोत्तरद्वितीयायाः कर्मानुवादकत्वपक्षोऽभ्युपेयते। एवं फलान्वयिक्रियाविशेषणानां कर्मानुवादिका द्वितीया, फलव्यापारयोः संसर्गीभूतकर्मत्वस्य प्रापिका, यथा धात्वर्थान्तर्भूतकर्मफलयोः संसर्गीभूतकर्मत्वस्य; तादृशकर्मविशेषणानां कर्मानुवादिका द्वितीयेति प्राचीनशाब्दिकमतम्। तत्तार्किका न क्षमन्ते; स्तोकं स्यन्दते इत्यादौ व्यापारविशेषणपदोत्तरद्वितीयायाः कर्मानुवादकत्वस्याप्यसंभवात्। न चात्र व्यापारविशेषणे नपुंसकप्रथमेति वाच्यम् प्रथमाया अननुशिष्टतया असाधुत्वात्। व्यापारविशेषणस्य कर्तृत्वपक्षे त्यादिप्रत्ययेन तद्गतकर्तृत्वानभिधानात्, तृतीयापत्तेर्दुर्वारत्वात्। सुखहेतुं चेष्टते यतते चेतते वेत्यत्र प्रथमाप्रसक्तेरसम्भवेन द्वितीयोपपत्तेः कथमप्यसम्भवाच्च। तस्माद्दर्शितरीत्या फलव्यापारोभयविशेषणवाचिपदाद् द्वितीयैव साधुरिति तेषामाशयः। स्वमते च क्रियाविशेषणाद् द्वितीयैवानुशिष्यते न तु कर्मत्वमिति न कोऽपि शङ्कासमाधानावसर इत्युक्तपूर्वम्।

## कालाध्वनोर्व्याप्तौ ॥ २।२।२४२ ॥

अनेन सूत्रेण व्याप्तौ द्योत्यायां द्वितीयाऽनुशिष्यते। व्याप्तिश्चैवं विवृता– स्वेन सम्बन्धिना द्रव्यगुणक्रियारूपेण कात्स्न्येन सम्बन्ध इति। स च सम्बन्धः अत्यन्तसंयोगपदेन व्याख्यातः। अत्यन्तसंयोगश्चाभिव्याप्तिः। सा च यावदवयवसंयोगरूपैव। मासमधीत इत्यादौ यत्समुदायो मासपदार्थस्त एव तदवयवाः। एवं च त्रिंशद्दिनानां मासपदार्थतया तेष्वखिलेषु किञ्चिदध्ययनसत्त्वेऽपि मासमधीते इति प्रयोगः प्रमाणम्। एवञ्चाभिव्याप्तेर्द्वितीयार्थत्वेऽपि व्युत्पत्तिवैचित्र्येण तस्या मासपदादेव लाभादनन्यलभ्यमधिकरणत्वमात्रमेतद्विहितद्वितीयाया अर्थः। मासत्वावच्छेदेनाधिकरणत्वस्यान्वयः। अवच्छेदकत्वं चेह व्यापकत्वम्। तथा च मासत्वव्यापकत्वमधिकरणस्येति लभ्यते। तथा च द्वितीयार्थे मासपदार्थस्य व्यापकतया अधिकरणे लाभात् त्रिचतुरादिदिनाध्ययनकर्तरि मासमधीते इति प्रयोगो न प्रमाणम्। मासपदार्थत्रिंशद्दिनसम्बन्धश्च दिनपर्याप्तत्रिंशत्त्वव्यापकत्वम्। न चैकमासमात्राध्ययनकर्तर्यपि मासमधीत इति प्रयोगस्य प्रामाणिकतया, तत्राध्ययने मासान्तरे व्यभिचारात्– मासत्वव्यापकताया अभावात्तदनुपपत्तिः ( मासत्वव्यापकत्वानुपपत्तिः ), संसर्गज्ञानस्याप्यन्वयबोधात्पूर्वमावश्यकतया तत्तन्मासत्ववन्निरूपिताधेयतासंसर्गेण प्रकृत्यर्थतान्वयासंभवादिति वाच्यम्; अखिलमासानुगतस्यैकस्य मासत्वस्याभावात्। तस्य दिनपर्याप्तत्रिंशत्त्वस्वरूपतयैकत्वासम्भवात्। त्रिंशत्त्वस्य क्षणकूटरूपदिनानां द्रव्यानात्मकत्वेन संख्यारूपत्वस्य बुद्धेर्वैलक्षण्यस्यानुगमासंभवात्, बुद्धिविशेषविषयत्वस्वरूपस्य चासम्भवेऽपि सूर्योदयात्सूर्योदयान्तरस्थायिनो द्रव्यस्य दिनरूपतया संख्यारूपस्यैव तस्य संभवात्। तथा चाधिकरणत्वस्वरूपद्वितीयार्थे व्युत्पत्तिवैचित्र्येण मासपदार्थतावच्छेदकदिनपर्याप्तत्रिंशत्त्वादेश्चैत्रकर्तृकाध्ययनाधारतात्वव्याप्यधर्मावच्छिन्नावच्छेद्यत्वसंसर्गेणान्वयादेकमासाधिकरणकाध्ययनस्थले नानुप–

पत्तिः । तादृशाध्ययनाधारतानामननुगतत्वेऽपि तत्तदधिकरणतागतान्यतमत्वेन तदनतिरिक्तवृत्तित्वात् तादृशत्रिंशत्त्वस्य तदवच्छेदकत्वम् । शब्दाच्चैत्राध्ययनाधारताव्याप्यत्वस्य मासपदप्रवृत्तिनिमित्ते भानेऽपि यस्य यन्निष्ठावच्छेद्यतानिरूपकत्वं तस्य तद्व्याप्यत्वमिति सामान्यतो गृहीतव्याप्तिसहकृतोक्तावच्छेद्यत्वनिरूपकत्वादेव तत्र तस्य लाभात्– इति ।

ननु दिनस्य द्रव्यात्मकत्वेऽपि त्रिंशतामेकदास्थित्यभावेनाविद्यमानसमवायिकारणकगुणोत्पत्तेरसंभवात् त्रिंशत्त्वं संख्यात्मकं तेषु कथं सम्भवतीति चेन्न, यथा सूर्योदयात्सूर्योदयान्तरवर्तिक्षणविशिष्टस्यैकस्य द्रव्यस्य दिनत्वम् तथा त्रिंशद्दिनस्थायिन एकस्य द्रव्यस्य मासत्वं तद्गतैकत्वस्यैव मासपदार्थतावच्छेदकत्वात् । न चैकद्रव्यस्य मासपदार्थत्वे एकदिनाध्ययनस्थले मासमधीते इति प्रयोगापत्तिः व्यापकत्वस्य प्रतियोगिवैयधिकरण्यघटितस्यैव द्वितीयार्थत्वादिति वाच्यम्, व्यापकत्वघटकाभावे प्रतियोगिवैयधिकरण्यमपहाय मासत्वसमानाधिकरणं यन्निरुक्तसूर्योदयक्षणोत्पन्नापरसूर्योदयप्राक्क्षणस्थायिद्रव्यरूपदिनावच्छेद्याधिकरणत्वं तन्निरूपकत्वस्य निवेशात् । तथा च यत्किञ्चिद्दिनाध्ययनस्थले मासत्वाधिकरणं यदध्ययनानधिकरणं दिनं तदवच्छेद्याधिकरणनिरूपकत्वस्याध्ययनाभावे सत्त्वान्नोक्तप्रयोगापत्तिः ।

'क्रोशं पर्वतः' क्रोशं कुटिला नदीत्यादौ क्रोशत्वमध्वपरिमाणविशेषः तदवच्छेदेन कौटिल्यस्याप्यन्वयो व्युत्पत्तिवैचित्र्यात् । क्रोशत्वव्यापकः पर्वतः क्रोशत्वव्यापककौटिल्यवती नदीति चान्वयबोधः ॥

वस्तुतस्तु मासमधीते इत्यत्र मासात्मककालिकविशेषणतावच्छिन्नमाधेयत्वं द्वितीयार्थः । तन्मासनिरूपितमध्ययनेऽन्वेति । द्वित्रदिनाध्ययने न निरुक्तमाधेयत्वमिति न तत्र तथा प्रयोगः । एवं क्रोशं कुटिला नदीत्यत्र अध्वपरिमाणविशेष–क्रोशत्वव्यापकसंयोगावच्छिन्नमाधेयत्वं द्वितीयार्थः, तच्च क्रोशनिरूपितं कुटिलेऽन्वेति, कुटिलत्वस्य तादात्म्येन नद्यामन्वयः । मासं कल्याणीत्यत्र कल्याणजनक; कल्याणशब्दार्थः कल्याणजनकत्वविशिष्टे मासीयस्य व्यापकत्वस्य निरुक्ताधेयत्वस्य वाऽन्वयोपगमात् विशेषणेऽप्यन्वयः । व्यापकत्वाद्यविवक्षायां च न द्वितीयाऽपि तु सम्बन्धसामान्येऽधिकरणत्वविवक्षायां वा तत्रैव षष्ठी सप्तम्याविति– मासस्य मासे वेत्यादिप्रयोगाः ॥ २।२।४३ ॥

इति द्वितीयार्थप्रकाशः ॥

# अथ तृतीयाविभक्त्यर्थविचारः ।

## हेतु-कर्तृ-करणेत्थंभूतलक्षणे । २।२।४४ ॥

तृतीयाऽपि कारकविहिता तदन्या चेति द्विविधा । तत्र क्रियान्वय्यर्थिका तृतीया कारकतृतीया, नामार्थान्वय्यर्थिका च साऽकारकतृतीयेति तयोः स्थूलो भेदः सर्वैरपि सुग्रहः । तत्र कारकतृतीयाविधायकसूत्रमिदम् । तत्र हेतुर्द्विविधः लौकिकः शास्त्रीयश्च । लौकिको हेतुरेवेह सूत्रे हेतुपदेन विवक्षितः । कर्तृप्रयोजकस्य हेतोः कर्तृविशेषरूपतया कर्तृत्वेनैव सङ्ग्रहात् । अत्र सूत्रे च कीदृशो हेतुर्विवक्षित इति जिज्ञासायां वृत्तिकृदाह– **फलसाधनयोग्यः पदार्थो** हेतुरिति । विवृतं चैतत् शब्दमहार्णवन्यासे– फलं कार्यं तस्य साधनं भावना निष्पादनं करणमिति यावत् तत्र योग्यः– सामान्यतो दृष्टसामर्थ्यः' इति । इत्थं च हेतुरपि कारकमेव तद्विहिता विभक्तिः कारकविभक्तिरेवेति स्वमतम् । परे च हेतुत्वं न कारकत्वम्, साक्षात्क्रियायां जनकतयाऽन्वयिन एव कारकत्वात् । हेतुस्तु परम्परया क्रियायां जनकतयाऽन्वेति साक्षात्तु नामार्थान्तर एवेति न तस्य कारकत्वम् । तथा च हेतुत्वमेव हेतुतृतीयार्थः, तच्च फलसाधनयोग्यत्वमेव । तार्किकास्तु– हेतौ तृतीयाविधायके सूत्रे हेतुपदं हेतुत्वपरम्– भावप्रधाननिर्देशात् । हेतुत्वं च द्विविधम् कारणत्वं ज्ञापकत्वं च । कारणत्वमपि द्विविधम्– साक्षात् परम्परया वा सम्बन्धद्वयेन यथायथमवच्छिन्नत्वात् । तत्र

साक्षात्कारणत्वं यथा धनेन कुलम्, अन्नेन वसति, विद्यया यश इत्यादौ, परम्परया कारणत्वं यथा दण्डेन घटः इत्यादौ दण्डस्य चक्रभ्रमिद्वारा कारणत्वात्। ज्ञापकत्वं यथा धूमेन वह्निरित्यादौ। अत्र प्रकृत्यर्थस्याधेयतया तृतीयार्थे ज्ञापकत्वे, तस्य निरूपकतया ज्ञाप्ये वह्न्यादावन्वयः, तथा च धूमवृत्तिज्ञापकतानिरूपको वह्निरित्यन्वयबोधः।

चिन्तामणिकारास्तु– ज्ञापकत्वं न हेतुतृतीयार्थः, तथा सति चक्षुषा रूपमिति प्रयोगप्रसङ्गात्, किंतु धूमेन वह्निरित्यत्र धूमपदं धूमज्ञाने, वह्निपदं वह्निज्ञाने ज्ञायमानवह्नौ वा लाक्षणिकम्। तृतीयार्थो हेतुत्वम्, तस्य निरूपकतया लक्ष्यैकदेशे ज्ञायमानविशेषणे ज्ञानेऽन्वयः। तथा च धूमज्ञानवृत्तिहेतुतानिरूपकज्ञानविषयो वह्निरित्यन्वयबोधः। चेष्टाविशेषेण पचतीत्यत्र विशेषशब्दस्य चेष्टाविशेषज्ञाने, त्यादेः ज्ञायमानकृतौ लक्षणा। तथा च चेष्टाविशेषज्ञानवृत्तिहेतुतानिरूपकज्ञानविषयः पाककृतिरित्यन्वयबोधः। विभक्त्यर्थयोः परस्परं नान्वय इत्यप्रामाणिकमेव, प्रामाणिकं चेत् स्याद्यर्थयोरेव परस्परं नान्वय इति तदाशयः। एवमन्यत्रापि ज्ञाने लक्षणा, यथा 'प्रत्यक्षोपजीवकत्वेन निरूप्यते' इत्यादौ त्वप्रत्ययस्य प्रत्यक्षोपजीवकत्वज्ञाने लक्षणा, लक्ष्यं ज्ञानम् आधेयत्वेन तृतीयार्थहेतुत्वे, तच्च निरूपकतया निरूपणेऽन्वेति। प्रत्यक्षोपजीवकत्वसंगतेर्ज्ञानं तज्जिज्ञासाया जिज्ञापयिषाया वा प्रयोजकतया निरूपणजनकम्। एवं वेदेन प्रवर्तते आगमेन व्यवहरति इत्यादौ वेदपदस्य आगमपदस्य वा तत्तज्ज्ञाने लक्षणा, वेदज्ञानस्य वेदार्थे इष्टसाधनत्वगोचरज्ञानप्रयोजकतया प्रवृत्तिजनकत्वमित्याहुः (मणिकृतः)।

एकदेशिनस्तु–"न जनकत्वं (कारणत्वं) न वा ज्ञापकत्वं तृतीयार्थः, तथा सति घटो न रासभेनेतिवत् घटो न दण्डेनेति प्रयोगप्रसङ्गात्– स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकस्य दण्डहेतुत्वाभावस्य घटेऽपि सत्त्वात्। निरूपकतासम्बन्धस्य वृत्त्यनियामकतया प्रतियोगितानवच्छेदकत्वात् इति जन्यत्वं ज्ञाप्यत्वं च तृतीयार्थः" इत्याहुः; तच्चिन्त्यं, वृत्तिनियामकसम्बन्धस्य प्रतियोगितानवच्छेदकत्वे युक्तेः द्वितीयाविवरणप्रसङ्गे दर्शितत्वात्। अन्यथा 'घटो न पारिमाण्डल्येन' इत्यत्रान्वयबोधानुपपत्तेः। पारिमाण्डल्यजन्यत्वस्याप्रसिद्धतया तदभावबोधासम्भवात्। वृत्तिनियामकस्य सम्बन्धस्य प्रतियोगितावच्छेदकत्वे तु तृतीयार्थे हेतुत्वे आधेयतया, जन्यत्वे निरूपकतया सम्बन्धेन प्रकृत्यर्थाभावस्य नञा बोधनसम्भवादन्वयबोधानुपपत्तिः। 'गगनं न पारिमाण्डल्येन' इत्यादिवाक्यमयोग्यमेव, योग्यं चेत्, तदा नञा द्वेधाऽभावो बोध्यते, अतः प्रकृत्यर्थाभावविशिष्टजन्यत्वस्याभावो बोध्यते अतः पारिमाण्डल्याभावविशिष्टजन्यत्वस्याभावो गगने प्रतीयते। गगनमन्धो न पश्यतीत्यत्र द्वेधा नञर्थबोधवत् इति।

वस्तुतस्तु तृतीयाविधायके प्रकृतसूत्रे हेतुपदेन हेतुत्वस्य प्रतिपादनात् हेतुत्वं तृतीयार्थ इत्युक्तम्। तत्र हि हेतुपदस्य ज्ञाप्यं ज्ञापकं वा न शक्यम्, येन तत्त्वं प्रतीयेत। सूत्रे लक्षणाकल्पने प्रयोजनविरहः, कोशादिप्रमाणाभावेन रूढिविरहश्च परिपन्थी। 'धूमेन वह्नि'रित्यादिप्रयोगो न वृत्तौ दृष्टचरः। वृत्तौ तु धनेन कुलम्, विद्यया यशः, कन्यया शोकः, इत्याद्येवोदाहृतम्। तत्र धनस्य दारपरिग्रहादिप्रयोजकतया कुलस्य सन्ततेः हेतुत्वम्, अध्यापनादिप्रयोजकतया विद्याया यशोहेतुत्वम्, विश्लेषप्रयोजकदानप्रयोजकतया कन्यायाः शोकहेतुत्वम्, इति बोध्यम्। एवमुदाहरणान्तरेष्वपि तेन तेन रूपेण कारणत्वरूपं हेतुत्वमूह्यम्।

फलमपीह हेतुतया व्यवह्रियते। फलं च कार्यम्। तथा च तृतीयार्थे हेतुत्वे यथाऽऽधेयतया तथा निरूपकतयाऽपि प्रकृत्यर्थस्यान्वयः, कार्यस्य हेतुतानिरूपकत्वात्। अथवा तृतीयार्थे जन्यत्वे यथा निरूपकतया तथाऽऽधेयतयापि प्रकृत्यर्थस्यान्वयः कार्यस्याधिकरणत्वात्। फलरूपहेतोरुदाहरणम्–अध्ययनेन वसतीति। अत्राध्ययननिरूपितहेतुताकोऽध्ययनजन्यतानिरूपको वा वासः इति वाक्यार्थबोधः। 'अलं महीपाल तव श्रमेण, इत्यत्र फलोद्देश्यककृतिविषयः फलाजनकोऽलंपदार्थः। निष्फलस्य कृतिविषयस्य

श्रमजनकत्वं निराबाधमिति— श्रमजन्यतानिरूपकत्वमलं— पदार्थेऽन्वेति अतः फलहेतुतया नामार्थान्वयान्न कारकत्व- मिति । एवं दुःखेनाधीतम्, दुःखेनार्जितम्, दुःखेन विद्या, दुःखेन धनम्, श्रमणे यदुपार्जितम्, इत्यत्रानयैव रीत्या फलहेतुत्वान्वयो बोध्यः । तत्त्वज्ञानेन गुरुमुपास्ते इत्यत्र तत्त्वज्ञानपदस्य तत्त्वजिज्ञासायां लक्षणा तस्याः फलेच्छा- चिकीर्षाप्रवृत्तिप्रयोजकतया गुरूपासनजनकत्वं प्रत्यक्षोपजीव- कत्वज्ञानस्य पूर्वोक्तदिशा निरूपणजनकत्ववदिति नात्र फलस्य हेतुत्वम् । अग्रे च हेत्वादिशब्दसमानाधिकरणान्नाम्नः सर्वा अपि विभक्तयः हेत्वर्थेस्तृतीयाद्याः (२।२।११८)इति सूत्रेणानुशिष्टाः । तत्र–सर्वासामपि हेतुत्वमेवार्थः । हेतु- भूतनाम्नः सामानाधिकरण्येन–तादात्म्येनान्वयः इति यथा- वसरं निरूपयिष्यते ।

## अथ कर्तृतृतीयार्थः

अनेनैव सूत्रेण कर्तर्यपि तृतीया विधीयते । तस्याश्च वैयाकरणमते आश्रयमात्रमर्थः । तथा हि– 'स्वतन्त्रः कर्ता' (२।२।२)इति सूत्रेण धात्वर्थव्यापाराश्रयस्य कर्तृत्वमुक्तम् । स्वातन्त्र्यं हि धात्वर्थव्यापारे इतरव्यापारानधीनत्वम् । व्यापाराश्रयत्वस्य स्वातन्त्र्यत्वे– करणेऽपि तत्प्रसक्तेः धात्वर्थेति विशेषणम् । धात्वर्थाश्रयत्वमात्रोक्तौ कर्मणोऽपि धात्वर्थफलाश्रयत्वात्तत्रातिप्रसक्तिरिति व्यापारपदोपादानम् । अन्ये तु– कर्तृप्रत्ययसमभिव्याहारे व्यापारतावच्छेदक- सम्बन्धेन धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रय– तद्धात्वर्थाश्रयत्वं स्वातन्त्र्यम्; तदेव च कर्तृत्वम् । कालिक- सम्बन्धेन व्यापाराश्रयेऽतिप्रसङ्गवारणाय व्यापारतावच्छे- दकसम्बन्धेनेति निवेशितम् । ग्रामं गच्छतीत्यादावुत्तरदेश- संयोगात्मके फले तादृशधात्वर्थत्वाभावान्न तदाश्रयेऽति- प्रसङ्गः । पक्वस्तण्डुलो देवदत्तेनेत्यादौ फलस्य विशेष्यत्वेन देवदत्तेऽव्याप्तिवारणाय कर्तृप्रत्ययसमभिव्याहारे इत्युक्तम् । सामग्रीसाध्यायां क्रियायां सर्वेषां कारकाणां स्वस्वव्यापारे स्वातन्त्र्योऽप्युक्तस्वातन्त्र्यस्य युगपत्सर्वेष्वभावात् । कर्म- कर्तरि तु नव्यमते फले व्यापारत्वारोपान्नाव्याप्तिः । व्यापारत्वेन कृतेरपि सङ्ग्रहात् तदाश्रयेऽचेतने न स्वरसतः कर्तृव्यवहारः, तदतिरिक्तव्यापारस्य धातुना विवक्षायां तु क्वचित्कर्तृत्वव्यवहारोऽपि । तदुक्तं वाक्यपदीये–

धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते" इति

अत एव यदा यदीयो व्यापारो धातुनाभिधीयते तदा स कर्ता– इति स्थाली पचति, अग्निः पचति, काष्ठानि पचन्ति, तण्डुलः पच्यते स्वयमेवेत्यादिप्रयोगाः सङ्गच्छन्ते । कृत्याश्रयत्वादेः कर्तृत्वे तु तदसङ्गतिः स्पष्टैव, ननूक्तरीत्या विवक्षाया एव प्रयोगनियामकत्वे कर्तृकर्मव्यपदेशाच्च(ब्र०- सू० १।२।४)इति शारीरकसूत्रे– "मनोमयः प्राणशरीरः" इति वाक्यस्थमनोमयस्य जीवत्वे वाक्यशेषे तस्य "एतमितः प्रेत्याभिसम्भवितास्मि" इति प्राप्तिकर्मत्वकर्तृत्वव्यपदेश- विरोधः इति भगवता व्यासेन निर्णीतं कथं संगच्छताम् ? इतः शरीरात् प्रेत्य निःसृत्य– एतच्छरीरं परित्यज्य, एतं स्वप्रकाशत्वादिगुणविशिष्टं पूर्वोक्तमात्मानम्, अभिसम्भ- वितास्मि प्राप्तास्मीति तदर्थः । तत्र हि भवदुक्तरीत्या वैवक्षिकयोः कर्मत्वकर्तृत्वयोरेकस्मिन्नपि सम्भवेन विरोधा- भावाद् विरोधकथनस्य स्पष्टमयुक्तत्वात्– इति चेदुच्यते, जीवस्यैव ज्ञेयत्वे प्राप्तिकर्मत्वमपि तस्य वाच्यम्; कर्तृ- त्वञ्च तस्याख्यातेनोक्तम् । न चैकस्यैकदा संज्ञाद्वयमुपपन्नम्, कर्तृसंज्ञया कर्मसंज्ञया बाधात् । तथा चैतमिति द्वितीया न स्यात् । कर्मकर्तृतायां च यगाद्यापत्तिरिति शब्दविरोध- द्वारा भवति स भेदहेतुरिति न व्यासोक्तिविरोधः ।

एवञ्च धातूपात्तव्यापाराश्रयस्य कर्तृत्वमित्यायातम् । तत्र च व्यापारपर्यन्तांशस्य धातुनैव लभ्यत्वात्– अनन्य- लभ्यस्यैव शब्दार्थत्वनियमादाश्रयमात्रं कर्तृतृतीयार्थः । कृत्याश्रयत्वं कारकचक्रप्रयोक्तृत्वं वा कर्तृत्वमिति नैयायि- कोक्तं तु न युक्तम् 'दण्डः करोति' इत्यादावचेतने दण्डादौ तथा कर्तृत्वस्यानुपपन्नत्वात् ।

अत्र वदन्ति-दण्डादिनिष्ठव्यापारस्य धात्वर्थत्वविवक्षया भवदुक्तस्वातन्त्र्यवत् वास्तवकारकचक्रप्रयोक्तृत्वस्य दण्डादावभावेऽपि तदारोपात्कर्तृत्वव्यवहारस्तस्मिन् सूपपादः। अतएव हरिणा —

"प्रागन्यतः शक्तिलाभात् न्यग्भावापादनादपि।
तदधीनप्रवृत्तत्वात् प्रवृत्तानां निवर्तनात् ॥

अदृष्टत्वात् प्रतिनिधेर्व्यतिरेके च दर्शनात्।
आरादप्युपकारित्वे स्वातन्त्र्यं कर्तुरिष्यते ॥

इति कारिकया "करणादिव्यापारात् पूर्वं करणादिसम्पादकशक्तिमत्त्वेन, करणादीनामात्माधीनत्वसम्पादनेन, तदायत्तव्यापारत्वेन, प्रवृत्तानां निवर्त्तनेन (कर्तुः फलप्राप्तौ स्वत एव निवृत्त्या) प्रतिनिध्यभावेन, कारकान्तराभावेऽप्यस्ति क्रियादौ कर्तुर्दर्शनेन च दूरादप्युपकारित्वेऽपि स्वातन्त्र्यमित्यर्थया-कारकचक्रप्रयोक्तृत्वरूपमेव स्वातन्त्र्यं लक्षितम्। वस्तुत एषां धर्माणामभावेऽपि शब्देन यस्य ते धर्माः प्रतिपाद्यन्ते स कर्तेति कारिकाशयः। पाचयति चैत्रेण मैत्र इत्यादौ प्रयोज्यस्य प्रयोजकव्यापाराधीनत्वेऽपि णिच्प्रकृत्यर्थसाधनान्तरविषये उक्तस्वातन्त्र्यस्य सत्त्वात् कर्तृत्वोपपत्तिः। धातुवाच्यक्रियाकृतस्वातन्त्र्यस्यैव विवक्षणात्; कर्तृपरतन्त्रकरणादेर्न स्वव्यापारमादाय कर्तृत्वम् प्रयोज्यस्य स्वार्थसिद्ध्यर्थमपि प्रवृत्त्या करणादीनां कर्त्रधीनत्ववत् प्रयोज्यस्य प्रयोजकानधीनत्वाच्च। न हि फलोद्देशाधीना करणादीनां व्यापारवत्ता। प्रयोज्यस्य तु तादृशप्रवृत्तौ 'सर्व इमे स्वभूत्यर्थं प्रवर्त्तन्ते' इति 'हेतुमति च' (३।१।२६) इति पाणिनिसूत्रस्थभाष्यमनुभवश्च सार्वजनीनः प्रमाणमिति तथा च 'चैत्रेण पच्यते तण्डुलः' इत्यादौ विक्लित्तिः फलम्, प्रयत्नरूपो व्यापारश्च पचेरर्थः। आश्रये तादात्म्येन चैत्रः, स च (आश्रयश्च) समवेतत्वेन व्यापारे, प्रधाने तण्डुलाभिन्नाश्रयिका विक्लित्तिरन्वेति। तथा च चैत्राभिन्नाश्रयसमवेतव्यापारजन्या तण्डुलाभिन्नाश्रयिका विक्लित्तिरिति बोधः।

तार्किकास्तु आश्रयत्वस्याखण्डस्याभावात् नाश्रयस्य तृतीयार्थत्वम्, किन्त्वाश्रयत्वमाधेयत्वं वा तृतीयार्थो लाघवात्। यदि, चैत्रेण पच्यते इत्यादौ पचिना फूत्कारादिव्यापार एव प्रत्याय्यते तदाऽऽख्यातस्यैव लाघवात् प्रयत्न एव तृतीयार्थः। 'चैत्रेण गम्यते' स्पन्द्यते इत्यादौ प्रयत्नस्यैव तृतीयार्थतया भानात्। स च (प्रयत्नः) समवेतत्वेन चैत्रविशेषितः साध्यतया गमनादौ विशेषणीभूयान्वेति। रथेन गम्यते, चैत्रेण ज्ञायते इत्यादौ तृतीयाया आधेयत्वमर्थः। तच्च निरूपितत्वेन सम्बन्धेन प्रकृत्यर्थविशेषितं स्वरूपसंसर्गेण धात्वर्थविशेषणतयाऽन्वेति। शोभया प्रतिभायते प्रकाश्यते वा, मोदकेन स्वद्यते रुच्यते वा इत्यादौ विषयत्वं तृतीयार्थः, तच्च आधेयत्वसंसर्गेण प्रकृत्यर्थविशेषितं प्रतियोगितासंसर्गेण धात्वर्थे ज्ञाने, इच्छायां विशेषणतयाऽन्वेति; ज्ञानमात्रार्थकयोः प्रतिभातिप्रकाशत्योः, इच्छामात्रार्थकयोः स्वदतिरोचत्योर्विषयत्वार्थककर्तृ प्रथमयैव साकांक्षत्वात्। चैतन्येन प्रतिबिम्ब्यते इत्यत्र प्रकारत्वं तृतीयार्थः, तस्य प्रतियोगितासंसर्गेण धात्वर्थे भ्रमे विशेषणतयाऽन्वयः एवं चैतन्यप्रकारताप्रतियोगी भ्रम इत्यन्वयबोधः। घटेन नश्यत इत्यत्र घटो नश्यतीत्यादौ त्यादेरिव तृतीयायाः प्रतियोगित्वमर्थः तस्य निरूपितानुयोगितासम्बन्धेन धात्वर्थे नाशे विशेषणतयाऽन्वयः, तथा च घटप्रतियोगिताको नाश इत्यन्वयबोधः। वह्निना दीप्यत इत्यत्र भास्वररूपवत्तेजःसंयोगनियतावयवसंयोगो दीप्यतेरर्थः, तदन्वयि समवायावच्छिन्नं समवायघटितसामानाधिकरण्यावच्छिन्नं वाऽऽधेयत्वं तृतीयार्थः। चैत्रेण शय्यते इत्यत्राधःस्वावयवावच्छिन्नसंयोगानुकूलव्यापारः शयतेरर्थः। तदनुकूलप्रयत्नस्तृतीयार्थः। यदि च तादृशसंयोग एव शयतेरर्थः, व्यापारो नार्थः; अत एव व्यापारे नष्टेऽपि तादृशसंयोगे विद्यमाने शय्यत इति वर्त्तमानाप्रयोग इत्युच्यते तदा तथाविधमाधेयत्वं तृतीयार्थः। आधेयत्वेनाधेयत्वस्य शक्यत्वेऽपि संसर्गविशेषावच्छिन्नाधेयत्वीयस्वरूपसंसर्गेण धात्वर्थेऽन्वयोपगमात् नानुपपत्तिरिति। अत्र प्रयत्नत्वस्य जातितया

तद्विशिष्टे तृतीयायाः शक्तिः आधेयत्वादौ लक्षणा । यदि चाधेयत्वत्व-विषयत्वत्व-प्रकारत्वत्व-प्रतियोगित्वत्वान्यखण्डोपाधयस्तदा तद्विशिष्टेऽपि तृतीयायाः शक्तिरेव ।

नृपेण गम्यते गमितो वा दिगन्तं शत्रुरित्यत्र तृतीयार्थः प्रयाणादिव्यापारः नृपविशेषितः प्रयोज्यतासंसर्गेण शत्रुकर्तृकगमनेऽन्वेति । आचार्येण बोध्यते बोधितो वा धर्मं माणवक इत्यत्र तृतीयाऽर्थोऽध्यापनादिव्यापार आचार्यादिविशेषितो माणवककर्तृकबोधे तथाऽन्वेति । यजमानेन भोज्यते भोजितो वा पायसं ब्राह्मण इत्यत्र तृतीयार्थो निमन्त्रणादिव्यापारो यजमानविशेषितो ब्राह्मणकर्तृकभोजने तथाऽन्वेति । गुरुणा व्याहार्यते व्याहारितो वा धर्ममेष इत्यत्र तृतीयार्थः शिक्षणादिव्यापारो गुरुविशेषित एतत्कर्तृकव्याहारे तथाऽन्वेति । गुरुणा श्राव्यते श्रावितो वा शास्त्रं शिष्य इत्यत्र तृतीयार्थो वाक्यादिव्यापारो गुरुविशेषितः शिष्यकर्तृकशाब्दबोधे तथाऽन्वेति । गृहस्थेन मासमास्यते आसितो वा ऽतिथिरित्यत्र शयनासनभोजनादिदानव्यापारो गृहस्थविशेषितोऽतिथिकर्तृकासने तथाऽन्वेति । मुद्गरेण नाश्यते घट इत्यत्र तृतीयार्थोऽभिघातव्यापारो मुद्गरविशेषितो घटप्रतियोगिकनाशे तथाऽन्वेति । यदि च पूर्वोक्तः प्रयाणादिव्यापारो णिजर्थ एव स कथं तृतीयार्थोऽन्यलभ्यत्वात् – अनन्यलभ्यस्यैव शब्दार्थत्वात् – इति विभाव्यते तदा प्रयत्न आधेयत्वादिकं च तृतीयार्थः, णिजर्थप्रयाणादिव्यापारे यथायोग्यं तत्तत्सम्बन्धेनान्वेतीति बोध्यम् ।

न च प्रयाणादिव्यापारः प्रयत्नादिर्वा कथं तृतीयार्थः, तज्ज्ञापकस्यानुशासनस्य विरहात्, स्वतन्त्रः कर्ता (२।२।२) इत्यत्र धात्वर्थस्य त्यादिप्रत्ययार्थस्य वा प्रधानव्यापारस्याश्रयतायाः कर्तृतात्वेनानुशासनात्, न तु णिजर्थव्यापारस्येति वाच्यम्; गतिबोधाहारे० (२।२।५) इति सूत्रस्थस्य अणिगित्यस्य ज्ञापकस्य सत्त्वात् । यदि च स्वतन्त्र एव कर्तृशब्दार्थः तदा सूत्रे अणिक् इति व्यर्थं स्यात्, णिजर्थव्यापाराश्रयस्यास्वतन्त्रत्वादेव तत्र कर्तृत्वाऽप्रसक्तेः । तथा च प्रयोजकोऽपि कर्ता भवति, तत्र कर्मत्वनिषेधकतयाऽणिगित्यस्य सार्थक्यम् । तेन गमयति देवदत्तेन यज्ञदत्तं जिनदत्तः इत्यत्र देवदत्तस्य कर्मत्वाभावान्न द्वितीयेति । एवं प्रयोजकस्य णिजर्थव्यापाराश्रयस्य कर्तृत्वेऽवगते हेतुकर्तृकरणेत्थंभूत० (२।२।४४) इत्यनेनैव प्रयोजकवाचिपदात्तृतीयेति । अत एव पञ्चविधः कर्तेत्यत्र प्रकरणे प्रयोजकस्वतन्त्र-कर्मकर्तृणामेव ग्रहणम्- अभिहितानभिहितत्वे स्वतन्त्रप्रयोजकयोरवान्तरधर्मौ न विभाजकोपाधी इति कौण्डभट्टेरुक्तम् । इत्थं च प्रयत्न आधेयत्वं वा तृतीयाविभक्त्यर्थ इति तार्किकसिद्धान्तनिष्कर्षः ।

वैयाकरणसिद्धान्तस्तु पूर्वमेव प्रतिपादितः । कर्तृत्वस्य स्वातन्त्र्यस्य धात्वर्थव्यापाराश्रयत्वरूपस्य सिद्धत्वेन धात्वर्थव्यापारस्य च धातुनैव प्रतिपादनादवशिष्टस्य आश्रयस्यैव तदर्थत्वौचित्यात् । आधेयत्वस्य प्रयत्नस्य वा शब्दमर्यादया तदर्थत्वालाभावात् । यच्च तार्किकैस्तत्र तत्र विषयत्वादिकमपि तृतीयार्थत्वेन वर्णितं तदपि नोचितम्, अनुशासनविरहात् अनेकार्थत्वस्यायुक्तत्वाच्चेति विभावनीयम् । तथा च चैत्रेण कृतमित्यत्र चैत्राभिन्नाश्रयको भूतकालिक उत्पत्त्यनुकूलो व्यापार इति बोधः । मैत्रेण भुज्यत इत्यत्र मैत्राभिन्नाश्रयको वर्त्तमानकालिको गलविलाधःसंयोगानुकूलो व्यापार इति बोध इत्यादिरीत्या शाब्दबोध ऊहनीयः ।

## अथ करणतृतीयार्थः ।

अनेनैव सूत्रेण करणेऽपि तृतीया विधीयते । तस्याश्चाश्रयव्यापारौ वाच्यौ । तथा हि साधकतमं करणम् ( २।२।२४ ) इति सूत्रे तमबर्थः प्रकर्षः, स चाव्यवधानेन फलजनकव्यापारवत्ता । तादृशव्यापारवत्कारणं च करणम् । तथा च वाक्यपदीये हरिणाऽप्युक्तम्—

क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।
विवक्ष्यते यदा यत्र, करणं तत्तदा स्मृतम् ॥

वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम् ।
स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः ।। इति

तथा च यद्व्यापाराव्यवधानेन क्रियानिष्पत्तिविवक्षा तदेव करणम् । तच्च विवक्षाधीनमिति अधिकरणव्यापारस्यापि कदाचित् करणत्वविवक्षया चैत्रेण स्थाल्या पच्यत इत्यपि प्रयुज्यते । यद्यपि धातुरपि व्यापारवाचकः इति व्यापारस्य धातुनैव लाभादाश्रयमात्रं करणतृतीयार्थ इति शङ्कितुं शक्यते, तथापि धातुना कर्तृस्थ एव फलानुकूलो व्यापार उच्यते, करणस्थव्यापारस्य तेनानभिधानात्, इति करणतृतीयाया आश्रयव्यापारोभयवाचकत्वस्यौचित्यात्, तथा च दात्रेण लुनातीत्यत्र प्रकृत्यर्थदात्रस्याभेदेनाश्रयरूपतृतीयार्थेऽन्वयः । तस्य च व्युत्पत्तिवैचित्र्येण समानप्रत्ययोपात्तत्वप्रत्यासत्त्या व्यापाररूपे तृतीयार्थान्तरे आधेयतासम्बन्धेन, फलोपहिततादृशव्यापारस्य चानुकूलतासम्बन्धेन लवनानुकूलव्यापारेऽन्वयः । एवञ्च दात्राभिन्नाश्रयको यः फलोपहितव्यापारस्तद्विशिष्टो लवनानुकूल एकाश्रयको वर्तमानो व्यापार इति शाब्दबोधः । वैशिष्ट्यं च जन्यजनकभावसम्बन्धेन बोध्यम् ।

अपरे तु —"क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्" इति वाक्यपदीयस्थ-अनन्तरपदस्वारस्यात् तृतीयार्थव्यापारस्य जन्यतासम्बन्धेन फलेऽन्वयः । तथा च जन्यतासम्बन्धेन दात्राभिन्नाश्रयकव्यापारविशिष्टो लवनानुकूलो व्यापार इति बोधः । तृतीयार्थकरणत्वस्य व्यापार एवान्वयः शब्दशक्तिस्वाभाव्यात्; न फलांशे । अत एव मत्वर्थलक्षणया सोमेन यजेतेत्यादौ सोमादिपदस्य नामधेयत्वं साधितम् । अन्यथा व्यापारं प्रति करणत्वेनान्विते फलांशे करणत्वेनान्वयोपपत्तौ अप्रसङ्ग एव लक्षणायाः स्यात् । वस्तुतस्तु—

आश्रयोऽवधिरुद्देश्यः सम्बन्धः शक्तिरेव वा ।
यथायथं विभक्त्यर्थाः सुपां कर्मेति भाष्यतः ।। इति

कौण्डभट्टोक्तदिशा करणतृतीयाया अपि आश्रय एवार्थः । प्रकृत्यर्थान्वितस्याश्रयस्य स्वनिष्ठव्यापारजन्यत्वसम्बन्धेन धात्वर्थव्यापारेऽन्वय इत्येव न्यायः ।

ननु विवक्षावशादेकस्मिन्नपि धर्मिणि कर्तृकरणशक्त्योरविरोध इति पूर्वोदाहृतहरिकारिकयाऽवगतम् । तथा च "कर्ता शास्त्रार्थवत्त्वात्" ( ब्र० सू० २।३।३३ ) इत्युत्तरमीमांसाधिकरणे ( शारीरके ) "शक्तिविपर्ययात्" इति सूत्रेण अन्तःकरणस्य कर्तृत्वे करणशक्तिविपर्ययापत्तिरुक्ता-सा न युक्ता इति चेत्, अत्रोच्यते—"तदेतेषां प्राणानां विज्ञानेन विज्ञानमादाय" इति श्रुत्यन्तरे करणतया क्लृप्तस्य कर्तृतां प्रकल्प्य शक्तिविपर्ययापत्तिर्निष्प्रमाणा कल्प्येतेत्यभिप्रायात् । अयमाशयः- बुद्ध्यात्मकस्य विज्ञानस्य कर्तृत्वं जीवस्य वेति सन्देहे जीवस्यैव कर्तृत्वसाधकं ब्रह्मसूत्रं 'कर्ता शास्त्रार्थवत्त्वात्' ( २।३।३३ ) इति । अस्यार्थः जीवः कर्ता, शास्त्रस्य विधिनिषेधरूपस्य अर्थवत्त्वात्- जीवस्य कर्तृत्व एव उपपन्नत्वात् इति जीवस्य कर्तृत्वं प्रसाध्य विज्ञानपदव्यवहार्याया बुद्धेः कर्तृत्वं निरस्यति तदुत्तरसूत्रेण 'शक्तिविपर्ययात्' इत्यनेन । अस्यार्थः- विज्ञानस्य कर्तृत्वे तस्य करणत्वशक्तेर्विपर्ययापत्तिः, करणस्य कर्तृभिन्नत्वात् इति । स चार्थ सिद्धान्तः एकस्यापि विवक्षावशात्करणत्वकर्तृत्वयोरभ्युपगमे विरुध्येतेति शङ्का । एकस्य विज्ञानस्य करणत्वेन क्लृप्तस्य कर्तृत्वकल्पनायां- युगपदुभयथाविवक्षाया अप्रामाणिकतया तदापत्तिः कथितेति न तद्ग्रन्थविरोध इत्युत्तरपक्षस्याशयः ।

वस्तुतस्तु अन्वाचयमात्रमेतत् इति "यथा च तक्षोभयथा" ( ब्र० सू० २।३।४० ) इत्यधिकरणे शारीरकभाष्य एव स्पष्टम् । तत्र हि यथा तक्षा वास्यादिकरणहस्तः कर्ता सन् दुःखी भवति, स एव विमुक्तवास्यादिकरणो निर्व्यापारो गृहे सुखं तिष्ठति, एवम् अविद्याप्रत्युपस्थापितद्वैतसम्बद्ध आत्मा स्वप्नजागरितावस्थयोः कर्ता सन् दुःखी भवति, तत्श्रमापनुत्तये तमात्मानं परब्रह्म प्रविश्य विमुक्तसङ्गः सुखी भवति । एवं च यथा तक्षा वास्यादियुक्त

एव कर्तृत्वेन व्यवह्रियते तथाऽऽत्मापि सर्वव्यापारेषु विज्ञानादीनाश्रित्यैव कर्तृत्वमनुभवति, इति विज्ञानादेर्न कर्तृत्वमित्यत्रैव तत्रत्य—सूत्रभाष्यादीनां तात्पर्यं न तु शक्तिविपर्ययप्रतिपादन इति तदुक्तिरभ्युच्चयमात्रमित्या—शयः ॥

तार्किकास्तु—साधकतमं करणम् ( २।२।२४ ) इति सूत्रस्थ-साधकतमपदं फलायोगव्यवच्छिन्नव्यापारवत्परम् । तथा च फलोपहितव्यापारद्वारा क्रियाया जनकं करणमिति लभ्यते । तत्र च तृतीया विधीयत इति तस्याः फलो—पहितव्यापार एवार्थः । फलोपधानं विशेषणमुपलक्षणं वेत्यन्यदेतत् । तत्र साक्षाज्जनकं न करणमिति तण्डुल—विक्लित्त्यौदनं पचतीति न प्रयोगः, तण्डुलविक्लित्तेरोदनो—त्पत्तिं प्रति साक्षाज्जनकत्वात् । फलानुपहितव्यापार—कमपि न करणम्, इति शूर्पेण तण्डुलं पचतीति न प्रयोगः । शूर्पव्यापारस्य तण्डुलविक्लित्यनुपधायकत्वात् । व्यापा—रस्तु क्रियाजनकतावच्छेदकेन धर्मेणोपलक्षणेनानुगतीकृत—तत्तद्धर्मवान्, तृतीयाविभक्त्योपस्थाप्यः । एतेन सकल—व्यापारसाधारणैकरूपाभावेन, न शक्यत्वैक्यं, तत्तद्रूपेण शक्तिस्वीकारे नानार्थता, युगसहस्रेणापि तदीयशक्तेरग्रह—श्चेति यदाक्षिप्तमन्यैस्तत्परास्तम् । यदाधारादिव्यापारो धातुनानभिधीयमानः क्रियाजनकतया विवक्षितः, तदाऽऽधा—रादिकारकगणोऽपि करणमेव, विवक्षातः कारकाणि भव—न्तीति प्राचीनप्रवादात् । व्यापाराश्रयः करणतृतीयार्थ इति शाब्दिकमतं तु न युक्तम् व्यापारमात्रस्य शक्यत्वे लाघवात्, तदाश्रयस्य तथात्वे गौरवात् । किं च व्यापा—रस्य धात्वर्थे जन्यत्वेन संसर्गेण साक्षादन्वयस्तदाश्रयस्य तु स्वव्यापारजन्यत्वसंसर्गेण परम्परयाऽन्वय इति केवलव्या—पारस्यैव तृतीयाविभक्त्यर्थत्वं युक्तम् ।

वह्निना पचतीत्यत्र तृतीयार्थ ऊर्ध्वज्वलनव्यापारो जन्यत्वसंसर्गेण पाके ऽन्वेति, वह्न्यूर्ध्वज्वलनजन्या पाक—कृतिरित्यन्वयबोधः । अनुभवेन स्मरति, योगेन स्वर्गच्छति, चक्षुषा पश्यति इत्यादौ क्रमशः संस्कारापूर्वसन्निकर्षेषु तृतीयार्थेषु प्रकृत्यार्थानां जन्यत्वसंसर्गेणान्वयः, अनुभव—जन्यसंस्काराभिन्नव्यापारजन्यं स्मरणम्, योगजन्यापूर्वाभि—न्नव्यापारजन्यं स्वर्गमनम्, चक्षुर्जन्यसन्निकर्षजन्यं दर्शन—मित्यादिरीत्या बोधः । श्रोत्रेण शृणोतीत्यत्र तृतीयार्थे शब्दावच्छिन्नसमवाये— सविशेषणे हीतिन्यायेन श्रोत्रस्य जन्यतासंसर्गेण शब्देऽन्वयः पर्यवस्यति— यथा 'रूपं चक्षुषा पश्यतीत्यत्र सन्निकर्षे । क्वचिज्जन्यत्वातिरिक्त—संसर्गेणापि तृतीयार्थे प्रकृत्यर्थस्याऽन्वयः—यथा 'चिकीर्षया प्रवर्तते परामर्शेनानुमिमीते इत्यादौ तृतीयार्थे समवाये चिकीर्षापरामर्शयोः स्वप्रतियोगिताकत्वसंसर्गेणान्वयः । यदि च शृणोतेः प्रत्यक्षार्थकत्वेऽपि 'शब्देन शृणोतीति प्रयोगस्तदा शब्दस्यापूर्ववत्समवायेऽन्वय इति वदन्ति । अन्ये तु सर्वत्र करणतृतीयार्थे तृतीयार्थस्य जन्यजनकभावसंसर्गेणैवान्वयः । परामर्शेनानुमिमीते इत्यादौ दण्डेन घट इत्यत्रेव हेतौ तृतीया न करणे इत्याहुः ।

अत्र वदन्ति— अनुमानीयः परामर्श इत्यत्र करणे ईय—प्रत्ययस्य दर्शनात् परामर्शेनानुमिमीते इत्यत्र करणे तृतीया न तु हेतौ, करणत्वं तु फलोपधायकत्वम् । तत्रोपहितत्वं करणतृतीयार्थः । हेतुतृतीयायास्तु स्वरूपयोग्यत्वमर्थ इति । तच्चिन्त्यम्, पटीयास्तन्तवः, ओदनीयः पाक इत्यादाविव हेतुत्वार्थकेन सम्बन्धार्थकेन वा ईयप्रत्ययेन दर्शितप्रयोगोपपादनसम्भवात् उपहितत्वस्य कार्याव्यवहित—पूर्वक्षणवृत्तित्वरूपस्य कार्यविशेषाणामन्यलभ्यानामज्ञाने दुर्ग्रहस्य, कार्यविशेषाणामननुगमेन तत्तत्कार्यव्यक्तीनामननु—गततयाऽव्यवहितपूर्वक्षणस्याननुगमेन चात्यननुगतत्वात्तृती-यार्थत्वासम्भवाच्च । व्यापारस्य तृतीयार्थत्वे तु प्रकृत्य—र्थस्य व्यापारे तस्य च धात्वर्थे जन्यत्वसंसर्गेणान्वयान्नान—नुगमशङ्कापि । अत एव सव्यापारकं कारणं करणमिति करणस्य, 'स्वजन्यः सन् स्वजन्यजनको व्यापार' इति व्यापारस्य च लक्षणं सङ्गच्छते ।

ननु घटादौ दण्डादेर्व्यापारद्वारा हेतुत्वम्, अत एव शब्दालोके पक्षधरमिश्रः, "दण्डकाष्ठादेश्च चक्रभ्रमिविभिलत्यादिजनकत्वं स्वनिष्ठस्पन्दज्वलनद्वारे" त्युक्तम्, तथा च दण्डेन घट इत्यत्र सव्यापारकहेतुत्वस्य तृतीयार्थतया तस्य च नामार्थान्वियेन करणत्वस्य कारकत्वहानिरिति चेन्, न; व्यापारस्य करणतृतीयार्थतया तस्य च जन्यत्वसंसर्गेण धात्वर्थ एवान्वयेन कारकत्वानपायात्। दण्डेनेति तृतीयाया हेतुत्वमेवार्थः, तच्च साक्षात्परम्परासाधारणमिति पूर्वमुक्तमेवेति कृतं प्रपञ्चेनेति।

## अथ इत्थंभूतलक्षणतृतीयार्थः।

इत्थंभूतलक्षणेऽप्यनेनैव सूत्रेण तृतीया विधीयते। तत्रेत्थंभूतलक्षणशब्द एवं व्याख्यातो बृहद्वृत्तौ— **इमं कंचित् प्रकारं भूतः प्राप्तः, स लक्ष्यते येनेति।** तथा च प्रकारलक्षणे तृतीयेति पर्यवस्यति। तत्र प्रकारो द्विविधः विशेषणमुपलक्षणं च। स्वसमानकालिकबुद्धिप्रकारो विशेषणम्, स्वासमानकालिकबुद्धिप्रकार उपलक्षणम्। एतदेव विद्यमानं व्यवच्छेदकं विशेषणम्, अविद्यमानं व्यवच्छेदकमुपलक्षणमिति व्याचक्षते प्राञ्चः। तथा दण्डेन संन्यासीत्यत्र दण्डो विद्यमान एव संन्यासिनं व्यावर्तयतीति दण्डो विशेषणम्। गुरुणा टीका कुरुणा क्षेत्रमित्यत्र गुरुः कुरुश्चोपलक्षणम्। तथा चात्र विद्यमानकालनिष्ठस्य ध्वंसस्य कादाचित्काभावस्य वा प्रतियोगित्वं सम्बन्धश्च तृतीयार्थः। प्रतियोगित्वं प्रकृत्यर्थे विशेषणतया, सम्बन्धो विशेष्यतयाऽन्वेति। एवं चाविद्यमानस्य गुरोः टीका, तथाभूतस्यैव कुरोः क्षेत्रमित्यन्वयबोधः। अत एव सूत्रे इत्थंभूतेत्यत्रातीतार्थको क्तः अतीतस्य लक्षणे सम्बन्धे तृतीया भवतीत्यभिप्रायेण प्रत्यक्षालोके पक्षधरमिश्रैः अतीतार्थेन प्रत्ययेनासत्त्वबोधनादित्युक्तम्।

अन्ये तु यस्यां बुद्धौ यो यत्र प्रकारः स तत्र विशेषणम्, विशेषणोपस्थापकमविशेषणमुपलक्षणम्— इति विशेषणोपलक्षणयोर्लक्षणमाहुः। यथा काकेनोपलक्षितः संस्थानविशेषः देवदत्तगृहे विशेषणीभूय भासते, तत्प्रतीतावुपलक्षणं काकः। एवं चूलयोपस्थापितो विषयभोगाभावः परिव्राजकविशेषणम्। एवं काकेन देवदत्तगृहाः इत्यत्र काकज्ञानजन्यज्ञानविषया देवदत्तगृहा इति। चूलया तापस इत्यत्र चूलाज्ञानजन्यज्ञानविषयस्तापस इति चान्वयबोधः इतिवदन्ति। तदत्र मते ज्ञानजन्यज्ञानं तृतीयार्थः इति पर्यवस्यति इति प्रतियोगिना घटेनाभाव इत्यत्र तृतीयाऽनुपपत्तिः प्रतियोगिनोऽभावविशेषणानुपस्थापकत्वात्। तदुक्तं प्रत्यक्षचिन्तामणौ प्रतियोगिनाऽभावे धर्मान्तरानुपनयनाच्चेति। शिवादित्यमिश्रास्तु साक्षात्सम्बद्धं विशेषणं, परम्परासम्बद्धमुपलक्षणम्। तदुक्तम्—

"व्यावर्तनीयमधितिष्ठति यच्च साक्षाद्,
एतद्विशेषणमतो विपरीतमन्यत्।
दण्डी पुमानिति विशेषणमत्र दण्डः,
पुंसो न जातिरनुदण्डमसौ च तस्य ॥ इति।

यत् व्यावर्त्तनीयं धर्मिणं साक्षात् अधितिष्ठति एतद् विशेषणम्, यथा दण्डी पुमानित्यत्र दण्डः पुंसो विशेषणम्, अनुदण्डम्— दण्डमनुगता जातिः दण्डत्वं पुंसो न विशेषणम्, किन्त्वसौ जातिर्दण्डस्य विशेषणमिति। अतो विपरीतं परम्परया व्यावर्तकमुपलक्षणम्। यथा उपरिपरिभ्राम्यत्काकादिगृहस्योपलक्षणम् इत्याहुः। अत्रापि मते कमण्डलुना छात्रः, चूलया परिव्राजक इत्यादौ कमण्डलुचूलिकयोः साक्षात्सम्बद्धयोश्छात्रपरिव्राजकयोरुपलक्षणत्वानुपपत्तिः। अत एव चिन्तामणौ साक्षात्सम्बन्धेऽप्युपलक्षणत्वादित्युक्तम्। तथा च तदनुयायिनां मते विशेषणमुपलक्षणं चान्यथैव व्याचक्षते।

तथा हि—यत्रैकस्या व्यावृत्तेरनुयोगिता प्रतियोगिता चैकधर्मावच्छिन्ना तत्र व्यावृत्तेरनुयोगितावच्छेदकत्वेन प्रतियोगितावच्छेदकीभूताभावप्रतियोगित्वेन प्रतीयमानत्वं विशेषणपदप्रवृत्तिनिमित्तं यथा दण्डी पुरुष इति निश्चयानन्त-

रमदण्डपुरुषव्यावृत्तौ दण्डी पुरुष इति निश्चयो जायते । तत्र पुरुषत्वेनैकेनावच्छिन्ना प्रतियोगिताऽनुयोगिता चैकस्या व्यावृत्तेः, तदनुयोगिता दण्डेनाप्यवच्छिद्यते, तत्प्रतियोगितावच्छेदकीभूतदण्डाभावप्रतियोगित्वं च दण्डे प्रतीयत इति दण्डी पुरुष इत्यत्र दण्डः पुरुषविशेषणम् । यत्र तु प्रतियोगित्वानुयोगित्वयोर्नैकधर्मावच्छिन्नत्वं तत्र पद्मत्वावच्छेदेन कुसुमान्यपत्रादिव्यावृत्तेः प्रत्ययेऽपि कुसुमत्वं न विशेषणं पद्मस्येति । इदं तु विशेषणत्वमेकधर्मविशिष्टेऽपरविशेषणस्य बोध्यम् । सामान्यतो विशेषणत्वं तु व्यावृत्त्यधिकरणतावच्छेदकतया व्यावृत्तिप्रतियोगितावच्छेदकीभूताभावप्रतियोगितया च प्रतीयमानत्वम् । यथा दण्डीत्यत्रैकस्या एव व्यावृत्तेः प्रतियोगितावच्छेदकीभूताभावप्रतियोगितयाऽधिकरणतावच्छेदकतया च दण्डो व्यावृत्तिबुद्धौ भासते इति सामान्यतो विशेषणत्वमपि दण्डस्य दण्डी पुरुष इत्यत्र सम्भवति । अत एव चिन्तामणौ "दण्डी पुरुष इति ज्ञानानन्तरं दण्डवत्यदण्डव्यावृत्तिरवगम्यते इति प्रत्याख्य व्यावृत्त्यधिकरणता पुरुषस्य दण्डेनावच्छिद्यते, न पुरुषत्वेन; अतिव्याप्तेः" इत्युक्तम् । सामान्यतो विशेषणत्वं व्यतिरेकिधर्ममात्रस्य सम्भवति; केवलान्वयिनि धर्मे व्यावृत्तेरप्रसिद्ध्या विशेषणत्वसामान्याभाव इति ॥

प्रतीयमानत्वगर्भं विशेषणत्वं व्यावृत्तेर्बुद्धौ न विषयः किं तु तदनुव्यवसायादौ । काकवन्तो देवदत्तस्य गृहा इत्यत्र देवदत्तस्वत्वशून्यगृहव्यावृत्तिः संस्थानविशेषवत्त्वावच्छेदेन प्रतीयते, न तु काकवत्त्वं तदवच्छेदकत्वं तदसत्त्वकालेऽपि दर्शितव्यावृत्तेः प्रतीतेश्च सत्त्वात्– न्यूनवृत्तित्वादिति काको न विशेषणमपि तु व्यावृत्तिबुद्धिप्रकारतया व्यावृत्त्यवच्छेदकोपस्थापकतया वा व्यावर्तकतयोपलक्षणम् । तथा च व्यावृत्त्यधिकरणतानवच्छेदकत्वे सति व्यावर्तकत्वमुपलक्षणत्वमत एव चिन्तामणौ प्रत्याख्य व्यावृत्त्यधिकरणतावच्छेदकत्वे सति व्यावर्तकं विशेषणं तदन्यद्व्यावर्तकमुपलक्षणमित्युक्तम् । व्यावृत्त्यधिकरणताया अवच्छेदकत्वं स्वरूपसम्बन्धविशेषः । अत एव तदवच्छेदकत्वं संयोगादाविव तेन समं स्वरूपसम्बन्धविशेषे इति पक्षधरमिश्रैरुक्तम् । व्यावर्तकत्वं व्यावृत्तिबुद्धिप्रयोजकबुद्धिविषयत्वं व्यावृत्त्यबोधकालेऽपि विशेषणत्वबुद्धिप्रसङ्गवारणार्थमुपात्तम् । अत एव चिन्तामणौ व्यावृत्त्युल्लेखानन्तरमेव विशेषणत्वबुद्धिरित्युक्तम् । न च व्यावृत्तेरबोधकाले तदवच्छेदकत्वाग्रहसम्भवेनैव विशेषणत्वबुद्धेर्न प्रसङ्ग इति वाच्यम्; शब्दादिना तदवच्छेदकत्वग्रहसम्भवात् । अत एवादण्डव्यावृत्त्यधिकरणतावच्छेदको दण्ड इति शब्दादवगमेऽपि तद्वत्यदण्डव्यावृत्त्यप्रतीतेः सर्वसिद्धत्वादिन्द्रियासन्निकर्षादिना प्रत्यक्षादिसामग्र्यभावादिति पक्षधरमिश्रैरुक्तम् । एवमीदृशविशेषणत्वाभाववद्व्यावर्तकमुपलक्षणं वस्तुसत्युपलक्षणे नाम्नोपस्थापिते सम्बन्धमात्रं तृतीयार्थः । 'काकेन देवदत्तगृहा' इत्यत्र काकसम्बन्धिनो देवदत्तगृहा इत्यन्वयबोधः । प्रमेयत्वादेरव्यावर्तकत्वेनोपलक्षणत्वमपि न सम्भवति, इति प्रमेयत्वेन घटः इति न प्रयोगः । अत एव 'प्रकारो द्विविधः' इत्यत्र प्रकारपदं व्यावर्तकपरतया पक्षधरमिश्रैर्व्याख्यातम् ।

यस्तु पशुना रुद्रं यजेतेत्यत्र पशुगतमेकत्वं विशेषणम्, ग्रहं संमार्ष्टीत्यत्र ग्रहगतमेकत्वमुपलक्षणमिति छान्दसानां व्यवहारः, स च विशिष्टान्वयनिबन्धनः । पशुनेत्यादौ तृतीयार्थकर्मत्वे पशोरेकत्वविशिष्टस्यान्वयः । यथा चैकत्ववैशिष्ट्यं पशौ तथोपपादितं वचनार्थविवरणे । ग्रहं संमार्ष्टीत्यादावेकत्वविशिष्टस्य ग्रहस्य संमार्गकर्मत्वेनान्वय इति विशिष्टान्वये पशोरेकत्वावच्छिन्नप्रतियोगिताकः संसर्गो भासते इत्येकः पक्षः । एकत्वे पशौ च प्रकारता पर्याप्तेति द्वितीयः । एकत्वावच्छिन्ना पशुप्रकारताऽथ वा पशुविशेष्यतया कर्मतादिविशेष्यतया च साक्षात्परम्परासम्बन्धद्वयावच्छिन्नमेवैकत्वप्रकारत्वं निरूप्यत इति तृतीयः । तथा चेदृशविशिष्टविषयतामापन्नं विशेषणम्, अनापन्नमुपलक्षणमिति । अतएव चिन्तामणौ 'उद्देश्यान्वयप्रतियोगी धर्मो विशेषणम्, तदन्यदुपलक्षणमिति सिद्धान्तपर्यवसानम् । काकवन्तो देवदत्तगृहा इत्यत्र उद्देश्याया देवदत्तस्वत्वशून्य-

गृहव्यावृत्तेः अन्वयितावच्छेदकत्वं काकस्य न सम्भवतीति काको न विशेषणम्। यदि चाकाकव्यावृत्तिरुद्देश्या तदा विशेषणमेव। एवं ग्रहं संमार्ष्टीत्यादौ एकत्वविशिष्ट-ग्रहकर्मत्वस्य संमार्गेऽन्वयो नोद्देश्यः किं तु प्रस्तुतसकलग्रह-कर्मत्वस्य, इत्येकत्वं न विशेषणम्। एवमुक्तविशेषणत्वं क्वचित्प्रमेयत्वस्यापि। 'प्रमेय इति प्रमेयं जानाति' इत्यत्र प्रमेयत्वविशिष्टकर्मत्वस्य ज्ञानेऽन्वयात्। अन्यथा प्रमेय इति ज्ञानाभेदान्वयानुपपत्तेः, अत एव नहि प्रमेयत्व-विशिष्टं प्रमेयपदशक्यमित्यत्र प्रमेयत्वं न विशेषणम्, प्रमेय-त्वस्याशक्यत्वापत्तेरिति पक्षधरमिश्रैरुक्तम्। यदा दण्ड-विशिष्टपुरुषस्यान्वयो न विवक्षितस्तदा दण्डो न विशेषणं किन्तूपलक्षणम्, अत एव दण्डेन पुरुषमानयेत्यादिः प्रयोगः। इतीदृशोपलक्षणे वस्तुभूते प्रकृत्यर्थे सति सम्बन्धमात्रार्थिका तृतीया भवतीत्याहुः।

ननु तृतीयायाः सम्बन्धमात्रार्थकत्वे प्रमेयत्वेन द्रव्य-त्वेन वा पुरुषमानयेत्यादिकः कुतो न प्रयोग इति चेन्न, स एव हि सम्बन्धस्तृतीयार्थो य उद्देश्यान्वयप्रतियोगी भवति, अन्यथा उपलक्षणतृतीयान्तप्रयोगस्य वैयर्थ्यापत्तेः। प्रमेय-त्वादेस्तु न तादृशः सम्बन्धः पुरुषादाविति तत्र प्रमेयत्वादिकं नोपलक्षणमिति काकेन देवदत्तगृहा इत्यत्र काकस्य स्व-प्रयोज्यसंस्थानविशेष उत्तृणत्वं सम्बन्धस्तृतीयार्थः। तस्य देवदत्तस्वत्वशून्यगृहव्यावृत्तेरुद्देश्याया अन्वयितावच्छेदक-त्वात्। अत एव काकपदेनोपस्थापितः काक इव तत्सम्ब-न्धस्तु मतुपा बोधितः काककारितसंस्थानविशेष इति पक्षधर-मिश्रैरुक्तम्।

अत एव चूलया तापस इत्यत्र चूलायाः स्वप्रयोजक-केशासंयमप्रयोजकव्रतवत्त्वं सम्बन्धस्तृतीयार्थः। व्रतस्य केशासंयमप्रयोजकत्वं तु केशसंयमस्य निषिद्धतया केशसंयमेन कर्तव्यजपादिकर्मणः कालातिपातशङ्कया वा। यदि च संयतकेशोऽपि तापसस्तदा केशसंयमादिस्तस्य न कर्तव्य-जपादिविरोधीति तदा स्वप्रयोजकीभूताभावप्रतियोगिकेश-संयमाप्रयोजितावैगुण्यकव्रतरूपः सम्बन्धस्तृतीयार्थः। अवै-गुण्यमनिषिद्धत्वम्, कर्तव्यजपादिलोपविरहो वा। केश-संयमप्रयुक्तजपादिलोपस्य विषयासक्ते केशिनि सम्भवान्ना-प्रसिद्धिः। केशसंयमप्रयुक्तजपादिलोपविरहस्य संयतासंयत-केशयोर्व्रते समानत्वादिति पूर्वोक्तव्रतत्वमेव तापसव्यावृत्ती-रुद्देश्याया अन्वयितावच्छेदकं, तस्य चूलायाः सत्त्वासत्त्व-दशायामप्यविकलत्वात्। अत एव संस्थानविशेषवत्त्वादिने-त्यत्र व्रतविशेषवत्त्वादिरादिपदार्थः इति व्याख्यातारः। व्रते विशेषो चूलासम्बन्धतावच्छेदको दर्शित एव। गुरुणा टीकेत्यत्र विवरणवाक्यं टीकाशब्दार्थः। गुरुप्रयोजिता तत्सजातीया वाऽऽनुपूर्वी तद्रूपः सम्बन्धः तृतीयार्थः। स च टीकान्तर-व्यावृत्तेरुद्देश्याया अन्वयितावच्छेदको भवत्येवेति। कुरुणा क्षेत्रमित्यत्र कुरोः स्वकृष्टपरमाणुभिरारभ्यत्वरूपः सम्बन्ध-स्तृतीयार्थः। स च क्षेत्रान्तरव्यावृत्तेरुद्देश्याया अन्वयिता-वच्छेदको भवत्येवेति। दण्डेन पुरुषमानयेत्यत्र दण्डस्य स्वसंयोगप्रागभावनाशस्सम्बन्धस्तृतीयार्थः। स च दण्ड-सत्त्वासत्त्वदशायामप्यविकल इति गृहीतदण्डपुरुषव्यावृत्ते-रुद्देश्याया अन्वयितावच्छेदको भवति। न चात्रोपलक्षण-तृतीयाया अत्यन्ताभावसम्बन्धोऽप्यर्थः तथा च पुरुषे दण्डा-त्यन्ताभावो दण्डसम्बन्धश्च प्रतीयत इति वाच्यम्, दर्शित-वाक्यानन्तरं दण्डसहितपुरुषानयने दर्शितवाक्यस्याप्रामाण्य-प्रसङ्गात्, पुरुषे दण्डदण्डात्यन्ताभावासत्त्वात्। चूलया तापस इत्यत्र चूलाया विद्यमानतया तदत्यन्ताभावस्य तापसे बोधयितुमशक्यत्वाच्च।

एवं बृहद्वृत्तावुदाहृते "अपि भवान् कमण्डलुना छात्र-मद्राक्षी"दित्यत्र। तत्राध्ययनशीलः छात्रशब्दार्थः, कमण्डलोः स्वप्रयोज्याचमनसजातीयम् अध्ययनपूर्वाङ्गाचमनं तद्रूपः सम्बन्धस्तृतीयार्थः। "पीत्वाऽपोऽध्येष्यमाणश्च" इति स्मृतेराचमनमध्ययनपूर्वाङ्गं भवति। तथाविधाचमनमच्छात्र-व्यावृत्तेरन्वयितावच्छेदकं भवत्येव। न हि सम्बन्धस्य तृती-यार्थताऽन्वयितावच्छेदकरूपेणैवान्वयितावच्छेदकत्वम्, किं तु यदेव लघुभूतमनतिप्रसक्तं च तेन रूपेण। अत एव काक-

प्रयोज्योत्तृणत्वत्वेनोत्तृणत्वस्य तृतीयार्थत्वेऽप्युत्तृणत्वत्वे-नैवान्वयितावच्छेदकत्वम् । "अपि भवान् छात्रेणोपाध्याय-मद्राक्षी"दित्यत्र छात्रस्य स्वाध्ययनप्रयोजकमध्यापनं तृती-यार्थः । अध्यापनं वाक्यविशेषः । उपाध्यायोऽध्यापन-योग्यः । योग्यत्वं तु अध्यापनवाक्यतदर्थगोचरदृढसंस्कार-वत्वे सति वक्तृत्वम् । वक्तृत्वोपादानादवगतशास्त्रार्थस्य मूकस्य व्युदासः । एवमध्यापनमुपाध्यायान्यव्यावृत्तेरन्वयिता-वच्छेदकं भवत्यवेति प्राचीनमतानुसारी पन्थाः ।

वस्तुतस्तु गुरुणा टीका कुरुणा क्षेत्रमित्याद्यसमस्तस्थले प्रोक्तार्थत्वेऽपि काकेन देवदत्तगृहा इत्यत्र समासेन गृहे देवदत्तस्वत्वस्य बोधने तच्छून्यगृहव्यावृत्तिप्रतीतेस्तत एव सम्भवात् तृतीयान्तस्य वैयर्थ्यमेव । काकेन गृहा देवदत्त-स्येत्यत्र काकस्य गृहे अन्तःप्रवेशप्रागभावनाशः सम्बन्ध-स्तृतीयार्थः, स च काके प्रविष्टेऽन्यत्र गते चाविकल इति अन्तरप्रविष्टकाकस्य गृहस्य व्यावृत्तेरन्वयितावच्छेदको भवतीति । सा व्यावृत्तिः समनियताभावानामैक्ये, स्वरू-पभेदेऽपि लिङ्गतया देवदत्तस्वत्वशून्यगृहव्यावृत्तिं गमयति । कमण्डलुना छात्रं, चूलाभिस्तापसमित्यत्र स्वसंयोगप्राग-भावनाशः सम्बन्धस्तृतीयार्थः । स च तयोः सत्त्वासत्त्व-दशायामविकल इति, अधृतकमण्डलोश्छात्रस्य अधृतचूलस्य तापसस्य व्यावृत्तेर्यथायोग्यमन्वयितावच्छेदको भवति । अत एव **अपि भवान् कमण्डलुपाणिं छात्रमद्राक्षी-दित्यत्र तु लक्ष्यप्रधानो निर्देशो न लक्षणप्रधान इति न भवतीत्युक्तं** वृत्तौ, लक्षणस्य कमण्डलोः समासान्त-र्भूतत्वाद् अन्यपदार्थस्य छात्रस्य ( लक्ष्यस्य ) प्राधान्यात् प्रोक्तसम्बन्धबोधनासम्भवात् । छात्रेणोपाध्यायमित्यत्र छात्रस्य स्वाध्ययने छात्रप्रयोज्यनिवासप्रागभावनाशाधि-करणदेशाधिष्ठातृत्वमुपाध्याये सम्बन्धस्तृतीयार्थः । स च छात्रनिवासासत्त्वासत्त्वदशायामविकल इति अच्छात्रस्य छात्राकृतनिवासदेशाधिष्ठातुरुपाध्यायस्य व्यावृत्तेरन्वयिता-वच्छेदको भवति । एवमनयैव रीत्याऽन्यत्रापि सुधीभिरू-ह्यस्तृतीयार्थः सम्बन्धः इति ।

यत्तु वैशिष्ट्यं लक्षणतृतीयार्थः । यस्य वैशिष्ट्यं विद्यमानतया प्रतीयते तद्विशेषणं, यस्य न विद्यमानतया प्रतीयते तदुपलक्षणमिति विशेषणोपलक्षणलक्षणे इति, तन्न, अविद्यमानस्य वैशिष्ट्यस्य तृतीयासहस्रेणापि बोधयितुम-शक्यत्वात्, योग्यता-विरहात् । 'श्यामेन घट' इत्यत्र वैशिष्ट्यस्य समवायस्य रक्ततादशायामपि विद्यमानत्वात् श्यामस्योपलक्षणत्वानुपपत्तेः । 'चूलया परिव्राजक' इत्यत्र चूलासम्बन्धस्य विद्यमानत्वादुपलक्षणत्वानुपपत्तेश्च ।

यदपि सम्बन्धमात्रं लक्षणतृतीयार्थः । सम्बन्धो यस्य विद्यमानस्य प्रतीयते तद्विशेषणं, यस्याविद्यमानस्य प्रतीयते, तत्र मतुबादेर्बाधात्तृतीयैवेति तदुपलक्षणमिति तदपि न सुन्दरं, घटो विनाशीत्यत्राविद्यमानस्य नाशस्य इन् प्रत्ययेन सम्बन्ध-बोधनात् । न चात्र प्रत्ययः साधन्वार्थः, धात्वर्थो नाशः जानातीत्यादाविव प्रथमान्तार्थे साक्षादेवान्वयीति वाच्यम्, तथा सति 'विनाशी न स्यान्नति' इत्यत्रान्वयबोधानुपपत्तेः भाविस्थितिकर्तृत्वाभावस्य विनाशे बोधयितुमशक्यत्वात् । किं चोत्पत्तिकालिको घटो गन्धवानित्यत्र अविद्यमानस्य गन्धस्य सम्बन्धो मतुपा बोध्यते, तदनुपपत्तिः । चूलया परिव्राजक इत्यत्र विद्यमानायाश्चूलायाः तृतीयया सम्बन्ध-बोधने उपलक्षणत्वानुपपत्तिश्च । श्यामेन घट इत्यत्र श्या-मस्य स्वप्रागभावनाशः सम्बन्धः, स चाजातश्यामव्यावृत्ते-रन्वयितावच्छेदको भवति । घटेनाभाव इत्यत्र घटस्य स्वप्रतियोगितानिरूपितानुयोगित्वं सम्बन्धस्तृतीयार्थः । स च घटाप्रतियोगिकाभावव्यावृत्तेरन्वयितावच्छेदको भवति । न चात्रोक्तसम्बन्धेन घट एवान्वयितावच्छेदकोऽस्त्विति वाच्यम्, घटस्यातीतत्वेऽपि व्यावृत्तिबुद्धेरुदयापत्तेरिति । एवमुपलक्षणत्वविवेचनपूर्वकं परमतैरुपलक्षणतृतीयाविषये विचारः संक्षेपेण कृतः । स्वमतं तु पूर्वमुक्तमेव ।

इयांस्तु विशेषः— कर्तृकरणयो अर्थयोः सूत्रेण या तृतीयाऽनुशिष्टा सा न केवलं प्रयुक्तक्रियामादायैव प्रवर्त-तेऽपि तु गम्यमानां क्रियामादायाऽपि, अत एव— 'अलं मही-पाल तव श्रमेण' इत्यादौ श्रमेण साध्यं नास्तीत्यादिबोधे

साधनक्रियां प्रति श्रमस्य करणत्वात्तृतीया। सूचितश्चायमर्थः धान्येनार्थः इत्यादिप्रयोगानुदाहृत्य– '**इत्यादौ हेतौ कृतभवत्यादिगम्यमानक्रियाऽपेक्षया कर्तरि करणे वा तृतीयेति** वृत्त्या।

## सहार्थे ।२।२।४५

सहेत्यव्ययम् तस्य शब्दस्य अर्थः– द्योत्यः; निपातानां द्योतकत्वस्यैव स्वसम्मतत्वात्। सहशब्देन च योऽर्थो द्योत्यते तमाह वृत्त्या– सहार्थस्तुल्ययोगो **विद्यमानता** चेति। तुल्ययोगश्च क्रियादिना समः सम्बन्धः कर्तृत्वादिरूपः नामार्थेन स्वस्वामिभावादिरूपो वा। तत्र कर्तृत्वादिसम्बन्धे तद्विहितविभक्त्याः कर्तृत्वादिकमर्थः, तस्य प्रधानेविहितया विभक्त्यैवोक्तत्वादिति अभेद एवैतद्विहिततृतीयाया अर्थः। यत्र चैतद्विहिततृतीयान्तस्य क्रियया न सम्बन्धस्तत्र सम्बन्धार्थिकैव सा। स च सम्बन्धविशेषः प्रातिस्विकरूपेण भिद्यते। यथा– पुत्रेण सह स्थूल इत्यत्र समानकालिकत्वं सम्बन्धस्तृतीयार्थः। पुत्रेण सह गोमान् इत्यत्र स्वस्वामिभावः सम्बन्धस्तृतीयार्थः। एवं रीत्या यथायोगं तृतीयार्थो विज्ञेयः। विद्यमानता च यद्यपि तुल्ययोगेऽपि भवत्येव। तथापि क्वचित् तुल्ययोगाभावेऽपि विद्यमानत्वमात्रं प्रतीयते। यथा "सहैव दशभिः पुत्रैर्भारं वहति गर्दभी"त्यत्र पुत्राणां भारोद्वहनायोगेऽपि विद्यमानतासत्त्वात् दशानां पुत्राणां विद्यमानत्वेऽपीत्यन्वयबोधः।

## अत्र शब्दशक्तिप्रकाशिकाशयः।

जगदीशतर्कालङ्कारास्तु 'पुत्रेण सहागतः' 'सूपेन सार्धं भुक्तः' 'चक्रेण सार्धं दण्डेन जनितः' पुत्रेण समं मित्राय दानम्' इत्यादौ स्वान्वयितत्तत्कर्तृत्वादिकारकावच्छिन्नायाः समभिव्याहृतक्रियायाः समानकालीनत्वरूपं साहित्यं सहाद्यव्ययस्यार्थः, तदेकदेशे च कर्तृत्वादिकारके स्वप्रकृत्यर्थस्यान्वयित्वं तृतीयया बोध्यते। तेन पुत्रवृत्तिकर्तृताकागतिकालीनागतिकर्तृतावान्, सूपनिष्ठकर्मताकभोजनकालीनभोजनकर्मतावान्, चक्रनिष्ठकरणताकोत्पत्तिकालीनदण्डनिष्ठकरणताकोत्पत्तिमान्, पुत्रसम्प्रदानकदानकालीनं मित्रसम्प्रदानताकं दानमित्याकारकस्तत्र बोधः। 'तुल्यवदेकक्रियान्वयित्वं साहित्यम्' इति प्रवादस्याप्येककारकान्वयित्वेन तुल्ययोरेकजातीयक्रिययोरन्वयित्वं समानकालीनत्वमित्यत्र तात्पर्यात्। पुत्रेण सह गत इत्यत्र समभिव्याहृतापि गतिक्रिया न कर्मत्वादिनाऽन्वयिनी, किन्तु निष्ठार्थकर्तृत्वेन। पुत्रेण सह गतं चैत्रेणेत्यादावपि तृतीयार्थ एव कर्तृत्वे गतिक्रियाऽन्विता।

यत्तु पुत्रेण सहागत इत्यत्र समभिव्याहृतगत्यादिक्रियाकालीनत्वमेव सहाद्यव्ययस्यार्थः, तन्निविष्टगतौ पुत्रादिपदोत्तरतृतीयालब्धस्य पुत्रनिष्ठकर्तृत्वस्यान्वयादेव पुत्रकर्तृकगतेर्लाभात् इति, तन्न, तृतीयार्थकर्तृत्वस्य धात्वर्थ एव साकाङ्क्षत्वेन सहाद्यर्थे तदन्वयस्याव्युत्पन्नत्वात्। पुत्रेण समं मित्रं प्राप्तश्चैत्र इत्यादौ तु तात्पर्यवशात् पुत्रकर्तृकमित्रप्राप्तिकालीनमित्रकर्मकप्राप्तिकर्तृत्वम्, कदाचिच्च पुत्रकर्मकप्राप्तिकालीनमित्रकर्मकप्राप्तिकर्तृत्वम्, चैत्रस्य बुध्यते, समभिव्याहृतायाः प्राप्त्यादिक्रियायाः कर्तृत्वे इव कर्मत्वे अप्यन्वयितया तत्प्रत्येकावच्छिन्नप्राप्त्यादिकालीनत्वबोधने सहाद्यव्ययस्य सामर्थ्याभावात्। न चान्यकर्तृकधनप्राप्त्यादिदशायां ग्रामप्राप्तिमत्यपि चैत्रे 'धनेन सहायं ग्रामं प्राप्त इति प्रयोगापत्तिः, तस्य धनकर्मकप्राप्तिकालीनग्रामकर्मकप्राप्तिमत्त्वानपायात् इति वाच्यम्, घटत्वेन सह घटमवगाहते बुद्धिरित्यादौ क्वचित् कर्तृत्वावच्छिन्नायाः समानकर्तृकत्वस्यैव सर्वत्र कर्मत्वावच्छिन्नायाः समभिव्याहृतक्रियायाः समानकालीनत्वस्यैव, समानकर्तृकत्वस्यापि सहार्थे निवेश्यत्वात्। यत्तु स्वान्वयिकर्मत्वाद्यवच्छिन्ना समभिव्याहृतक्रियैव सर्वत्र सहाद्यव्ययस्यार्थः, तस्याश्च समानकालीनत्वैककर्तृत्वोभयसम्बन्धेनैव समभिव्याहृतक्रियायामन्वयान्नातिप्रसङ्ग इति तत्तुच्छम्, 'साकस्य भोजनं न सुधया सह'

इत्यादिवाक्यानां समानकर्तृकत्वादिसम्बन्धेन सुधाकर्मक-भोजनाभावस्य बोधकतायामप्रामाण्यापत्तेः, वृत्त्यनियामक-सम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धेः।

पटः पटत्वेन सह भासते इत्यादौ पटत्वनिष्ठविषयतायाः समानकालीनत्वमिव समानप्रतियोगित्वमप्यर्थः विभिन्न-ज्ञानीयविषयतायां तादृशाप्रयोगात्। पुत्रेण सह गति-रित्यादौ कर्तृत्वाद्यन्वयिक्रियासमभिव्याहारविरहेण शक्त्या पुत्रकर्तृकगतिकालीनत्वादेर्बोधयितुमशक्यत्वादनन्यगत्या सहा-देस्तादृशार्थे निरूढलक्षणा। पुत्रेण सह स्थूल इत्यादावपि समभिव्याहृतनामार्थतावच्छेदकीभूतस्थौल्यादिसमानकाली-नत्वे, तथा च पुत्रवृत्तिस्थौल्यकालीनस्थौल्यवानित्याकारस्तत्र बोधः। 'पत्न्या सहाग्निमादध्या' दित्यादौ पत्नीकर्तृक-स्याग्न्याधानस्यालीकत्वेन तत्समानकालीनत्वस्य प्रमापयितु-मशक्यत्वात्– सामानाधिकरण्यपर्यवसितसहभावमात्रं तत्र सहस्यार्थः; यथा 'घटेन सह पटवद्गृह' मित्यादौ। एतेन 'यत्कर्तव्यं तदनया सह' इत्यादिको विधिरपि व्याख्यातः। 'पुत्रेणागत' इत्यादौ विनापि सहादिप्रयोगं तदर्थस्य प्रती-तेस्तृतीयाया एव तत्र कर्तृत्वाद्यवच्छिन्नागतिसमानकालीन-त्वादिकमर्थः; तत्सन्निविष्टे च कर्तृत्वादौ प्रकृत्यर्थस्य पुत्रादेराधेयत्वेनान्वयः इत्याहुः।

पदवाक्यरत्नाकरकार––म० म० गोकुलनाथोपाध्या-यानुयायिनस्तु– सहार्थेन युक्तेऽप्रधानक्रियाकारके तृतीया भवति। तत्र सहार्थः सामानाधिकरण्यम्, तच्च दैशिकेन कालिकेन दैशिककालिकोभयेन च सम्बन्धेन घटितत्वात् त्रिविधम्। 'वह्निना सह धूमो भस्म वा' इत्यत्र संयोगि-संयुक्तत्वं सहार्थः, तृतीयायाः प्रतियोगित्वमर्थः, स चाद्य-संयोगेऽन्वेति। एवं वह्निप्रतियोगिताकसंयोगवत्संयुक्तो धूम इत्यन्वयबोधः। 'रूपेण सह रस' इत्यत्र समवायिसमवेतत्वं सहार्थः, तृतीयार्थस्य प्रतियोगित्वस्य आद्यसमवायेऽन्वयः, 'द्रव्यत्वेन सह धूम' इत्यत्र समवायिसंयुक्तत्वं सहार्थः तृती-यार्थप्रतियोगित्वस्य समवायेऽन्वयः। वह्निना सह धूम-संयोग इत्यत्र संयोगिसमवेतत्वं सहार्थः, तृतीयायाः प्रतियो-गित्वं, तच्च संयोगेऽन्वेति। एतानि दैशिकसामानाधि-करण्योदाहरणानि।

कालिकसमानाधिकरण्येन यथा– जातीपुष्पेण सह-नीपपुष्पमित्यत्र कालस्वरूपेण कालिकविशेषणतासम्बन्धेना-धिकरणे तेन सम्बन्धेनाधेयत्वं सहार्थः। कालिकविशेषण-तयाऽन्वयि प्रतियोगित्वं तृतीयार्थः। अथ वा काल एव सहार्थः, कालिकाधिकरणत्वस्य तृतीयार्थस्य काले, कालस्य कालिकाधेयतासम्बन्धेन नीपपुष्पेऽन्वयः।

दैशिककालिकोभयेन सम्बन्धेन सामानाधिकरण्यस्य यथा– 'पत्न्या सह यजमान' इत्यत्र संयोगसंयुक्तत्वं काल-श्चोभयं सहार्थः; प्रतियोगित्वम्, कालिकाधिकरणत्वं चोभयं तृतीयार्थः। प्रतियोगित्वस्याद्यसंयोगेऽन्वयः, कालि-काधिकरणत्वस्य काले, कालस्य कालिकाधेयतया यजमाने-ऽन्वयः। एवं भारमनुद्वहत्सु सह गच्छत्सु पुत्रेषु 'सहैव दशभिः पुत्रैर्भारं वहति गर्दभीत्यत्रापि दर्शितोभयं सहार्थः, तृतीयार्थोऽपि प्रतियोगित्वं, कालिकाधिकरणत्वमित्युभयम्। पूर्ववदेवान्वयो बोध्यः।

एतद्रीत्या 'पुत्रेण सह स्थूल' इति वृत्त्युक्तोदाहरणे स्थूलत्वं तृतीयार्थः, तत्र पुत्रस्याधेयतयाऽन्वयः, तृतीयार्थस्य स्थूलत्वस्य कालिकाधिकरणतया सहार्थे काले, कालस्या-धेयतया पदार्थैकदेशे स्थूलत्वेऽन्वयः। तथा च पुत्रस्थूल-त्वसमानकालिक–स्थूलत्ववात् पितेत्यन्वयबोधः। पुत्रेण सह गोमान् पितेत्यत्र स्वामित्वं तृतीयार्थः तस्य निरूपकता-सम्बन्धावच्छिन्नसामानाधिकरण्ये सहार्थे प्रतियोगितया-ऽन्वयः, सहार्थस्य मत्वर्थैकदेशे गोविशेषिते स्वामित्वेऽन्वयः। एवं च पुत्रस्वामित्वसमानाधिकरणगोस्वामित्ववान् पितेत्य-न्वयबोधः। शिष्येण सह ब्राह्मण इत्यत्र ब्राह्मणत्वं तृती-यार्थः, समवायसम्बन्धावच्छिन्नसामानाधिकरण्यं सहार्थः, तथा च शिष्यसमवेतब्राह्मणत्ववान् आचार्य इत्यन्वयबोधः। अप्राधान्यं च तृतीयाप्रकृतेर्वास्तविकं बोध्यं न तु वैवक्षिकम् तेनाचार्येण सह पूज्यः शिष्यः इत्यादयो न प्रयोगाः।

क्वचित्सम्बन्धमात्रं सहयुक्ततृतीयार्थः, यथा 'वज्रेण सहेन्द्रः' इत्यत्र संयोगः सहार्थः प्रतियोगित्वं तृतीयार्थः, एवं वज्रप्रतियोगिताकसंयोगवानिन्द्र इत्यन्वयबोधः। गन्धेन सह पृथिवीत्यत्र सहार्थः समवायः, तृतीयार्थः प्रतियोगित्वम्, गन्धप्रतियोगिकसमवायवती पृथिवीत्यन्वयबोधः। एवं 'मुद्रया सह कुण्डली देवदत्त' इत्यत्र तृतीयार्थः सम्बन्धः, स चात्र संयोगः, सहार्थः समानकालिकत्वम् तच्च कालः एव, तस्य इन्प्रत्ययार्थैकदेशे सम्बन्धेऽन्वयः। इत्थं मुद्रासंयोगसमानकालिककुण्डलसंयोगवान् देवदत्त इत्यन्वयबोधः। यदि च त्याद्यर्थविशेषणधात्वर्थस्येव तद्धितार्थतावच्छेदकसम्बन्धादेः, पुत्रेण सह स्थूलः पितेत्यादौ नामार्थतावच्छेदकस्य विशेषणस्य स्थूलत्वादेः, सहार्थे विशेष्यतया वाऽन्वयोऽभ्युपेयते, तदा तृतीयायाः सम्बन्धान्वयि स्थूलत्वान्वयि चाधेयत्वमर्थः; तृतीयान्तार्थविशेषितयोः सम्बन्धस्थूलत्वयोः सहार्थे विशेषणत्वमिति।

ननु सहार्थस्य तृतीयायाश्चार्थस्य पदार्थैकदेशे सम्बन्धस्थूलत्वादौ अन्वयो न युज्यते 'पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति व्युत्पत्तिविरोधात्; किंतु पुत्रेण सह स्थूल पिता, कन्यया सह रमणीयो वरः इत्यत्रपदार्थयोः स्थूलरमणीययोस्तादात्म्येन पितृवरान्वयिनोः सहार्थे विशेष्यतया विशेषणतया वाऽन्वयः, विशेषणत्वापन्नयोस्तयोः तृतीयार्थोऽभेदो ऽन्वेति। एवं पुत्राभिन्नस्थूलसमानकालिकस्थूलः पितेति कन्याऽभिन्नरमणीयसमानकालिकरमणीयो वर इति चान्वयबोधो भवति। स्थूलयोः रमणीययोश्च समानकालिकत्वे भासमाने, स्थूलत्वयोः रमणीयत्वयोश्च समानकालिकत्वं भासते, विशिष्टान्वयबोधसामग्रीबलादिति चेत्, न, एवमन्वयबोधोपगमेऽप्यभिमतनिर्वाहाभावात्। सहार्थविशेषणतावच्छेदकयोः स्थूलत्वरमणीयत्वयोः समानकालिकत्वभानायोगात्। विशिष्टान्वयस्थले हि यद्धर्मविशिष्टे विशेषणस्यान्वयः, तत्र विशिष्टे बाधेऽबाधेऽपि वा सति तद्धर्मविशेषणस्यान्वयो भवति, यथा 'शिखी विनष्ट' इत्यत्र विनष्ट-तादात्म्यं शिखायां, न तु विशेषणतावच्छेदके विशेष्यस्य क्वाप्यन्वयः व्युत्पत्तिविरहात्। न च भास्तु विशेषणतावच्छेदके स्थूलत्वे समानकालिकत्वान्वय इति वाच्यम्, तथा सति कालान्तरेण स्थूलेऽपि पुत्रे तथाविधप्रयोगप्रसङ्गात्।

यदपि सहार्थतृतीयार्थयोरेकदेशान्वयो न व्युत्पन्नः इति तदपि न चारु, एकदेशान्वयस्यावश्यकत्वात्। तथा हि 'पुत्रेण सह गोमान् पिते'त्यत्र पुत्राभिन्नगोमतः समानकालिकत्वं गोमति भासते चेत्तर्हि पुत्रस्य गवान्तरस्वामित्वेऽपि तथाप्रयोगप्रसङ्गः। दर्शितान्वयस्य तावतापि सम्भवात्। तस्मात् सहार्थविशेषणतापन्ने मत्वर्थतावच्छेदके स्वामित्वे अन्वयितावच्छेदके गोस्वामित्वे चैकदेशे तृतीयार्थाधेयत्वस्यान्वयः। गोस्वामित्वे एकदेशे सहार्थस्य विशेषणतयाऽन्वयः सहार्थः निरूपकतासम्बन्धघटितसामानाधिकरण्यम्; प्रतियोगित्वसम्बन्धेन स्वामित्वस्य सामानाधिकरण्ये, तस्य स्वरूपेण गोस्वामित्वेऽन्वयितावच्छेदके तद्विशिष्टस्य तादात्म्येन पितर्यन्वयः। न चात्र भवतु एकदेशान्वयः तावता न सर्वत्र तत्सम्भवः, पुत्रेण सह स्थूलः पितेत्यत्र पुत्राभिन्नस्य स्थूलत्वविशिष्टस्य समानकालिकत्वे विशेषणतयाऽन्वयात्, स्थूलत्वस्याप्यन्वयः, विशेषणान्वये सत्येव विशिष्टान्वयस्य भावात्– इत्येतावता सामञ्जस्यान्नात्रैकदेशान्वय इति वाच्यम्; यत्र हि स्थूलत्वोपलक्षितः स्थूलपदेन प्रतिपादितः तत्र विशिष्टान्वयबलादपि न स्थूलत्वसमानकालिकत्वलाभः, इत्येकदेशान्वय आवश्यक इति। एवं शिष्यैः सह चूलावन्तो मुनयः, यज्ञदत्तगृहैः सह काकवन्तो देवदत्तगृहाः इत्यादावेकदेशान्वयं विना नाभिमतनिर्वाह इति।

एवं 'सह दिवसनिशाभ्यां दीर्घाः श्वासदण्डाः' इत्यत्र दीर्घत्वं कालिकं दैशिकं च बहुतरकालसम्बन्धः कालिकं दीर्घत्वं यद्वशाद्दीर्घमायुरितिप्रयोगः, बहुतरदेशसम्बन्धो दैशिकं ( दीर्घत्वम् ) यद्वशाद् दीर्घः पन्था इति प्रयोगः। दीर्घत्वं स्वसजातीयापेक्षया बोध्यम्।

दिवसो ग्रीष्मे दीर्घः, निशा हेमन्ते दीर्घा, विरहिश्वासो बहुतरवायुमण्डलगामितया दीर्घः। एवं दीर्घपदोपस्थापि–

तयोर्दीर्घत्वयोः कालिके, तृतीयार्थाधेयत्वस्य दैशिके, विशेष्यतया श्वासस्यान्वयो योग्यताबलात्सहार्थः । एवं दिवसवृत्तेर्निशावृत्तेर्वा बहुतरकालसम्बन्धस्य समानकालिको यो बहुतरदेशसम्बन्धः तद्वन्तः श्वासदण्डा इत्यन्वयबोधः । अत्र दण्डस्य घटिकारूपस्य दिवसदीर्घत्वसमानकालिकं दीर्घत्वं विरुद्धमिति, दण्डस्य चतुर्हस्तदेशसम्बन्धवतः दिवसघटकक्षणसमसंख्यकपरमाणुसम्बन्धरूपं दीर्घत्वं विरुद्धमिति विरोधालङ्कारः । एकानुपूर्वीकशब्दप्रतिपाद्ययोर्भिन्नयोरर्थयोरपि सहार्थे विशेषणतया विशेष्यतया चान्वयः यथा—

दोषायोगमहस्थितिस्फुटरसश्रीकायहृद्यः समं,
चन्द्रेणैषनृपो बुधोदयगुरुप्रीतः कविः प्रीतिमान् ।
पुत्रोऽस्यापि समं बुधेन सततं मित्रान्तिकासादनः,
प्रीतः प्राप्तकराद्भुतोदयगुणोऽत्युच्चैः श्रितः सौम्यताम्"

इत्यत्र । बुधोदयगुरुप्रीतः कविः प्रीतिमान् एष नृपः चन्द्रेण समं दोषायोगमहस्थितिस्फुटरसश्रीकायहृद्यः । अस्य पुत्रः अपि बुधेन समं सततं मित्रान्तिकासादनः प्रीतः प्राप्तकराद्भुतोदयगुणः अत्युच्चैः सौम्यतां श्रितः इत्यन्वयः । बुधोदयेन विद्वत्सङ्गत्या गुरुप्रीतः अतिप्रसन्नः इति नृपपक्षे, बुधस्य स्वपुत्रस्य प्रसिद्धस्य ग्रहस्य उदयेन वृद्ध्या उत्पत्त्या वा गुरुप्रीतः अतिप्रसन्न इति चन्द्रपक्षे, कविः प्रीतिमान् इति सामान्यत उभयत्र— इत्थं भूत एष नृपः चन्द्रेण सह— दोषायोगेन दोषसम्पर्कराहित्येन महस्थित्या उत्सवमर्यादया च स्फुटरसा व्यक्तानन्दा श्रीर्यस्य तथाभूतश्चायेन शुभादृष्टेन हृद्यः— चन्द्रश्च— दोषायोगेन रात्रिसम्बन्धेन या महःस्थितिः तेजः स्थैर्यं तेन स्फुटरसा श्रीर्यस्य तादृशेन कायेन शरीरेण हृद्यः, अस्य नृपस्य पुत्रोऽपि— बुधेन चन्द्रपुत्रेण— विदुषा च समं सह— सततं मित्रान्तिकासादनः सुहृत्सन्निधिप्राप्तः रविसामीप्यं गतश्च ( बुधग्रहस्य रविणा सामीप्यं सर्वदेति ज्योतिः शास्त्रविदः ) प्रीतः प्रसन्नः, प्राप्तः करः, राज्ञे देयं द्रव्यं अद्भुतः उदयः गुणश्च येन तथाभूतः ( नृपपुत्रः ) प्राप्तः कराणां किरणानामद्भुत आश्चर्यकर उदयो वृद्धिः स एव गुणो येन तादृशः बुधः, अत्युच्चैः सौम्यतां शीतलस्वभावत्वं श्रितः प्राप्तः ( नृपपुत्रः ) सौम्यतां सोमात्मजत्वं प्राप्तः ( बुधः ) इति संक्षिप्तार्थः । एवमत्र चन्द्रगतं हृद्यत्वमेकं, राजगतं च तदपरं, तथाप्येकानुपूर्वीकशब्दप्रतिपाद्यत्वेन सहार्थकसमंशब्दार्थे विशेषणतया विशेष्यतया चान्वेतीति विशेषणे हृद्यत्वे तृतीयान्तार्थस्य चन्द्राश्रयत्वस्यान्वयः, विशेष्यहृद्यत्वस्य नृपेऽन्वय इति ।

## सहार्थतृतीयायाः कारकार्थत्वमपि

पुत्रेण सहागत आगच्छति वा पितेत्यत्र कर्तृत्वं कारकं क्तप्रत्ययार्थतावच्छेदकमाख्यातार्थतावच्छेदकं वा तृतीयाऽभिधत्ते, धात्वर्थे आगमनं समानकालिकत्वे सहार्थे विशेषणतया विशेष्यतया चान्वेति, विशेषणे धात्वर्थे तृतीयार्थकारकस्यान्वयः विशेष्यधात्वर्थस्य कृदर्थैकदेशे त्याद्यर्थे वा कर्तृत्वे विशेषणतयाऽन्वयः । तथा च पुत्रकर्तृकागमनसमानकालिकातीतागमनकृतिमदभिन्नः, पुत्रकर्तृताकागमनसमानकालिकवर्तमानागमनकृतिमदभिन्नो वा, पितेत्यन्वयबोधः । प्रधानेऽर्त्ते तत्वान्वितेऽतीताया विद्यमानत्वान्विते विद्यमानाया गुणक्रियायाः समानकालिकत्वं भासते इति न काऽप्यनुपपत्तिः । प्रधानक्रियाकारकसजातीयं कारकं तृतीयार्थः कर्तृत्वादिकम् । तत्र कर्तृत्वमुदाहृतम् । अन्यदुदाह्रियते— कर्मत्वं यथा— हिरण्येन सह गां लभते ब्राह्मणः इत्यत्र लभतेः स्वत्वं व्यापारश्चार्थः द्वितीया तृतीययोराधेयत्वरूपं कर्मत्वमर्थः, सहार्थः समानकालिकत्वम्, एवं हिरण्यवृत्तिस्वत्वानुकूलव्यापारसमकालिकगोवृत्तिस्वत्वानुकूलव्यापाराश्रयत्वं वाक्यार्थः। करणत्वं यथा— तृणेन सह काष्ठेन पचतीत्यत्र तृतीययोः करणत्वमर्थः, सहार्थः समानकालिकत्वमेव, तथा च तृणकरणताकपाकसमकालिककाष्ठकरणताकपाककृतिर्वाक्यार्थः । सम्प्रदानत्वं यथा'ऋत्विग्भिः सह गुरवे ददाति' इत्यत्र चतुर्थीतृतीययोः सम्प्रदानत्वमर्थः, सहार्थः पूर्ववदेव, तथा च ऋत्विक्सम्प्रदानताकदानसमकालिकगुरुसम्प्रदानताकदानाश्र-

यत्वं वाक्यार्थः। अपादानत्वं यथा— 'कोटरेण सह तरोः पतति' इत्यत्र पञ्चमीतृतीययोरपादानत्वमर्थः सहार्थः तदेव, तथा च कोटरापादानताकपतनसमकालिकतर्वपादानताक—पतनकृतिर्वाक्यार्थः। सम्बन्धसामान्यस्य यथा— सपत्नीभिः सह कान्तस्य त्रस्यन्ति इत्यत्र षष्ठीतृतीययोः सम्बन्धसामान्यमर्थः, सहार्थः पूर्ववदेव, तथा च सपत्नीसम्बन्धित्राससमकालिककान्तसम्बन्धित्रासाश्रयत्वं वाक्यार्थः। अधिकरणस्य यथा— पीठेन सह गृहे आस्ते इत्यत्र सप्तमीतृतीययोरधि—करणत्वमर्थः, सहार्थः समानकालिकत्वमेव, तथा च पीठाधिकरणताकासनसमकालिकगृहाधिकरणताकासनाश्रयत्वं वा—क्यार्थः।

सहार्थविशेषणविशेष्ययोरुभयोर्धात्वर्थयोः तृतीयाभिन्नविभक्त्यन्तार्थः सर्वोऽन्वेति, तृतीयान्तार्थो विशेषणमात्रे, तेन पुत्रस्य ग्रामगमने पितुर्नगरगमने पुत्रेण सह नगरं गच्छति पितेति न प्रयोगः। यत्र कर्मत्वादिकारकस्य तृतीयार्थस्य गुणक्रियायामन्वयो, न कर्तृत्वस्य, तत्र प्रधानक्रियाकर्तुरेव कर्तृत्वमवसीयते; गुणक्रियाकारकानभिधाने प्रधानकारकस्य प्रत्ययाभिहितस्य गुणक्रियायामन्वयात्। तदुक्तम् हरिणा—

प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्।
शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते॥

प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते।
गुणे यदा तदा तद्वदनुक्ताऽपि प्रतीयते॥ इति।

'हिरण्येन सह गां लभते' इत्यादौ गोलब्धृकर्तृकत्वं हिरण्यलाभे प्रतीयते, अतो न चैत्रेण हिरण्ये मैत्रेण गवि लभ्यमानायां हिरण्येन सह गां लभते मैत्र इति प्रयोगः। अत एव समानकर्तृकत्वादिकं सहार्थ इति निरस्तम्; दर्शितरीत्यातिप्रसङ्गनिरासात्, समानकर्तृकत्वादौ च शक्त्यन्तरकल्पनाया अन्याय्यत्वाच्च।

'पत्न्या सह यजते' इत्यत्र पतिपदस्याध्याहारे पत्नी—साहित्यं पत्युर्विशेषणम्, यदि च नाध्याहारस्तदापि साहित्य-द्वारकं कर्तृत्वं पत्न्या मन्तव्यं पत्नीसाहित्यस्य शौचवदधिकारित्वसम्पादकत्वात्— यत्कर्तव्यं तदनया सहेत्यभिधानात्। अध्याहाराभावेऽपि कर्तव्यत्वे कृतिविषयत्वे धात्वर्थकृतौ "साहित्यद्वारकं कर्तृत्वं पत्न्याः" इत्येवमन्वयबोधोपपादनेऽपि पत्येत्यध्याहारं विना मुख्यकर्तव्यताकाङ्क्षाया अनिवृत्तिः। भट्टानां मते कर्तृत्वादिकमखण्डमतिरिक्तमिति पत्न्या अपि कर्तृत्वं निराबाधमिति।

केचित्तु "पुत्रेण सहागत आगच्छति वेत्यादौ आगमनसमानकालिकागमनेन कर्तृतासम्बन्धेन विशिष्टः, तथाविधागमनं च सहार्थः, विशिष्टस्य तादात्म्येन तथाविधागमनस्य कर्तृतया सम्बन्धेन प्रथमान्तार्थे पितर्यन्वयः, तत्रैव आगतशब्दार्थस्य आगमनकर्तुरभेदेन, आगच्छतीति त्याद्यन्तार्थे आगमनकर्तृत्वस्य यथायोगमन्वयः। न चैवं सहशब्दार्थान्वयादेवागमनलाभे आगत आगच्छतीति शब्दप्रयोगो व्यर्थ इति वाच्यम्, तत्तत्प्रत्ययान्तधातुसमभिव्याहारेणैव सह-शब्दस्य क्रियातद्विशिष्टोपस्थापकत्वात्। एवं तृतीयार्थः कर्तृत्वं समानकालिकत्वविशेषणीभूतधात्वर्थे सहार्थैकदेशेऽ—न्वेति। सहशब्दस्य निपातत्वात्तदर्थस्य भेदेनान्वयो नामार्थेऽपि न विरुद्धः। न च 'यशसा सह मूर्च्छतीह शत्रु'रित्यत्र त्याद्यन्तेन मोहकर्तृत्वस्योपस्थापनात् सहशब्देन मोहसमानकालिकमोहाभिधाने मोहे यशः कर्तृकत्वबाधात्— अन्वयानुपपत्तिरिति वाच्यम्, यतः त्याद्यर्थान्वितमोहोपस्थितावपि मूर्छतियोगे पुत्रैः सह मूर्छति शत्रुरित्यत्र मोहसमानकालिकमोहः, यशसा सह मूर्छति श्रीरित्यत्र वृद्धिसमानकालिकवृद्धिः रिपुणा सह मूर्छति यश इत्यत्र मोहसमानकालिकवृद्धिः, प्रकृते ( यशसा सह मूर्छति शत्रुरित्यत्र ) वृद्धिसमान—कालिकमोहः; एते सहार्थाः। तथा च सहार्थैकदेशे वृद्धौ यशः कर्तृकत्वस्याबाधनात् नान्वयानुपपत्तिरिति वदन्ति" तन्न विचारसहम्; सहशब्दस्य समानकालिकत्वशक्त्यैव निर्वाहे धातुभेदेन, तदर्थभेदेन तत्तत्प्रत्ययभेदेनानन्तशक्तिकल्पनाया अन्याय्यत्वात्। यत्र धातोर्नानार्थः तत्र समानकालिकत्वस्य विशेषणतया विशेष्यतया चान्वये योग्यता तन्त्रमिति स्वीक्रियते। यत्र च न नानार्थः शब्दः, तृतीया

भिन्नप्रकृतिः तत्र तृतीयार्थभिन्नकारकान्विता, नामार्थव्यक्तिरेकैव कारकद्वारा क्रियान्वयिनी। तेन पितरि नन्दिग्रामं गच्छति, ग्रामान्तरं च पुत्रे गच्छति, पुत्रेण सह ग्रामं गच्छतीति न प्रयोगः। अत एव पुत्रेण सह गां लभत इत्यत्र एकस्यामेव गवि पितुः पुत्रस्य च स्वत्वं प्रतीयते। एवं हिरण्येन सह गां पुत्रेण सह लभते पितेत्यत्र सहार्थद्वयस्यार्थबोधः। तत्र हिरण्यकर्मकलाभसमानकालिकगोकर्मकलाभः द्वितीयसहार्थे विशेषणतया विशेष्यतया वान्वेति। पुत्रकर्तृकत्वं हिरण्यलाभे प्रथमसहार्थस्य विशेषणे, विशेष्ये गोलाभे चान्वेति। द्वितीयसहार्थस्य विशेष्ये गोलाभे विशेष्यतावच्छेदकांशे हिरण्यलाभे च पितृकर्तृताकत्वमन्वेति व्युत्पत्तिवैचित्र्यात्।

ननु पूर्वोक्तवाक्ये हिरण्येन सहेत्यत्र सहार्थः कमत्वं तदन्वयिनिरूपितत्वं तृतीयार्थः, पुत्रेण सहेत्यत्र सहार्थः कर्तृत्वं तच्चाधेयत्वं तदन्वयिनिरूपितत्वमेव तृतीयार्थः। एवं लाभे हिरण्यकर्मत्व– गोकर्मत्व– पुत्रकर्तृत्वानामन्वयः, तथा च पुत्रकर्तृताकहिरण्यकर्मताकगोकर्मताकलाभकर्ता पितेत्यन्वयबोधः। एतावता सर्वसामञ्जस्ये सहस्य समानकालिकत्वादौ शक्तिर्न कल्प्यते मानाभावात्; न वा धात्वर्थस्य सहार्थे विशेषणतया विशेष्यता चान्वयः स्वीक्रियते व्युत्पत्त्यन्तरकल्पनागौरवादिति चेन्न, सहस्य कर्मत्वादिशक्तिकल्पनायां 'छत्रेण सहोपानहौ दधाती'त्यत्र एकस्यां धारणक्रियायामुपानच्छत्रयोः कर्मत्वासम्भवेनानन्वयापत्तेः। पुत्रेण सहागच्छतीत्यत्र पितापुत्रकर्तृत्वयोरेकत्वासम्भवेनानन्वयापत्तेश्च तस्मात्– सहस्य समानकालिकत्वशक्तेः क्लृप्ततया व्युत्पत्त्यन्तरकल्पनं न न्याय्यम्। न च क्व समान–कालिकत्वे शक्तिः क्लृप्तेति वाच्यम्, गर्जितेन सह वृष्टिः, श्यामाकमञ्जरीभिः सह कङ्कुमञ्जरीत्यत्र सहस्य समानकालिकत्वार्थत्वं विनाऽन्वयस्य दुरुपपादत्वात् इति।

एवं यत्र भिन्नकर्तृकयोः क्रिययोरेकव्यक्तिकर्मकत्वं न सम्भवति योग्यताविरहात्, तत्रैकरूपेण नानाव्यक्तीनां कर्मत्वम्। यथा पुत्रेण सहौदनं भुङ्क्ते इत्यत्र पुत्रकर्तृकपितृकर्तृकभोजनयोरेकौदनव्यक्तिकर्मकत्वं न सम्भवति इति ओदनत्वेन नानौदनव्यक्तीनामेव तत्र कर्मत्वमिति। भिन्नरूपेण नानारूपकर्मत्वसम्भवेऽपि, पृथुकं पुत्रे ओदनं पितरि भुञ्जाने, पुत्रेण सह पृथुकमोदनमुभयं वा भुङ्क्ते इति न प्रयोगः इत्येकरूपेणेत्युक्तम्।

एवं पुत्रेण सह भुङ्क्ते इत्यत्र सहार्थः समानकालिकत्वं सामानाधिकरण्यरूपं समानदेशत्वं च। उभयस्मिन्नेव सहार्थे भोजनस्य विशेषणतया विशेष्यतया चान्वयः। विशेषणे भोजने पुत्रकर्तृत्वस्यान्वयः। तेन विभिन्ने काले देशे च, कालान्तरेणैकगृहे, एककाले गृहान्तरे च भोक्तरि पुत्रे पितरि वा न तथा प्रयोगः। एवं पतितैः सह न भुञ्जीतेत्यत्र यद्येककालावच्छेदेनैकगृहे पतितापतितयोर्भोजने पतित–भोजनमपतितं न दूषयति, तदेकपात्रैकपङ्क्त्यधिकरणत्व-स्वरूपं समानदेशत्वं प्रकृते बोध्यम्। पङ्क्तिस्तु परत्व–विशेषापरत्वविशेषणनिरूपक– सजातीयाधिकरणं देशः संयोगघटितः; परम्परया घटकेन स्वल्पेन स्वल्पतमेन संयोगेनाभिव्यङ्ग्यः परत्वविशेषोऽपरत्वविशेषश्च। यदि च पुरुषाकृतिकाष्ठनिवेशेऽपि पङ्क्तिव्यवहारस्तदा साजात्यं सामानाकारतया बोध्यम्। एवं पुत्रेण सह पचतीत्यत्रापि समानकालिकत्वं समानदेशत्वं च सहार्थः। तेन देशकाल–योर्वैषम्ये न तथा प्रयोगः। सूपेन सहौदनं पुत्रेण सह पचति पितेत्यत्र द्वेधा सहार्थान्वयः, तेन पुत्रकर्तृकसूपकर्मताकपाक-समानदेशकालिकौदनकर्मताकपाकसमानदेशकालिक— सूप–कर्मताकपाकसमानदेशकालिकौदनकर्मताकपाककृतिमान् पितेत्यन्वयबोधः।

ननु

> कौशल्ययाऽसावि सुखेन रामः,
> प्राक्; केकयीतो भरतस्ततोऽभूत्।
> "प्रासोष्ट शत्रुघ्नमुदारचेष्ट–
> मेका सुमित्रा सह लक्ष्मणेन"
>
> ( भट्टिकाव्यम् )

इत्यत्र लक्ष्मणप्रसवसमानकालिकत्वं शत्रुघ्नप्रसवे बाधितम्

इति कथं सहार्थान्वयः । न चात्र लक्ष्मणप्रसवकालादारभ्य शत्रुघ्नप्रसवकालकर्यन्तः स्थूलकाल एव ग्राह्य इति न समानककालिकत्वरूपसहार्थान्वयानुपपत्तिरिति वाच्यम्, तथा सति—

"प्रासोष्ट बीभत्समुदारचेष्ट– मेका पृथा वायुसुतेन साकम्" इत्येवमपि प्रयोगस्य प्रामाण्यं स्यात् । अत्र बीभत्सः अर्जुनः । वायुसुतो भीमः । तयोश्च व्यवहितकालोत्पत्तिमत्त्वेऽपि प्रथमजातभीमप्रसवकालमारभ्य– परकालजातबीभत्सप्रसवकालपर्यन्तमेकं स्थूलकालमादाय सहार्थान्वयोपपत्तेः इति चेन्न, प्रकारान्तरेणेदृशस्थले समानकालिकत्वोपपत्तेः । तथा हि– सूतिमारुतात्मकस्यैव कालोपाधेरिहकालपदेन ग्रहणम् । एक एव सूतिमारुतो यमजप्रसवहेतुः । सूतिमारुतस्य प्रसवप्रयोजकत्वमुक्तं याज्ञवल्क्येन —

नवमे दशमे मासि प्रबलैः सूतिमारुतैः ।
निःसार्यते बाण इव यन्त्रच्छिद्रेण सज्वरः ॥"

तत्र सूतिमारुतानां बहुत्वेऽपि एकस्थूलकालवृत्तितया ऐक्यमेव तेन बहुवचनेन सूतिमारुतानां बहूनां प्रसवप्रयोजकत्वमुक्तमिति सूतिमारुतात्मककालस्य कथमैक्यमिति शङ्कापास्ता, य एव सूतिमारुता लक्ष्मणप्रसवे प्रयोजकास्त एव शत्रुघ्नप्रसवेऽपि प्रयोजका इति कल्पनागौरवभियाऽवश्यं कल्पनीयम् । यदि च सूतिमारुतानामैक्यं तर्हि कथं न लक्ष्मणप्रसवकालरूपसूक्ष्मकाल एव शत्रुघ्ननिर्गमोऽपीति न शङ्कनीयम्, तत्र लक्ष्मणस्य प्रतिबन्धकतया सहनिर्गमाभावस्योपपादनात् । अत एवैकेन पुरुषव्यापारेण कमलपत्राणां सूचीभेदने प्रथमपत्रभेदनकाले न द्वितीयपत्रभेदनम् प्रथमपत्रस्य प्रतिबन्धकत्वात् । तत्र षूङ्धात्वर्थो जरायुजशरीरस्यान्तरवयवावच्छेदेन शरीरान्तरेण यः संयोगस्तन्नाशकतावच्छेदकवैजात्याश्रयो व्यापारश्च । तादृशवैजात्यं तु सूतिमारुतसंयोगजक्रियाविशेषजन्यतावच्छेदकतया सिद्धम् । तादृशजातिपरिचयार्थमेव जरायुजशरीराद्युपादानम्, न तु तस्य धात्वर्थघटकता, तेन तस्य धात्वर्थान्तर्भूतकर्मकत्वाभावान्नाकर्मकत्वम् । तेन व्याधिवशाद्भेकादीनां शरीरात् निर्गमेऽपि 'प्रसूते' इति न प्रयोगः, न वा बालस्य क्रोडात्क्रोडान्तरगमनेऽपि तथा प्रयोगः, भेकस्य जरायुजत्वाभावात्, तादृशबालसंयोगस्यान्तरवयवावच्छिन्नत्वस्य चाभावात् । 'तरुः फलानि सूते' 'वसुधा भटान् सूते' इत्यादौ तु लक्षणयोत्पत्तिव्यापारावेव षूङ्धातोरर्थः । एवं प्रकृते लक्ष्मणवृत्तिविजातीयविभागानुकूलव्यापाराधिकरणसूतिमारुतकालिकस्यातीतस्य शत्रुघ्नवृत्तिविजातीयविभागानुकूलव्यापारस्याश्रयः सुमित्रेत्यन्वयबोधः । बीभत्सभीमयोस्तु प्रसवप्रयोजकसूतिमारुतानां बहुतरव्यवहितकालद्वयभावित्वेनैककालिकत्वाभावात् "प्रासोष्ट बीभत्समुदारचेष्ट– मेका पृथा वायुसुतेन साकम्" इति प्रयोगस्य न प्रामाणिकत्वमिति ।

## प्रसङ्गादधीङोऽर्थ–विचारः

वैशम्पायनेन सह वेदं जैमिनिरधीते इत्यत्राधीङोऽर्थद्वयम् । तत्र उच्चारणं तदनुकूलश्रावणं चेत्येकोऽर्थः । उच्चारणं तु वर्णोत्पत्त्यव्यवहिततयोपलक्षितो विवृतादिः प्रयत्नः । स तु विवृतत्वादिनैव धात्वर्थे निविशतेऽतो न सकर्मकत्वहानिः । लिप्यादिना वर्णज्ञानादुच्चारणेऽधीत इति प्रयोगवारणाय श्रावणमुक्तम् । फलज्ञानविधया विवृतादिप्रयोजकत्वं वर्णस्य, फलस्य साधनतया कण्ठताल्वादिसंयोगे, तत्साधनतया कण्ठताल्वादिक्रियायामिच्छाप्रयत्नश्चेतीयं रीतिर्वर्णोत्पादे बोध्या । अधीङो धातोरीदृशार्थवशात्प्रयोगो– यथा– पञ्चाब्दिको ब्राह्मणवटुर्वेदमधीते इत्यत्रानुपूर्वीविशेषविशिष्टो वर्णकलापो वेदः । द्वितीयार्थः साध्यत्वाख्यं विषयत्वं, साध्यत्वविषयत्वसम्बन्धावच्छिन्नमाधेयत्वं वा विवृतावन्वेति । एवं वेदविषयताकस्य वेदाधेयस्य वा विवृतादेरनुकूलश्रावणाश्रयः पञ्चाब्दिको ब्रह्मवटुरित्यन्वयबोधः । एवमुपाध्यायप्रतिवेशी बालो वा शुको वाऽधीत इति प्रयोगोऽपि सूपपादः ।

अर्थप्रतिपादकत्वेन ज्ञानं प्रतिपादकतासम्बन्धेनार्थवत्तया ज्ञानं वा फलं तदनुकूलश्रावणं चेत्यपरोऽधीङ्धातोरर्थः। भवति हि विवरणवाक्यश्रवणानन्तरं विव्रियमाणवाक्ये विवरणार्थकत्वबुद्धिः, सा शाब्दबोधो ज्ञानसमान्यं वा। शाब्दबोधपक्षे 'पचति पाकं करोति' इति 'इतिशब्दरहितवाक्ये– पचतीत्यत्र तेः पचतिपदमर्थः, धातुप्रयोगः साधुत्वार्थः। विवरणवाक्यस्य पाककृतिरर्थः स च प्रतिपादकतासम्बन्धेन पचतिपदेऽन्वेति। यत्र इतिशब्दसहितं पचतीति पाकं करोतीत्यर्थं इत्येवं रूपं तत्रेतिशब्दोपस्थापितस्य पचतिपदस्य, पाककृतेः इति शब्दोपस्थापितायाः तादात्म्येनान्वितेऽर्थपदार्थे प्रतिपाद्यतासंसर्गेणान्वयः। एवमर्थे शब्दप्रतिपाद्यताग्रहकाले शब्देऽर्थप्रतिपादकत्वं गृह्यते। ज्ञानसामान्यपक्षे तु शब्दानन्तरं प्रतिपादकत्वस्य मानसज्ञानसम्भवान्नानुपपत्तिः। अर्थवत्तायाः शाब्दबोधस्यानुकूलत्वं च पदार्थस्मृतिद्वारा, ज्ञानसामान्यस्यानुकूलत्वं स्मृतिद्वारा शाब्दादिद्वारा वा श्रावणस्येति।

एवं शास्त्रमधीत इत्यत्र द्वितीयाया विशेष्यत्वं तत्सम्बन्धावच्छिन्नमाधेयत्वं वाऽर्थः। शास्त्रवृत्त्यर्थवत्त्वप्रकारकज्ञानानुकूलशाब्दाश्रयत्वं वाक्यार्थः। वेदमधीते जैमिनिरित्यत्र द्विविधाध्ययनं धात्वर्थः। वेदकर्मकाध्ययनाश्रयो जैमिनिरिति वाक्यार्थबोधः। एवं यथास्थलमधीङोऽर्थोऽवसेयः। एवं च वैशम्पायनेन सह वेदमधीते जैमिनिरित्यत्र समानकालिकत्वसमानदेशत्वातिरिक्तं समानगुरुकत्वमपि सहशब्दार्थः। समानगुरुकत्वं च सजातीयवाक्यविषयकत्वम्, साजात्यं च गुरुप्रयोज्यतावच्छेदिकया कत्वादिव्याप्यजात्या बोध्यम्। तेन गुरुभेदैर्नैककाले एकवेदाध्ययने न तथा प्रयोगः। तथा चोक्तस्थले वैशम्पायनकर्तृताकस्य वेदविषयकविवृताद्यनुकूलस्य वेदविषयकार्थवत्त्वप्रकारकानुकूलज्ञानानुकूलस्य वा श्रावणस्य समानकालिकं विषयसजातीयवाक्यविषयकं च यद् वेदविषयकविवृताद्यनुकूलं, वेदविषयकार्थवत्त्वप्रकारकज्ञानानुकूलं वा श्रावणं तदाश्रयो जैमिनिरित्यन्वयबोधः।

"आहारो हि मनुष्याणां जन्मना सह जायते" इत्यत्र कर्तृघटितं सामानाधिकरण्यं सहार्थः क्रिययोरन्वेति। गर्भाशयविभागस्तदनुकूलव्यापारो वा जन्मशब्दार्थः। पार्थिवद्रव्यप्रतियोगिककण्ठसंयोगस्तदनुकूलव्यापारो वा आहारशब्दार्थः। जन्माहारयोः कर्त्रैकशरीरवर्त्तित्वाद् भवति क्रिययोः सामानाधिकरण्यम् तथा च जन्मकर्तृताकोत्पत्तिसमानाधिकरणोत्पत्त्याश्रय आहार इत्यन्वयबोधः। जनिधातोरुत्पत्तिरर्थः इति। न चात्र समानकालिकत्वं सहार्थ इति वाच्यम्, अनन्वयापत्तेः। जन्मोत्पत्तेरनन्तरमेवाहारोत्पत्तेः सम्भवात्। न चोत्तरकालिकत्वं सहार्थोऽस्त्विति वाच्यम्, तथा सति पुत्रागमनोत्तरमागते पितरि पुत्रेण सहागत इति प्रयोगापत्तेः। सामनाधिकरण्यस्य सहार्थत्वे तु यत्र क्रिययोः सामानाधिकरण्यं तत्र सहशब्दप्रयोग इष्ट एव।

एवं सहार्थे एकानुपूर्वीकत्याद्यन्तप्रतिपाद्यो नानाविधो धात्वर्थो विशेषणतया विशेष्यतया चान्वेति, विशेषणे तृतीयान्तार्थश्च। यथा पूर्वोक्त– यशसा सह मूर्छतीह शत्रुरित्यत्र मोह उच्छ्रायश्च धातोरर्थः। यशः कर्तृताकत्वमुच्छ्राये तत् समानकालिकत्वे, तत् मोहे, स च त्याद्यर्थे आश्रयत्वे, तत् शत्रौ विशेषणतयाऽन्वेति योग्यताबलाद् व्युत्पत्तिवैचित्र्याच्च। यशः कर्तृकसमुच्छ्रायसमानकालिकमोहाश्रयः शत्रुरित्यन्वयबोधः। नानाविधेऽपि धात्वर्थे एकानुपूर्वीकशब्दप्रतिपाद्यो नानाविधोऽर्थः तृतीयाभिन्नविभक्त्यर्थेऽन्वेति। तत्र योग्यतावशाद् एकविधार्थान्वितो विभक्त्यर्थो विशेषणेऽपरविधार्थान्वितो विभक्त्यर्थो विशेष्ये धात्वर्थेऽन्वेति व्युत्पत्तिवैचित्र्यात्। यथा "कैरवं हतवान् राजा भृङ्गेण सह सत्वरम्" इत्यत्र धात्वर्थो गमनं हननं च, कैरवशब्दार्थः कुमुदं शत्रुश्च। कुमुदकर्मत्वं गमने शत्रुकर्मत्वं हननेऽन्वेति। एवं भृङ्गकर्तृताककुमुदकर्मताकगमनसमानकालिक– शत्रुकर्मताकहननाश्रयो राजेत्यन्वयबोधः। तथाविधनानाविधार्थान्वितस्तृतीयाभिन्नविभक्त्यर्थः एकविधार्थान्वितः सहार्थस्य विशेषणेऽपरविधार्थान्वितो विशेष्ये एकविधेऽपि धात्वर्थेऽन्वेति। यथा– "देवाधिनाथेन सह

क्षितीशो भृशं धराप्रीतिमसौ विधत्ते" इत्यत्र धराप्रीति-शब्दार्थः पर्वताप्रीतिः पृथ्वीरतिश्च तदुभयकर्मत्वमेकविधे धात्वर्थे विधानेऽन्वेति । तथा च देवाधिनाथकर्तृताकपर्वताप्रीतिकर्मताकविधानसमानकालिकपृथिवीरतिकर्मताकविधानानुकूलकृतिमान् क्षितीश इत्यन्वयबोधः ।

तथाविधनानार्थान्वित– तथाविध ( समानानुपूर्वीक ) विभक्त्यर्थस्य एकैकं सहार्थस्य विशेषणे विशेष्ये च समानानुपूर्वीकत्याद्यन्तनानाविधधातुप्रतिपाद्ये नानाविधेऽप्यन्वयः । यथा– "शिशुः पयो धास्यति सागरैः सह" इत्यत्र धास्यतिपदेन धयत्यर्थस्य पानस्य, दधात्यर्थस्य धारणस्य, भावित्वस्य, कृतेश्च स्मृतिर्जायते । पयःपदेन क्षीरनीरयोः, द्वितीयया कर्मत्वस्य, तृतीयया कर्तृत्वस्य । सागरकर्तृत्वं नीरकर्मत्वं च धारणे, क्षीरकर्मत्वं पाने योग्यताबलाद् व्युत्पत्तिवैचित्र्याच्चान्वेति । एवं च सागरकर्तृताक– नीरकर्मताकधारणसमानकालिक– क्षीरकर्मताकभाविपानानुकूलकृतिमान् शिशुरित्यन्वयबोधः । सहार्थान्विते विशेषणे विशेष्ये वा धात्वर्थे एकत्र कर्मत्वाद्यन्वययोग्योपस्थापकपदस्य न त्याद्यन्तेन सहाकाङ्क्षा । अत एव पयःपदेन क्षीरमात्रोपस्थितौ न तथा शाब्दबोधः, न वा क्षीरं शिशुर्धास्यति सागरैः सह इति प्रयोगः ।

ननु शिशुः क्षीरं धास्यति पयो वेत्यत्र धास्यतिपदेन द्वितीयान्तस्य क्षीरपदस्य, क्षीरमात्रोपस्थापकपयःपदस्य वा आकाङ्क्षाया दृष्टत्वात् प्रकृते कुतो नाकाङ्क्षा । न च प्रकृते त्याद्यन्तेन धारणस्याप्युपस्थापनेन धारणे क्षीरकर्मत्वान्वययोग्यताविरहात् पानेऽपि न क्षीरकर्मत्वान्वयाकाङ्क्षेति वाच्यम्, तावताऽप्यर्थभेदेऽप्यभिन्नायाः शब्दधर्मस्वरूपाकाङ्क्षाया अवैकल्यात्, योग्यताविरहस्य वक्तुमुचितत्वात् । नानार्थस्यैकत्र योग्यताविरहेऽपि अपरत्रान्वयस्य दर्शनाच्च । यथा सैन्धवो नील इत्यादौ । तत्कुतो न दर्शितप्रयोगः, पाने क्षीरकर्मत्वान्वयसम्भवाद् इति चेन्न, नानार्थशब्दस्यापि हि नानाविधार्थतात्पर्यनानाविधार्थान्वययोग्यार्थकेनैव पदेन सहाकाङ्क्षा । अत एव लवणाश्वतात्पर्ये सति सैन्धवौ नीलाविति न प्रयोगः सैन्धवलवणे नीलान्वयासम्भवात् । न च लवणेऽयोग्यत्वान्मास्तु नीलान्वयः आकाङ्क्षा तु वर्तत एवेति वाच्यम्, तथा सत्यश्वेऽपि नीलान्वयप्रसङ्गात् । तस्मात् धारणतात्पर्यविषयीभूतधास्यतिपदार्थ स्वार्थान्वयबुद्ध्यभावप्रयोजकाभावप्रतियोगित्वस्वरूपाकाङ्क्षा द्वितीयान्तक्षीरपदे नास्ति, क्षीरमिति पदे सत्यप्यन्वयबुद्धेरभावात् । न चैवमग्निना सिञ्चतीत्यत्राप्याकाङ्क्षाविरहादेव न शाब्दबोध इति वाच्यम्, अग्निपदस्य द्रवद्रव्यपरतायामाकाङ्क्षासम्भवादर्थभेदेनाकाङ्क्षाभेदाभावात्– वह्निपरतायामप्याकाङ्क्षासत्त्वात् । तात्पर्यविषयत्वस्यापरपदार्थविशेषणत्वात्– आकाङ्क्षाग्रहधर्मिपदस्यार्थे तद्विशेषणत्वाविवक्षणात् । अग्निनेति पदस्य धर्मित्वे नाकाङ्क्षाविरहः किन्तु योग्यताविरहः पाकलाक्षणिकसिञ्चतिपदस्य धर्मित्वेऽप्यग्नितात्पर्यकाग्निनेतिपदेन सहाकाङ्क्षा सम्भवत्येवेति यत्र क्षीरमिति पदस्य लक्षणया नीरक्षीरयोरुभयोरुपस्थापकत्वं तत्रोभयार्थकस्य पय इतिपदस्येवाकाङ्क्षाया अवैकल्यात् क्षीरकर्मकत्वस्य पाने नीरकर्मकत्वस्य धारणेऽन्वयबोधो भवत्येव । यत्र द्वितीयान्तपदं विनैव 'सागरैः सह शिशुर्धास्यती'ति प्रयोगः, तत्र कर्मत्वान्वययोग्यशब्दाभावात्– कर्मत्वान्वयबोधं विनैव शाब्दबोधः, पानधारणोभयकर्मत्वान्वययोग्यार्थस्य पय इत्यादिद्वितीयान्तपदस्य तद्घटिताकाङ्क्षायाश्च विरहान्न कर्मत्वान्वयबोध इति म० म० गोकुलनाथोपाध्यायरीतिः ।

दर्शितेषु 'यशसा सह मूर्च्छतीह शत्रुः' 'शिशुः पयो धास्यति सागरैः सह' इत्यादिषु श्लेषानुप्राणितसहोक्त्यलङ्कारस्थलेषु एकानुपूर्वीकशब्दप्रतिपाद्ययोरर्थयोः सर्वत्र तादात्म्यं व्यञ्जनया प्रतीयते । वैयञ्जनिकबोधे बाधो न विरोधी, अत एव—

"सकलकलं पुरमेतज्जातं सम्प्रति सुधांशुबिम्बमिव" इत्यत्र कलकलसाहित्यकलासाकल्ययोरभेदाध्यवसाये साधारणधर्मोपपत्त्योपमाप्रतीतिः । तथा च– शिशुः पयोधास्यतीत्यत्र पानधारणयोः तादात्म्याध्यवसायेनैक्ये सहार्थविशेषण-

विशेष्ययोरेकजातीयक्रिययोः क्षीरनीरयोरपि तादात्म्याध्यवसायादेकजातीयककर्मत्वान्वयः इति रसविद्याविदः। व्यञ्जनाविद्वेषिणस्त्वत्र लक्षणयैव निर्वोढुं प्रयतन्त इत्यन्यत्।

## प्रयोगवशात्सहार्थभेदः।

दर्शितातिरिक्तोऽपि क्वचित्सहार्थः— समवायेन सह घटत्वं प्रतियोगितामवच्छिनत्ति इत्यत्र निरूप्यत्वमवच्छेदकता चावच्छिदो धातोरर्थः। निरूप्यत्वं च ज्ञानजन्यज्ञानविषयत्वम्, तत्र ज्ञानमात्रं फलविषयाऽर्थः, द्वितीयान्तार्थस्य प्रतियोगित्वाधेयत्वस्य विषयतासम्बन्धावच्छिन्नस्य फले ज्ञाने, तस्य स्वजन्यज्ञानविषयत्वेन सम्बन्धेनावच्छेदकतायामन्वयः। सहार्थः समाननिरूपकत्वम्, तत्रापि निरूपकमात्रं सहार्थः, निरूपकं च ज्ञानजन्यज्ञानविषयः, तत्र ज्ञानविषययोरेकपदार्थयोरपि परस्परमन्वयः, आधेयत्वलक्षणकर्तृत्वार्थकतृतीयान्तार्थस्य समवायाधेयत्वस्य प्रतियोगिताकर्मके धात्वर्थे, तस्य स्वविषयकज्ञानजनकत्वेन सम्बन्धेन ज्ञानस्य विषयतया विषये, तस्य स्वविषयकज्ञानजन्यज्ञानविषयत्वेन तथाविधे धात्वर्थे, तस्य त्याद्यर्थाश्रयत्वे, तस्य घटत्वेऽन्वयः। एवं च समवायवृत्तेः प्रतियोगितावृत्तिज्ञानज्ञाप्यावच्छेदकत्वस्य ज्ञापकज्ञानविषयो यस्तद्विषयज्ञानज्ञाप्यायाः प्रतियोगितावृत्तिज्ञानज्ञाप्यावच्छेदकताया आश्रयो घटत्वमिति शाब्दबोधः। अभावनिरूपकः प्रतियोगितावच्छेदकविशिष्टः प्रतियोग्येव प्रतियोगित्वतदवच्छेदकत्वनिरूपकः स तु निरूपकत्वेन सहार्थे निविशते न तु तत्त्वेनेति। न चात्रापि समानकालिकत्वं सहार्थः, तत्रैव प्रतियोगिताकर्मकावच्छेदकस्य विशेषणतया विशेष्यतया चान्वय इति वाच्यम्, तथा सति पटत्वेन सह घटत्वमवच्छिनत्तीति प्रयोगप्रसङ्गात्, पटघटाभावप्रतियोगितावच्छेदकतयोः समानकालिकत्वाबाधात्। ननु यथा पुत्रेण सह ग्रामं गच्छतीत्यत्र यद्व्यक्तिकर्मकस्य धात्वर्थस्य विशेषणत्वं तद्व्यक्तिकर्मकस्यैव धात्वर्थस्य विशेष्यत्वे सहशब्दप्रयोगः साधुस्तथाऽत्रापि समवायेन सहेत्यत्र प्रतियोगिताव्यक्तेरेकस्या उभयकर्मत्वाद्भवत्युपपत्तिः, पटत्वेन सह घटत्वमित्यत्रैकप्रतियोगित्वव्यक्तेरुभयकर्मत्वासम्भवान्नोपपत्तिरिति चेत्, न, महानसीयत्वेन सह वह्नित्वमवच्छिनत्तीत्यत्रैकप्रतियोगित्वव्यक्तेरुभयकर्मत्वासम्भवादसाधुत्वप्रसङ्गात्, अवच्छेदकधर्मभेदेन प्रतियोगिताभेदात्। एवं चक्षुःप्रतियोगिकत्वेन सह संयोगे चाक्षुषकारणतामवच्छिनत्तीत्यत्रापि समाननिरूपकत्वं सहार्थः न तु समानकालिकत्वम्, तथा सत्युद्भूतरूपत्वेन सह संयोगत्वमवच्छिनत्तीति प्रयोगप्रसङ्गात्। न चात्रैकव्यक्तिकर्मकत्वसंभवः; कर्मणः कारणताया अवच्छेदकधर्मभेदेन भेदादवच्छेदकतया व्यासज्यवृत्तित्वस्य दूषितत्वात् इति कारणताया निरूपकावन्वयव्यतिरेकौ तदवच्छेदकत्वनिरूपकाविति बोध्यम्।

क्वचिदभेदोऽपि सहार्थः यथा पटेन सह घटं साक्षात्करोतीत्यत्र द्वितीयातृतीययोः कर्मत्वमर्थः तच्चाधेयत्वं, सहार्थस्याभेदस्य विशेषणे तृतीयार्थविशेषे धात्वर्थे द्वितीयार्थोऽन्वेति। एवं च पटवृत्तिलौकिकविषयताकसाक्षात्काराभिन्नघटवृत्तिलौकिकविषयताकसाक्षात्काराश्रयत्वं वाक्यार्थः। न चात्रसमानकालिकत्वं सहार्थः, तथा सत्यव्यवहितज्ञानभेदेन तथाप्रयोगप्रसङ्गात्। न चेष्टापत्तिः, तथा सति रूपेण सह गन्धं साक्षात्करोमीति प्रयोगप्रसङ्गात्॥

जात्या सह व्यक्तिं घटत्वेन सह घटं वा जानतीत्यत्र सामग्रीघटकसामग्रीकत्वं सहार्थः। जातिवृत्तिविषयताकज्ञानसामग्रीघटकव्यक्तिवृत्तिविषयताकज्ञानाश्रयत्वं च वाक्यार्थः। न चात्र समानकालिकत्वमभेदो वा सहार्थः, तथा सति जात्या सहाभावं, घटत्वेन सह पटं वा जानातीति प्रयोगप्रसङ्गात्, जात्यभावयोः घटपटयोश्च समूहालम्बनसम्भवात्। प्रत्यक्षे व्यक्तीन्द्रियसन्निकर्षो जातीन्द्रियसन्निकर्षघटकः, अनुमितौ व्यापकताया ज्ञानं तदवच्छेदकत्वज्ञानघटकं शाब्दबोधे पदार्थस्योपस्थितिस्तदवच्छेदकोपस्थितिर्घटिका प्रयोजिकेति। घटकत्वं व्यापकत्वम् इति प्रमायामीदृशसामग्री सम्भवति न तु भ्रमे। अत एव भ्रमस्थले घटत्वेन सह पटं जानातीति

सहपदघटितो न प्रयोगः किं तु घटत्वेन पटं जानातीति सहपदशून्य एव ।

जात्या सह व्यक्तिर्भासते इत्यत्र भासतेर्विषयत्वमर्थः, तेराश्रयत्वमर्थः । इच्छायां भासते सुखमित्यत्र सप्तम्यर्थाधेयत्वस्य यथान्वयः तथा सप्तमीविवरणे स्फुटीभविष्यति । एवं चात्र सहार्थः प्रतियोगिसामग्रीघटकसामग्रीकप्रतियोगित्वम्, न तु समानकालिकत्वम्, तथा सति ज्ञानभेदेनेच्छाज्ञानाभ्यां वा जातिव्यक्त्योरवभासे तथाप्रयोगप्रसङ्गात् । तृतीयायाः कर्तृत्वलक्षणमाधेयत्वमर्थः तथा च जातिवृत्तिविषयत्वप्रतियोगिसामग्रीकप्रतियोगिकविषयत्वाश्रयो व्यक्तिरिति शाब्दबोधः । जातिव्यक्तिविषयत्वयोः प्रतियोगि ज्ञानमिच्छा वा, तत्र जातिविषयत्वप्रतियोगिकज्ञानसामग्रीघटकत्वं व्यक्तिविषयत्वप्रतियोगिज्ञानसामग्र्याः दर्शितमेव, इच्छाविषयताया ज्ञानविषयत्वाधीनत्वात् जातिविषयकेच्छासामग्र्या व्यक्तिविषयकेच्छासामग्रीघटितत्वमपि उपपन्नमेव । न चात्राभिन्नप्रतियोगिकत्वं सहार्थः- लाघवादिति वाच्यम् तथा सति जातिव्यक्त्योः समूहालम्बने तथाप्रयोगप्रसङ्गात्- इति ।

जात्या सह व्यक्तिमवगाहते बुद्धिरित्यत्र अवगाहतेर्विषयताफलकप्रतियोगित्वव्यापारोऽर्थः, तृतीयाद्वितीययोः कर्मत्वलक्षणमाधेयत्वमर्थः, तेराश्रयत्वमर्थः, प्रयोजकसामग्रीघटकसामग्रीप्रयोज्यत्वं सहार्थः, प्रधानक्रियाकर्त्र्या बुद्धेर्गुणक्रियायामपि कर्तृत्वेनान्वयः, एवं च बुद्धिकर्तृकजातिवृत्तिविषयताप्रतियोगित्वप्रयोजकसामग्रीघटकसामग्रीप्रयोज्यस्य व्यक्तिवृत्तिविषयताप्रतियोगित्वस्याश्रयो बुद्धिरित्यन्वयबोधः । जातिविषयकज्ञानसामग्र्येव जातिविषयत्वप्रतियोगित्वप्रयोजिका, एवं व्यक्तिविषयकज्ञानसामग्र्येव व्यक्तिविषयत्वप्रतियोजिकेति तयोश्च घटितघटकभावो दर्शित एवेति ।

'शैवालेन सह जलेन संयुज्यते बकः', 'वामतटेन सह दक्षिणतटेन संयुज्यते नदी', इत्यादौ तृतीययोर्जन्यत्वलक्षणं हेतुत्वमर्थः, न तु प्रतियोगित्वमर्थो, बाधात्; न वा आधेयत्वं, साक्षात्संसर्गावच्छिन्नाधेयत्वस्य धात्वर्थान्वयाव्युत्पत्तेः । एकक्रियाप्रयोज्यत्वं सहार्थः । एवं च शैवालजन्यसंयोगप्रयोजकक्रियाप्रयोज्यजलजन्यसंयोगाश्रयो बक इति शाब्दबोधः । न चात्र समानकालिकत्वं सहार्थः सम्भवति, तथा सति वायुना सह शैवालेन संयुज्यते बक इति प्रयोगप्रसङ्गात् । सहार्थे प्रयोज्यत्वप्रवेशात्, शाखया सह वृक्षेण संयुज्यते कपिरित्यत्राप्युपपत्तिः । एवं यथाप्रयोगं सहार्थः सुधीभिरूह्यः इति तार्किकसरणिः ।

## अथोपसंहारः

प्रकृतमनुसरामः— तार्किकादिरीत्योपरिवर्णिताः सहशब्दद्योत्यार्थाः सर्व एव तुल्ययोगरूपा एव, तुल्ययोगो हि येन सम्बन्धादिना दैशिकेन कालिकेन समवायसंयोगादिना वा प्रधानस्य, क्रियया नामार्थेन वा योगस्तेनैव सम्बन्धेन तृतीयाप्रकृतेरप्रधानस्यापि योग इत्येवंरूप एव । स एव च तैर्विविधया वाचोभङ्ग्या प्रतिपादितः । ध्वनितश्चायमर्थः शब्दमहार्णवन्यासे आचार्यैः— तुल्ययोगोऽपि केनचित् क्रियादिना भवति, तत्र पुत्रेण सह स्थूल इत्यत्र स्थौल्येनगुणेन, पुत्रेण सह गोमानित्यत्र च गोभिर्द्रव्येण, शिष्येण सह ब्राह्मण इत्यत्र ब्राह्मणेन ( ब्राह्मणत्वेन ) जात्येत्यादिना । एवं चैतद्योगविहिततृतीयाया अपि प्रधानविहितविभक्त्या सह समानार्थत्वमेव । एवं च पुत्रेण सहागत इत्यत्र कर्तृत्वम्, पुत्रेण सह स्थूल इत्यादौ समवायादिः सम्बन्धः, पुत्रेण सह गोमानित्यादौ स्वस्वामिभावादिः सम्बन्ध इत्यादिकं यथायोगमूहनीयमिति दिक् । २।२।४४।।

## यद्भेदैस्तद्वदाख्या ।।२।२।४६।।

सूत्रार्थविवरणेनैव विभक्त्यर्थबोध इति सूत्रार्थं विवृणोति- **यस्य भेदिनः** इत्यादिना । भेदश्च प्रकारः । तद्वान् भेदी । तत एवेयं विभक्तिरिति लभ्यते । तथा च प्रकार एवैतद्विहितविभक्तेरर्थः । अस्य च नामार्थोपस्था-

प्येन प्रकारेण सहाभेदः सम्बन्धः । तथा च अक्ष्णा काण इत्यस्य अक्षिप्रकाराभिन्नकाणत्वविशिष्ट इति शाब्दबोधः । चाक्षुषप्रयोजकगोलकद्वयाभाववत्त्वे सति चाक्षुषप्रयोजकैक-गोलकवान् काणपदार्थः । गोलकस्य स्वच्छिद्रद्वारा चक्षुषो निर्गमेण सन्निकर्षसम्पादनेन चाक्षुषप्रयोजकत्वं, चक्षुषो गोलकान्तर्वर्तित्वात्, न तु तस्य कृष्णतारकावर्तित्वं कृष्ण-तारकाचाक्षुषापत्तेः । आलोकाभावाच्च न गोलकान्तश्चाक्षुषम् ।

अन्ये च वैयाकरणाः अत्र तृतीयाया विकारवाचित्व-माहुः । एवं सति काणपदार्थैकदेशे चाक्षुषप्रयोजकगोलक-द्वयाभावे तृतीयार्थविकारस्य प्रयोज्यत्वसम्बन्धेनान्वयः । अक्षिपदं गोलकपरम् । तथा च गोलकविकारप्रयोज्य-चाक्षुषप्रयोजकगोलकद्वयाभाववान् चाक्षुषप्रयोजकैकगोलक-वान् इत्यन्वयबोधः । तद्ग्रहणेन च भेदिनो विकाराभावे भेदमात्रस्य प्रतीतौ च तृतीया नेति अक्षि काणं पश्येत्यादौ न तृतीया । स्वमतेऽपि मुख्यप्रकारिणः पुरुषस्य प्रकारत्वेऽ-प्रतीयमाने न सेति तुल्यम् । एवं पादेन खञ्ज इत्यत्र पाद-द्वयप्रयोज्यप्लुतान्यगत्यभाववत्त्वे सति प्लुतान्यगतियोग्य-पादवान् खञ्जपदार्थः । खञ्जस्यापि प्लुतगतिमत्त्वादव्याप्ति-वारणाय सत्यन्तमुपात्तम् । विकृतोभयपादवत्यतिप्रसङ्ग-वारणाय विशेष्यदलम् । पादस्य प्लुतान्यगतियोग्यत्वं च विजातीयसंयोगवदवयवारभ्यत्वम्; प्लुतान्यप्रयोजकमारम्भक-संयोगगतं वैजात्यमेव, आवश्यकत्वात्; यद्विरहात् जात-मात्रबालस्यापि विसदृशपादाद्यवयववत्त्वमालोक्यते । तृती-यार्थश्च प्रकारो विकारो वा यथामतम् । विकारमते च स क्वचिदामवातसंयोगः क्वचिदवयवनाशकखड्गादिप्रहारः, क्वचिद्रुधिरास्थिमांसाद्यवयवनाशप्रयोजको रोगविशेषः, क्व-दारम्भकसंयोगनाशकवायुप्रयोजक आहारविशेषः । तृती-यार्थः (विकारपक्षे) प्रयोजकत्वेन तथाविधगत्यभावेऽन्वेति । एवं च पादविकारप्रयुक्तपादद्वयप्रयोज्यप्लुतान्यगत्यभाववान्, प्लुतान्यगतियोग्यैकपादवान् इत्यन्वयबोधः । विकारास्तु तथाविधगतिप्रतिबन्धकतावच्छेदकत्वोपलक्षितधर्मवत्तयाऽनु-गन्तव्याः । क्वचित् शापोऽपि विकारः । अत एव सौरिः पादेन खञ्ज इति व्यवहारः । एवं हस्तेन कुणिः इत्यत्र कुणिपदार्थः कुकरत्वम्, तच्च करद्वयप्रयोज्यकार्याभाववत्त्वे सति तथाविधकार्ययोग्यैकपाणिमत्त्वम् । तथाविधकार्यं तु धनुष्प्रहरणादि तान्त्रिककरमुद्रादि । तद्योग्यत्वं पाणेः पाद-वद्बोध्यम् । तृतीयार्थो विकारः, स चाङ्गुलीगलनादिः । एवं च पाणिविकारप्रयोज्यकरद्वयप्रयोज्यकार्याभाववान् कार्य-योग्यैकपाणिमांश्चेत्यन्वयबोधः । यदि च हस्ताभ्यां कुणि-रिति प्रयोगः तदा करद्वयप्रयोज्यकार्याभाववत्त्वमात्रं कुणि-शब्दार्थो बोध्यः ।

एवं कार्याभावस्याङ्गिविकारत्वोपगमेन, 'ताऽक्ष्णा वधिराणि पन्नगकुलानि' इत्यादिप्रयोगोऽप्युपपन्नः । तत्र वधिरत्वं श्रावणप्रत्यक्षयोग्यत्वाभावः । पन्नगानां चक्षु-र्गोलकमेव श्रवणेन्द्रियाधिष्ठानं, तत्र गोलकावच्छिन्ने श्रोत्रे शब्दानुत्पादोऽपि गोलकस्य विकारः । स एव च तृतीयार्थः । तस्य प्रयोज्यत्वेन श्रावणाभावेऽन्वयः । एवं नेत्राभ्यामन्ध इति प्रयोगोऽपीष्ट एव । चाक्षुषाभावेऽन्धत्वे नेत्रद्वयविकारस्य प्रयोज्यतयाऽन्वयः । एवं 'नासिकयाऽघ्राता' इत्यत्र नासि-काया विकारो घ्राणसन्निकर्षप्रयोजकनिर्गमप्रतिबन्धकः कफादिः क्वचिद् घ्राणनाशश्च । तस्य प्रयोज्यत्वेन घ्राण-जाभावेऽघ्रातृत्वेऽन्वयः । एवं जिह्वयाऽरसयितेत्यत्र रसन-निर्गमनप्रतिबन्धको रोगादिः, क्वचिद्रसननाशः, क्वचित् स्वनाशश्च जिह्वाया विकारः, स च रासनाभावेऽरसयितृ-त्वेऽन्वेति । एवं त्वचाऽस्पर्शक इत्यत्र त्वचो विकारः स्पर्श-नेन्द्रियप्रतिबन्धको गजचर्मादिरोगः, क्वचित्स्पर्शननाशश्च । स च प्रयोज्यत्वेन स्पार्शनाभावे— ऽस्पर्शकत्वेऽन्वेति । एवं श्रोत्रेण वधिर इत्यत्र श्रोत्रं कर्णशष्कुल्यवच्छिन्नं नभः, तत्र शब्दानुत्पादो वधिरत्वम् । स च रोगविशेषेणादृष्ट-विशेषविरहेण वा यथायोग्यं प्रयुज्यत इति । अत एव—

"स बाल आसीद्वपुषा चतुर्भुजः,
मुखेन पूर्णेन्दुनिभस्त्रिलोचनः ।

युवा कराक्रान्तमहीभृदुच्चकै–
रसंशयं सम्प्रति तेजसा रविः”
( शिशुपालवधे प्रथमसर्गे )

इत्यत्र 'वपुषा चतुर्भुजः' 'मुखेन त्रिलोचन' इत्यादिप्रयोगा अप्युपपद्यन्ते । तत्र अवयवस्य नाशस्वरूपापचयस्येवोपचयस्यापि विकारत्वमेवेतीह तृतीययोरुपचयोऽर्थः । स च प्रयोज्यत्वेन भुजचतुष्टयसम्बन्धेऽन्वेति ।

वस्तुतस्तु विकारस्य तृतीयार्थत्वं सर्वत्रैषु न प्रतिभासत इति स्वमतोक्तं प्रकारार्थत्वमेव व्यापकतया समादरणीयम् । वपुषा चतुर्भुज इत्यत्र चतुर्भुजशब्दस्य भुजचतुष्टयसमवेतोऽर्थः। प्रकारश्च तृतीयार्थोऽभेदेन सम्बन्धेनान्वेतीति वपुः प्रकाराभिन्नभुजचतुष्टयसमवेतः शिशुपालो बाल इतिरूपेणान्वयबोधो बोध्यः । एवं त्रिलोचनशब्दस्यापि लोचनत्रयसमवेतोऽर्थः, प्रकारश्च तृतीयार्थोऽभेदेन त्रिलोचनपदार्थेऽन्वेति । एवम् 'उदरेण पिचण्डिलः' वर्णेन लोहित, इत्यादिप्रयोगा अपि प्रकारार्थतयैवोपपादनीयाः । यद्यप्यारव्याग्रहणस्य प्रसिद्धिपरिग्रहार्थत्वोक्तेरेवमादयः प्रयोगा लोके न बहुतरप्रयुक्ता इत्यप्रसिद्धा इवाभान्ति, तथाऽपि महाकविप्रयोगेषु तत्र-तत्रोपलभ्यमानत्वान्नाप्रसिद्धत्वम् ।

प्रकृतमनुसरामः— 'शिरसा खल्वाट इत्यत्र केशरहितकपालवान् खल्वाटशब्दार्थः । तत्र च शिरःप्रकारस्याभेदेनैवान्वयः शिरःप्रकारविशेषकेशरहितकपालवानितिबोधात् । प्रकृत्या दर्शनीयः । अत्र दर्शनीयत्वमदर्शनीयत्वञ्च सौन्दर्यासौन्दर्यरूपम् प्रकृतिप्रकार एव ।

## प्रकृतिपदार्थविचारः ।

प्रकृतिपदार्थस्तु स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवान्– असाधारणो धर्मः । भवति च सतो जातिः प्रकृतिरित्यत्र जात्यादिस्तथाभूतः । असाधारण्यविशेषणात् घटस्य गुणो जातिर्वा प्रकृतिरिति न प्रयोगः । कम्बुग्रीवादिमत्त्वं घटस्य प्रकृतिरिति प्रयोगश्च भवति । कम्बुग्रीवादिमत्त्वस्य तदसाधारणधर्मत्वात् । जलस्य शैत्यं पृथिव्या गन्धः, तेजस औष्ण्यं प्रकृतिरित्यादौ शैत्यगन्धौष्ण्यानां संग्रहाय स्थूलकालावच्छिन्नत्वं स्वाश्रयनिष्ठात्यन्ताभावे विशेषणं देयम् । यदि च संयोगो द्रव्यस्य, मत्सरः खलस्य, चैतन्यमात्मनः प्रकृतिरित्यादिप्रयोगः प्रामाणिकस्तदा देशानवच्छिन्नविशेषणतया स्वाश्रये स्थूलकालावच्छेदेन वर्तमानस्यात्यन्ताभावस्य प्रतियोगितानवच्छेदकधर्मवानसाधारणो धर्मः प्रकृतिरिति । द्रव्ये वृक्षादौ मूलाद्यवच्छेदेन संयोगस्य, खले मत्सरस्य आत्मनि ज्ञानस्य घटाद्यवच्छेदेन स्थूलकालावच्छेदेन वर्तमानोऽप्यत्यन्ताभावो न देशानवच्छिन्नविशेषणतयाऽस्तीति न तेषामसंग्रहः ।

वस्तुतस्तु– भूयःकालिकस्वाश्रयनिरूप्यसत्तावानसाधारणो धर्मः प्रकृतिः । तावतैव सर्वसामञ्जस्यम् । यदि च पृथिव्या गन्धप्रागभावो रक्तप्रागभावो वा, गन्धनाशो रक्तनाशो वा प्रकृतिरिति प्रयोगस्तदा–स्वसम्बन्धिनि प्रतियोगिसजातीयासामानकालिकस्य विद्यमानस्य नाशस्य प्रागभावस्य चाप्रतियोगी तादृशः ( असाधारणः ) धर्मः प्रकृतिरिति । तथाविधनाशप्रागभावप्रतियोगिनौ न तथासंयोग-मत्सरज्ञानानां नाशप्रागभावे स्वसम्बन्धिनि विद्यमानौ न प्रतियोगिजातीयासमानकालिकाविति न तेषामसंग्रहः ।

यद्वा स्वसम्बन्धितावच्छेदकसमनियतो धर्मः प्रकृतिः, समनियमघटकवाक्यद्वये प्रतियोगिवैयधिकरण्यं निवेशनीयम्; तच्च प्रतियोगिकालावच्छेदेन प्रतियोग्यधिकरणे वर्तमानेभ्योऽन्यत्वम् । तेन द्रव्यस्य संयोगः, संयोगवतो द्रव्यत्वं प्रकृतिरित्यादौ नानुपपत्तिः । प्रतियोगिकालावच्छिन्नत्वस्य निवेशात् प्रागभावनाशयोर्न प्रकृतित्वम्; प्रागभावनाशयोरत्यन्ताभावस्तत्कालावच्छेदेन तदधिकरणे न वर्तमान इति तयोर्न सम्बन्धितावच्छेदकव्यापकत्वम् । चित्ररूपाद्यनभ्युपगमादैशिकाव्याप्यवृत्तेर्गन्धादेरत्यन्ताभावस्य प्रतियोगिकालेऽपि सत्त्वान्न व्यापकत्वहानिः । चित्ररूपाभ्युपगमे

तु 'वस्तुतस्तु'– इत्यादिनोक्तः कल्पोऽनुसरणीयः इति प्रकृतिपदार्थविचारः संक्षेपेण ।

एतद्विहित– तृतीया च यथायोगं यथाविवक्षं वा नानार्थिकेति विचारकाः । ते चार्थाः प्रयोगवशादेवानुगन्तव्याः । प्रकृत्या दर्शनीय इत्यत्र प्रकृतिपदोत्तरतृतीयायाः तादात्म्यमर्थः, तच्चापरपदार्थतावच्छेदकेऽन्वयितावच्छेदकेवाऽन्वेति । एवं च प्रकृत्यभिन्नदर्शनीयत्ववानित्यर्थः । 'प्रायेण वैयाकरणः इत्यत्र प्रैति बाहुल्येन ज्ञानविषयतां गच्छतीति प्रायः, तदभेदवान् वैयाकरण इत्येवं शाब्दबोधः । गोत्रेण गार्ग्य इत्यत्रापि तृतीयायास्तादात्म्यमेवार्थः ।

## अथ गोत्रपदार्थविचारः

गोत्रपदार्थस्तु वंशप्रवर्त्तकः पुरुषो ब्रह्मऋषिः । वंशपदार्थस्तु प्रवर्त्तकस्याप्रवर्तकस्य वा पुरुषस्योत्तरकालिकः स्वारम्भकशुक्रपरमाणुभिः परम्परयाऽऽरम्यमाणः । उत्तरकालिकत्वनिवेशात् पराशरस्य वंशो वसिष्ठ इति न प्रयोगः, किं तु वसिष्ठस्य पराशर इति । प्रवर्तकशब्दार्थस्तु– दर्शितवंशत्वस्वरूपशक्यसम्बन्धेन स्वसंज्ञाशब्दस्य निरूढोपचारकः । तथा निरूढोपचारका यथा– गौतमाः, गर्गाः, शाण्डिल्या इत्यादौ गौतमादयः पुरुषाः स्ववंशे संज्ञोपचारकाः । ब्रह्मऋषि शब्दार्थस्तु ऋषिस्वरूपो ब्राह्मणः । वंशमात्रार्थकत्वे तु चैत्रमैत्रगोत्रा एते इति प्रयोगापत्तिस्तद्वारणायोपात्तेऽपि प्रवर्त्तकत्वे विशेषणे, एते रघवो, यदवः, कुरवो, रघुयदुकुरुगोत्रा एते इति प्रयोगवारणाय ब्रह्मर्षित्वं विशेषणम् । न च दर्शितप्रयोगवारणाय ब्राह्मणत्वमेव विशेषणमस्तु किमृषित्वनिवेशनेति वाच्यम् यतः दर्शितोपचारकत्वेऽपि न ब्राह्मणत्वमात्रं तन्त्रम् तथा सति प्रभाकराः कुमारिला उदयना एते इति प्रयोगप्रसङ्गः । किन्तु ऋषित्वं तन्त्रम्, तदर्थमेवात्र तत्प्रदर्शनम् । वस्तुतो गोत्रलक्षणे न तन्निवेशः । पत्न्यां पतिसागोत्र्यव्यपदेशो गौणः धर्मशास्त्रातिदेशात्; पितृसागोत्र्यनिवृत्तिरपि धर्मशास्त्रातिदेशादेव ततश्च तस्यां वंशप्रवर्तकपुरुषोत्तरकालिक–स्वारम्भकशुक्रपरमाणुभिः परम्परयारम्यमाणत्वरूपगोत्रत्वविरहेऽपि न क्षतिः । कन्यादानात्पूर्वं तस्याः पितृसगोत्रत्वेऽपि तदुत्तरं तस्या गोत्रपरिवर्तनात् । अत एव कन्यादानवाक्ये पितृगोत्रोच्चारणमेव । ततः परञ्च तत्र पतिसगोत्रत्वव्यवहार एव । स च धर्मशास्त्रकृतातिदेशादिति गौण इत्युक्तम्, एवं च गोत्रेण गार्ग्यो इत्यत्र गार्ग्यपदार्थैकदेशे गर्गापत्यत्वे–गर्गारम्भकशुक्रावयवपरमाणुपरम्परारम्यत्वे गोत्रपदार्थाभेदान्वयः । तथा च प्रवर्तकपुरुषारम्भकशुक्रावयवारब्धत्वाभिन्नं यद्-गर्गारम्भकशुक्रावयवारब्धत्वं तद्वानिति बोधः ।

एवं 'नाम्ना सुतीक्ष्णश्चरितेन दान्तः' इत्यत्र नामपदोत्तरं तृतीयाऽप्येतद्विहितैव । तस्या अपि तादात्म्यमेवार्थः । सुतीक्ष्णपदस्य सुतीक्ष्णपदप्रतिपाद्ये लक्षणा । नाम वाचकं पदम्, चरितमाचारस्य प्रयत्नस्य विषयः । दम इन्द्रियनिग्रहादिः । तथा च नामाभिन्नसुतीक्ष्णपदप्रतिपाद्यः, चरिताभिन्नदमशील इति बोधः । सुतीक्ष्णपदयोगार्थेन दमस्य विरोधस्तु ध्वननीयो न श्रौतः । इदं हि पद्यं भट्टिकाव्यस्य पूर्णं पद्यमित्थम्—

"हविर्भुजामेधवतां चतुर्णां
मध्ये ललाटंतपसप्तसप्तिः ।
असौ तपस्यत्यपरस्तपस्वी
नाम्ना सुतीक्ष्णश्चरितेन दान्त" इति ।

दण्डकवनेषु चरन्तं मुनिजनपरिचयशीलं रामचन्द्रं प्रति कस्यापीयमुक्तिः । सुतीक्ष्णनामा महर्षिः पञ्चाग्निव्रतमाचरन्नासीत्, तद्धि व्रतं चतुर्दिक्षु वह्निं प्रज्वाल्य मध्ये स्थित्वा सूर्यातपस्थेन क्रियते । तथा च एधवतां काष्ठसमिद्धानां चतुर्णाम् हविर्भुजां वह्नीनाम्मध्ये ( स्थितः ) ललाटं तपः सप्तसप्तिः सूर्यो यस्य तथाभूतोऽसावयमपरः तपस्वी तपस्यति यश्च नाम्नैव 'सुतीक्ष्णः' चरितेन तु कृतेन्द्रियदम इति । अत्र सुतीक्ष्णस्य दान्तत्वं विरुद्धमिव प्रती-

यते, तद्धि न शब्दशक्त्याऽपि तु व्यञ्जनयेति, न काप्यनुपपत्तिरिति। 'सुरथो नाम राजाभूदित्येवंविधे वाक्ये च नामपदोत्तरं तृतीया लुप्ता, नामेति सम्भावनार्थमव्ययं वेति बोध्यम्। जात्या ब्राह्मण इत्यत्र जात्यभेदो ब्राह्मणेऽन्वीयमानः, सविशेषणे हि विधिनिषेधौ विशेष्यमुपसङ्क्रामत इति न्यायेन ब्राह्मणत्वमादाय पर्यवस्यति। न च तृतीयाऽर्थोऽभेदः पदार्थैकदेश एवान्वेतीति नियम इति वाच्यम्, ईदृशनियमे मानाभावात्, यत्र पदार्थे सविशेषणे हीति न्यायेनापि प्रथमतृतीयार्थोऽभेदो नान्वेतुमर्हति तत्रैव पदार्थस्यान्वयिनोऽन्वयितावच्छेदकस्य वैकदेशेऽन्वेति। यत्र तु पदार्थेऽन्वेतुमर्हति तत्र तु पदार्थ एवान्वेति। यथा पृथिव्यादीनां नवानां द्रव्यत्वेन गुणवत्त्वेन वा साधर्म्यमित्यत्र द्रव्यत्वाद्यभेदस्तृतीयान्तार्थः साधर्म्यशब्दार्थे समाने धर्मेऽन्वेति, यथा वा वाजपेयेन यजेतेत्यादौ वाजपेयाद्यभेदस्तृतीयान्तार्थो धात्वर्थयागादावन्वेति।

एवं "तमर्घ्यमर्घादिकतयाऽऽदिपूरुषः सपर्यया साधु स पर्यपूपुजत्" इति माघकविवाक्ये, अर्घ्यादिकयेतिविशेषणविशेषितसपर्यादितादात्म्यं धात्वर्थे शुद्धसपर्यायां तृतीया बोधयति। अविशेषितस्यैकधर्मावच्छिन्नस्य तादात्म्यसंसर्गेणान्वयो निराकाङ्क्षत्वबाधितो भवति, न तु तादात्म्यविशेषणकः; नितरां विशेषणान्तरविशेषितस्य। ननु धात्वर्थविशेषणे तृतीयाऽपि द्वितीयेव साधुत्वार्था। तृतीयान्तार्थस्य द्वितीयान्तार्थस्येव तादात्म्यसंसर्गेण धात्वर्थेऽन्वयः, न तु तादात्म्यविशेषणेनेति चेत्, तर्हि कथं 'सपर्यया पर्यपूपुज'दित्यत्रान्वयोपपत्तिः। न च विशेषणान्तरविशेषितस्यैकधर्मावच्छिन्नस्यापि तादात्म्येनान्वयो भवत्येव, यथा 'प्रमानुभवः' इत्यत्र प्रमाशब्दार्थस्य यथार्थानुभवस्यानुभवे, यथा वा 'भूरुर्वरा' देशो राजन्वान्' इत्यत्र सर्वसस्यवद्भूमिवाचकस्योर्वराशब्दस्य भुवि, सौराज्यसम्पन्नदेशस्य देशे तादात्म्यान्वयस्तथा प्रकृतेऽपि, अर्घ्यदानादिसपर्यायाः सपर्यायां (धात्वर्थभूतायां), वाजपेयेन यजेतेत्यादौ वाजपेयादेर्धात्वर्थयागादौ तादात्म्येनान्वय इति वाच्यम्, धात्वर्थविशेषणे द्वितीयाया एव साधुत्वज्ञापकानुशासनस्य (क्रियाविशेषणात् २।२।४१) सत्त्वेन तृतीयायास्तथानुशासनविरहात्। प्रकृतसूत्रस्य तु नामार्थप्रकारवाचकपदादपि तृतीयाविधायकत्वेन क्रियाविशेषणपदाद्विशिष्यविहितेन द्वितीयानुशासनेन बाध्यत्वात्। प्रकृतानुशासनविहिता हि तृतीया तादात्म्यं प्रकारत्वेन बोधयति न तु संसर्गत्वेनेति नामार्थयोरपि तादात्म्यप्रकारकबोधो भवति। अन्यथा प्रकृत्या दर्शनीय इत्यादौ तादात्म्यसंसर्गेणान्वयो दुर्लभः स्यात्– नामार्थयोस्तादात्म्येन संसर्गेणान्वये समानविभक्तिकत्वस्य तन्त्रत्वात्। प्रकारतया तादात्म्यस्यान्वये तु न समानविभक्तिकत्वं तन्त्रमित्यदोषात्। अत एव द्रव्यत्वेन साधर्म्यमित्यत्र, द्रव्यत्वस्य समानधर्मे, 'द्रोणैः षोडशभिः खारी' इत्यत्र षोडशानां द्रोणानां खारीपदवाच्ये तादात्म्यप्रकारकोऽन्वयबोधः। एवञ्च पूर्वोक्ते माघवाक्ये 'अर्घ्यादिना पर्यपूपुजत्' इत्येतावतैव सामञ्जस्ये 'सपर्यया' इति पदमपुष्टार्थत्वदोषावहं भवदपि न निराकाङ्क्षमिति।

एवं जात्या सुशील इत्यादौ जातिपदस्य स्वभाववाचकत्वेन स्वभावाभिन्नसौशील्यवानित्यादिप्रकारेण बोधोऽवगन्तव्यः। 'तेजसा सूर्यः' 'दानेन कल्पतरुः' इत्यादौ सूर्यादिपदस्य सूर्यादिसदृशे लक्षणा, सूर्यसादृश्ये तेजसः, कल्पतरुसादृश्ये दानस्य तादात्म्यं तृतीयार्थोऽन्वेति। अथवा यथा 'समवायेन नीलः पटः' कालिकेन स्पन्द इत्यादौ तृतीयान्तसमभिव्याहारः समवायकालिकादिविशिष्टशाब्दधियं जनयति तथा तेजसेत्यादितृतीयान्तसमभिव्याहारस्तेजोदानातितादात्म्यसंसर्गकसूर्यकल्पपादपादिविशिष्टशाब्दधियं जनयति। अतः संसर्गानुवादिका तृतीयेति।

अवच्छेदकत्वमपि तृतीयार्थः क्वचित्– यथा–वह्नित्वेन वह्नेर्जनकत्वं, जन्यत्वं प्रतियोगित्वं, प्रकारत्वं, विशेष्यत्वं वेत्यादौ तृतीयाया अवच्छेदकत्वमर्थः। तच्चाधेयतासम्बन्धेन नामार्थेनान्वितं जनकत्वादावन्वेति। समवायेन ध्वंसो नास्तीत्यादाववच्छेदकतानिरूपकत्वस्वरूपमवच्छिन्नत्वं तृतीयार्थः, तच्च नञर्थेऽत्यन्ताभावे स्वाश्रयप्रतियोगिताकत्व–

सम्बन्धेनान्वेति । व्युत्पत्तिवैचित्र्येण तृतीयार्थस्य संसर्गीभूता प्रतियोगितैव प्रतियोगिनो ध्वंसपदार्थस्य नञर्थे संसर्गीभवति । अथवा अवच्छिन्नप्रतियोगिताकत्वं तृतीयार्थः, तच्च स्वरूपेण सम्बन्धेन नञर्थेऽन्वेति । व्युत्पत्तिवैचित्र्येण प्रतियोगिनोऽपि संसर्गीभवन्ति इति केचित् । तृतीयार्थोऽवच्छिन्नत्वं संसर्गीभूतप्रतियोगिताविशेषणतया भासत इति स्वतन्त्राः ।

वस्तुतस्तु समवायेनेत्यादितृतीयान्तसमभिव्याहारः समवायाद्यवच्छिन्नप्रतियोगिताकत्वसंसर्गेण प्रतियोगिनो ध्वंसादिशब्दार्थस्य नञर्थान्वयबोधे हेतुरित्येव रमणीयमिति । इयमेव गतिः पटत्वेन घटो नास्ति, शशीयत्वेन शृङ्गं नास्तीत्यादावपि बोध्या । क्वचिन्निरूपकत्वमपि एतद्विहिततृतीयार्थः यथा– 'धूमस्य धूमत्वेन वह्निव्याप्तिः' इत्यत्र निरूपकत्वमेव तृतीयार्थः– तच्चाधेयतया प्रकृत्यर्थविशेषितं वह्निव्याप्तावन्वेति । निरूपकत्वं तु व्यापकत्वलक्षणं घटकत्वमिति सम्प्रदायः । अतिरिक्तमित्यन्ये । एवं 'मङ्कुरेणानेकान्तः' इत्यत्र 'वह्न्यावयः पिण्डेन धूमव्यभिचार' इत्यत्र च घटितत्वं व्याप्यत्वलक्षणमतिरिक्तं वा निरूपकत्वं तृतीयार्थः । तच्च प्रकृत्यर्थविशेषितम्– अनेकान्तपदार्थे व्यभिचारे, धूमव्यभिचारे चान्वेति ।

क्वचिद् दैशिकसम्बन्धावच्छिन्नमाधेयत्वं तृतीयार्थः, यथा– 'समेनैति' 'विषमेणैति' इत्यादौ । यदीयसकलावयवानां प्रत्येकं स्वसंयुक्तसंयोगादिपरम्पराणामूर्ध्वदिगवच्छिन्नानां तुल्यत्वं स भूभागः समो देशः, तदितरो विषमः, तथा च कर्तृघटितपरम्परासंसर्गावच्छिन्नमाधेयत्वं तृतीयार्थः । तच्च प्रकृत्यर्थेन समेन विषमेण च देशेन विशेषितं धात्वर्थगमनेऽन्वेति । न चात्र समादिदेशव्यापारस्य जन्यत्वेन सम्बन्धेन धात्वर्थगमनेऽन्वयात् करणे तृतीया नत्वनेन प्रकारवाचिका तृतीयेति वाच्यम्, करणत्वविवक्षायामिष्टापत्तेः । अविवक्षणे तु आधारस्याधिकरणसंज्ञया तत्कार्येण वा करणसंज्ञायास्तत्कार्यस्य तृतीयोत्पत्तेर्वा बाधात् । न चैवं तृतीयार्थाधिकरणत्वस्य धात्वर्थेऽन्वयात् कारकविभक्तित्वापत्तिरस्या इति नामार्थेनान्यत्रान्वयो न स्यादिति वाक्यम्, सर्वत्र धात्वर्थेऽन्वयस्यानियतत्वेन नामार्थेनाप्यन्वयात् । अत एव 'शाखया कपिसंयोगी वृक्ष' इत्यत्र 'श्वेतः खुरविषाणाभ्याम्' इत्यत्र च तृतीयार्थाधेयत्वस्य शाखाविशेषितस्य कपिसंयोगे, खुरविषाणोभयविशेषितस्य श्वेतरूपेऽन्वयो भवति ।

रजतत्वेन पुरोवर्तिनं जानाति, इच्छति, द्वेष्ठि वेत्यादौ प्रकारत्वं तृतीयार्थः । तच्च धात्वर्थे फले द्वितीयार्थो वा विशेष्यत्वे निरूपकतासम्बन्धेन अन्वेतीति केचित् । तत्र घट इति घटघटत्वसमवायान् जानातीत्यादिप्रयोगेण विशेष्यत्वस्य न धात्वर्थत्वं न वा द्वितीयार्थत्वं सम्भवति । घट इति नियतार्थस्य धात्वर्थे ज्ञानेऽभेदान्वयेन तादृशज्ञानविशेष्यत्वस्य घटत्वसमवाययोरसंभवात् । विषयत्वं फलतया धात्वर्थो न तु द्वितीयार्थः । भगवान् जानातीत्यादावनुपपत्तेः । तथा च तृतीयार्थः प्रकारत्वं रजतत्वादिप्रकृत्यर्थविशेषितं धात्वर्थे फले, विषयत्वे, व्यापारे ज्ञानादौ वा निरूपकत्वेन प्रतियोगित्वेन वा संसर्गेणान्वेति । रजतत्वप्रकारतानिरूपितपुरोवर्तिविशेष्यताकत्वम्– आक्षेपेण, परिशेषेण, मनसा वा मानान्तरेणावगम्यते । विशेष्यत्वस्य द्वितीयार्थतापक्षेऽपि तत्र तृतीयार्थप्रकारत्वस्य निरूपकतासंसर्गेणान्वयो न सम्भवति स्याद्यर्थयोः परस्परान्वयस्याव्युत्पन्नत्वात् । तृतीयार्थप्रकारत्वस्य धात्वर्थे ज्ञानादावेवान्वयात्, प्रकारतानिरूपितविशेष्यताकत्वस्य मानान्तरादेव लाभ इति ।

एवं 'लक्षणस्वरूपप्रमाणादिभिरनुमाने निरूपणीये' इति चिन्तामणिवाक्ये शाब्दबोधस्तदनुकूलव्यापारश्च निरूपेरर्थः । कर्मकृतस्तु विशेष्यो विषयो वाऽर्थः । कर्मप्रत्ययस्थले व्यापारस्य विशेषणतया कर्मप्रत्ययार्थेऽन्वयः । प्रकृते कर्मकृदर्थैकदेशेऽपि विशेष्यत्वे विषयत्वे वा शाब्दबोधस्य फलस्य विशेषणतयाऽन्वयो व्युत्पत्तिवैचित्र्यात् । तथा चात्र तृतीयार्थप्रकारत्वस्य लक्षणादिविशेषितस्य शाब्दबोधेऽन्वयः । प्रकारतानिरूपितविशेष्यताकत्वलाभः पूर्ववदेव । कृदर्थैकदेशे विशेष्यत्वे विषयत्वे वा तृतीयार्थप्रकारत्वस्य

निरूपकत्वेन संसर्गेणान्वयः इति वदन्ति । तत्र कृदर्थैकदेशे धात्वतिरिक्तार्थस्यान्वयो न व्युत्पत्तिसिद्ध इत्याद्यनुपपत्तिश्चिन्तनीया । केचित्तु फलविशिष्टं कर्म कृदर्थः, फलस्य द्वेधा शाब्दबोधविषयत्वं— तृतीयार्थप्रकारस्य कर्मकृदर्थैकदेशे फलेऽन्वयः, तथा चात्र शाब्दबोधानुकूलव्यापारप्रयोज्यस्य लक्षणादिप्रकारकशाब्दबोधस्य विशेष्योऽनुमाने इति बोधः इति वदन्ति, तदपि चिन्तनीयम्, फलस्य द्वेधा शाब्दबोधविषयत्वस्य प्रमाणविरुद्धत्वात्, व्युत्पत्तिवैचित्र्येणैव व्यापारविशेषणकफलविशेष्यकबोधस्य सम्भवेनान्वयोपपत्तिसंभवात् । फलादेः कर्मप्रत्ययार्थत्वासंभवात् कृदर्थैकदेशे धात्वर्थातिरिक्तान्वयस्याव्युत्पन्नत्वाच्च ।

परिच्छिन्नत्वमपि क्वचिदेतद्विहिततृतीयाया अर्थः इत्यादिप्रकारेणास्यास्तृतीयाया अनेकार्थत्वं स्वीकुर्वन्ति परे नव्या वैयाकरणास्तार्किकादयश्च, तत्तदर्थस्य प्रकाररूपतयैव भानसंभवात्स्वमते केवलं प्रकारार्थतास्वीकारेणैव निर्वाह इति परमतमिह नातः परं प्रदर्श्यते; केवलं व्युत्पत्तिवैशद्यायैतावत्प्रदर्शितम् । शाब्दबोधप्रकारोऽपि स्वमते भिन्न एव । प्रकृत्यर्थस्य निरूपितत्वसंसर्गेण तृतीयार्थे प्रकारतायां तस्य च निरूपकत्वसम्बन्धेन स्वसम्बद्धनामार्थैकदेशेऽन्वयः, अथवा प्रकृत्यर्थे वृत्तित्वसम्बन्धेन प्रकारताया, निरूपकत्वसम्बन्धेन स्वसम्बद्धनामार्थैकदेशे तस्य च तत्तत्सम्बन्धेन स्वसम्बद्धपुरुषेऽन्वयः । एतदेव सूचितम् "सर्वत्र पुरुषस्तद्वान् सम्बध्यत' इति ग्रन्थेन । ( इति प्रकारार्थतृतीयाविवरणम् ) ।

## काले भान्नवाऽऽधारे ॥२।२।४८॥

इदं सूत्रं नक्षत्रवाचिनः शब्दात्— सम्प्रति कालार्थे वर्त्तमानात् आधारे तृतीयां विधत्ते । नक्षत्रवाचिनः कालवाचकत्वं तु युक्ते कालेऽर्थे विहितप्रत्ययस्य लुपा भवति । तथा च पुष्येण पायसमश्नीयादित्यादौ पुष्यादिशब्दाः पुष्ययुक्तकालार्थकाः । तृतीयायाश्चाधार एवार्थः । तथा च पुष्ययुक्तकालाधिकरणकं पायसभोजनं प्रेरणाविषयः इत्यादिरूपेणार्थबोधः । अन्येऽपि वैयाकरणा अधिकरणे एवाऽत्र तृतीयां प्रयुञ्जते इति न तैः सह भेदः । तार्किकास्तु—ईदृशस्थले तृतीयासप्तम्योरुत्पत्तिरेवार्थः । तथा च पुष्ययुक्तकालोत्पत्तिकत्वं पायसभोजने प्रतीयत इत्यादि प्रतिपादयन्ति, तच्च व्याकरणस्मृतिसम्मततया प्रतिपादयितुमेतद्विषके सूत्रे आधारासम्बन्धं साधयन्ति, तच्च वैयाकरणपरम्पराप्रतिकूलमिति तद्विषयको विचारः परित्यज्यते ॥ २।२।४८॥

## प्रसितोत्सुकाववद्धैः ॥२।२।४९॥

एतेनापि सूत्रेण पाक्षिकी तृतीया एषां शब्दानां सम्बन्धे सत्यनुशिष्यते । तस्या अपि च आधार एवार्थः । आधारश्च औपश्लेषिकाभिव्यापकवैषयिकभेदेन त्रिप्रकारः । तत्र वैषयिकाधारे तृतीयेयं, तथा च विषयता तृतीयार्थः । केशैः प्रसित इत्यादौ केशविषयकनित्यप्रसक्तियुक्त इत्येवमन्वयबोधः । अत्र च परेषामपि समानैव प्रतिपत्तिः न कश्चन वाक्यार्थबोधे विशेष इति ॥२।२।४९॥

## व्याप्ये द्विद्रोणादिभ्यो वीप्सायाम् ॥२।२।५०॥

अनेन सूत्रेण वीप्साविवक्षायाम् द्विद्रोणादिभ्यः परिच्छेदपरेभ्यः कर्मणि तृतीया विधीयते, तथा च वीप्सासहितं कर्मत्वमेतद्विहिततृतीयाया अर्थः । द्रोणो गुरुत्वपरिच्छेदकावान्तरजातिमान् चतुराढकपरिच्छिन्नः परिमाणविशेषः । क्रयणं च स्वत्वोत्पत्त्यनुकूलो द्रव्यविनिमयः । तथा च 'द्विद्रोणेन धान्यं क्रीणाति' इत्यत्र द्रोणद्वयपरिच्छिन्नधान्यसंघातं पीनः पुन्येन द्रव्यविनिमयद्वारा स्वीकरोतीति वाक्यार्थबोधः । वीप्सा च विभक्त्यर्थेऽन्तर्भूतेति न तदर्थे द्विविधिः । तृतीयाऽभावपक्षे च द्वित्वं भवत्येव द्विद्रोणं

द्विद्रोणं धान्यं क्रीणातीति । अन्ये चेह वीप्साया विवक्षां न स्वीकुर्वन्ति ।

## मतान्तरम्

तार्किकानुयायिनश्च— परिच्छिन्नत्वमिह तृतीयार्थः । स च क्रयकर्मत्वे धात्वर्थफलेऽन्वेति । परिच्छिन्नत्वं तु द्विद्रोणस्य स्वसमवायिन एकद्रव्यस्योभयद्रव्यस्य वा आरम्भकपरमाणुसमनियतसंख्यासजातीयसंख्याव्यापकत्वम्, क्रयजनितस्वत्वस्य सकलेषु धान्यतदारम्भकेषु एकस्याभ्युपगमात्, परमाणुवृत्तित्वसम्भवेन स्वरूपेण समवायेन वा सम्बन्धेन तादृशसंख्यां प्रति साक्षादेव व्यापकत्वम् । यदि च स्वत्वस्य धान्यवृत्तित्वमभ्युपेयते तदा स्वाश्रयारम्भजननपरम्परासम्बन्धेन तावत्परमाणुविश्रान्तेन व्यापकत्वं बोध्यम् । एवं द्विद्रोणसमवायिद्रव्यारम्भकपरमाणुसमनियतसंख्यासजातीयसंख्याव्यापकस्य स्वत्वस्यानुकूला क्रयक्रियेत्यन्वयबोध इति म० म० गोकुलनाथोपाध्यायाः । द्विद्रोणो गुरुत्वान्तरं, समवायित्वं तृतीयार्थः; स च धान्यपदार्थे धान्यराशावन्वेति; धान्यराशेरतिरिक्तत्वात्, एको महान् धान्यराशिरिति प्रतीतेरन्यथा अवयविमात्रासिद्धिप्रसङ्गादित्येकदेशिनः । तच्चिन्त्यम्, यवधान्योभयघटितराशौ यवत्वधान्यत्वयोः स्वीकारे साङ्कर्यापत्तेः, न च तत्र यवधान्योभयत्वजातिरतिरिक्तैव स्वीक्रियते न तु धान्यत्वं यवत्वं वेति न साङ्कर्यमिति वाच्यम्, यवार्थिनामप्रवृत्तिप्रसङ्गात् । न च रुधिरास्थिमांसादीनां शरीरावयवत्ववत् यवादीनामपि तदवयवत्वाद्भवति प्रवृत्त्युपपत्तिरिति वाच्यम्, तथाऽप्यनन्तानां यवधान्योभयत्वादिजातीनां राशितत्प्रागभावध्वंसानां च कल्पनापत्तेः । अतिरिक्तत्वाभ्युपगमेन प्रवृत्त्याद्युपपत्तेरेको महान् धान्यराशिरिति प्रतीतिरौपाधिकीति बोध्यम् ।

## विशिष्य द्रोणपदार्थविचारः ।

केचित्तु एकजातीयमवनमनं प्रति द्विद्रोणस्वरूपगुरुत्वविशेषस्य तदारम्भकपरमाणुसमसंख्यकपरमाणुगुरुत्वानां च वैकल्पिकी कारणता; तथा च तावत्परमाणुगुरुत्वं द्विद्रोणपदार्थः । तृतीयार्थो वैशिष्ट्यम्, समानाधिकरण्यं वा । वैशिष्ट्यं तु स्वाश्रयारम्भत्वघटितपरम्परास्वरूपं धान्येषु, सामानाधिकरण्यं तु दर्शितपरम्परासम्बन्धावच्छिन्नं सत्त्वेऽन्वेतीति वदन्ति; तदपि न विचारसहम् परमाणुगुरुत्वानामेवावनमनं प्रति हेतुत्वात् । अवयविगुरुत्वस्य हेतुत्वे पलमितसर्षपप्रयुक्तावनमनतः, तथाविधलोहपिण्डप्रयुक्तावनमनस्य प्रकर्षप्रसङ्गात् पतनप्रकर्षप्रयोजकत्वेनावयविगुरुत्वस्याभ्युपगमात्, कारणोत्कर्षस्य कार्योत्कर्षप्रयोजकत्वादिति ।

वस्तुतस्तु—

"जालान्तरगते भानौ यत्सूक्ष्मं दृश्यते रजः ।
प्रथमं तत्प्रमाणानां त्रसरेणुं प्रचक्षते ॥"

इत्यादिना त्रसरेण्वादिघटितं माषसुवर्णनिष्कादिमानं मनुना प्रतिपादितम् । निष्कादिघटितं च द्रोणादिमानमेव— माढकमितद्रव्यचतुष्टयस्यारम्भकपरमाणुसमसंख्यकपरमाणुगुरुत्वानि द्रोणः, तद्द्विगुणगुरुत्वानि द्विद्रोणः, तेषां गुरुत्वानां स्वाश्रयपरमाणुभिः परम्परयाऽऽरभ्यमाणत्वं सम्बन्धो धान्यादौ । न च तावत्संख्यकाः परमाणवः परमाणुवृत्तिस्तादृशीसंख्या वा द्रोणपदार्थोऽस्तु, धान्यादावुभयस्य परम्परासम्बन्धो भवतीति वाच्यम्; तावत्परमाणूनां परमाणुसंख्यायाश्च परम्परासम्बन्धस्य तैजसावयविन्यपि सम्भवात्, तत्र द्रोणादिव्यवहारप्रसङ्गात् । न च धान्यादौ तुलितत्वस्यैवात्र व्यञ्जकस्याभावान्न द्रोणादिव्यवहार इति वाच्यम्, क्षेत्रादिपूरणस्य धान्यादाविवात्रापि सम्भवात् । तस्मात् तथाविधगुरुत्वानि द्रोणपदस्यार्थः, यद्वशाद् द्रोणो व्रीहिः, द्रोणः पाषाणः इत्युभयप्रतीतेरेकविषयत्वं तैर्गुरुत्वैर्दर्शितपरम्परया विशिष्टो निरूढलक्षणः यद्वशाद् 'द्रोणमाषं भुङ्क्ते

भीम' इति प्रयोगः। न च तैर्गुरुत्वैः संसृष्टेषु धान्येषु विशकलितेष्वपि द्रोणादिव्यवहारप्रसङ्ग इति वाच्यम्, व्यञ्जकाभावादप्रसङ्गाद्, व्यञ्जकसत्त्वे त्विष्टत्वात्। अत एव द्रोणः काश्यां, द्विद्रोणः प्रयागेऽयोध्यायां वेति पञ्चद्रोणो मम व्रीहिरिति प्रतीतिव्यवहारौ।

एवं, तृतीयाऽर्थोऽन्यव्यवच्छेदः। अन्यस्य द्विद्रोणादिव्याप्यगुरुत्वत्वावच्छिन्नप्रतियोगितासंसर्गेण व्यवच्छेदेऽत्यन्ताभावेऽन्वयः। व्यवच्छेदस्य धान्येऽन्वयः। एवकारस्थल इव व्यवच्छेदान्वयिनि धान्ये द्विद्रोणस्याऽप्यन्वयः। तत्र अन्यव्यवच्छेद इव सम्बन्धोऽपि तृतीयार्थः। द्विद्रोणविशेषितस्य सम्बन्धस्य धान्येऽन्वयाद् द्विद्रोणस्य सम्बन्धो बोध्यः। अतः पञ्चद्रोणेन क्रीयमाणे धान्ये 'द्विद्रोणेन धान्यं क्रीणातीति न प्रयोगः। न वा द्रोणेन क्रीयमाणे धान्ये द्विद्रोणेन धान्यं क्रीणातीति प्रयोगः।

## प्रसङ्गात् क्रीणात्यर्थविचारः

क्रीणातेस्तु फलतया प्रतिग्रहः व्यापारतया दानं चार्थः। विक्रीणातेरपि फलव्यापारयोर्वैपरीत्येन तदुभयमर्थः। प्रतिग्रहः स्वत्वेच्छा, दानं स्वत्व– स्वत्वनाशोभयेच्छा, फलस्य स्वत्वेच्छायाः प्रयोज्यतया दाने, फलस्य दानस्य प्रयोजकतया सम्बन्धेन स्वत्वेच्छायामन्वयः। एवं भाविधान्यादिग्रहणार्थं धनं प्रयुञ्जाने द्विद्रोणेन त्रिद्रोणेन वा धान्यं क्रीणात्ययमिति प्रयोगः, भाविनि स्वत्वानुपगमेऽपि स्वत्वेच्छायाः सत्त्वात्। एवं मूल्यस्याग्रिमकाललभ्यत्वव्यवस्थायां निष्कशतेनाश्वं क्रीणातीति न प्रयोगः। क्रये धान्यादिकस्य कर्मणः स्वत्वप्रकारतानिरूपितविशेष्यतया, स्वत्वविषयतानिरूपिताधारत्वसंसर्गावच्छिन्नविषयतया वा सम्बन्धेनावच्छिन्ने आधेयत्वे द्वितीयार्थेऽन्वयः। विक्रये तु स्वत्वनाशीयविषयताघटितान्यतरसम्बन्धेन अवच्छिन्नमाधेयत्वं द्वितीयार्थः। शतेन क्रीणातीत्यत्र स्वत्वं व्यापारः करणतृतीयार्थः। स्वत्वस्य जन्यत्वसम्बन्धेन स्वत्वनाशेच्छायां दानेऽन्वयः। स्वत्वे सत्येव त्यागो भवति, न हि परकीये त्याग इति स्वत्वजन्यत्वं दाने स्फुटमिति। शतेन विक्रीणीत इत्यत्र स्वत्वनाशः तृतीयार्थः, तस्य जन्यतया स्वत्वेच्छायामन्वयः। स्वत्वोपहितेच्छायां स्वत्वनाशस्य हेतुत्वात्, परकीयधने तादृशेच्छाविरहात् इति स्वत्वनाशः स्वत्वेच्छाजनकः इति द्विद्रोणेन धान्यं स्वर्णं माषेण क्रीणात्ययमिति - अत्र द्विद्रोणान्यद्विद्रोणव्याप्यगुरुत्वाभाववद्द्विद्रोणधान्यवृत्ति– स्वत्वेच्छाप्रयोज्यायाः सुवर्णमाषस्वत्वजन्यायाः स्वत्व– स्वत्वनाशोभयविषयकेच्छायाः आश्रयोऽयमिति शाब्दबोधः। इत्येवंविधा वाग्विलासाः आकरेषु बहुशो दृश्यन्त इति न तेऽत्रोपनिबद्धाः विस्तरभयात्।

## समो ज्ञोऽस्मृतौ ।२।२।५१॥

इदं सूत्रं 'सम्' पूर्वस्य जानातेः कर्मणि तृतीयामनुशास्ति। तत्र संपूर्वस्य जानातेरवेक्षणमर्थः। एतद्योगे विहितायास्तृतीयायाः पाक्षिक्या द्वितीयायाश्च कर्मत्वमेवार्थः, तच्च विषयतास्वरूपम्। तथा च मात्रा संजानीत इत्यत्र मातृविषयकमवेक्षणं करोतीत्येव वाक्यार्थबोधः। केचिद्वैयाकरणा इह 'अस्मरणे' इति न पठन्ति। स्मरणे च स्मृत्यर्थदयेश (२।२।११) इति विशेषविहितकर्मसंज्ञाऽस्य बाधिकेति, तत्र द्वितीयैव। तद्विनिर्मुक्ते च सम्बन्धषष्ठ्येव शेषत्वविवक्षयेति वदन्ति। स्वमते च स्पष्टमेवा'ऽस्मरणे' इति प्रतिपाद्यते। पाक्षिकषष्ठी च नेह, शेषत्वाभावात्। तथा च तृतीयाविनिर्मुक्ते विषये द्वितीयैवेति तत्त्वम्॥ २।२।५१॥

## दामः सम्प्रदानेऽधर्म्ये आत्मने च ॥२।२।५२॥

अनेन सूत्रेण सम्पूर्वकस्य दामः प्रयोगे सम्प्रदानेऽथ तृतीया विधीयते। सम्प्रदानत्वं चाग्रे विचारयिष्यते। तत्र 'अधर्म्य' इति पदोपस्थापितं दानक्रियाया अधर्मसाधनत्वं न

विभक्तिवाच्यकोटौ प्रविशति इति न तस्य शाब्दबुद्धिविषयत्वम्। तस्य आक्षेपेणैव लभ्यत्वात्, अनन्यलभ्यस्यैव शब्दार्थत्वात्। अतश्चात्र दासीसम्प्रदानकं दानमेव वाक्यार्थबोधविषयः। 'कामुकः सन्' इति वृत्तिव्याख्यानेन तस्या धर्मसाधनता स्पष्टीक्रियते, न तु प्रयोगार्थो वर्ण्यते। एतद्विषये च न किमपि मतान्तरमिति बोध्यम् ॥२।२।५२

## तुल्यार्थैस्तृतीयाषष्ठ्यौ ॥२।२।११६॥

इति सूत्रेण तुल्यार्थकशब्दैर्युक्तान्नाम्नस्तृतीया विधीयते। तुल्यशब्दार्थश्च सादृश्याश्रयः। सादृश्यान्वयि प्रतियोगित्वं च तृतीयार्थः। मात्रा तुल्यः पुत्र इत्यादौ मातृप्रतियोगिताकसादृश्याश्रयः पुत्र इत्येवं वाक्यार्थबोधः। सादृश्यं च तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्। सादृश्यस्य पदार्थान्तरत्वमेवेति मते तत्प्रतियोगित्वमपि पदार्थान्तरमेव। यदि च वृत्तिमान् धर्मः भेदश्चेति द्वयं सादृश्यम् तदा वृत्त्यन्वयिनिरूपकत्वस्वरूपं प्रतियोगित्वम्, प्रतियोगितानिरूपिताऽनुयोगिता चेत्युभयं तृतीयाऽर्थः। तथा च मातृप्रतियोगिनिरूपितानुयोगिताकभेदाश्रयः मातृनिरूपकवृत्तिमद्धर्माश्रयश्च पुत्र इत्यन्वयबोधः। यत्र भेदाघटितसादृश्याश्रयस्तुल्यादिपदार्थः, यथा 'मुखेन तुल्यं मुखं तस्याः' इत्यादौ, तत्रापि वृत्त्यन्वयिनिरूपकत्वार्थिका तृतीया, मुखनिरूपितवृत्तिमद्धर्माश्रयो मुखमित्यन्वयबोधः। तुल्यादिपदस्य भेदांशत्यागेन सधर्म्ममात्रे लक्षणायाः प्रयोजनं 'मुखं निरुपम'मिति बोधः। स च बोधो मानसः, वैयञ्जनिकः शाब्दो वेत्यन्यदेतत्। तुलोपमाशब्दौ न तुल्यार्थौ इति तद्योगे तृतीया न भवति तुल्यपदार्थो हि तुलया समितः। न हि तुलाशब्दः स्वसमिते वर्तते। एवमुपमाशब्दोऽपि उपमायुक्तं सदृशमर्थं न स्वरसतो बोधयतीति स्वमतम्। 'कृष्णस्योपमा तुला वा नास्ति' इत्यादौ कृष्णेन तुल्योऽन्यो नास्ति इति प्रतीत्या तुलोपमाशब्दयोरपि तुल्यार्थत्वं मत्वा केचन तद्योगे तृतीयावारणार्थम्- 'अतुलोपमाभ्याम्' इति तुल्यार्थपर्युदासबोधकं पदं सूत्रे पठन्ति। उभयमतेऽपि 'तुलां यदारोहति दन्तवाससा' इति नैषधप्रयोगे 'स्फुटोपमं भूतिसितेन शम्भुना' इति माघप्रयोगे च कथं तृतीयेति न शङ्कनीयम्, यतो 'दन्तवाससा' इति करणे तृतीया। तुलायामारोहणं तुलाप्रकारज्ञानमेव। तत्र दन्तवाससो ज्ञानं व्यापारः जन्यतया अन्वेति प्रतियोगिज्ञानं विना सादृश्यबुद्धेरसम्भवात्। दन्तवासोज्ञानजन्यतुलाप्रकारज्ञानं वाक्यार्थः। एवं शम्भुनेति हेतौ तृतीया। स्फुटशब्दार्थोऽभिव्यक्तिविषयः। अभिव्यक्तौ शम्भुहेतुकत्वमन्वेति। तथा च शम्भुहेतुकाभिव्यक्तिमदभिन्नोपमाश्रयाभिन्नम्' इत्यर्थबोधः। शम्भोः प्रतियोगिनो ज्ञानद्वाराऽभिव्यक्तिहेतुत्वम् केचित्तु- चन्द्रेण सहोपमीयते तुल्यते इत्यादौ सहार्थः सम्बन्धसामान्यं, समानकालिकत्वादिरूपस्यान्यस्य सहार्थस्यासम्भवात्। अत एव—

> स्वबालभारस्य तदुत्तमाङ्गजैः
> समं चमर्येव तुलाभिलाषिणः।
> अनागसे शंसति बालचापलं,
> पुनः पुनः पुच्छविलोलनच्छलात् ॥'

इति नैषधे श्रीहर्षः। एवं चैत्रेण सह संयुज्यते समवैति वेत्यत्र निरूपकत्वं सहार्थः। निर्वैरेण सह वैरायते निर्मत्सरेण सह स्पर्धते इत्यादौ विषयविषयिभावः सहार्थः, सहयुक्ते तृतीया सार्थकेत्याहुः; तन्न विचारसहम्, सहयुक्ततृतीयाया निरर्थकत्वे पुत्रेण सहागच्छतीत्यत्र पुत्रकर्तृत्वानवगमप्रसङ्गात्। न च दर्शितस्थल एव सा तृतीया निरर्थिकेति वाच्यम्, तत्रापि सार्थकत्वात्। तथा हि चन्द्रेण सहोपमीयते इत्यत्र तृतीयार्थ आधेयत्वम्, सहार्थोऽभेदः, चैत्रेण सह संयुज्यते इत्यत्रापि तथैव, निर्वैरेण सह वैरायत इत्यत्र विषयविषयिभावः तृतीयार्थ एव, सहार्थोऽभेद एव, सहपदं विना क्रियायां यत्कारकार्थिका विभक्तिर्यत्पदार्थेन सह संयुज्यते, सहयोगे तत्कारकार्थिका वा तृतीया तत्पदाद्भवति। सहार्थविशेषणक्रिया साकाङ्क्षा इति सहयुक्ते

तृतीयाविधायकसूत्रस्यार्थः । निर्वैराय वैरायत इति सह-शून्यप्रयोगे चतुर्थ्यत्र तस्याश्च विषयविषयिभावोऽर्थ इति सहशब्दप्रयोगे जातायास्तृतीया अपि स एवार्थः । ग्रामेण सह गृहं गच्छतीत्यत्र सहपदं विना द्वितीयैवेति तत्प्रयोगे जाता तृतीयाऽपि कर्मत्वार्थिकैव । इत्थं च चन्द्रेण सहोप-मीयते इत्यादौ आधेयत्वं कर्मत्वमेव तृतीयार्थः, प्रधाने कर्मत्यादियोगात् । चैत्रेण सह संयुज्यत इत्यत्र कर्तृत्वं तृतीयार्थः कर्तरि त्यादियोगात् । एवमन्यत्राऽपि तृतीया-विभक्त्यर्थः यथोचितं स्वयमूहनीय इति शम् ॥

इति तृतीयार्थप्रकाशः ।

## अथ चतुर्थ्यर्थप्रकाशः

### चतुर्थी ॥२।२।५३॥

'सम्प्रदाने' इति पदं पूर्वसूत्रादनुवृत्तम् । तथा च सम्प्रदाने वर्तमानात् गौणान्नाम्नः ङेभ्यांभ्यस्लक्षणा चतुर्थी विभक्तिर्भवतीति प्रकृतसूत्रार्थः सम्पद्यते । तथा चास्याः सम्प्रदानमेवार्थः । सम्प्रदानत्वम् च– सम्यक् प्रदीयते अस्मै इति व्युत्पत्त्या दानोद्देश्यत्वमेव तथापि– कर्माभिप्रेयः सम्प्र-दानम् ॥२।२।२५॥ इति प्रत्यक्षानुशासनसिद्ध एव सम्प्रदान पदार्थः । विवृतं चैतत्सूत्रमाचार्येण– **कर्मणा– व्याप्येन क्रियया वा करणभूतेन यमभिप्रैति– श्रद्धानुग्रहादि-कामनया यमभिसम्बध्नाति स कर्माभिप्रेयः कारकं सम्प्रदानसंज्ञं भवतीति ।** कर्मणा धात्वर्थफलवता गवा-दिना स्वामित्वेन द्विजादेरभिप्रायविषयीकरणात् द्विजादेः सम्प्रदानत्वं निरपवादमिति द्विजाय गां ददाति' इति चतु-र्थ्युपपद्यते । सूत्रे कर्मपदस्य क्रियापरताऽपीति पूर्वोदाहृत-वृत्तिग्रन्थेन प्रतीयते । क्रियापदं च क्रियाप्रयोज्यफलपरं, फलं च धात्वर्थभिन्नं बोध्यम् । अत एव श्राद्धाय निगर्हते 'युद्धाय सन्नह्यते' इत्युपपद्यते । अत्र निगर्हतेर्गर्हामात्रमर्थः, प्रयोज्यफलं विषयत्वम् । संनह्यतेः सन्नाहः सज्जीभाव एवार्थः, प्रयोज्यफलं युद्धे प्रवृत्तिः । गर्हाविषयत्वं श्राद्धे, सन्नहनानन्तरप्रवृत्तिर्युद्धे इति श्राद्धयुद्धयोः सम्प्रदानत्व-मिति । एवं च धात्वर्थफलसम्बन्धितया धात्वर्थान्यफलेन सम्बन्धेन व्यापारसम्बन्धितया चाभिप्रायविषयत्वं सम्प्रदान-त्वमिति फलति । अत एव 'पत्ये शेते' इत्यत्र पतिप्रीतिः शयनफलं प्रीत्या सम्बन्धेन, शयनसम्बन्धितयाऽभिप्रायविष-यत्वं पत्युः सम्प्रदानत्वम् । तत्रेदृशं सम्प्रदानत्वं न चतु-र्थ्यर्थः, तदन्तर्गतानां व्यापारादीनामन्यलभ्यत्वात् किन्तु तत्तत्स्थलविषये तत्तदनुरूपमेव सम्प्रदानत्वम् । तथा हि द्विजाय गां ददातीत्यत्र ददातेः स्वत्वध्वंसजनको व्यापारोऽर्थः । उत्सर्गेऽपि ददातेर्मुख्य एवार्थः, अत एव 'गोमिथुनमादाय कन्यां ददाति पिता' 'दीनारमादाय मौक्तिकं ददाति वणिक्' इति विक्रयेऽपि ददातिप्रयोगः, व्यापारश्चात्र त्यागः, स च न ममेत्याकार उपेक्षासाधारणेन रूपेण स्वत्वध्वंसं प्रति जनको, न तु स्वत्वं प्रति, प्रमाणाभावात् ।

"सप्त वित्तागमा धर्म्या लाभो दायः क्रयो जयः ।
प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च ॥"

इति स्मृतौ, "याजनाध्यापनप्रतिग्रहैर्ब्राह्मणो धनमर्ज-येत" इति स्मृतौ च प्रतिग्रहस्यैव स्वत्वोत्पत्त्युपायत्वेनाभि-धानात् । प्रतिग्रहोऽपि 'इदं मम' त्याकारोऽनुमतिस्वरूपः समित्कुशाद्युपादानसाधारणेन रूपेण स्वत्वं प्रति जनकः, तत्पुरुषीयत्वं प्रति तत्पुरुषस्वीकारस्य विशेष्यतया हेतुत्वात् । तथा च स्वत्वमात्रं चतुर्थ्यर्थः । तत्र प्रकृत्यर्थस्य निरूपक-तया स्वत्वस्य जनकतया स्वत्वध्वंसेऽन्वयाद् द्विजाय गां ददाति राजेत्यत्र विप्रनिरूपितस्वत्वजनकगोनिष्ठस्वत्वध्वंस-जनकत्यागाश्रयो राजेत्यन्वयबोधः । व्यधिकरणस्वत्वं प्रति गोनिष्ठस्वत्वध्वंसस्याजनकत्वात् । स्वत्वे गोवृत्तित्वमर्था-ल्लभ्यते । तेन पुत्रस्य राज्यकामनया गवि दीयमाने 'पुत्राय गां ददातीति न प्रयोगः इति वदन्ति; तन्न विचारसहम्; स्वत्वध्वंसानुकूलव्यापारस्य ददात्यर्थत्वे उपेक्षायामपि

ददातिप्रयोगापत्तेः। प्रतिग्रहस्य समित्कुशाद्युपादानसाधारणेन रूपेण स्वत्वजनकत्वे चैत्रोद्देशेन त्यक्ते मैत्रेण स्वीकृते तस्य स्वत्वोत्पत्तिप्रसङ्गात्। उपादानमात्रस्य स्वत्वकारणत्वे-अन्यपुरुषीयहिरण्यस्य कथञ्चित्तत्पुरुषादपगमे तदन्यपुरुषेण तत्प्राप्तौ स्वत्वोत्पत्तिप्रसङ्गात्। तस्माद्दानमेव स्वत्वकारणम्। अत एवान्योद्देशेन त्यक्तेऽन्यस्योपादाने न स्वत्व-प्रसङ्गः। 'सप्तवित्तागमा धर्म्या' इति वचने प्रतिग्रहस्य ग्रहणं दानोपलक्षकमेव। उपादानेन स्वत्वे जननीये समित्कुशादीनां तादात्म्येन सहकारित्वाभ्युपगमे तु दानस्यापि विशेषसामग्रीघटकत्वमावश्यकम्। एवं च तत्पुरुषीयस्वत्व-प्रकारतानिरूपितविशेष्यतासंसर्गेण त्यागस्य तत्पुरुषीयस्वत्वं प्रति कारणत्वम्, स्वत्वध्वंसस्तु व्यापारः। स्वत्वजनकस्त्यागो ददात्यर्थः। द्विजाय गां ददातीत्यत्र निरूपकत्वं स्वामित्वं वा चतुर्थ्यर्थः। तस्य प्रकृत्यर्थेनाधेयतयाऽन्वितस्य स्व-निरूपितनिरूप्यतासंसर्गेण स्वामित्वेऽन्वयात् ब्राह्मणनिरूपितत्वं स्वामित्वे फलति तथा च ब्राह्मणनिरूपितस्य ब्राह्मण-समवेतस्वामित्वनिरूपितस्य वा स्वत्वस्य स्वत्वध्वंसव्यापारेण जनकस्त्यागो वाक्यार्थः। भवतु वा स्वत्वस्योद्देश्यत्वाख्य-विषयतासंसर्गेण त्यागान्वयात् स्वत्वोद्देश्यकस्त्याग एव ददात्यर्थः। अत एव सम्प्रदानास्वीकृतस्याप्युत्सर्गे स्वत्वा-नुपहिते च ब्राह्मणस्य सम्प्रदानत्वं ददातिप्रयोगस्य च मुख्यत्वमुपपद्यते।

यत्तु उत्सर्गेण समनन्तरमेव (उत्सर्गाव्यवहितोत्तर-काल एव) सम्प्रदानस्य स्वत्वं जायते। न चैवमस्वीकृतेऽपि सम्प्रदानस्वत्वापत्तिरिति वाच्यम्, दानेन स्वत्वजनने वैमत्यस्य प्रतिबन्धकत्वात्, अस्वीकृतिस्थले तत्सत्वात्। अत एव तदुद्देशेनोत्सृष्टे तस्मिन्नप्रतिगृह्यैव मृते तत्पुत्रादीनां स्वत्वो-त्पत्तिरुपपद्यते। तद्व्यक्तिमरणजन्यस्वत्वध्वंसस्य स्वत्वध्वंस-द्वारेण तद्व्यक्तिमरणस्य वा तत्पुत्रस्वत्वं प्रति जनकत्वात्। पितृस्वत्वध्वंसस्य पुत्रस्वत्वे कारणत्वं साक्षाद् व्यापारविधया वेत्यत्र हेतुरनुभवसंस्कारयोरिवात्रापि बोध्यः। एवञ्च त्यागमात्रस्य स्वत्वाजनकत्वे ब्राह्मणनिरूपितस्वत्वस्य तद्ध-नेऽभावात् तन्मरणजन्यस्य तद्ध्वंसस्य तत्रात्यन्तमसम्भवात्, तत्पुत्राणां त्यागोद्देश्यत्वविरहात् तैस्तद्धनस्य स्वीकारेऽपि स्वत्वोत्पत्तेरसम्भव एव स्यात्। एवमपुत्रव्यक्तिमरणजन्य-स्वत्व- ध्वंसस्य तत्पत्नीस्वत्वं प्रति जनकत्वम्, 'अपुत्रस्य धनं पत्न्यभिगामी'ति वचनात्। ऋतुकालाभिगमेन गर्भ-माधाय मृते पितरि जातमपि तत्पत्नीस्वत्वं पुत्रोत्पत्त्या नाश्यते। स्वजन्मजनितमातृस्वत्वनाशः मातृस्वत्वनाशद्वारेण स्वजन्म वा पुत्रस्वत्वं प्रति कारणम्। पुत्रोत्पत्तिपूर्वं मात्रा विक्रीते च न पुत्रस्वत्वोत्पत्तिः, जन्मजनितमातृस्वत्वनाश-विरहात्, विक्रेतृपुरुषस्वत्वस्य प्रतिबन्धकस्य नाशकाभावाच्च इत्यवश्यम् उत्सर्गेण व्यवहितस्यापि पुंसः स्वत्वं जन्यत इतिः तन्न, एवमपि मृतं विदेशस्थं द्विजमुद्दिश्य त्यक्ते तत्पु-त्रस्य स्वत्वानुत्पादप्रसङ्गात्— विदेशे मृतस्य द्विजस्य मरणाज्ञानेन तदुद्देशेन त्यागसम्भवेऽपि तस्यासत्त्वेन तन्नि-रूपितस्वत्वस्य तस्मिन् धनेऽनुत्पत्त्या तद्ध्वंसादिना तत्पुत्र-स्वत्वोत्पत्तेरसम्भवात्— उत्सर्गेण स्वत्वे जननीये प्रतिपाद-नस्य सहकारित्वस्वीकाररूपव्यवस्थान्तरस्यावश्यमाश्रयणीय-त्वात्। अन्यथा ब्राह्मणमात्रमुद्दिश्य त्यक्ते तुलापुरुषादौ ब्राह्मणसामान्यस्वत्वोत्पत्तिप्रसङ्गात्, परस्वे दातुर्विभज्य वितरणेऽनधिकारप्रसङ्गाच्च। तस्मादुत्सर्गेण स्वत्वे जननीये प्रतिपादनं सहकारीति नोत्सर्गाव्यवहितोत्तरमेव सम्प्रदानस्य स्वत्वोत्पत्तिरिति प्रतिपादनात्पूर्वं परस्वत्वोत्पत्तिविरहाद् दातुर्विभज्य वितरणमुपपद्यते।

इत्थञ्च सम्प्रदीयतेऽस्मै तत्सम्प्रदानमित्यर्थमनुगता या कर्माभिप्रेयः सम्प्रदानम् (२।२।२५) इति सूत्रविहिता संज्ञा तद्बलात् दानफलस्वत्वनिरूपकत्वमेव चतुर्थ्यर्थ इति तार्किकादयः। दाधात्वर्थनिरूपितकर्मत्ववता गवादिना सम्ब-न्धवत्त्वप्रकारकेच्छानिरूपितविशेष्यताश्रयस्य सम्प्रदानसंज्ञेति हि तत्सूत्रार्थः। तत्र सम्बन्धः स्वत्वमेव। तद्वत्त्वं ब्राह्मणस्य निरूपकतयैवेति तस्य सम्प्रदानत्वं निर्बाधम्।

वस्तुतस्तु ददातेः स्वत्वध्वंसः स्वत्वं च फलविधयाऽर्थः। व्यापारस्त्यागः स च स्वत्वध्वंसस्य जनकः स्वत्वोद्देश्यकश्च।

स च त्यागो नेदं मम किं त्वस्य स्याद्' इत्याकारः, तादृशत्यागरूपेच्छाविषयत्वं सम्प्रदानत्वम् । अत एव सूत्रेऽभिप्रेय इत्यत्र दानस्य कर्मणेति सम्बध्यते । विषयत्वमुद्देश्यतावच्छेदकत्वम्, तदेव चतुर्थ्यर्थः इच्छान्वयी । 'ब्राह्मणस्य स्याद्' इत्यत्र षष्ठ्यर्थस्वत्वनिष्ठोद्देश्यताया अवच्छेदकत्वस्य ब्राह्मणे सत्त्वात् । तत्रोद्देश्यतावच्छेदकतायाः स्वनिरूपितस्वत्वनिष्ठोद्देश्यताप्रतियोगित्वेन सम्बन्धेन त्यागरूपेच्छायामन्वयः । तत्रावच्छेदकत्वमात्रं चतुर्थ्यर्थो लाघवात् । तच्च दर्शितसम्बन्धेन त्यागेऽन्वेति । एवं ब्राह्मणाय गां ददाति राजेत्यत्र ब्राह्मणनिष्ठावच्छेदकताकगोवृत्तिस्वत्वनिष्ठोद्देश्यताकस्वत्वध्वंसजनकत्यागाश्रयो राजेत्यन्वयबोधः । कर्मपदस्य क्रियापरतयाऽपि व्याख्यानेन तु धात्वर्थान्यफलसम्बन्धितयाऽभिप्रेतत्वं सम्प्रदानत्वं सूचितम् तत्र वृक्षायोदकं सिञ्चतीत्यत्र पुष्टीच्छाप्रयोज्योऽपि वृक्षे सेकः । तत्र धात्वर्थे पुष्टिविषयत्वमन्वेति, न त्विच्छायामित्यभिप्रायो न चतुर्थ्यर्थः, अभिप्रैतीति स्वरूपकीर्तनमात्रम् । यदि च ज्ञानेच्छे व्यापारतया न धात्वर्थः, किं तु तत्प्रयोज्यः प्रयत्नः, तदा वृक्षायोदकं सिञ्चतीत्यत्र चतुर्थ्यर्थपुष्टिरुद्देश्यतया धात्वर्थे द्रवद्रव्यप्रतियोगिकसंयोगानुकूलव्यापारे प्रयत्नेऽन्वेति । पुष्टिरुपचयः । स च बृहदवयवनिष्ठारम्भकसंयोगसामानाधिकरण्यम् । तथा च वृक्षसम्बन्धिपुष्ट्युद्देश्यकः जलवृत्तिद्रवद्रव्यप्रतियोगिकसंयोगानुकूलः प्रयत्नो वाक्यार्थः ।

एवं 'यदग्नये च प्रजापतये च सायमग्निहोत्रं जुहोति' इत्यत्र जुहोत्यर्थे वह्निसंयोगानुकूलप्रक्षेपस्य समानकालिके त्यागेऽनुकूलप्रयत्ने वा चतुर्थ्यर्थस्यान्वयः । तथावच्छेदकस्य चतुर्थ्यर्थस्य यत्पदार्थनिष्ठस्वत्वोद्देश्यताद्वारा त्यागेऽन्वयः, प्रीतेर्वा चतुर्थ्यर्थस्य प्रयत्ने प्रयत्नत्यागैकतरान्वयः । विप्रायान्नं निर्वपतीत्यत्र धात्वर्थेऽधिश्रितपात्रप्रक्षेपानुकूले प्रयत्ने विप्रविशेषितस्य चतुर्थ्यर्थस्य भोजनस्योद्देश्यतयाऽन्वयः । खण्डिकोपाध्यायः शिष्याय चपेटां ददातीत्यत्र आहन्यमानः करश्चपेटार्थः, अभिघातजनकप्रयत्नो ददात्यर्थः । तत्र प्रयत्ने चतुर्थ्यस्य व्यथायाः शिष्यविशेषिताया अन्वयः । इत्थं दर्शितानां चतुर्थ्यर्थानां सन्दर्शितेन संसर्गेण धात्वर्थ एवान्वय इति कारकत्वं निष्प्रत्यूहम् इति ।

## प्राचीनशाब्दिकमते चतुर्थ्यर्थविचारः

प्राचीनशाब्दिकास्तु– उद्देश्यत्वं चतुर्थ्यर्थः । तथा हि सम्प्रदाने चतुर्थी विधीयते । तच्च कर्माभिप्रेयः सम्प्रदानम् ( २।२।२५ ) इति सूत्रात् कर्मणा करणभूतेन यमभिप्रैति ईप्सति तत्कारकं सम्प्रदानमित्यर्थकादुद्देश्यम् । द्विजाय गां ददातीत्यादौ परस्वत्वजनकस्वस्वत्वध्वंसावच्छिन्नेच्छात्मकस्त्यागो दाधात्वर्थः । उद्देश्यत्वं चतुर्थ्यर्थः । गोरूपकर्मणश्चाश्रयत्वेन स्वत्वरूपफलेऽन्वयः । तथा च गोवृत्तिस्वत्वजनकस्वस्वत्वध्वंसानुकूलो द्विजाभिन्नोद्देश्यकस्त्यागः इति वैयाकरणमते बोधः । उद्देश्यत्वं च द्विजे गोजन्यस्वत्वभागितयेच्छाविषयत्वमेव । एवं वृक्षायोदकं सिञ्चति इत्यत्राप्युदकनिष्ठक्रियाजन्यसंयोगफलभागितयेच्छाविषयत्वात्सम्प्रदानत्वमूह्यम् । उक्तोद्देश्यत्वमेव शेषित्वम् । तदुद्देश्यकेच्छाविषयत्वमेव शेषित्वमित्येव पूर्वमीमांसायां निर्णीतम् । द्विजो गोजन्यस्वत्वजन्यसुखादिमान् भवतु इतीच्छा दातुर्भवतीति द्विजस्य तादृशेच्छाविशेष्यत्वमेव शेषित्वम् । गवादेश्च तादृशेच्छाप्रकारत्वमेव शेषत्वम् । इदमेव चार्थकर्मत्वेन तत्र ( पूर्वमीमांसायां ) प्रसिद्धम् । उद्देश्यत्वरूपशेषित्वस्य आर्थकर्मत्वरूपशेषत्वप्रयोजकत्वादेव—

"प्रासनवन्मैत्रावरुणाय दण्डप्रदानम्" इति पूर्वमीमांसायाश्चतुर्थाध्यायद्वितीयपादीये षष्ठेऽधिकरणे 'क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छति' इति वाक्यविहितं दण्डप्रदानं न प्रतिपत्तिकर्म, किन्तु चतुर्थीश्रुत्या आर्थं कर्मेति निर्णीतम् । अयमाशयः यथा– ज्योतिष्टोमे श्रूयते– "नीतासु दक्षिणासु चात्वाले कृष्णविषाणं प्रास्यति" इति । यदा यजमानेन दत्ता दक्षिणा ऋत्विग्भिर्नीतास्तदा यजमानः स्वहस्ते धृतं कृष्णमृगविषाणं चात्वालकनामके गर्ते प्रक्षिपेदिति तदर्थः । तत्रैवं सन्दिह्यते– किमेतत् प्रासनमर्थकर्म,

प्रतिपत्तिकर्म वेति । अर्थकर्मैव भवितुमर्हति सप्रयोजनत्वात्, प्रतिपत्तिकर्मतायां तु अपूर्वाभावे निरर्थकमेव स्यादिति पूर्वपक्षे 'कृष्णविषाणया कण्डूयति' इति श्रुत्या कृतार्थस्य प्रतिपत्त्यपेक्षत्वात् प्रतिपत्तिकर्मतैव युक्ता । न चानर्थक्यम्, प्रासनक्रियाप्रयुक्तापूर्वाभावेऽपि चात्वाल एवेति नियमापूर्वसद्भावात्– इति सिद्धान्तितम्, तद्वद्दण्डदानं ( मैत्रावरुणाय दण्डं प्रयच्छतीत्यत्र ) न प्रतिपत्तिः, किन्तु चतुर्थीश्रुत्या आर्थं कर्म । तथा हि ज्योतिष्टोमं प्रकृत्यैव 'मैत्रावरुणाय दण्डं प्रयच्छतीति श्रूयते । तत्र दण्डदानस्यार्थप्रतिपत्तिभावसन्देहेऽध्वर्युणा दीक्षासिद्ध्यै दत्तदण्डस्य आसोमक्रयात् यजमानधारणेन कृतार्थत्वात् उपयुक्तस्य तस्य दानं प्रतिपत्तिकर्मैव भवितुं युक्तमिति पूर्वपक्षे "दण्डी प्रैषानन्वाह" इति श्रवणात् मैत्रावरुणस्य प्रैषानुवादेऽवलम्बनाय दण्डोऽपेक्षितः । एवञ्च भविष्यदुपयोगसद्भावात् दानव्याप्यमानदण्डव्याप्यमानत्वेन मैत्रावरुणस्य प्राधान्याच्च दण्डदानस्य प्रतिपत्तिकर्मण उपयुक्तसंस्काररूपात्; तद्विहाय– उपयोक्ष्यमाणसंस्काररूपत्वेन प्राशस्त्याच्चार्थकर्मतैव युक्ता । उपयोजितुमेव सर्वत्र संस्कारप्रवृत्तेः । उपयुक्ते तु प्रतिपत्तिरूपसंस्कारस्य असत्कारमात्रपर्यवसायित्वेन कार्यपर्यवसानाभावात् अप्रशस्तत्वम् । अतो मैत्रावरुणाय दण्डदानकर्म अर्थकर्मैव । तथा — सति निरूढपशौ असत्यपि दीक्षिते दण्डसम्पादनस्यैतद् दानं प्रयोजकमिति सिद्धान्तितम् । अर्थकर्मत्वे तु शेषित्वमेव प्रयोजकं, तच्च चतुर्थीश्रुत्या उद्देश्यत्वरूपं मैत्रावरुणस्यास्त्येवेति मीमांसासिद्धान्तेनापि चतुर्थ्यर्थ उद्देश्यत्वमिति सारम् ।

यत्र च दाधातुरधीनीकरणार्थः तत्राधीनत्वादिरूपफलनिरूपकतया इच्छाविषयत्वरूपसम्प्रदानत्वस्य रजकादावपि संभवात्, 'रजकाय वस्त्रं ददाति' 'होत्रे उष्ट्रं ददाति' इत्यादयः प्रयोगा अपि 'खण्डिकोपाध्यायः शिष्याय चपेटां ददाती'ति महाभाष्यप्रयोगानुसारमिष्टा एव । अत्र च ददातिः संयोगानुकूलव्यापारार्थकः । चपेटापदार्थश्च प्रसृतकरतलम् । दाधात्वर्थसंयोगसम्बन्धित्वेनेच्छाविषयत्वस्य शिष्ये सत्त्वात्तस्य सम्प्रदानत्वम् । "नशूद्राय मतिं दद्यात्" इत्यत्र ददातिर्बोधनार्थकः, मतिपदार्थश्च तज्जनकं वेदादिशास्त्रमिति, साक्षात् शूद्रमुद्दिश्य वेदाद्यध्यापनं निषेधविषयः ।

## ( वृत्तिकृन्मतम् )

वृत्तिकारास्तु सम्यक् प्रदीयतेऽस्मै तत् सम्प्रदानमित्यन्वर्थसंज्ञया परस्वत्वोत्पत्त्यवच्छिन्नस्वस्वत्वनिवृत्तिपर्यन्तम् दाधात्वर्थं वर्णयन्तो रजकस्य वस्त्रं ददातीत्येव प्रयोगः इत्याहुः । किन्तु शिष्याय चपेटां ददातीत्युक्तभाष्यप्रयोगप्रामाण्यादस्याः संज्ञाया अन्वर्थत्वमेवासिद्धम् । महासंज्ञाकरणं तु प्राचामाचार्याणामनुरोधेन सर्वनामस्थानादिसंज्ञावत्, तथाचोक्तं वृत्तिमतं न महाभाष्याद्याकरग्रन्थानुकूलमिति विज्ञेयम् ।

## वैयाकरणान्तरमतेन ददात्यर्थादिविचारः ।

अपरे शाब्दिकास्तु ददातेः स्वत्वध्वंसः स्वत्वं च फलविधयार्थः । त्यागक्रियाफलद्वयमपि तत् ( स्वत्वं स्वत्वध्वंसश्च ) एकेनैव गवादिना साकाङ्क्षम्, न तु ब्राह्मणादिना त्यागोद्देश्येन । गवादिपदोत्तरद्वितीयोपात्तमधिकरणं स्वत्वे ध्वंसे च यौगपद्येनान्वेति । द्विजाय गां ददातीत्यत्र गोवृत्तेः स्वत्वस्य स्वत्वध्वंसस्य चानुकूलस्त्यागो वाक्यार्थः । चतुर्थी तु धात्वर्थफलान्वयि प्रीत्यादिफलान्तरमभिधत्ते । तेन गां ददाति ब्राह्मणायेत्यत्र ब्राह्मणप्रीतिजनकगोवृत्तिस्वत्वस्य गोवृत्तिस्वत्वध्वंसस्य चानुकूलस्त्यागो वाक्यार्थः । यत्र च राजाज्ञादिना निषिद्धदानप्रतिग्रहस्तादृशे स्थले प्रीतिमजनयत्यपि स्वत्वे यदि ददातिप्रयोगस्तदा तत्रेष्यमाणप्रीतिजनकत्वमेव चतुर्थ्यर्थः । इच्छायां चतुर्थीप्रकृत्यर्थस्य विषयतयाऽन्वयः । ब्राह्मणविषयतानिरूपितप्रीतिविषयतानिरूपितजनकत्वविषयतानिरूपितविषयतयाभिप्रायः स्वत्वेऽन्वेति

तथा च ब्राह्मणसमवेतप्रीतिजनकस्वत्वजनकं दानं भवत्वितीच्छाया विशिष्टविषयतायाः, तादृशप्रीतिविरहस्थलेऽसम्भवेऽपि निरूप्यनिरूपकभावापन्नविषयताशालिनीं विसंवादिनीमिच्छामादायैवोक्तसम्बन्धप्रसिद्धिः ।

अत एव कर्मणाभिप्रेयः सम्प्रदानम् ( २।२।२५ ) इति सूत्रे फलगोचरमभिप्रायविशेषणमेव चतुर्थ्यर्थतया आचार्य उदाजहार । तत्र सम्प्रदानपदं नान्वर्थसंज्ञकम्, येन दानजन्यफलभागेव सम्प्रदानसंज्ञः स्यात् । किन्तु क्रियान्तरजन्यफलभागपि सम्प्रदानमिति संज्ञायते । अत एव कर्मपदस्य क्रियापरतयाऽपि व्याख्यानं कृतम् । चतुर्थ्युपात्तं च फलं क्वचिदनुकूलतया धात्वर्थफलेऽन्वेति । यथा– द्विजाय ददातीत्यत्र दानफलस्वत्वे प्रीतिः; वृक्षायोदकं सिञ्चतीत्यत्र क्रियाफले जलसंयोगे वृक्षपुष्टिः, 'यदग्नये च प्रजापतये च जुहोतीत्यत्र च वह्निसंयोगफले प्रक्षेपात्मकहोमफले वह्निसंयोगेऽग्निप्रजापतिस्वाम्यम् तत्प्रीतिर्वा, विप्रायान्नं निर्वपतीत्यत्र निर्वापफले विविक्तौ विप्रभोजनम्, खण्डिकोपाध्यायः शिष्याय चपेटां ददातीत्यत्राभिघातफलकक्रियाफलेऽभिघाते शिष्यव्यथा, अजां ग्रामाय नयतीत्यत्र कर्मानुकूलव्यापारात्मकनयनफले कर्मणि ग्रामसंयोगः । यत्र च नयतिना संयोगोऽप्युपात्तस्तत्र परया कर्मसंज्ञया सम्प्रदानसंज्ञाया बाधात् अजां ग्रामं नयतीत्येव प्रमाणम् । एवं गमनजन्यफलस्य चैत्रेऽपि संभवेन चैत्रश्चैत्राय गच्छतीति प्रयोगापादनमपि परास्तम्, परया कर्तृसंज्ञया सम्प्रदानसंज्ञाया बाधात् ।

क्वचिच्चतुर्थ्यर्थः प्रधानक्रियायामन्वेति । यथा–– "आत्मने वै पुत्रः प्रियो भवति" इत्यत्र पुत्रप्रियभावे आत्मनः प्रीतिः, 'पत्ये शेते प्रौढा वधूः' इत्यत्र प्रौढवधूकर्तृकशयने पतिः, ग्रामाय गच्छतीत्यत्र शुद्धस्पन्दार्थकगमिधात्वर्थग्रामसंयोगः । अत एव गतेर्नवाऽनाप्ते ( २।२।६३ ) इति विभाषाचतुर्थीविधिर्नावश्यकः । गमिफलस्य धातुनोपादाने चतुर्थीति न्यायसिद्धतया 'ग्रामाय चलति' 'वृक्षाय स्पन्दते' इत्यादाविव ग्रामाय गच्छतीति प्रयोगस्याप्युपपन्नत्वात् । पाकमात्रस्य पचिधातुनोपादाने ओदनाय तण्डुलाय वा पचतीति प्रयोगोऽपीष्ट एवेत्याहुः ।

## अत्र विप्रतिपत्तिरपि ।

सा चेत्थम् - प्रीतीच्छायाश्चतुर्थ्यर्थत्वे तस्या निरुक्तपरम्परयाऽन्वये गौरवम्, पत्नीप्रीतिजनके श्वशुराय दाने 'पत्न्यै ददातीति प्रयोगापत्तेश्च । एवं यदग्नये च प्रजापतये च–' इत्यादावपि प्रीतेस्तथात्वे वह्निप्रीतिजनककृतिकादेवताकहोममादाय वह्नये जुहोतीत्यस्यापत्तेः, विष्णुप्रीत्यर्थं क्रियमाणे दाने होमे वा विष्णवे ददाति, जुहोतीति वा प्रयोगापत्तेः । मन्मते तु यद्देवताको होमो दानं वा तत्प्रीतिरेव जुहोत्यर्थव्यापारस्य ददात्यर्थव्यापारस्य चोद्देश्येति विष्णुप्रीतेः होमदेवताप्रीति– संप्रदानविप्रादिप्रीतिफलत्वान्न तथा प्रयोगः । तन्मते विष्णुप्रीतीच्छाया दर्शितविषयतासम्बन्धेन ददातिफले गोनिष्ठविप्रस्वत्वे हविर्निष्ठवह्निसंयोगे च सत्त्वादुक्तप्रयोगस्य दुर्वारता । न च सम्बन्धघटकविषयतावज्जनकत्वं साक्षादेव विवक्षितमिति नोक्तदोषः इति वाच्यम्, तथा सति गोनिष्ठविप्रस्वत्वमपि तदीयप्रीतेर्न साक्षाज्जनकमिति विप्राय गां ददातीत्यस्यानापत्तेः, गोनिष्ठस्वत्वस्य दुग्धदानादिद्वारैव विप्रसुखजनकत्वात् । एवं वृक्षायोदकमासिञ्चतीत्यत्रापि पुष्टीच्छा न चतुर्थ्यर्थः, गौरवात् । वृक्षपुष्टीच्छया क्रियमाणे कूपखननादौ वृक्षाय कूपं खनतीत्यस्यापत्तेश्च । आत्मने पुत्रः प्रियो भवतीत्यत्रापि नात्मप्रीतीच्छा चतुर्थ्यर्थः । पुत्रप्रियभावस्यात्मप्रीतीच्छाप्रयोज्यत्वाभावात् । नाप्यात्मप्रीतिः, ( चतुर्थ्यर्थः ) भवत्यर्थानन्वयात् । तस्मात्तत्र क्रियाशून्यवाक्ये तादर्थ्यचतुर्थी उपकारकत्वमर्थः प्रियपुत्रेऽन्वेति । तथा पत्ये शेते इत्यत्रापि प्रीतीच्छा न चतुर्थ्यर्थः, गौरवात् । पतिप्रीतीच्छया क्रियमाणे शयनानुकूलपल्यङ्कस्थापने पत्ये पल्यङ्कं स्थापयतीति प्रयोगापत्तेः । तस्माद्यथा वृक्षपुष्टिः सेचनव्यापारे तथा पतिप्रीतिरपि शयनव्यापारे उद्देश्यत्वेनान्वेति, अतः पुष्टि–

प्रीत्योरजनकयोः सेचनशयनयोर्न्न दर्शितप्रयोगानुपपत्तिः । एवमजां ग्रामं नयतीत्यत्र ग्रामसंयोगेच्छायाश्चतुर्थ्यर्थत्वे ग्रामसंयोगेच्छया अजाग्रहणे 'अजां ग्रामाय गृह्णातीति प्रयोगापत्तिः । ग्रामाय गच्छतीत्यादौ गमेः शुद्धव्यापारार्थकत्वे चतुर्थ्यर्थत्वेनैव संयोगे विवक्षितेऽनेनैव चतुर्थ्युपपत्तौ 'गतेर्नवाऽनाप्ते । ( २।२।६३ ) इति सूत्रमनावश्यकमित्यपि न युक्तम् । धात्वर्थफलस्य चतुर्थ्या प्रतिपादने धारणजन्यसंयोगस्य धातुना विवक्षायां दण्डाय दधातीति प्रयोगापत्तिः । 'ग्रामाय चलति स्पन्दते' इत्यादौ च धातोः संयोगार्थत्वविरहाच्चतुर्थ्या तद्बोधसंभवः । तण्डुलायौदनाय वा पचतीत्यादिकन्तु न प्रमाणम्, प्रमाणं चेत्, तण्डुलोपकारकत्वस्यौदनजनकत्वस्य च चतुर्थ्या प्रतिपादनात्तादर्थ्ये सा चतुर्थी । यदि दण्डाय दधातीत्यादिकमपि प्रमाणमेवेति मन्येत, तदापि गत्यर्थकर्मणि चतुर्थीविधानस्य वैयर्थ्यं न शंक्यम्, यतस्तत्र द्वितीयाऽपि पक्षे भवति, ग्रामादिविशेषितमाधेयत्वं संयोगरूपफलान्वयि तदर्थः । सम्प्रदानचतुर्थी तु फलमेवाभिधत्ते; न तु फलान्वय्याधेयत्वमिति । नापि संयोगेच्छा चतुर्थ्यर्थः, तथा सति ग्रामसंयोगेच्छया यानारोहणे ग्रामाय गच्छतीति प्रयोगापत्तेः । किञ्च संयोगार्थकत्वेऽपि चतुर्थ्या न कर्मार्थकत्वम्—तेन प्रत्याख्यानम्— अनावश्यकत्वख्यापनं स्यात् ॥

## एतत्परिहारः ।

उक्तरीत्या प्रीतीच्छायाश्चतुर्थ्यर्थत्वाभावेऽपि उद्देश्यस्य चतुर्थ्यर्थत्वे न कोऽपि दोषोऽवतरति । तथा च कर्मजन्यतद्वृत्तिफलभागित्वप्रकारको यद्विशेष्यकोऽभिप्रायः स सम्प्रदानमिति सम्प्रदानसंज्ञाविधायकसूत्रस्य पर्यवासितार्थतया पत्न्यै ददातीत्यादिप्रयोगाणां नापत्तिः । तस्याः कर्मजन्यतद्वृत्तिफलभागित्वाभावात् । एवमन्यत्रापि सर्वत्रोहनीयमिति ।

## सम्प्रदानस्य त्रैविध्यम् ।

'अनिराकरणात्कर्तुस्त्यागाङ्गं कर्मणेप्सितम् ।
प्रेरणानुमतिभ्यां च लभते सम्प्रदानताम् ॥''

इति वाक्यपदीयात् सम्प्रदानं त्रिविधम् । तदनुसारमेव बृहद्वृत्तौ देवाय बलिं ददाति, याचकायान्नं ददाति, द्विजाय गां ददातीति प्रयोगा उदाहृताः । देवो न प्रार्थयते, नानुमन्यते, न निराकरोति— इति तत्प्रथमं सम्प्रदानम् । याचकायान्नं ददातीति-प्रार्थितो दाता तस्मै वितरतीति द्वितीयम् । द्विजाय गां ददातीति द्विजो न प्रार्थयते न निराकरोति, केवलमसौ स्वीकरोति इति तदनुमतिस्तत्र प्रतीयते इति तृतीयमिदं सम्प्रदानम् । तत्र सर्वत्र विहितानां चतुर्थीनामुद्देश्य एवार्थ इति वैयाकरणमतसारांशः ॥ २।२।५३

## तादर्थ्ये ॥२।२।५४॥

अनेन सूत्रेण तादर्थ्ये चतुर्थीविभक्तिः प्रतिपादिता । तादर्थ्यं विवृतं बृहद्वृत्तौ किञ्चिद्वस्तु सम्पादयितुं यत्–प्रवृत्तं तत्तदर्थम्–तस्य भावे तादर्थ्ये सम्बन्धविशेषे इति । भावप्रत्ययस्य सम्बन्धविशेषार्थकता च–"कृत्तद्धितसमासेभ्यः सम्बन्धाभिधानं भावप्रत्ययेन" इति हरिप्रतिपादितरीत्यैव । तस्य च सम्बन्धस्य यथाप्रकरणमेव निर्णेयत्वेन सम्बन्धविशेषपदेन निर्देशः । तस्मै इदं तदर्थमिति तादर्थ्यचतुर्थ्या समासेन तत्पदस्य बुद्ध्या परिगृहीतेऽर्थेऽपि शक्त्या कार्यविशेषो गृह्यते । कार्यार्थं च कारणमुपादीयते । तथा च तदर्थपदं तत्कारणपरम् । तेन कारणन यादृशः सम्बन्धः कार्यस्य स एवेह सम्बन्धविशेषपदप्रतिपाद्यः । यदि च तादर्थ्यचतुर्थीसमासे परस्पराश्रयो दोषः, तर्हि स एवार्थः प्रयोजनमस्येति बहुव्रीहिणापि कार्यप्रयोजनकम्— कार्योपकारकं कारणमेवाभिधीयते । तस्य कारणस्य यः सम्बन्धः स एवेह चतुर्थ्याऽभिधीयते । कार्योपकारकमपि तदर्थं भवति । यथा मशकेभ्यो धूम इत्यादौ । 'यूपाय दारु'

इत्यादौ च कार्यकारणभावः सम्बन्धः । अश्वाय घास इत्यादौ च तन्निष्ठोपकारकत्वं सम्बन्ध इत्यादि यथायथं स्वयमूह—नीयमिति ।। २।२।५४।।

## रुचिक्रुप्यर्थधारिभिः प्रेयविकारोत्तमर्णेषु ।।२।२।५५।।

एतेन सूत्रेण रुच्यर्थैः क्रुप्यर्थैः धारिधातुना च योगे चतुर्थी विधीयते । 'रुचिश्चान्यकर्तृकोऽभिलाष' इतिरूपेण व्याख्याता । अन्यपदं च विषयपरम् । तथा च रुचि—विषयकर्तृकेऽभिलाषे वर्त्तमानै रुच्यर्थैर्धातुभिर्योगे प्रेये चतुर्थी भवतीत्येकं वाक्यम् । प्रेयश्च प्रीतिसमवायी प्रीयमाण इति यावत् । रुचिकर्तृविषयप्रीतिमतश्चतुर्थी । जिनदत्ताय रोचते मोदक इत्यत्र रुचिकर्त्ता मोदकः स एव च रुचि—विषयोऽपि, तद्विषयप्रीतिर्जिनदत्ते समवायेन सम्बन्धेन इति तस्माच्चतुर्थी भवति । तथा च प्रीत्यादेर्धातुनैवोक्तत्वाद-नन्यलभ्यं समवेतत्वं समवायित्वं वाऽस्याश्चतुर्थ्या अर्थ इति पदवाक्यरत्नाकरकृतः । तथा च जिनदत्तसमवेताभिलाष—विषयो मोदक इत्यन्वयबोध इति सम्प्रदायविदः । वस्तुतस्तु रुचिरुत्कटेच्छा । उत्कटत्वं च द्वेषप्रतिबन्धकतावच्छेदको जातिविशेषः । रुच्यर्थाः रोचति— स्वदति— प्रभृतयः । तदर्थकर्तृत्वं विषयस्यैवेति रोचते इत्यादावाख्यातस्य विषय-त्वमर्थः । प्रेयशब्दार्थः प्रीतिमान्, प्रीतिः सुखं तथा च चतुर्थ्यर्थः सुखम्, तस्य च सामानाधिकरण्योद्देश्यित्वाभ्यां सम्बन्धाभ्यां रुचावन्वयः । सामानाधिकरण्यनिवेशात् देव-दत्तस्यान्यदीयसुखेच्छाविषयमोदके न तथा प्रयोगः । एवं च जिनदत्ताय रोचते मोदक इत्यत्र जिनदत्तसुखस्य समाना-धिकरणोद्देश्यिनी योत्कटेच्छा तद्विषयो मोदक इत्यन्वयबोधः । अत एव सूत्रे प्रेयशब्दोपादानम् । अन्यथा 'रुच्यर्थानां रुचौ' इत्येव सूत्रयेत्, तावतापि रुचेः समवायेनैव सद्भावात् सम—वेतत्वादेरुक्तार्थस्य चतुर्थीवाच्यता स्यादेवेति प्रेय इति कर-णेन सामानाधिकरण्येन प्रीतेरर्थत्वात् जिनदत्ताय रोचते मोदको माधुर्येणेत्यत्र माधुर्यान्न चतुर्थी । तत्रापि प्रीति—सम्बन्धस्य सत्त्वेऽपि तत्सामानाधिकरण्यस्य— ( विषयसामा-नाधिकरण्यस्य ) तत्रासत्त्वादिति नवीनाः । शेषत्वेन विव—क्षायां च षष्ठ्यपि प्रयुज्यते रुच्यर्थयोगे इति सर्वं स्पष्टीकृतं बृहद्वृत्तिबृहन्न्यासादिषु इति विशेषजिज्ञासुभिस्तत एवाव—लोकनीयम् ।

## क्रुप्यर्थयोगे विकारे विहितायाश्चतुर्थ्या विचारः ।

क्रुप्यर्थयोगे विकारे चतुर्थी भवतीति द्वितीयं वाक्यम् । क्रुपिः सामर्थ्यार्थः । सामर्थ्यं च तत्कार्यकरणशक्तिरेव । तथा च सामर्थ्यं धातुनैवोपात्तमितीहापि समवेतत्वं प्रकृति—विकृतिभावो वा चतुर्थ्यर्थः । मूत्राय कल्पते यवागूरित्यत्र समवायेन मूत्रसम्पादनशक्तिमती यवागूरिति यवागूप्रकृतिक मूत्ररूपविकारकर्तृका सत्ता वेति वाक्यार्थः । अत्र पक्षे धातोः सत्तामात्रमर्थः । शेषं बृहद्वृत्त्यादौ स्पष्टम् ।

## धारेर्योगे उत्तमर्णे विहितायाश्चतुर्थ्या विचारः ।

धारयतेर्योगे उत्तमर्णे चतुर्थी भवतीति तृतीयं वाक्यम् । उत्तममृणं यस्येति बहुव्रीहिणा ऋणार्थं धनप्रयोक्ता धन—स्वामी उत्तमर्णशब्देनोच्यते । धारयतेश्च ऋणत्वनिरूपितम-धमर्णत्वं अधमर्णत्वजनको व्यापारो वार्थः । उत्तमर्णत्वं स्वाम्यविशेषः चतुर्थ्यर्थः । फलीभूतऋणत्वाश्रयता शतस्य कर्मत्वम्, एवं चैत्राय शतं धारयतीत्यत्र चैत्रनिष्ठोत्तमर्णत्व-निरूपितशतवृत्तिऋणप्रतियोगिकाधमर्णत्वाश्रयत्वं वाक्यार्थः ।

अत्र ऋणत्वाधमर्णत्वे स्वत्वस्वामित्ववदतिरिक्तपदार्था-वेव अनुगतप्रतीतिव्यवहारयोरविशेषात् । स्वत्वाभाव एव ऋणत्वमिति चेत्, ऋणत्वाभाव एव स्वत्वमित्यपि किं न स्यात् । यदि चोद्धारनाश्यपापविशेषस्य साधनं विनियोगः ऋणत्वम्, तदा पापासाधनविनियोग एव स्वत्वमिति स्यात् । अविनियोगकाले स्वव्यवहारः ऋणव्यवहारेण तुल्ययोगक्षेमः, शास्त्रमपि ऋणत्वे स्वत्वे च तुल्यम्, शास्त्रस्याननुगतप्रवृत्ति-

निमित्तकऋणपदघटितत्वमिव तादृशस्वपदघटितत्वमपी-त्यादि विवदन्ते तार्किकाः ।

वस्तुतस्तु उद्धारनाश्यपापजनकग्रहणाहितव्यापारो धार-यतेरर्थः । फलीभूतग्रहणविषयतया शतादीनां कर्मत्वम् । उत्तमर्णः प्रयोक्ता । प्रयोगो वृद्धिजिघृक्षा । तज्जनकज्ञान-जन्यसंस्कार उपकारता कीर्तिजनकः पुण्यविशेषो वा । स च चतुर्थ्यर्थः । तथाविध- ( उद्धारनाश्य ) पापवान् अध-मर्णः । एवं च चैत्रनिष्ठवृद्धिजिघृक्षादेः प्रयोज्यं यत्तथाविधं शतकर्मकग्रहणं तत्प्रयोज्यव्यापारो भोजनादिस्तदाश्रयत्वं वाक्यार्थः । ऋणमपि तथाविधग्रहणकर्म बोध्यम् इति परे ।

एवमर्थान्तरेऽपि धारयतेः प्रयोगो दृश्यते । यथा-

सेवनवेतनमृणमिह, मह्यं दीनाय धारयसि ।
अतिचण्डि ! वदाम्यपर्णेऽतिभीतितो भवतीम् ।।

इत्यत्र धारयतेरभीष्टफलदानानुकूलव्यापारोऽर्थः । ऋणपदलक्ष्यमवश्यदेयं, वेतनपदलक्ष्यं साध्यम् । एवं च सेवनसाध्यावश्यदेयकर्मको योऽभीष्टप्रयोजकदानानुकूलो व्या-पारस्तदाश्रयस्त्वमित्यन्वयबोधः । मह्यमित्यत्र चतुर्थ्यर्थः पुण्यविशेषः स प्रयोज्यत्वेन व्यापारेऽन्वेति । एवं ग्राह्यं गृह्णातीतिवत् 'उत्तमर्णाय धारयति' अधमर्णो धारयतीति-विशेष्यविशेषणभावव्यत्यासेनान्वयो बोध्यः ।।२।२।५५

## प्रत्याङ्भ्यां श्रुवोऽर्थिनि ।।२।२।२६।।

अनेन सूत्रेण प्रत्याङ्भ्यां परेण शृणोतिना युक्तान्नाम्नः अर्थिनि चतुर्थी विधीयते । तत्र प्रत्याङ्पूर्वकस्य शृणोतेः याच्ञापूर्वकः स्वीकारोऽर्थः, यो हि केनापि याचितः सन्, साक्षाद्याचितत्वाभावेऽपि तदिङ्गितादिना ( प्रार्थिमुखादि-विकारेण ) तदिच्छामवगत्य तद्दानं स्वीकरोति तत्रैवास्य प्रयोगः । अत एव याच्ञापूर्वक इत्युक्तम् । यद्यपि—

"संविदागूः प्रतिज्ञानं नियमाश्रवसंश्रवाः ।
अङ्गीकाराभ्युपगमप्रतिश्रवसमाधयः" ।।

इत्यमरकोशानुसारं प्रतिश्रवाश्रवशब्दौ सामान्यतोऽङ्गी-कारवाचकावित्येव समायाति । तथापि याच्ञापूर्वकेऽपि स्वीकारे मुख्यता स्वीकारांशस्यैवेति तमेवादाय कोशे अर्थ-वर्णनमिति स्वीकार्यम् । इदमेव च इदं मे त्वया कर्तव्य-मिति याचमाने, महत्त्वादयाचमानेऽपि केनाप्याकारादिना स्वाभिलाषं समर्पयति द्विजादौ ओमिति तस्य प्रतिपद्यते-अभ्युपगच्छतीति' बृहन्न्यासग्रन्थेन सूचितम् । 'अर्थिनि' विहितेयं चतुर्थी- याच्ञाकर्तारमभिधत्ते । याच्ञा च नेहोपनिबद्धाऽस्तु प्रयोगतोऽनुगम्यत इति एतद्विहितचतुर्थ्याः कर्तृत्वमर्थः । तच्च याचनायामन्वेति । द्वितीयोपात्तं कर्मत्वं याचनाङ्गीकारयोरुभयोः सम्बध्यते । तथा च द्विजाय गां प्रतिशृणोतीत्यत्र द्विजकर्तृकगोकर्मकयाचनापूर्वको देयत्वेना-भ्युपगम इति वाक्यार्थः ।

अन्ये तु प्रतिशृणोतेराशृणोतेरभ्युपगमोऽर्थः । स च क्रियागोचरकर्तव्यत्वाध्यवसायः । क्रिया च क्वचिद्दानरूपा क्वचिदन्यादृशी । अत एव पूर्वोक्तनामलिङ्गानुशासनसंमत-प्रतिज्ञानपर्यायता प्रतिश्रवाश्रवयोरुपपद्यते । चतुर्थ्याः प्रयो-जकतयोपलक्षितो व्यापारोऽर्थः । स च क्वचिद् याच्ञारूपः, यत्र प्रतिशृणोतेराशृणोतेर्वा दानगोचरकर्तव्यत्वाध्यवसा-योऽर्थः । क्वचिदन्यादृशः, यत्र प्रतिशृणोतेराशृणोतेरन्या-दृशोऽर्थः । एवं द्विजाय गां प्रतिशृणोति आशृणोति वा राजेत्यत्र प्रतिशृणोतेराशृणोतेश्च दानकर्तव्यत्वाध्यवसायो-ऽर्थः । चतुर्थ्या याच्ञारूपो व्यापारोऽर्थः । दानं परस्व-त्वानुकूलः स्वस्वत्वध्वंसः, याच्ञा लिप्साप्रकाशनम्, प्रति-ग्रहस्येच्छाप्रकाशनं वा । प्रकृत्यर्थस्य ( चतुर्थीप्रकृतेरर्थस्य ) याच्ञायां कर्तृतयाऽन्वयः । याच्ञायाः प्रयोज्यतया दाने, तद्गोचर ( दानगोचर ) कर्तव्यत्वज्ञाने वाऽन्वयः । दानं कर्तव्यत्वप्रकारकं ज्ञानं खण्डशो धात्वर्थः । दानं विशेष्यितया कर्तव्यताज्ञानेऽन्वेति । प्रतिग्रहः स्वत्वमिच्छा चेति खण्ड-शश्चतुर्थ्यर्थः । स्वत्वमुद्देश्यितयेच्छायामन्वेति । कर्तृत्व-माधेयत्वं संसर्गः इच्छान्वयघटको बोध्यः । गोकर्मकत्वं दानेऽन्वेति । तथा च द्विजसमवेतस्वत्वोद्देश्यताकेच्छाप्रयो-

ज्यगोवृत्तिस्वत्वानुकूलस्वत्वध्वंसविशेष्यताककर्तव्यत्वप्रकारताकज्ञानाश्रयो राजेत्यन्वयबोधः। प्रतिग्रहस्य याच्ञाया गोविषयकत्वमर्थादवगम्यते। न ह्यन्ययाच्ञाप्रयोज्यं गोदानं भवति। कर्तव्यत्वप्रकारतानिरूपितविशेष्यता स्वत्वध्वंसे अर्थादवगम्यते। तत एव कर्तव्यत्वं स्वत्वध्वंसेऽवसीयते। प्रतिज्ञानं तथाध्यवसाय एव।

यत्र,अन्यादृशक्रियागोचरकर्तव्यत्वाध्यवसायः प्रतिश्रवः, चतुर्थ्यास्त्वन्यादृशो व्यापारोऽर्थः। यथा– ब्रह्मचारिणे आगमव्याख्यानं प्रतिशृणोत्युपाध्याय इति। तत्र आनुपूर्वीविशेषप्रकारकज्ञानस्य प्रतिपादकतासंसर्गेणार्थवत्वप्रकारकज्ञानस्य वाऽनुकूलो व्यापारोऽध्यापनं तद्गोचरकर्तव्यत्वाध्यवसायः प्रतिशृणोतेरर्थः। चतुर्थ्या आनुपूर्वीविशेषेण अर्थवत्वेन वा जिज्ञासाऽर्थः। आगमव्याख्यानविशेषितं विशेष्यत्वं तत्सम्बन्धावच्छिन्नमाधेयत्वं वा द्वितीयाऽर्थः, स च फलीभूते ज्ञानेऽन्वेति। ज्ञानस्याध्यापनफलस्याभ्युपगमफलत्वानपायात्। जिज्ञासायाः प्रयोज्यतया अभ्युपगमेऽन्वयः। तथा च आगमव्याख्यानविशेष्यताकस्यानुपूर्वीविशेषप्रकारकस्य वा ज्ञानस्यानुकूलो यो व्यापारः तद्गोचरो यो ब्रह्मचारिसमवेतजिज्ञासाप्रयोज्यः कर्तव्यत्वाध्यवसायः तदाश्रय उपाध्याय इत्यन्वयबोधः। अभ्युपगमफले ज्ञाने ब्रह्मचारिसमवेतत्वमर्थात्प्रतीयते, यथा पूर्वत्राभ्युपगमफले स्वत्वे द्विजनिरूपितत्वम्। नह्यन्यदीयजिज्ञासाप्रयोज्योऽभ्युपगमः अन्यदीयज्ञानफलकः, यथा द्विजयाच्ञाप्रयोज्योऽभ्युपगमो न क्षत्रियादिस्वत्वफलकः इति।

क्वचित् कर्तव्यत्वाध्यवसाय एव प्रतिशृणोतेरर्थः, यत्र तद्विषयो धातुना पदान्तरेण वा प्रत्याय्यते। यथा—अनुमाननिरूपणं शिष्याय प्रतिशृणोतीत्यत्र निरूपणम् अनन्त धात्वर्थः, तत्र प्रयोज्यतया शिष्यजिज्ञासाया अन्वय इति।

सहिष्ये शतमागांसि सूनोस्त इति यत्त्वया।
प्रतीक्ष्यं तत् प्रतीक्ष्यायै पितृष्वस्रे प्रतिश्रुतम्॥

( शिशुपालवधे २'य सर्गे ) इत्यत्र त्वत्सूनुप्रयोज्यागःशतकर्मकभाविसहनकर्तृत्वमिति शब्दार्थो यच्छब्दार्थाभिन्नप्रतिश्रवकर्मण्यभेदेनान्वेति। प्रतिश्रवोऽत्र कर्तव्यत्वाध्यवसायः। तद्विशेष्यस्तत्सहनकर्तृत्वे कर्तव्यत्वाध्यवसायः सहनमादाय पर्यवस्यति। आगोऽनिष्टाचरणं सहनं तज्जन्यफलोपभोगस्तद्विषयकद्वेषाभावो वा। द्वेषाभावे कर्तव्यत्वं क्षेमसाधारणं बोध्यम्। यथा मीमांसकानां कलञ्जभक्षणाभावे। चतुर्थ्यास्तु पुत्रगतानिष्टस्याचरणे द्वेषः तथाविधानिष्टाचरणाभावे इच्छा वाऽर्थः, पितृष्वसृविशेषितः कर्तव्यत्वाध्यवसाये प्रयोज्यतयाऽन्वेति इत्येवं यथास्थलमूहनीयमिति प्रपञ्चयन्ति, तन्न सूत्राक्षरानुगतम्। सूत्राक्षरानुगतस्य पूर्वप्रार्थनाकर्तृत्वस्यैव चतुर्थ्यर्थतास्वीकारे सर्वत्रसामञ्जस्ये सर्वत्र स्वमतिकल्पितनानार्थवर्णनस्यावश्यकत्वात्। एवमभ्युपगमरूपस्यार्थस्यैव सर्वत्र प्रकारान्तरेणोक्ततया धात्वर्थभेदवर्णनमपि प्रपञ्चमात्रमेवेति वृथावाग्जालाद्विरमामः ॥२।२।५६॥

## प्रत्यनोर्गृणाऽऽख्यातरि ॥२।२।५७॥

अनेन सूत्रेण प्रत्यनुभ्यां परेण गृणातिना योगे आख्यातरि वर्तमानाद् गौणान्नाम्नश्चतुर्थी विधीयते। अनुपूर्वस्य प्रतिपूर्वस्य वा गृणातेः शंसनपूर्वकं प्रोत्साहनमर्थः। आख्याता यथा शंसति तथैव चेच्छ्रोताऽपि तमर्थमनुवदति तेनाख्यातुरग्रेऽपि कथनाय प्रोत्साहनं भवतीति स्वभावः। तथा सति हि श्रोतुः सावधानत्वं सापेक्षत्वं विज्ञाय पुनराख्याने उत्साहो जायते। शंसनं हि कथनं, प्रोत्साहनं च हर्षानुकूलो व्यापार इत्यन्ये। अत्रापि चतुर्थ्याः कर्तृत्वार्थत्वमेव। आख्याता हि आख्यानकर्ता। तत्राख्यानं च गृणातिनैवोपात्तमिति कर्तृत्वमात्रमेवास्या अर्थ इति स्वीकार्यम्। अन्ये च शंसने हर्षे चान्विता वृत्तिरेव चतुर्थ्यर्थ इति वदन्ति। तथा च आचार्यकर्तृकशंसनपूर्वकस्य तद्वृत्तिउत्साहानुकूलस्यव्यापारस्य कर्ता शिष्य इति वाक्यार्थबोधः इति सम्प्रदायविदः। अन्ये तु शंसनपूर्वकतयोपलक्षितं प्रोत्साहन-

मनुगृणातेरर्थः । शंसनपूर्वकत्वं तु शंसनज्ञानसापेक्षज्ञान-विषयत्वम्, तदुपलक्षितं— स्वरूपसत्तत्सम्बन्धीत्यर्थः । उत्साहोऽध्यवसायस्तत्र प्रकर्षः कर्तव्यत्वगोचरत्वम्, तेन कर्तव्यत्वाध्यवसायानुकूलो व्यापारः प्रोत्साहनमिति निष्कर्षः । चतुर्थ्याः शंसनमर्थः, तस्य स्वज्ञानादिद्वारकप्रयोज्यतया हर्षणे विशेषितया, कर्तव्यत्वाध्यवसाये वाऽन्वयः । शंसने प्रकृत्यर्थस्याधेयत्वलक्षणकर्तृतयाऽन्वयः । एवम् आचार्याय प्रतिगृणाति अनुगृणाति वा शिष्य इत्यत्र आचार्यवृत्तिशंसन-प्रयोज्यहर्षणाश्रयः शिष्य इत्यन्वयबोधः । अथवा कर्तव्यत्वाध्यवसाये शंसनस्य सामानाधिकरण्येनान्वयः । सामानाधिकरण्यमेककालावच्छेदेनैकत्र वर्तमानत्वम् । तथा च आचार्यवृत्तिशंसनस्य समानाधिकरणः तद्विशेष्यताकश्च यः कर्तव्यत्वप्रकारताकोऽध्यवसायः, तदनुकूलव्यापाराश्रयः शिष्य इत्यन्वयबोधः । परम्परया शंसनफलकस्य हर्षणस्यापेक्षया साक्षात्शंसनफलकस्य कर्तव्यत्वाध्यवसायस्य धात्वर्थत्व-मुचितम् । न च हर्षणं न शंसनफलकमिति वाच्यम्, तथा सति हर्षकस्य ( प्रोत्साहकस्य ) व्यर्थव्यापारतया प्रमत्तत्वापत्तेः । एवं च "प्रशंसन्तं प्रोत्साहयतीत्यर्थ" इति वृत्तिः वर्तमानाद्वयप्रयोगं दर्शयन्ती कालघटितसामानाधिकरण्येनान्वयं सूचयति । एवं निन्दकायानुगृणाति खल इत्यादावन्यत्रापीयं रीतिरनुसर्तव्येति वदन्ति । कर्तव्यत्वाध्यवसायस्य प्रकृतधात्वर्थप्रवेशस्वीकारेण च पूर्वसूत्रतः प्रसङ्ग-संगतिरध्यायातीति तेषामाशयः ।।२।२।५७।।

## यद्वीक्ष्ये राधीक्षी ।।२।२।५८।।

अनेन सूत्रेण वीक्ष्ये वर्तमानाभ्यां राधीक्षिभ्यां योग वीक्ष्यविषयाद् गौणान्नाम्नश्चतुर्थी विधीयते । वीक्ष्यपदं चैवं विवृतम्—**विमतिपूर्वकं निरूपणीयमिति** । विमतिश्च विवृता बृहन्न्यासे— विविधा विशेषानुपलम्भादेकस्मिन् वस्तुनि सादृश्यादिनिमित्तादनेकपक्षालम्बनानवधारणात्मिका मतिः — विमतिरिति । तत्पूर्वकं निरूपणीय- शुभाशुभादि । तदेव स्पष्टीकृतं वृत्तौ विप्रश्नविषय इति यावदिति । एवं च वीक्ष्ये विविधप्रश्नविषये वर्तमानाभ्यां राधीक्षिभ्यां योगे चतुर्थीविधिरिति फलति राधीक्षी च पर्यालोचनार्थौ । प्रकृते च दैवविषयकं पर्यालोचनं तयोरर्थः । यत्सम्बन्धिदैवपर्यालोचने तयोर्वृत्तिस्तस्मादेव चतुर्थीति यद्वीक्ष्य इत्यत्र यच्छब्दप्रयोगादवगम्यते । चतुर्थ्याश्च समवेतत्वमर्थः । मैत्राय राध्यतीत्यत्र मैत्रसमवेतशुभाशुभ-पर्यालोचनाश्रयः ( दैवज्ञादिः कश्चित् ) इत्यन्वबोधः । मैत्रस्य कीदृशं शुभमशुभं वेति प्रश्नस्य विषयता तु मैत्र-पदेन न प्रतिपाद्यते किन्तु व्यञ्जनया । अथ वा विप्रश्नानन्तरितशुभाशुभपर्यालोचनं राधीक्ष्योरर्थः इति धातुनैव विप्रश्नगोचरता प्रतिपाद्यत इति सम्प्रदायविदः ।

वस्तुतस्तु विप्रश्नः शुभाशुभप्रश्नः शुभाशुभजिज्ञासा-प्रयोज्यकिमादिशब्दघटितवाक्यमिति यावत् । तत्र विप्रश्नस्तत्प्रयोजिका जिज्ञासा वा चतुर्थ्यर्थः, दैवपर्यालोचने राधीक्ष्योरर्थे प्रयोज्यतयाऽन्वेति । चतुर्थ्यर्थे जिज्ञासायां विषयितया प्रकृत्यर्थस्यान्वयः । यत्सम्बन्धित्वेन शुभाशुभ-जिज्ञासा तस्यैव शुभाशुभविषयतानिरूपितविषयितया जिज्ञासायामन्वयः, ईदृशविषयितयैव प्रकृत्यर्थस्यान्वयः । तेन मैत्रपुत्रस्य किं शुभमशुभं वेति प्रश्ने मैत्राय राध्यतीति न प्रयोगः । एवं मैत्राय राध्यतीक्षते वा दैवज्ञ इत्यत्र मैत्र-विषयकशुभाशुभजिज्ञासाप्रयोज्यशुभाशुभपर्यालोचनाश्रयो दैवज्ञ इत्यन्वयबोधः । धात्वर्थघटकशुभाशुभे कृष्णसमवेतत्वमर्थात्प्रतीयते धात्वर्थे तादृशजिज्ञासाप्रयोज्यत्वान्वय-बलात् विप्रश्नवाक्यं न धात्वर्थे घटते न वा चतुर्थ्यर्थः । किंतु शुभाशुभजिज्ञासैव । यत्र न प्रश्नवाक्यम्, स्वस्यैव शुभाशुभजिज्ञासा तत्र वराय कन्यायै वा राध्यति नैमित्तिक इत्यपि प्रामाणिकः प्रयोगः इति नवीना आहुरिति । २।२।५८।।

## उत्पातेन ज्ञाप्ये ॥२।२।५९॥

अनेन सूत्रेण उत्पातेन ज्ञाप्यमानेऽर्थे वर्तमानाद् गौणान्नाम्नश्चतुर्थी विधीयते । तत्र उत्पातशब्द एवं विवृतो बृहद्वृत्तौ उत्पात आकस्मिकं निमित्तमिति । बृहन्न्यासे च उत्पातशब्दो व्याख्यातः—उत्क्रम्य प्रसिद्धं निमित्तं पततीति प्रसिद्धं च पूर्वतः कार्यकारणभावज्ञानपरम्परया निर्णीतरूपम् । यच्च तादृशं निमित्तमतिक्रम्यागच्छति तदेव आकस्मिकम्- अज्ञातागमनमिति तदेवोत्पातशब्देनाभिधीयते । निमित्तं कारकज्ञापकभेदेन द्विविधमिति कारकं तत् तादर्थ्यचतुर्थ्या कथ्यते । ज्ञापके इदं सूत्रं प्रवर्त्तते । सूक्ष्मेक्षिकया उत्पातशब्देन मयूरचित्रकादिप्रबन्धेषूपलक्षिता दिव्य-भौमान्तरिक्षा प्राणिनिष्ठशुभाशुभसूचकभूतविकारा विद्युदुद्रेकादयः महोल्कासंपातादयश्चोच्यन्ते । तथा च उत्पातादिवाचकशब्दप्रयोगे ज्ञापकत्वार्थो चतुर्थीयम् । तथा च 'वाताय कपिला विद्युत्' इत्यत्र वातज्ञापिका कपिला विद्युदिति वाक्यार्थबोधः ।।२।२।५९।।

## श्लाघ-ह्नु-स्था-शपा प्रयोज्ये ॥२।२।६०॥

अनेन सूत्रेण श्लाघ-ह्नु-स्था-शप्-धातुभिर्युक्ताद् ज्ञाप्ये प्रयोज्ये वर्तमानात् गौणान्नाम्नश्चतुर्थी विधीयते । तत्र श्लाघेरुत्कर्षप्रकारकप्रतिपत्त्यनुकूलो व्यापारः शब्दो वाऽर्थः । ह्नुतेरदर्शनानुकूलो व्यापारोऽर्थः, तिष्ठतेरात्मनेपदान्तस्य प्रकाशानुकूलो व्यापारः सम्मुखावस्थानादिरर्थः, शपेरपकर्षप्रतिपत्त्यनुकूलो व्यापारः शब्दो वाऽर्थः । मैत्राय-श्लाघते इत्यत्रोत्कर्षप्रकारकप्रतिपत्तिस्वरूपे फले विशेष्यत्वरूपे फले, विशेष्यत्वस्वरूपं विशेष्यतासम्बन्धावच्छिन्नाधेयत्वस्वरूपं वा कर्मत्वं वा चतुर्थ्यर्थोऽन्वेति । अत एव श्लाघां कुर्वाण आत्मानं परं वा ज्ञाप्यं जानन्तं मैत्रं प्रयोजयतीत्यर्थ इति बृहद्वृत्तावुक्तम् । तथा च ज्ञापयितुमभिप्रेतादनेन चतुर्थी विधीयते इति पर्यवस्यति । मैत्राय ह्नुते इत्यत्रादर्शने — विषयतासम्बन्धावच्छिन्नप्रतियोगिताकचाक्षुषाप्रतियोगिके ज्ञानसामान्यप्रतियोगिके वा अभावे, चाक्षुषविषयत्वाभावे वा फले, विशेषणतासम्बन्धावच्छिन्नाधेयत्वस्वरूपं कर्मत्वमन्वेति । मैत्राय तिष्ठते इत्यत्र प्रकाशे ज्ञानस्वरूपे फले समवेतत्वस्वरूपं कर्मत्वमन्वेति । मैत्राय शपते इत्यत्रापकर्षप्रकारकप्रतिपत्तौ फले विशेष्यत्वं विशेष्यतासम्बन्धावच्छिन्नमाधेयत्वं वा कर्मत्वमन्वेतीति सर्वत्र कर्मत्वमेव चतुर्थ्यर्थः, इत्यस्य द्वितीयाबाधनार्थत्वमेवेति केचित् । एतदेव अप्रयोज्यो यो ज्ञाप्यो, य आख्यायते तत्रैवेच्छन्तीत्यनेन सूचितम् । वस्तुतस्तु ज्ञापयितुमिष्यमाणस्य प्रयोज्यस्यैवात्र चतुर्थीप्रकृतित्वं सूत्राक्षरस्वारस्यादायाति । तथा च मैत्रं श्लाघमानस्तां श्लाघां मैत्रमेव ज्ञापयितुमिच्छतीति मैत्राय श्लाघत इत्यत्र बोधो जायते । तथा चेच्छैव चतुर्थ्यर्थः । तत्रेच्छायामुत्कर्षप्रकारकज्ञानस्वरूपफलस्य उद्देश्यतया मैत्रादेः प्रकृत्यर्थस्य समवेतत्वसंसर्गावच्छिन्नायाः तादृशज्ञानरूपफलनिष्ठोद्देश्यतावच्छेदकतायाः प्रतियोगित्वेन सम्बन्धेन, तादृशज्ञाननिष्ठविशेष्यितानिष्ठोद्देश्यतावच्छेदकतानिरूपितावच्छेदकतायाः प्रतियोगित्वेन सम्बन्धेन चान्वयः । मैत्रस्य मैत्रविशेष्यताकोत्कर्षप्रकारकज्ञानं भवतु इतीच्छायां ज्ञाननिष्ठोद्देश्यतानिरूपितसमवेतत्वसम्बन्धावच्छिन्नमैत्रनिष्ठावच्छेदकताप्रतियोगित्वं, तथाविधोद्देश्यतानिरूपितविशेष्यतानिष्ठावच्छेदकतानिरूपितमैत्रनिष्ठावच्छेदकताप्रतियोगित्वं चेति सम्बन्धद्वयं निराबाधम् । अन्यविशेष्यकोत्कर्षप्रकारकमैत्रज्ञानस्य, मैत्रविशेष्यकोत्कर्षप्रकारकान्यदीयज्ञानस्य चेच्छायां न तथा प्रयोगः सम्बन्धद्वयेन पूर्वोक्तेनेच्छायामन्वयाभावात् । यत्र च श्लाघतिः सकर्मकः, तेन 'पण्डिताय श्लाघते नरपतिः' इति प्रयोगः, तत्र समवेतत्वसम्बन्धावच्छिन्नतादृशज्ञानोद्देश्यतावच्छेदकताप्रतियोगित्वेन सम्बन्धेनैव चतुर्थ्यर्थेच्छायां प्रकृत्यर्थस्य तादृशज्ञानरूपे फले, प्रकृत्यर्थविशेषितस्य द्वितीयार्थस्य विशेष्यत्वस्य विशेष्यतासम्बन्धावच्छिन्नाधेयत्वस्य वाऽन्वयः ।

मैत्राय निह्नुते इत्यादौ ह्नुतिफलेऽदर्शने चतुर्थ्यर्थस्ये-

च्छाया:, इच्छायां तु विशेषणतासम्बन्धावच्छिन्नाधेयत्व-सम्बन्धावच्छिन्नाया अदर्शननिष्ठोद्देश्यतावच्छेदकताया: प्रतियोगित्वेन सम्बन्धेन प्रकृत्यर्थस्यान्वय:। अधीरतां जनाय निह्नुते इत्यत्रादर्शनप्रतियोगिनि दर्शने, फलैकदेशे निह्नवे दर्शनमभावश्चेत्युभयार्थकत्वे, फले दर्शने द्वितीयार्थस्य विशेष्यत्वस्य तत्सम्बन्धावच्छिन्नाधेयत्वस्य वाऽन्वय:। वस्तुतस्तु सतोऽसत्त्वेन प्रतिपादनं निह्नुति:। अतो गगनं निह्नुते इति न प्रयोग:। तथा चासत्त्वप्रकारकप्रतिपत्त्यनुकूलो व्यापारो ह्नुतेरर्थ:। अत एव ज्ञीप्स्यमानता चतुर्थीप्रकृत्यर्थ: सम्पद्यते। एवमसत्त्वप्रकारप्रतिपत्तौ पूर्ववत् चतुर्थ्यर्थस्य द्वितीयार्थस्य चान्वय:।

अनिष्टवत्ताप्रतिपत्त्यनुकूलो व्यापार: शपेरर्थ:। तत्रानिष्टवत: प्रतिपाद्यस्य प्रतिपत्तीच्छायां चतुर्थ्या द्वितीयाया बाधात्, ज्ञीप्स्यमानभेदस्य द्वितीयार्थस्यानन्वयाद्वा न द्वितीया। यथा मैत्राय शपते मुनि: इत्यत्र चतुर्थ्यर्थस्येच्छाया अनिष्टप्रतिपत्तौ, इच्छायां प्रकृत्यर्थस्य च पूर्ववदन्वय:। यत्र च शापकर्तु: शापकर्मणि न ज्ञीप्सा तत्र द्वितीयैव– यथा—

"अवजानासि मां यस्मादतस्ते न भविष्यति।
मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा॥"

इति रघुवंशप्रयोगे न चतुर्थी। यत्र शुद्ध्यशुद्धिज्ञानं शपेरर्थस्तत्र न चतुर्थी न वा द्वितीया शुद्ध्यशुद्धिकर्मावरोधो द्वितीयाबाधक:। अनिष्टप्रतिपत्त्यर्थकस्यैव ज्ञीप्स्यमानतायामेव चतुर्थ्या: साधुत्वमिति, किन्तु हेत्वर्थिका तृतीया, यथा पुत्रेण दारैर्वा शपतीति। अत एव—

आचम्य चाम्बु तृषित: करकोशपेयम्,
भावानुरक्तललनासुरतै: शपेयम्।
जीयेय येन कविना यमकै: परेण,
तस्मै वहेयमुदकं घटखर्परेण॥" इति

घटखर्परकवे: प्रयोगे तृतीया। शुद्ध्यशुद्धी सत्यासत्यप्रतिज्ञे बोध्ये।

आत्मनेपदान्तस्य तिष्ठते: स्वप्रकाशानुकूलोऽव्यवहितावस्थानादिरर्थ:, प्रकाश: चाक्षुषं, ज्ञानसामान्यं वेत्यन्यदेतत्। तत्र ज्ञीप्स्यमानस्य चतुर्थीप्रकृतिता, यथा 'कृष्णाय तिष्ठते गोपी' इत्यादौ। अत्र चतुर्थ्यर्थ इच्छायां समवेतत्वसम्बन्धावच्छिन्नायां, प्रकाशनिरूपितोद्देश्यतावच्छेदकतायां प्रतियोगित्वेन सम्बन्धेनान्वय:। इच्छाया उद्देश्यतया प्रकाशे तस्यानुकूलतयाऽव्यवहितावस्थानादौ, तस्य त्यार्थ आश्रयत्वेऽन्वय:। यत्रात्मनेपदान्तस्यापि तिष्ठते: स्थेयविनिवेदनमर्थ:, (स्थेयो मध्यस्थो निर्णायक इति यावत्) तत्र ज्ञीप्स्यमानेऽपि न चतुर्थी। अत एव "संशय्य कर्णादिषु तिष्ठते य:" इति भारविकविप्रयोगे न चतुर्थी। अत्र समानदेशत्वसम्बन्धावच्छिन्नमाधेयत्वं यत्पदार्थे कर्तरि, विद्यमानत्वं कर्तृघटितपरम्परासम्बन्धावच्छिन्नं सप्तम्यर्थे विनिवेदने व्यापारेऽन्वेति। तथा च संशयानन्तरितस्य कर्णाद्यधिकरणस्य निर्णायकनिवेदनस्य कर्ता य: इत्यन्वयबोध:। कर्णादेर्निर्णायकत्वं विनिवेद्यत्वं च मानान्तरवेद्यम्। इत्येवं वाग्विलासोऽत्र नव्यानां, विस्तरभिया न प्रपञ्चित:॥

## तुमोऽर्थे भाववचनात् ॥२।२।६१॥

अनेन सूत्रेण तुम् प्रत्ययस्यार्थे विहितो भावार्थकप्रत्ययो यस्तदन्तात् चतुर्थी विभक्तिर्विहिता। तुमोऽर्थश्च क इति बोधयितुमाह बृहद्वृत्तौ क्रियायां क्रियार्थायामुपपदे इति। तथा च क्रियार्थक्रियावाचक एव तुम् तदर्थ एव च भाववचनाश्च (५।३।१५) इति सूत्रेण विहिता घञादय: प्रत्यया:। अत्रोपपदभूताया: क्रियाया: कृत एव भावप्रत्ययान्तो धातु: प्रयुज्यत इति तादर्थ्यचतुर्थ्यैव सिद्धे सूत्रवैयर्थ्यमाशङ्क्य– तादर्थ्यस्य प्रत्ययेनैवोक्तत्वात्– चतुर्थी न प्राप्नोतीत्यादि समाधानमुक्तं बृहद्वृत्तौ। तथा च नेयं चतुर्थी तादर्थ्यार्थाऽपितु तुमर्थैव। यद्यपि तुमर्थोऽपि घञादिभिरेव प्रतिपादितस्तथापि अत्यन्तस्वार्थिकानामपि प्रत्ययानां शास्त्रकारैर्विधानात् स्वार्थेऽर्थेयमपीति, तुमोऽर्थमेवानुवदति।

तुमर्थस्तु पातुं गच्छतीत्यादौ समानकर्तृकत्वमुद्देश्यत्वं च। तथा च पाकाय व्रजतीत्यत्र समानकर्तृकं पाकोद्देश्यकं गमनमिति वाक्यार्थः। बृहद्वृत्तिरीत्या सम्बन्धसामान्ये प्राप्तां षष्ठीं, हेतुहेतुमद्भावविवक्षायां वा प्राप्तां हेतुतृतीयां बाधितुं चतुर्थीविधानमिति ज्ञायते। तथा च सम्बन्धसामान्यं– हेतुहेतुमद्भावो वा चतुर्थ्यर्थ इत्यायाति। अपरे शाब्दिकास्तु– भाववचनाः (५।३।१५) इति सूत्रेण घञादीनां भावप्रत्ययानां क्रियार्थत्वं प्रत्याय्यते। तच्च फलस्य ज्ञानद्वारा इच्छाद्वारा वा प्रयोजकत्वम्। तथा च घञः प्रयोज्यत्वमर्थः तच्च गमनेऽन्वेति। तत्र पाकादिशब्दात्कारकान्तरप्रतिपादकद्वितीयादिविभक्तिप्राप्तिविरहेण नामार्थमात्रे प्रथमा प्राप्ता, तदपवादाय– साधुत्वमात्रार्था चतुर्थी विधीयते। तथा च पाकाय व्रजतीत्यत्र पाकप्रयोज्यं गमनं वाक्यार्थः। एतद्विहितचतुर्थ्युपकारायैव भाववचनाः (५।३।१५) इति सूत्रेण तुमोऽर्थे भावार्थका घञादयो विशिष्य विहिताः। चतुर्थीं विना क्रियार्थभाववचनप्रयोगस्य क्वाप्यदर्शनात्। तथा च क्रियायाः क्रियान्तरार्थस्वरूपः तुम्प्रत्यार्थ एव चतुर्थ्या अप्यर्थः। तत्रैतावान् विशेषः क्रियाद्वयस्य धातुद्वयलभ्यतया प्रयोज्यत्वमात्रं चतुर्थ्यर्थः, तस्यैव तुमर्थत्वात्। तथा च साधुत्वार्थिकैव चतुर्थीति यदुक्तं तदपीदृशतात्पर्यकमेव। एवं च पाकाय व्रजतीत्यादौ वाक्यार्थः पूर्ववदेव बोध्यः ।।२।२।६१।।

## गम्यस्याऽऽप्ये ।।२।२।६२।।

अनेन सूत्रेणाप्रयुज्यमानस्य तुमुन्नन्तस्य कर्मणि चतुर्थी विधीयते। गम्यशब्दस्याप्रयुज्यमानार्थकत्वं च बृहद्वृत्तौ विवृतम्–"यस्यार्थो गम्यते न च शब्दः प्रयुज्यत" इत्यनेन कथनेन। तुमुनः क्रियार्थायां क्रियायां विधानं प्रसिद्धम् तदन्तस्याप्रयुज्यमानस्याऽप्यर्थो यत्र प्रतिभासते, तत्र तदाप्यवाचकान्नाम्नश्चतुर्थी विधीयते। क्रियायाश्च क्रियार्थत्वं फलविधया क्रियाप्रयोजकत्वम् यथाऽन्नं भोक्तुं व्रजतीत्यत्रान्नभोजनफलस्य गमनप्रयोजकत्वम्। तुमुनः फलज्ञानद्वारकप्रयोज्यत्वमर्थः। तथा चान्नकर्मकभोजनप्रयोज्यं गमनमिति वाक्यार्थः। एवमन्नाय व्रजतीत्यत्रापि बोध्यम्। अत्र भोक्तुमित्यस्याप्रयोगेऽपि भोजनकर्मभूतान्नपदादेव चतुर्थी भवति। तथा च एधेभ्यो व्रजतीत्यस्य एधनानेतुं व्रजतीत्यर्थकतयाऽऽनेतुमिति तुमुन्तस्याप्रयोगेऽपि तदर्थस्य गम्यमानत्वेन तत्कर्मण एधपदाच्चतुर्थी भवति। अत्र प्रकृत्यर्थस्य एधस्य कर्मतासम्बन्धेनानयने तस्य निरूपकतया प्रयोज्यत्वे तस्य स्वरूपेण गमनेऽन्वय इति एधानयनप्रयोज्यं (वनकर्मकं) गमनमिति वाक्यार्थबोधः। पटमुत्पादयितुं यतत इत्यर्थे पटाय यतत इति प्रयोगे पटोत्पादप्रयोज्यो यत्नो वाक्यार्थः। न चात्र विषयत्वं चतुर्थ्यर्थः पटविषयताको यत्नो वाक्यार्थः इति वाच्यम्, चतुर्थ्या विषयत्वार्थत्वेऽनुशासनाभावात्। विषयत्वसामान्यस्य चतुर्थ्यर्थत्वे पटत्वाय यतत इति प्रयोगापत्तेः। साध्यत्वस्य तथात्वे पटार्थतन्तुसाधने पटाय यतत इति प्रयोगानुपपत्तेः। उद्देश्यत्वस्य तथात्वे (चतुर्थ्यत्वे) ज्ञानकामस्तपसे यतते इति प्रयोगानुपपत्तेः। न च पटाय यतत इत्यत्र तादर्थ्यविज्ञानात् चतुर्थ्या जनकत्वमर्थः, पटजनको यत्नो वाक्यार्थः इति वाच्यम्, तथा सति तन्तुसाधने पटानुत्पादे पटाय यतत इति प्रयोगस्याप्रामाण्यापत्तेः। सूत्रस्थपदकृत्यानि बृहद्वृत्तौ प्रदर्शितान्येवेति न तदर्थं प्रयत्यते ।।२।२।६३।।

## मन्यस्यानावादिभ्योऽतिकुत्सने ।।२।२।६४

अनेन सूत्रेण कुत्सनकरणभूतान्नाम्नो मन्यतेः कर्मणश्चतुर्थी विकल्पेन विधीयते। श्यन्–विकरणनिर्देशाच्च तानादिकमनुतेः कर्मणो न सा। न त्वां तृणाय तृणं वा मन्य इति प्रयोगः। तत्र कर्मण्येवैषेति शाब्दिकमतम्। तार्किकास्तु– इह द्वितीयाचतुर्थ्योः प्रतियोगित्वमर्थमाहुः। अथवा साधुत्वार्थिकैव चतुर्थीत्याहुः नञश्च सादृश्यमप्राशस्त्यरूपोऽपकर्षो वाऽर्थः। तथा च तृणप्रतियोगिकेन सादृश्ये– नापकर्षेण वा त्वां जानामीत्यन्वयबोधः। तदनन्तरमनादृ–

तस्त्वमिति वैयञ्जनिको बोधः। यत्र तु व्यञ्जनयाऽप्य-नादरो न प्रतीयते तत्र न चतुर्थी- यथा 'वृषलं न द्विजं मन्ये' इत्यत्र। दृश्यते च वैयञ्जनिकबोधसापेक्षा पदानां साधुता- 'वद-वद जितः शत्रुः ? न हतो जल्पँस्त्वतवा-स्मीति" इत्यादौ हर्षभयादौ द्योत्ये द्विर्वचनं साधु नान्यथा। न चात्र हर्षादिः शाब्दप्रतीतिविषयः, तद्वाचकपदाभावात् किन्तु व्यञ्जनयैव हर्षादिबोधः। भवतु वा तृणसदृशतदप-कृष्टादौ लक्षणा। लक्ष्यार्थस्य तादात्म्येन त्वत्पदार्थेऽन्वयः, नञ्पदमनादृतवाचि, तृणवदनादृतं त्वां मन्ये इत्यन्वय-बोधः।

अन्ये तु न त्वां तृणाय मन्ये इत्यादौ तृणपदस्य तृण-सदृशोऽर्थः, तस्य त्वत्पदार्थे भेदान्वयोपपादिका कर्मानु-वादिका द्वितीयावच्चतुर्थ्यनुशिष्यते कर्मविशेषणे, न तु मुख्ये कर्मणि। सूत्रेऽतिकुत्सन इत्यनेन व्याप्यो इत्यनेन चानादरनिमित्तसादृश्यप्रतियोगिनः कर्मविशेषणस्य वाच-कात्पदात् चतुर्थी विधीयते। नञोऽनादरोऽर्थः। आदरो नामेष्टानिष्टसाधनत्वेन प्रतिसन्धानम्, तद्भेदश्चानादरः भेदो हि त्वत्कर्मकमननत्वावच्छेदेनान्वेति। ततस्त्वत्पदार्थस्य हिताहितान्यतरासाधनत्वमर्थतः प्रतीयते इत्याहुः।

अत्र चतुर्थ्याः सादृश्यमर्थः नञ्पदं तात्पर्यग्राहकम्, क्वचिन्नञं विनाऽपि प्रयोगस्य दर्शनात्। यथा- "तृणाय मत्वा रघुनन्दनोऽथ बाणेन रक्षः प्रधनान्निरास्थत्" इति भट्टिकाव्यप्रयोगः। यथा वा- "तृणाभ्यां मन्यते कामक्रोधौ यः पञ्च कारयन्" इति नैषधीयसप्तदशसर्गे प्रयोगः। अत्र नवीनपुस्तकेषु- "न तृणे मन्यते कामक्रोधौ यः पञ्च कारयन्' इति नञ्सहितोऽपि पाठः समुपलभ्यते। पञ्च-महापातकानि कारयन् यः (लोभः) एकद्विपातककारिणौ कामक्रोधौ तृणाभ्यां सदृशं मन्यते, तृणवदपि न मन्यते- ततोऽप्यपकृष्टौ मन्यते इति वा वाक्यार्थबोधः। तत्र पूर्वो-ल्लिखितपाठ एव प्रकृतानुकूलः। नञ्पदं विनापि अना-दरस्य प्रतीतिरित्येव प्रकृते प्रतिपाद्यत्वात्। आपिशलिरपि चतुर्थ्याः सादृश्यबोधकत्वमेवाह। तथा हि तदीया कारिका—

सदृशत्वं तृणादीनामनुक्ते मुख्यकर्मणि।
द्वितीयावच्चतुर्थ्याऽपि बोध्यते बाधितं यदि॥" इति।

बाधितमित्यस्यायुक्तसादृश्यबोधकमित्यर्थः। तेन 'मुखं पद्मं मन्ये' इति युक्तसादृश्यबोधने न चतुर्थी तत्र कुत्साया अप्रतीतेः। एवं न त्वां तृणाय मन्ये इत्यादौ नञा सहिते, तेन शून्ये वा प्रयोगे चतुर्थ्याः सादृश्यमर्थः तच्च मन्यकर्मणि त्वत्पदार्थेऽन्वेति। तथा तृणसदृशत्वत्कर्मकमननाश्रयोऽह-मिति शाब्दबोधः। ततोऽनादृतस्त्वमिति पाणिको बोधो वैयञ्जनिकः आनुमानिको मानसो वेत्यन्यदेतत्। प्राथमिके शाब्दे बोधेऽनादरो न भासते। अत एवान्यो अनादरे गम्य-माने इत्येव व्याचक्षते। मन्यकर्मणि सादृश्यान्वयबोधने चतुर्थ्याः द्वितीयासमानवचनत्वं तन्त्रम्। अत एव "तृणा-भ्यां मन्यते कामक्रोधौ" इति श्रीहर्षप्रयोगे द्विवचनमुप-पद्यते, त्वां तृणाभ्यां न मन्ये, युवां तृणाय न मन्ये इति प्रयोगश्च नोपपद्यते। स्वमते च नञः प्रयोगाभावेऽति-कुत्साया अभाव इति त्वां तृणं मन्ये, सुवर्णं तृणं मन्ये इत्यादौ न चतुर्थीति प्रतिपादितं वृत्तौ। परमन्ये पाणिनी-यादयो नञोऽभावेऽपि कुत्सामिच्छन्ति, प्रयुञ्जते च चतु-र्थीमिति प्रागुदाहृतभट्टिप्रयोगादिभ्योऽवगम्यते। अयमेवार्थः 'कुत्साभावेऽपीच्छन्त्येके' इति बृहद्वृत्तिग्रन्थेन प्रतिपादितः। पदकृत्यं चान्यत् वृत्तावेव स्पष्टमिति न तद्विषये विस्तारोऽ-पेक्षितः॥२।२।६४॥

## स्पृहेर्व्याप्यं वा ॥२।२।२६॥

अनेन सूत्रेण स्पृह्यतेः कर्मणः सम्प्रदानसंज्ञा विधीयते, सम्प्रदाने च चतुर्थी विहितेति स्पृह्यतेः कर्मणि चतुर्थी सिद्ध्यति। तत्र स्पृहेरभिलाषोऽर्थः। चतुर्थ्या विषयत्व-मर्थः। 'पुष्पेभ्यः स्पृहयति' इत्यत्र एवं पुष्पविषयताका-भिलाषाश्रय इत्यर्थबोधः।

"स्त्रीषु प्रवीरजननी जननी तवैव,
देवी स्वयं भगवती गिरिजापि यस्यै।

त्वद्दोर्वशीकृतविशाखमुखावलोक-

व्रीडाविदीर्णहृदया स्पृहयांबभूव ॥"

इत्यत्र परशुरामस्तुतौ पार्वत्या रेणुकासदृशी भवेय-मित्यभिलाषः । तत्राभिलाषे रेणुकाविषयत्वस्यानपायान्न चतुर्थ्या अनुपपत्तिः । यदि च विषयत्वमात्रस्य चतुर्थ्यत्वे पुष्पत्वं स्पृहयतीति प्रयोगापत्तिरिति- उद्देश्यत्वमेवात्र चतुर्थ्यर्थ इत्युच्यते तर्हि प्रकृतप्रयोगे परशुरामजनन्या रेणु-कायाः तत् नास्ति किं तु तत्सादृश्यस्येति यस्यै भगवती स्पृहयतीति चतुर्थी कथमुपपद्यतेत्युच्यते, तदा स्वीक्रियतां तादात्म्येनोद्देश्यप्रकारकोऽभिलाषः धात्वर्थः । मुनिरहं स्या-मितीच्छाकारदर्शनात्, मुनिरिष्टसाधनम् मुनिरहमिति ज्ञान-द्वयेन विशिष्टज्ञानेन वा तथाविधेच्छाजननसंभवात् । तथा चोक्तस्थले परशुरामजननी ( रेणुका ) भवेयमित्यभिलाष एव स्पृहा तत्र रेणुकाया उद्देश्यत्वं निराबाधमिति चतुर्थ्या नानुपपत्तिरिति सम्प्रदायः । वस्तुतस्तु पुष्पेभ्यः स्पृहयती-त्यत्र पुष्पादीनां सिद्धत्वादुद्देश्यत्वं न सम्भवतीति नोद्देश्यत्वं चतुर्थ्यर्थः, किं तु सूत्रे आप्यपदोपादानात् आप्तिविषय एव । आप्यं आप्तिविषयः, आप्तिश्च सम्बन्धः सैव चात्र चतु-र्थ्यर्थः । स च पुष्पेभ्यः स्पृहयतीत्यत्र स्वत्वं संयोगश्च । रेणुकायै स्पृहयतीत्यत्र तादात्म्यसम्बन्धस्तूद्देश्यितया स्पृहाया-मन्वेति, तथा चपुष्पसंयोगस्पृहाश्रयः, रेणुकातादात्म्यस्पृहाश्रय इत्येवंप्रकारेणान्वयबोधः । कान्तस्य स्पृहेत्यत्र शेषष्ठ्या विषयत्वमर्थः स्पृहायामन्वेति ।

ननु स्पृहण् ईप्सायामिति धात्वर्थनिर्देशेन स्पृहेरिच्छा-र्थकत्वं, तत्रेच्छामात्रार्थकत्वे फलावाचकत्वादकर्मकत्वं विषयतारूपफलवाचकत्वेऽपि विषये निरवकाशया सम्प्रदान-संज्ञया कर्मसंज्ञाबाधाद् ईप्सितभेदस्य कर्मप्रत्ययार्थस्यानन्व-याद्वा कर्मप्रत्ययानुत्पत्तेः,

"स्पृहणीयगुणैर्महात्मभिश्चरिते वर्त्मनि यच्छतां मनः ।
विधिहेतुरहेतुरागसां विनिपातोऽपि समः समुन्नतेः ॥"

इति भारविकविप्रयोगादिषु कृत्यप्रत्ययानुपपत्तिः इति चेत्, नः दानीयो विप्र इत्यादिप्रयोगदर्शनात् सम्प्रदानेऽप्यनी-यस्य प्रवृत्तेः स्पृहणीय इत्यत्र कृत्यप्रत्ययस्य सम्प्रदानार्थ-त्वात् । एतेन

"परस्परेण स्पृहणीयशोभं
न चेदिदं द्वन्द्वमयोजयिष्यत् ।
अस्मिन्द्वये रूपविधानयत्नः
पत्युः प्रजानां विफलोऽभविष्यत् ॥"

इति ( रघुवंशः स० ६ ) कालिदासादिप्रयोगा अपि समाहिताः ।

हरदत्तस्तु यत्रेच्छामात्रार्थत्वात् फलावाचकः स्पृहिस्तत्र विषयत्वमुद्देश्यत्वं वा चतुर्थ्यर्थः यत्र च विषयतास्वरूप-फलवाचकस्तत्र कर्मप्रत्ययो निराबाध एव । अत एव "स्पृहयन्ति गुणान्मनीषिणः परिवादं तु परस्य दुर्जनाः" इति । एवं च स्पृहणीय इत्यादौ कर्मण्येव कृत्यप्रत्ययः । यत्र च विषयता शेषत्वेन विवक्षिता तत्र शेषषष्ठ्येव ; यथा कुमार्य इव कान्तस्य त्रस्यन्ति स्पृहयन्ति च" इत्यत्रे-त्याह ।

वस्तुतस्तु यत्र स्पृहेरुत्कटेच्छार्थस्तत्रैवाप्तिश्चतुर्थ्यर्थः, यत्र चेच्छासामान्यमर्थस्तत्र चतुर्थ्या अप्रसक्तेर्न कर्मप्रत्यया-नुपपत्तिः । एतदेव च सम्प्रदानसंज्ञापक्षे धातोरकर्मकत्व-मित्यादि वृत्तिग्रन्थेनापि प्रतिपादितम् । उत्कटेच्छार्थकतया रुच्यर्थकत्वेऽपि स्पृहेर्योगे ईप्सिते ( आप्ये ) चतुर्थीविधानं प्रीयमाणे निषेधमपि सूचयति । अतश्चैवाय पुष्पेभ्यः स्पृ-हयतीति न प्रयोगः, इति आप्यग्रहणं प्रीयमाणेऽधिकरणे च सम्प्रदानता निषेधार्थमतः पुष्पेभ्यो वने स्पृहयतीत्यत्र वनस्य न सम्प्रदानसंज्ञेति- आप्यमिति किमिति पदकृत्यप्रदर्शनेन सूचितमिति ॥२।२।२६॥

## क्रुद्-द्रुहेर्ष्यासूयार्थानां यं प्रति कोपः ॥२।२।२७॥

क्रोध-द्रोह-ईर्ष्या-असूया-एतदर्थकैर्धातुभिर्योगे कोप-विषयस्य सम्प्रदानसंज्ञा विधीयते, ततश्च चतुर्थी भवति ।

अत्र क्रोधादयोऽर्था व्याख्याता वृत्तौ अमर्षः क्रोध इत्यादिना । तच्चाग्रेऽपि यथोदाहरणं प्रदर्शयिष्यते । सूत्रे– यत्र– यत्र कोपः, येन कोप इत्याद्यपहाय यं प्रतीत्युक्त्या चतुर्थ्या नानाविधोऽर्थो ज्ञाप्यते । अत एव द्रोहादयोऽपि कोपप्रभवा एव गृह्यन्ते– इति शिष्यस्य कुप्यति विनयार्थम्, धनिनो द्रुह्यति धनार्थी– इत्यादौ न संप्रदानसंज्ञेति वृत्तौ प्रतिपादितम् । एषु कोपप्रभवत्वाभावो द्रोहादीनां स्पष्टः । क्रोधमात्रार्थकाः फलावाचकत्वादकर्मकाः । मैत्राय क्रुध्यति, कुप्यतीत्यादौ चतुर्थ्या द्विष्टतालक्षणं विषयत्वमर्थः । तथा च मैत्रविषयताकदोषाश्रयत्वं वाक्यार्थः । द्विषिस्तु द्विष्टतारूपं फलं द्वेषं चाभिधत्ते इति न क्रुधिपर्यायः, तद्योगे न चतुर्थी किन्तु द्वितीया, अत एव 'शत्रुं द्वेष्टि' इत्येव साधुः प्रयोगः न तु शत्रवे द्वेष्टीति । द्रुहेर्द्विष्टाचरणमर्थः, द्विष्टाचरणं चापकार इति अपचिकीर्षा द्रोह इति विवृतम् । मैत्राय द्रुह्यतीत्यत्र चतुर्थ्या द्वेषान्वयि समवेतत्वमर्थः । तथा च देवदत्तसमवेतद्वेषविषयाचाराश्रयत्वं वाक्यार्थः । ईर्ष्यतेः परक्रियादिगोचरो द्वेषोऽर्थः । विशेषतश्च परं स्वापेक्षया क्रियादिभिः सम्पन्नमभिवीक्ष्य तदसहननिमित्तं चेतसः प्रज्वलनमेव ईर्ष्यतिनोच्यते तदुक्तम्– "ईर्ष्या परसम्पत्तौ चेतसो व्यारोष" इति । चतुर्थ्याः क्रियाद्यन्वयि सम्बन्धसामान्यमर्थः । 'मैत्रायेर्ष्यति' इत्यत्र मैत्रसम्बन्धिसम्पदादिगोचरद्वेषाश्रयत्वमर्थः । यत्र तु क्रिया फलविधयेर्ष्यतिनोच्यते तत्र क्रियाविषये कर्मणि द्वितीयैव– 'यथा भार्यामीर्ष्यति' इति । अत्र 'मैनामन्यो द्राक्षीत्' इत्यभिप्रायत्वेन– भार्याविषयकमन्यकर्तृकदर्शनं न सहते इत्येवार्थः । गुणेषु दोषाविष्करणमसूयेति वृत्तिः । तथा चासूयतेः दोषत्वेनारोपणमर्थः, चतुर्थ्याः सम्बन्धित्वं समवेतत्वं वाऽर्थः । 'मैत्रायासूयति' मैत्रसम्बन्धिगुणं दोषत्वेनारोपयतीत्यर्थः । वादिने असूयतीत्यत्र वादिसमवेतगुणं भ्रमत्वेन ख्यापयतीत्यर्थः । इति प्राच्यवैयाकरणादिसम्प्रदायः ।

अन्ये च क्रुध्यत्यादेः क्रोधोऽर्थः स चामर्षस्तच्चासहिष्णुत्वम् । अत एव 'अमर्षः क्रोधः' इति वृत्तिः कोपक्रोधामर्षरोषादीनां पर्यायत्वममरोऽप्याह । असहिष्णुत्वं च स्वानिष्टानुकूलपरक्रियागोचरो द्वेषः । चतुर्थ्यास्तु क्रियान्वय्याधेयत्वमर्थः । मैत्राय क्रुध्यति चैत्र इत्यत्र स्वानिष्टानुकूलमैत्रवृत्तिक्रियागोचरद्वेषाश्रयश्चैत्र इति वाक्यार्थबोधः । अनिष्टानुकूलव्यापारो द्रुहेरर्थः, अत एव अपचिकीर्षा द्रोह इति वृत्तिः । चतुर्थ्यास्तु अनिष्टान्वय्याधेयत्वमर्थः । अनिष्टं च दुःखं सुखाभावश्च । मैत्राय द्रुह्यति चैत्र इत्यत्र मैत्रवृत्तिदुःखानुकूलव्यापारानुकूलकृतिमांश्चैत्र इत्यन्वय–बोधः । 'सपत्न्यै द्रुह्यति' इत्यत्र सपत्नीवृत्तिसुखाभावानुकूलव्यापारानुकूलकृतिमतीत्यन्वयबोधः । उत्कर्षगोचरो द्वेष ईर्ष्यतेरर्थः अत एव– 'परसम्पत्तौ चेतसो व्यारोष' इति वृत्तिः । चतुर्थ्या उत्कर्षान्वयि आधेयत्वमर्थः । मैत्रायेर्ष्यति चैत्र इत्यत्र मैत्रवृत्ति-उत्कर्षगोचरद्वेषाश्रयश्चैत्र इत्यन्वयबोधः । यत्र तु क्रिया फलतया, तद्गोचरो द्वेषो व्यापार–तयेर्ष्यतिना प्रत्याय्यते, फलीभूतक्रियान्वयिनि भार्यादौ न कोपः स्वानिष्टानुकूलव्यापारविरहात्, तत्र फलान्वयिनि द्वितीयैव । यथा भार्यामीर्ष्यतीत्यत्र परकर्तृकदर्शनं फलं, द्वेषो व्यापार ईर्ष्यतेरर्थः । दर्शने द्वितीयार्थो विषयत्वं, विषयत्वसम्बन्धावच्छिन्नाधेयत्वं वा भार्याकर्मकान्यकर्तृक–दर्शनगोचरद्वेषाश्रयत्वं वाक्यार्थः । एतच्च 'कोप इति किमि'ति प्रकृत्य भार्यामीर्ष्यति मैनामन्यो द्राक्षीदिति प्रत्यु–दाहरणेन प्रकटितम् । एवं यत्र क्रियान्तरद्वेषोऽपीर्ष्यतिना प्रत्याय्यते तत्रापि द्वितीयैव, यथा शिष्यमीर्ष्यति मैनमन्योऽ–ध्यापयेदिति । अन्यकर्तृकक्रियाद्वेषस्य धात्वर्थत्वे तु उक्ता–र्थानामप्रयोगात् अन्यस्मै द्रष्ट्रे, अन्यस्मै अध्यापकाय च ईर्ष्यतीति न प्रयोगः; फलीभूतक्रियान्वयिनि कर्मणि स्वा–निष्टानुकूलक्रियाविरहायोगात् न कोपविषयत्वमिति न तत्र चतुर्थीति ।

एवं गुणे द्वेषारोपोऽसूया असूयतेरर्थः । चतुर्थ्या गुणान्वय्याधेयत्वमर्थः । मैत्रायासूयति चैत्र इत्यत्र मैत्रवृत्तिधैर्यादिगुणधर्मिकचौर्यादिदोषत्वारोपकर्ता चैत्र इत्यन्वय–बोधः । एवं सपत्न्यै असूयतीत्यत्र सपत्नीवृत्तिपतिसेवनादिकं कार्मणत्वेनारोपयतीति वाक्यार्थबोधः । वादिनेऽसूयतीत्यत्र

वादिवृत्तिप्रमाणवाक्यमप्रमाणत्वेनारोपयतीत्यर्थः । गुणा दोषाश्च प्रतिस्विकरूपेण प्रकरणादिवशादसूयतिनोपस्थाप्यन्ते। गुणास्तु निन्दाप्रयोजकान्यपदार्थाः, ते च वैशेषिकादिप्रसिद्धाः द्रव्यगुणक्रियासामान्यादयः प्रत्येतव्याः। यच्च काव्यप्रकाशे

"जाने कोपपराङ्मुखी प्रियतमा स्वप्नेऽद्य दृष्टा मया,
मा मा संस्पृश पाणिनेति रुदती गन्तुं प्रवृत्ता पुरः।
नो यावत्परिरभ्य चाटुशतकैराश्वासयामि प्रियां
भ्रातस्तावदहं शठेन विधिना निद्रादरिद्रीकृतः ॥"

इत्यत्र विधिं प्रत्यसूया व्यज्यत इत्युक्तम् । तत्रेदमाकूतम्—विधेर्नैसर्गिको गुणो निद्रादरिद्रीकरणम्, तच्च शाठ्यहेतुकत्वरूपेण दोषत्वेन कामिना स्वप्नसमागमविच्छेदविह्वलेन समारोपितमिति गुणे दोषारोपरूपोऽसूयाख्यो भावोऽभिव्यज्यत इति" इति साम्प्रदायिकाः। वस्तुतस्तु अनिन्द्ये विधौ विधित्वे वा शठतादात्म्यस्य शठत्वतादात्म्यस्य वा समारोपः स्वप्नसमागमविच्छेदविकलेन कामिना कृत इत्यनिन्द्ये दोषारोपरूपाऽसूयाभिव्यक्तेति पक्षः साधीयान् प्रतिभाति। दोषास्तु निन्दाप्रयोजका बोध्याः। एतेन दुःखाय नरकाय वाऽसूयतीति न प्रयोग इत्यादिकमनुसन्धेयम् ॥२।२।२७॥

## परिक्रयणे ॥२।२।६७॥

अनेन सूत्रेण परिक्रयस्य साधनवाचकाद् गौणान्नाम्नश्चतुर्थी विधीयते। परिक्रयणपदं भावसाधनमिहोत करणसाधनमिति संशयेऽन्यमते भावसाधनत्वस्य प्रसिद्धावपि स्वमतेऽस्य करणसाधनत्वमेवेति प्रतिपादयितुं परिक्रयणशब्दं व्युत्पादयति—**परिक्रीयते नियतकालं स्वीक्रियते येनेत्यादिना**। तथा येन वेतनमूल्यादिना परिच्छिन्नेन वस्तुना कस्यचित्कालस्य कृते किञ्चिद्वस्त्वात्माधीनं क्रियते तदेवेह परिक्रयणशब्दप्रतिपाद्यमिति लभ्यते। 'क्रयण' इत्यनुक्त्वा 'परि' पूर्वकस्य ग्रहणेन यो विशेषः प्रतिपाद्यः स शब्दन्यासमहार्णवे विवृतः— **परिशब्दोऽत्र प्रत्यासत्तिं द्योतयति**—इति। प्रत्यासत्तिश्च सामीप्येन परिच्छेदः। तथा च क्रयकालसमीपवर्त्ती कश्चन परिच्छिन्नः कालः स्वीकारस्यावधित्वेनान्तर्भूत इति परिशब्देन द्योत्यत इत्याशयः। स च कालो मासत्वेन वर्षत्वेन, येन केन वा कालपरिमाणेन परिच्छिन्नो भवत्विति तत्र विशेषे नादरः। वेतनादिदानपूर्वको यः स्वत्वानुकूलो व्यापारः स क्रयः। स नियतकालावच्छेदेनैकत्र विद्यमानस्य स्वत्वस्य जनको यदि तदा परिक्रय इत्युच्यते। परिक्रयजन्यं स्वत्वं तत्रैव वस्तुनि भासमानं (नियतकालम्) अवस्थाय नश्यति। मासानन्तरन्तु स्वत्वान्तरमुत्पद्यते। "व्यवस्थाभेदेनैकमेव वा स्वत्वं यद्यत्कालावच्छिन्नवस्तुविषयकं तदा तदा धर्मव्यवहारप्रयोजकम्" इत्यपि लीलावतीप्रकाशे वर्धमानोपाध्यायैरुद्भावितम्।

स्वतन्त्रास्तु — भृतिदानजन्यनियतकालकस्वत्वजनकः परिग्रहो परिक्रय इत्युच्यते। तत्र भृतौ तादात्म्येन शतादेरन्वयः। संसर्गतयालब्धकरणत्वस्यानुवादिका चतुर्थी तृतीया च भवति— 'ज्योतिष्टोमेन यजेते' त्यत्र तृतीयावदित्याहुः। वस्तुतस्तु भोगाजनकनियतकालकस्वत्वफलको व्यापारः परिक्रयः। स च व्यापार इच्छैव। भृतिः शतादिका मासादिभोगव्यवस्थया गृहीता, मासादिव्यापकं परकीयस्वत्वं जनयति, न तु विक्रयदानादिकं परिक्रेतृकृतविक्रयदानादेरसिद्धेः। भोगस्य विक्रयो दानं च परिक्रेतुरपि सम्भवति। एवं शताय शतेन वा परिक्रीतो वृषभ इत्यत्र चतुर्थी तृतीययोः करणत्वं व्यापारोऽर्थः, स च व्यापारः परस्वत्वोपहितं दानं, शतवृत्तिस्वत्वं प्रति तादात्म्येन शतस्य जनकत्वात्। स्वत्वोपहिते दाने स्वत्वद्वारकं शतस्य जन्यत्वमिति शतव्यापारत्वमक्षतम्। यदि च भाविदानेन परिक्रयव्यवहारो न गौणः, तदा शतस्य स्वज्ञानद्वारकं दाने जन्यत्वमिति तद्व्यापारत्वं बोध्यमिति शतस्य जन्यतया कर्मतया च व्यापारे दाने, तस्य परिक्रयफले तथाविधस्वत्वेऽन्वयः, तत्रैव स्वत्वे परिक्रयव्यापारस्येच्छाया उद्देश्यत्वेनान्वयः तस्य स्वत्वस्य कर्मक्तप्रत्ययार्थे आश्रयेऽन्वयः। यदि च परिक्रयकर्मणो विद्यमानतायामपि परिक्रयव्यवहारस्तदा

क्तप्रत्ययार्थो निरूपकत्वं तत्रैव तस्य स्वत्वस्यान्वयस्तथा च शतजन्यतत्कर्मकदानजन्यस्येच्छोद्देश्यस्य भोगजनकनियत-कालकस्वत्वस्याश्रयो निरूपको वा वृषभ इत्यन्वयबोधः।

यत्र व्यवस्थितकालकं न स्वत्वं भृतिशेषस्य प्रत्यर्पणेन परिक्रेयस्यापचारेण वा, तत्र परिक्रयव्यवहारार्थं तथाविध-स्वत्वोद्देश्यिकेच्छा परिक्रीणातेरभिधेयत्वेनोक्ता। नियत-कालकस्वत्वं प्रति तु भृतिदानं कारणमत एव 'परिक्रीयते नियतकालं स्वीक्रियते येने' ति बृहद्वृत्तावुक्तम्। न चात्र वेतनदानादिजन्यनियतकालकस्वत्वानुकूलव्यापारः परिक्रीणा-तेरर्थः परिक्रय इति वाच्यम्, तथा सति नियतकालमित्यु-पादानवैयर्थ्यापत्तेः। वेतनदानादिजन्यस्वत्वस्यावश्यं नियत-कालकत्वात्, वेतनाय शताय, वेतनेन शतेन वा परिक्रीत इत्यादावनन्वयप्रसङ्गाच्च। भृतेस्तच्छेषस्य प्रत्यर्पणं व्य-वस्थितकालनाशो वा वेतनदानजन्यस्वत्वनाशं प्रतिहेतुरित्या-स्तां विस्तरः ॥२।२।६७॥

## शक्तार्थ–वषड–नमः स्वस्ति–स्वाहा–स्वधाभिः ॥२।२।६८॥

अनेन सूत्रेण शक्तार्थादिभिर्योगे चतुर्थी विधीयते। तस्याश्च यथायथं सम्बन्धः सम्प्रदानम् उद्देश्यत्वादिश्चार्थः। शक्तो मैत्रश्चैत्रायेत्यादौ शक्तशब्दार्थो निग्राहकत्वम्। चैत्र-स्य निग्राहको मैत्र इत्यादिर्बोधः। स्वाम्यमपि शक्तार्थस्तथा च प्रभवति मैत्रश्चैत्रायेत्यत्र स्वाम्यस्यापि प्रतीतिः, तथा च चैत्रनिरूपितस्वाम्यस्य निग्राहकत्वस्य वाऽधिकरणं मैत्र इति शाब्दबोध इति नवीनाः। अलमादयोऽपि शब्दाः शक्तार्थाः। प्रभुशब्दोऽपि तथा। क्वचिच्च प्रभुशब्दयोगे षष्ठ्यमपि दृश्यते-यथा—

प्रभुर्बुभूषुर्भुवनत्रयस्य यः,
शिरोतिरागाद्दशमं चिकीर्षुः,
अतर्कयद्विघ्नमिवेष्टसाहसः,
प्रसादमिच्छासदृशं पिनाकिनः।
( शिशुपालवधे प्रथमे सर्गे )

इत्यत्र माघकवेः षष्ठीप्रयोगः। देवतासम्प्रदानकं कर्म वषट्पदार्थः– वषडग्नये इत्यादौ अग्न्युद्देश्यकस्य देवतासम्प्र-दानस्य कर्मेत्यन्वयबोधः।

नमः पदस्य नमस्कारोऽर्थः, सचोत्कर्षप्रतिपत्त्यनुकूलो व्यापारः। तत्रोत्कर्षप्रकारकप्रतिपत्त्यन्वयि विशेष्यित्वं सम-वेतत्वं च द्वयं सम्बन्धः, स एव च चतुर्थ्यर्थः। तथा च अर्हद्भ्यो नम इत्यत्र– अर्हत्समवेत– तद्विशेष्यताकोत्कर्ष–प्रकारकप्रतिपत्त्यनुकूलो व्यापारो वाक्यार्थः। व्यापारस्तु नमः पदप्रयोक्तुरेव बोध्यः। यदा चाभिवाद्यानामर्हदादीनां स्वतो नोत्कर्षप्रतीतिरित्युच्यते, तदा चोत्कर्षप्रतिपत्तीच्छैव नमः–पादार्थो वाच्यः। तथार्हत्समवेतोत्कर्षप्रतिपत्तेर्नित्यतया व्या-पारस्य तदनुकूलत्वविरहेऽपि न क्षतिः। तेषु जन्यायास्ता-दृशप्रतिपत्तेर्विरहेऽपि तदुद्देश्यकेच्छाया नमस्कर्तरि सम्भ-वात्; उत्कर्षप्रतिपत्तेरुद्देश्यतयेच्छायामन्वयात्।

दानकर्मापि नमः पदार्थः। चतुर्थ्याः सम्प्रदानत्वमर्थः। पुष्पं महावीराय नमः इत्यादौ तथैव प्रतीतेः। सम्प्रदानत्वं तु प्रीतिरेव। प्रीतिस्तु जनकतया दानेऽन्वेति– तथा च महावीरप्रीतिजनकदानकर्मपुष्पमिति बोधः। "ब्राह्मणाय गौर्नमः" इति वाक्यं प्रमाणमपि दानार्थविहितवाक्यलक्ष-णानाक्रान्तत्वान्न प्रयुज्यते।

"नामगोत्रे समुच्चार्य सम्यक् श्रद्धान्वितो ददत्।
संकीर्त्य देशकालादि तुभ्यं सम्प्रददे इति ॥"

इति स्मृत्या 'सम्प्रददे' इत्यन्तवाक्यस्यैव दानवाक्य-त्वात्। ननु ब्राह्मणादिसम्प्रदानके दाने 'नमः' इत्यन्त-वाक्यस्य विहितत्वाभावेनाप्रयोगेऽपि प्रीत्यादिना दाने 'मित्राय गौर्नमः' इत्यादिवाक्यप्रयोगः स्यादिति चेन्न; मन्त्रकरणकत्यागकर्मणो नमः पदार्थत्वात्; प्रीत्यादिना दाने मन्त्रकरणकत्वाभावात्। वैधे हि कर्मणि मन्त्राणां करणत्वं,

तच्च त्यागादिवैधकर्मजन्यं परमापूर्वं वा प्रति अङ्गापूर्वद्वारा जनकत्वम्। अत एव जुहुयाद्वारुणैर्मन्त्रैरित्यादौ मन्त्राणां करणत्वार्थिका तृतीया। तथा च नमः पदार्थैकदेशे मन्त्र-करणकत्यागे उद्देश्यत्वं सम्प्रदानत्वं ( प्रीतिरिति यावत् ) चतुर्थ्यर्थो जनकतयाऽन्वेति। महावीरप्रीतिजनकमन्त्रकरणक-त्यागकर्म पुष्पमिति ( महावीराय पुष्पं नमः ) इत्यत्रान्वय-बोधः। भवति च 'महावीराय नमः' इति वाक्यं मन्त्रः, चतुर्थ्यन्तपदघटितनमोऽन्तवाक्यस्य मन्त्रत्वपरिभाषणात्। ईदृशवाक्यरूपमन्त्रस्य देवतोद्देश्यकत्याग एव करणत्वं, न तु ब्राह्मणाद्युद्देश्यकत्याग इति 'ब्राह्मणाय गौर्नमः, इति वाक्यमप्रमाणमेव। यत्र तु ब्राह्मणस्य देवतात्वविवक्षा तत्र दानाङ्गब्राह्मणपूजनादौ पुष्पं ब्राह्मणाय नमः इति वाक्यं प्रमाणमेव।

## अथ मीमांसानुसारं देवतात्वविचारः।

देवतात्वावगतिस्त्रिधा, तद्धितप्रत्ययेन, चतुर्थीश्रुत्या मन्त्रलिङ्गेन च। तत्र तद्धितनिमित्तका देवतात्वश्रुतिः 'ऐन्द्रं दधि' इत्यादौ अत्र हि इन्द्रोदेवताऽस्येत्यर्थे तद्धित-प्रत्ययविधानम्। चतुर्थ्या देवतात्वश्रुतिः 'महावीराय नमः इत्यादौ। मन्त्रलिङ्गेन यथा 'त्रातारमिन्द्रमवितारमिन्द्रम् ( यजुः २०।५० ) इत्यादौ। एषु पूर्वपूर्वापेक्षया परस्य परस्य दुर्बलत्वम्। यदाहुः—

तद्धितेन चतुर्थ्या वा मन्त्रलिङ्गेन वा पुनः।
देवतात्वश्रुतिस्तत्र दुर्बलं तु परं परम्॥ इति

'महावीराय नमः' इत्यादौ चतुर्थ्या देवतात्वावगति-रार्थिकी। 'ऐन्द्रं दधि' इत्यादौ तु श्रौती। तद्धितेन हि चतुर्थ्यन्तकरणकत्यागकर्माभिधीयते, तद् दध्नि तादात्म्येना-न्वेति। तदेकदेशे चतुर्थ्यन्तपदे प्रकृत्यर्थस्य स्वरूपपरेन्द्र-पदार्थेन्द्रशब्दस्य तादात्म्येनान्वयः— 'मन्त्रशरीरा देवा' इति मते। यदि पुनश्चेतन इन्द्रो देवता तत्रेन्द्रपदार्थ इन्द्रः प्रतिपाद्यप्रतिपादकभावसंसर्गेण चतुर्थ्यन्तेऽन्वेति। भवतु वा इन्द्रप्रतिपादकमिन्द्रपदमेव, इन्द्रपदार्थ-तादात्म्यमेव चतुर्थ्यन्ते पदे भासते। अत एव 'शक्राय स्वाहा' इत्यादिप्रक्षेपवाक्यमश्रौतम्। 'यदग्नये च प्रजापतये च जुहोति' इत्यादौ अग्निवृत्त्युद्देश्यताको होमः श्रौतः, तत्र चतुर्थ्यन्ताग्निपदकरणकत्वं न्यायावगतम्। अत एव तद्धिता-पेक्षया चतुर्थी दुर्बला साक्षाद्देवतावाचकत्वाभावात्। एतच्च पूर्वोक्तकारिकया—(तद्धितेन चतुर्थ्या वा)ऽपि प्रतिपादित-मेव। तथा प्रकृते 'महावीराय नमः' इति मन्त्रवाक्येऽपि महावीरवृत्त्युद्देश्यताकत्यागकर्म श्रुतमिति चतुर्थ्यन्तमहावीर-पदकरणकत्वं त्यागे न्यायावगम्यमिति नमः पदार्थैकदेशे त्यागेऽन्वितमुद्देश्यत्वं चतुर्थी प्रतिपादयति। उद्देश्यत्वं तन्निष्ठा प्रीतिरेव। तेन महावीरप्रीतिजनकत्यागकर्म वाक्यार्थः। परमात्मनि महावीरे प्रीतेस्तज्जनकत्वस्य च बाधितत्वेऽपि प्रीत्युद्देश्यिकेच्छैव चतुर्थ्यर्थः। तत्रालम्बनत्वेन महावीरस्यान्वयः, महावीरः प्रीयतामिति बाधितविषयाया अपीच्छायाः सम्भवात्। तादृशेच्छा तु प्रयोज्यतया त्यागे-ऽन्वेति, फलेच्छाया उपायेच्छाप्रयोजकत्वात् इति पदवाक्य-रत्नाकरे म० म० गोकुलनाथोपाध्यायाः।

वस्तुतस्तु— 'महावीराय पुष्पं नमः' इत्यादौ मन्त्र-करणकत्यागो नमः पदार्थः। त्यागस्तु स्वत्वनाशप्रकारि-केच्छा। तस्यास्तु स्वत्वनाशप्रकारतानिरूपितविशेष्यता-स्वरूपेण विषयत्वेन पुष्पेऽन्वयः। चतुर्थ्याः सम्बन्धोऽर्थः। सम्बन्धस्तु प्रीतीच्छाप्रयोज्यत्वम्; तच्च स्वरूपेण स्वत्व-नाशेऽन्वेति परम्परासम्बन्धघटकतदेकदेशे प्रीतीच्छायां प्रकृत्यर्थस्य प्रीतिप्रकारतानिरूपितविशेष्यतास्वरूपेण विषयि-त्वेनान्वयः। यथा 'जलस्य कर्पूरगन्धः', 'स्फटिकस्य जपा-लौहित्यम्' इत्यादौ षष्ठ्यर्थस्य परम्परासम्बन्धस्य घटके तदेकदेशे संयोगे सम्बन्धे प्रकृत्यर्थस्य जलादेरन्वयः। पर-म्परासम्बन्धस्य विभक्त्यर्थत्वे तदेकदेशे प्रकृत्यर्थान्वयस्य सर्वसम्मतत्वात्। भवतु वा प्रीतीच्छा, प्रयोज्यत्वं च खण्डशश्चतुर्थ्यर्थः, अन्वयस्तूक्तरीत्यैव। तथा च प्रीति-

प्रकारतानिरूपित–महावीरविशेष्यताकप्रीतीच्छाप्रयोज्यमन्त्रकरणकस्वत्वनाशप्रकारकेच्छायाः स्वत्वनाशप्रकारतानिरूपितविशेष्यतावत् पुष्पमित्यन्वयबोधः। विषयताया इच्छादिसमानकालिकत्वात् त्यक्ते पुष्पादौ न नमः पदप्रयोगः। नमः स्वाहा इत्यादि पदानां प्रयोक्तृपुरुषीयत्यागार्थकत्वात्। अन्यदीयत्यागेऽन्यस्य न स्वाहादिपदप्रयोगः। प्रीतीच्छाप्रयोज्यत्वं स्वत्वनाशान्वय्येवोपपद्यते, यतः प्रीतीच्छाप्रयोज्यस्वत्वनाश एव देवतानां स्वत्वं सम्बन्धः— 'महावीरस्य पुष्पम्' इत्यादौ षष्ठ्यर्थतया प्रतीयते। तत्र हि प्रीतीच्छाप्रयोज्यत्वस्य त्यागविशेषणत्वे विशिष्टत्यागस्य प्रयोज्यतया स्वत्वनाशघटकत्वे परम्परासम्बन्धगौरवं स्यात्। तस्य स्वत्वनाशविशेषणतया परम्परासम्बन्धघटकत्वे दर्शितसम्बन्धस्य लाघवमेव। न वा प्रीतीच्छायास्तत्प्रयोज्यत्वस्य चतुर्थ्यर्थस्य नमः पदार्थे त्यागेऽन्वयो युज्यते। तथा सति प्रीतेरुद्देश्यतया त्यागेऽन्वयेनैव तादृशप्रयोगसम्भवात्। पूर्वरीत्या महावीरादेः प्रीतिबाधेऽपि बाधितोद्देश्यताकेच्छायाः सम्भवस्योक्तत्वात्।

'यदग्नये जुहोती'त्यादौ सम्प्रदानत्वस्य प्रीतेर्नमः पदार्थान्वयोपगमे धातुं विना स्वविशेषणकशाब्दविषयत्वात् कारकत्वहानिप्रसङ्गात्। 'महावीराय नमः' इति मन्त्रवाक्ये महावीरादीनां देवतात्वं मन्त्रलिङ्गेनावगम्यते। यथा 'त्रातारमिन्द्रमवितारमिन्द्रम्'.... इति मन्त्रेण प्रकाशितस्येन्द्रस्य देवतात्वम्। तच्च त्यागार्थकनमः स्वाहादिपदसमभिव्याहृतचतुर्थ्यन्तपदप्रतिपाद्यत्वम्; अथवा नमः स्वाहादिपदप्रतिपाद्यस्य त्यागप्रकारकस्वत्वनाशस्य प्रयोजिकायाः प्रीतीच्छाया विषयत्वम् प्रागुक्त (स्वत्वनाशप्रकारतानिरूपित) विशेष्यत्वस्वरूपम्— बोध्यमिति।

यत्र पदेन वृत्त्योपस्थापितेऽर्थे पदान्तरार्थस्यान्वयेन वाक्यार्थतया देवतात्वं प्रतीयते तत्र श्रौतं देवतात्वमुच्यते। यथा 'ऐन्द्रं दधि भवत्यमावास्यायाम्' इत्यादौ तद्धितेनाण्–प्रत्ययेन प्रीतीच्छाप्रयोज्यस्य मन्त्रकरणकत्यागप्रकारस्य स्वत्वनाशस्याश्रयोऽभिधीयते तत्र प्रागुक्त– (प्रीतिप्रकारता–निरूपित) विशेष्यितया तादृशप्रीतिच्छायामन्वये तादृश–प्रीतीच्छाया अपि प्रागुक्तविशेष्यतया इन्द्रेऽन्वयः इतीन्द्रस्य देवतात्वं वाक्यार्थतया प्रतीयते।

## देवता मन्त्ररूपाश्चेतना वेति विचारः।

अत्रेत्थमाहुर्मीमांसकाः— देवतायाश्चैतन्ये प्रमाणाभावः। तथा हि— देवतावाचकेन्द्रादिपदानां 'इन्द्राय स्वाहा' इत्यादिमन्त्रात्मकाचेतन एव शक्तिः; तस्यैव देवतात्वम्; न तु सहस्राक्षस्य। "इन्द्रः सहस्राक्षः" इत्यादिवाक्यानां प्रवर्तकत्वेनार्थवादतयाऽप्रामाण्यात् अथेन्द्राय हस्तिनं दद्यादित्यादौ त्यागजन्यफलभागित्वरूपदेवतानिष्ठसम्प्रदानत्वश्रुतेर्बलात्–त्वश्रुतेश्चाचेतनमन्त्राणां कथमिन्द्रादिपदशक्यत्वम्, तस्य दर्शितसम्प्रदानत्वविरहात्। अपि च मन्त्राणामिन्द्रादिपद–शक्यत्वे तत्तन्मन्त्रानुपूर्वीविशेषणामेव शक्यतावच्छेदक–तयैकशक्यताविरहादिन्द्रादिसहस्रनाम्नां पर्यायत्वानुपपत्तिः। एवं वाजपेयेन स्वराज्यकामो यजेतेति श्रुत्या वाजपेय–यागस्येन्द्रपदफलकत्वात्तद्विरोधापत्तिश्चेति चेत्? अस्त्वे–तावतापि इन्द्रादिपदानां सहस्राक्षत्वादिविशिष्टे शक्तिः। एवमपि तस्य देवतापदवाच्यत्वे मानाभावः, देशना–(विधि) देशितचतुर्थ्यन्त–पदनिर्देश्यत्वरूपदेवतात्वस्य देवतापद–शक्यतावच्छेदकत्वात्। तन्निर्देश्यत्वञ्च वेदबोधित–चतुर्थ्यन्ततयोच्चार्यत्वम्। तच्च 'ऐन्द्रं दधि भवत्यमा–वास्यायाम्' 'आग्नेयं हव्यं निर्वपेत्' इत्यादौ देवतार्थे विहितेन तद्धितेनेन्द्रादिपद एव बोध्यते न तु सहस्राक्षादौ, अत एवेन्द्रादिपदमेव देवता, न तु शक्रादिपदम्, तत्र चतुर्थ्यन्तया निर्देश्यत्वस्य वेदेनाबोधनात्। न च 'इन्द्राय स्वाहा' इत्यस्यैव मन्त्रत्वेन तस्य चतुर्थ्यन्तत्वविरहात् देवतात्वानुपपत्तिरिति वाच्यम्, इष्टापत्तेः, इन्द्रायेत्यस्यैव देवतात्वात्, स्वाहादिपदानां त्यागमन्त्रार्थकत्वात्। तत्र च वेदबोधितत्वं न विशेषणम्, येन पूर्वं वेदजन्यज्ञाने जाते तादृशबोधितत्वज्ञानात् तद्घटितदेवतात्वं वेदेन बोधनीयम्, वेदेन देवताग्रहे वेदबोधितत्वं ग्राह्यमित्यन्योन्याश्रयो भवेत्।

प्रकारान्तरेण तद्ग्रहे तत्प्रत्यक्षमूलकत्वात् पूर्वपूर्ववेदजन्यज्ञानमूलकोत्तरोत्तरतादृशज्ञाननिर्वाहेऽपि प्रथमतस्तादृशवेदजन्यबोधे तदसम्भव इत्यादिदूषणं प्रसज्येत । तथा च देशना-(विधि)देशिता या चतुर्थ्यन्तता तद्विशिष्टपदत्वमेव देवतात्वम् घटायेति चतुर्थ्यन्तता न वेदबोधितेति तन्निरासः। केवलेन्द्रपदस्य चतुर्थ्यन्तत्वाभावादेव व्युदासः । 'ऐन्द्रं दधी' त्यादौ तद्धितेन चतुर्थ्यन्तं बोध्यत इतीन्द्रायेत्यस्य देवतात्वम् । चतुर्थीपदञ्च चतुर्थ्यर्थार्थकस्यादिपरम् । तेन 'धृतिः स्वाहे' त्यादौ चतुर्थीविरहेऽपि नाव्याप्तिः, तत्र चतुर्थीनिषेधेन प्रथमाया एव तत्स्थलाभिषिक्तत्वात् । वैज्ञानिकं वा चतुर्थ्यन्तत्वं निविष्टम्, 'धृतिः स्वाहा' इत्यादौ चतुर्थीज्ञानस्यावश्यकतया नानुपपत्तिः । अत एव लुप्तचतुर्थीके 'भूः स्वाहा' इत्यादावपि नानुपपत्तिः । इन्द्रो देवतेति सामानाधिकरण्येन प्रयोगस्तु इन्द्रपदस्य 'इन्द्राये'ति पदपरत्वादिति ऐन्द्रमित्यादाविन्द्रपदं स्वरूपपरमेवेति मीमांसकाः ।

अत्र प्रत्यवतिष्ठन्ते नैयायिकाः— अचेतनानां मन्त्राणां न देवतापदवाच्यत्वम्— किन्तु सहस्राक्षादिसचेतनानामेव, "इन्द्रः सहस्राक्षः" इत्यादिप्रसिद्धपदसामानाधिकरण्यस्थले इन्द्रपदार्थे सहस्राक्षाभेदान्वयस्यानुभविकत्वात् । किं च तन्मते इन्द्रमुपासीतेत्यादाविन्द्रपदार्थे उपासनान्वयासम्भवाच्च । अचेतने उपास्यत्वविरहात् । तस्मान्मन्त्रकरणकहविस्त्यागोद्देश्यत्वमेव देवतात्वम्— तदेव देवतापदप्रवृत्तिनिमित्तम् । न चैवं द्रव्यान्तरत्यागोद्देश्ये देवतात्वविरहप्रसङ्गः, हविः पदस्य द्रव्यसामान्यपरत्वात्, प्रयोजनविरहेणानुपादेयत्वाच्च । एवं च मन्त्रकरणकत्यागोद्देश्यत्वयोग्यतैव देवतात्वम् । तेनोद्देश्यताशून्यकालेऽपि न देवतात्वानुपपत्तिः। योग्यता चेन्द्रादिशरीरावच्छिन्नैव ग्राह्या, नातस्तच्छरीरानवच्छिन्नस्येन्द्राद्यात्मनः तथात्वप्रसङ्गः । शरीरे समवायेन चैतन्यविरहेऽपि अवच्छेदकतया चेतनत्वात् नाचेतनस्य देवतात्वम् । मन्त्रकरणकहविर्भागित्वमात्रस्य तथात्वे तु मुक्तस्य पित्रादेः श्राद्धे, 'आकाशाय स्वाहा' इत्यादावाकाशादेश्च; हविर्भागित्वविरहादव्याप्तिः । उद्देश्यता च विसंवादीच्छामादाय तत्रापि निराबाधा । तादृशत्यागादेः मन्त्रकरणकत्वस्य मानाभावादसम्भव इति तु न वाच्यम्, मन्त्रोच्चारणपूर्वकत्वेन विधिबोधितो यस्त्यागस्तत्र हविस्सम्बन्धितया विषयत्वमेव त्यागे विशेषणम् आकाशादेरचेतनस्यापि हविस्सम्बन्धित्वेनेच्छाविषयताया अक्षतेः, तदुद्देश्यकत्यागस्य "आकाशाय स्वाहा" इत्यादिशास्त्रबोधितत्वात् । महादानाङ्गहोमादौ मन्त्रपाठपूर्वकत्वेन दानाङ्गहोमादिरेव विहितो दानन्तु होमादिपूर्वकत्वेनैव विहितम् । दानस्यापि 'तुभ्यं सम्प्रददे' इत्यादिवाक्योच्चारणपूर्वकत्वेन शास्त्रबोधितत्वान्मन्त्रपर्यन्तनिवेशः । घृतादेरपि देवतासम्बन्धादिप्रकारेण त्यागविषयतया तत्रातिव्याप्तिवारणाय हविस्सम्बन्धितये"ति ।

अत्रेदमवधेयम् चेतनस्य देवतात्वमतेऽपि प्रतिपाद्यतासम्बन्धेन 'इन्द्राय स्वाहा' इत्यादिमन्त्रविशिष्टस्यैव देवतात्वमङ्गीकार्यम्, अन्यथा इन्द्रपदपर्यायशक्रादिपदैरपि तादृशस्थले त्यागापत्तेः । तथा च विनिगमनाविरहेण प्रतिपाद्यतासम्बन्धेन मन्त्रविशिष्टोऽर्थः, प्रतिपादकतासंसर्गेणार्थविशिष्टो मन्त्रो वेत्युभयमेव देवता, केवलयोस्तथात्वे दोषाणां दर्शितत्वात् । तत्राद्ये वेदबोधिता या चतुर्थ्यन्तता तद्विशिष्टपदप्रतिपाद्यत्वमेव देवतात्वम्, अन्त्ये च तादृशचतुर्थ्यन्तत्वविशिष्टमेवेत्यास्तां विस्तरेण—प्रकृतमनुसरामः ।

'स्वस्ति सिद्धेभ्यः' इत्यत्र सम्बन्धश्चतुर्थ्यर्थः स चावधित्वमेव । स्वस्तिपदार्थः कुशलम् तच्चानिष्टसाधनाभावः । तथा च सिद्धवृत्तिरनिष्टसाधनाभाव इत्यन्वयबोधः। तद्भद्रायुष्येत्यादि० (२।२।६६) इति सूत्रेणाशिषि-क्षेमार्थयोगे चतुर्थीविधानेऽपि, आशीरर्थाभावेऽपि स्वस्तिशब्दयोगे चतुर्थ्या एव विधानार्थम्, आशिष्यपि स्वस्तिशब्दयोगे नित्यमेव चतुर्थीविधानार्थं चेह 'स्वस्ति' शब्दग्रहणम् । तदुक्तम्— **स्वस्तिशब्दः क्षेमार्थः, तद्योगे आशिष्यपि परत्वान्नित्यमेवेति ।**

वह्निसंयोगजनकप्रक्षेपोत्तराङ्गकविहितत्यागः स्वाहाशब्दार्थः। विहितत्वविशेषणात् वह्निसंयोगफलकयादृच्छिकत्यागो न स्वाहापदार्थः। त्यागस्तु स्वस्वनाशप्रकारिकेच्छैव चतुर्थ्यर्थः सम्बन्धः प्रीतीच्छाप्रयोज्यत्वम्, तस्य स्वस्वनाशेऽन्वयः। प्रीतीच्छायां तु प्रीतिप्रकारतानिरूपितविशेष्यताकत्वेन प्रकृत्यर्थस्यान्वयः। त्यागस्य स्वत्वनाशप्रकारतानिरूपितविशेष्यतया हविषि ( प्रक्षेप्यद्रव्ये ) अन्वयः, तथा च इन्द्राय स्वाहेत्यादौ– इन्द्रनिष्ठप्रीतीच्छाप्रयोज्यस्वत्वनाशप्रकारतानिरूपितविशेष्यताश्रय. वह्निसंयोगजनकप्रक्षेपोत्तराङ्गकत्यागकर्म हविरित्यन्वयबोधः। अनग्निकर्तृक– (अनाहिताग्निविहित) ब्राह्मणपाण्याद्यधिकरणकप्रक्षेपोत्तराङ्गके त्यागे, अग्नौकरणहोमे स्वाहाप्रयोगो गौणः, तस्य त्यागस्य विहितत्वाभावात्।

पित्र्युद्देश्यकस्त्यागः स्वधापदार्थः। पितृत्वं तु वैदिकमते त्रैवर्णिकसपिण्डितत्वम्, शूद्रादेः पिता न त्रैवर्णिकेन सपिण्डितः किं तु श्राद्धदैवतमात्रम्- इति न तदुद्देश्यके त्यागे स्वधापदप्रयोगः किन्तु नमः पदप्रयोग एव प्रामाणिकः। त्रैवर्णिकेन सपिण्डितस्य शूद्रादिना क्रियमाणे श्राद्धादावपि न स्वधाशब्दप्रयोगः तस्य स्वधाशब्दोच्चारणस्य निषेधात्। निषेधोल्लङ्घनजन्यप्रत्यवायमङ्गीकृत्य तेन प्रयुक्तः स्वधाशब्दः शाब्दबोधं जनयत्येव बाधकाभावात्। भवतु वा स्वधाकरणकस्त्यागः स्वधापदार्थः शूद्रकर्तृकस्त्यागो न स्वधाकरणक इति न तत्र स्वधाशब्दप्रयोगः इति सम्प्रदायविदः। वस्तुतस्तु विहितस्त्यागः स्वधाशब्दार्थः, चतुर्थ्यर्थः पूर्वोक्त एव सम्बन्धः, तस्य स्वत्वनाशे त्यागस्यार्थे पूर्ववदेव अन्वयः। तथा च पितृभ्यः स्वधेत्यादौ पितृनिष्ठप्रीतीच्छाप्रयोज्योऽन्नादिकर्मकस्त्याग इत्यादिप्रकारेणान्वयो बोध्यः।

इत्थञ्च—नमः– स्वाहा– स्वधापदानां विहितस्त्याग एवार्थः। त्यागस्तु प्रयोक्तुरेव। तत्र पूजादौ नमः पदस्य, होमे स्वाहापदस्य, श्राद्धे स्वधापदस्य, प्रयोगो विहित इति विशेषः। नमः स्वाहादिशब्दाः पर्यायभूता इवेति एतदर्थकानामन्येषामपि शब्दानां योगे चतुर्थीप्रयोगो दृश्यते। तथा च हन्तशब्दोऽपि विहितत्यागे प्रयुज्यत इति तद्योगेऽपि चतुर्थीप्रयोगो दृश्यते। यथा—इदमन्नं सनकादिमनुष्येभ्यो हन्तेति। एवं वषड्ग्रहणमपि फट् वौषडादिशब्दानामुपलक्षणम्- तथा च 'नेत्रत्रयाय वौषट्' अस्त्राय फट् इत्यादौ चतुर्थ्युपपद्यते। एवं च 'हृदयाय नमः' इत्यादाविव वौषट्–फट् इत्यादयः शब्दाः कुशलार्थका इति सम्प्रदायविदः। चतुर्थ्या आधेयत्वमर्थः। एवं हुं शब्दयोगेऽपि चतुर्थी प्रयोगो दृश्यते इति सोऽपि वषट्शब्देनैवोपलक्षितो बोध्यः। आशीर्विवक्षया वैषु प्रयोगेषु चतुर्थी बोध्या।

ननु जिनान्नमस्यतीत्यत्रापि– नमः शब्दसत्त्वाच्चतुर्थी कुतो नेत्याशङ्कायामाह --**नमस्यधातुना योगो न तु नमसेति**। अयमाशयः, शब्दग्रहणादर्थस्योपस्थित्याऽर्थवत एव नमः शब्दस्य योगे चतुर्थी भवति। नमस्यति जिनान्, नमस्करोति गुरूनित्यादौ केवलस्य नमः शब्दस्य न कोऽप्यर्थोऽपि तु नमस्य–धातोः, नमस्कृ–धातोश्चेति तद्योगे न चतुर्थीति। नमस्यतेर्नमस्करोतेश्च नमस्कारानुकूलप्रयत्नार्थकतया केवलस्य नमसस्तत्र स्वातन्त्र्येणार्थबोधकत्वाभावात्। यद्यपि करणेऽर्थे क्यचो विधानेन शब्दायतिवन् नमस्यतेरकर्मकत्वमेवोचितमिति नमस्यति जिनानित्यत्र कर्मणि द्वितीयाऽपि नोचिता तथापि नमस्यति–नमस्करोती नत्यर्थे रूढौ करणार्थे व्युत्पादनं तु बालोपलालनमुणादिव्युत्पादनवदित्याश्रित्यानयोः सकर्मकत्वेन कर्मणि द्वितीयोपपत्तिः।

नन्वेवं स्वयंभुवे नमस्कृत्येत्यत्रापि द्वितीयैव युक्तेति चेदत्राह— स्वयंभुवे नमस्कृत्येत्यत्र नानेन चतुर्थीत्यादि। अयमाशयः नमस्कृतिक्रिययाऽभिप्रेयमाणत्वेन पत्ये शेत इत्यादिवदिहापि चतुर्थी विधेयेति। परे तु 'गम्यस्याप्ये' (२।२।६२) इति सूत्रेणात्र चतुर्थीति वर्णयन्ति। स्वयम्भुवमनुकूलयितुमित्यर्थस्य विवक्षितत्वेन तुमर्थस्य गम्यत्वात्तदाप्ये चतुर्थीविधानादिति। क्वचिच्च स्वयम्भुवं नमस्कृत्येत्यादिप्रयोगोऽपि सम्भाव्यते स कथमिति चेदत्राह— **क्रियाऽ**

मिप्रेयत्वाविवक्षायामिति । क्रियाभिप्रेयस्यैव सम्प्रदानत्वेन तस्याविवक्षायां कर्मणि द्वितीया स्वाभाविक्येवेति भावः । अत्र विषये समाधानान्तरमपि महार्णवन्यासादौ दृश्यते– तथा हि नमस्यति जिनानित्यत्र नमःशब्दार्थयोगविवक्षायां चतुर्थीप्राप्तावपि क्रियायोगविवक्षायां प्राप्तया द्वितीयया बाध्यते "उपपदविभक्तेः कारकविभक्तिर्बलीयसी" इति न्यायात्; क्रियाकारकभावसम्बन्धमूलिका हि कारकविभक्तिरन्तरङ्गा– उपपदार्थस्तु न तथाभूतोऽन्तरङ्ग इति तन्निमित्ता विभक्तिर्बहिरङ्गतया बाध्यते । 'स्वयम्भुवं नमस्कृत्य' 'मुनित्रयं नमस्कृत्यो' त्यादिप्रयोगाश्चैवमेवोपपन्नाः । स्वयम्भुवे नमस्कुरुते त्यत्र च समाधानमुक्तरूपमेवेत्यास्तां विस्तरः । इति शिवम् ।

।। इति चतुर्थ्यर्थप्रकाशः ।।

# अथ पञ्चम्यर्थप्रकाशः

## पञ्चम्यपादने ।।२।२।६६

अनेन सूत्रेण अपादानसंज्ञके कारके गौणान्नाम्नः पञ्चमी विधीयते । तत्रापादानसंज्ञा– 'अपायेऽवधिरपादान' मिति (२।२।२९) सूत्रेण प्रतिपादिता । विवृतं च सूत्रमिदं बृहद्वृत्तौ– सावधिकं गमनमपायः, तत्र यदवधिभूतमपायेनानधिष्ठितमिति । अपायो नाम विश्लेषः स च कुतोऽपि विभागरूप एवेति तस्य सावधिकत्वं स्पष्टम् । तत्र यदवधिभूतं– स्वयं चापायेन– विश्लेषेण– अनधिष्ठितम्– असम्बद्धम्, तत् कारकमपादानसंज्ञां लभते । तथा च अपायजनकक्रियानधिकरणत्वे सति तत्क्रियाजन्यविभागाश्रयत्वमपादानत्वमिति सिध्यति । 'ग्रामादागच्छति' इत्यत्र ग्रामावधिरेवापाय इति ग्रामस्यापादानत्वम्, तत्र विश्लेषजनिका क्रिया आगमनक्रिया तदनधिकरणत्वम् ग्रामस्य, तत्क्रियाजन्यो यो ग्रामानुयोगिकश्चैत्रप्रतियोगिको विभागस्तस्याश्रयत्वमपि तस्यैति लक्षणसङ्गतिः । तत्र विभागो भेदश्च पञ्चम्यर्थः लाघवात्, क्रियावदन्यो विभागवान्न पञ्चम्यर्थः गौरवात् । विभागस्य जनकतया भेदस्य प्रतियोगितावच्छेदकतया क्रियायामन्वयः । वृक्षात्पत्रं पततीत्यत्र वृक्षस्य पतनक्रियावदन्यत्वात् विभागवत्त्वाच्चापादानत्वम् । क्रियावदन्यत्वं च तत्क्रियावदन्यत्वं बोध्यम्, तेन कुड्यात्पततोऽश्वात्पततीत्यत्र अश्वस्य पतनक्रियावदन्यत्वाभावेऽपि, नरकर्तृकपतनक्रियावदन्यत्वेन नापादानत्वहानिः । तदुक्तं हरिणा—

> अपाये यदुदासीनं चलं वा यदि वाऽचलम् ।
> ध्रुवमेवातदावेशात्तदपादानमुच्यते ।।
>
> पततो ध्रुव एवाऽश्वो यस्मादश्वात्पतत्यसौ ।
> तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमुच्यते ।।
>
> उभावप्यध्रुवौ मेषौ यद्यप्युभयकर्मजे ।
> विभागे प्रविभक्ते तु क्रिये तत्र व्यवस्थिते ।।
>
> मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक् ।
> मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक् पृथक् ।।

अस्यार्थः अपाये विश्लेषहेतुक्रियायाम् यत् उदासीनम्, विश्लेषजनकक्रियाया अनधिकरणम्, तच्च द्विविधं– चलम्– अश्वादिरूपम् अचलम्– ग्रामवृक्षादिरूपम्, उभयविधमपि तदवधिभूतं– ध्रुवं स्थिरम्– ( ध्रुवमपायेऽपादानम् पा० सू० २।४।२४ इति सूत्रोक्तध्रुवपदेन ग्राह्यमिति वा ) एव, न तु विभागजनकक्रियाश्रयवच्चलमिति भावः । कुत इति चेदत्राह– अतदावेशादिति तद्विभागजनकतत्क्रियानाश्रयत्वात्– एवञ्च विश्लेषहेतुक्रियानाश्रयत्वे सति विश्लेषाश्रयो यदिति फलितम् तद् अवधिभूतम् अपादानमुच्यते अपादानकारकसंज्ञया व्यवह्रियते । कुड्यात्पततोऽश्वात्पततीत्यादावश्वस्यापि विश्लेषाश्रयत्वात् तस्यापादानत्वं कथ–

मित्याशङ्कायामाह– **पततो ध्रुव एवाश्वः** इत्यादि । पततः अश्वावधिकविभागवतो जनात् ( तदपेक्षया ) **अश्वः** कुड्यावधिविभागवानपि **ध्रुव एव**– नरकर्तृकपतनक्रियानाश्रयत्वात् अवधिभूत एव, कोऽसावित्याह– **यस्मादश्वात्पतत्यसौ** असौ पतनकर्ता यस्मात् अश्वात् पतति स द्वितीयपतनक्रियाकर्तृनरापेक्षया ध्रुव एवेति भावः। तथा च विश्लेषहेतुक्रियानाश्रयत्वे सतीत्यत्र तद्विश्लेषहेतुक्रियानाश्रयत्वे सतीत्येवं प्रातिस्विकरूपेण क्रियाया निवेशः कार्य इति यत्क्रियानिरूपितमपादानत्वं यस्य विवक्ष्यते तत्क्रियानाश्रयत्वन्तत्र वाच्यम् । एवञ्चाश्वस्यापि पूर्वपतनक्रियाश्रयत्वात् तस्यापादानत्वं यथा सिद्ध्यति तदाह–**तस्याप्यश्वस्य पतने** इति कुड्यात्पततोऽश्वात्पततीत्यत्र हि अश्वोऽपि पतनक्रियाकर्तेति तदर्थं तदपेक्षया कुड्यस्य ध्रुवत्वेन तस्यैवादानत्वमिति ततोऽपि **पञ्चमी** सिध्यति। तत्र हि कुड्यस्य अश्वनिष्ठपतनक्रियानाश्रयत्वमिति तदवधिभूतमिति भावः।

'परस्परस्मान्मेषावपसरतः' इत्यादावुभयकर्मजविभागस्थले विभागस्यैक्यात् ( क्रियाया ऐक्यात् ) तद्विश्लेषजनकक्रियानाश्रयत्वरूपविशेषणस्य कुत्राप्यसत्त्वात् कथं तत्र पञ्चमीति शङ्कामभ्युपेत्य समाधातुमाह– **'उभावप्यध्रुवौ मेषौ'** इत्यादि । **उभौ अपि मेषौ अध्रुवौ** तद्विश्लेषजनकक्रियाश्रयावेव, कुत्रेत्याह– **उभयकर्मजे विभागे** इति । अयमाशयः मेषौ पूर्वं परस्परं शिरः संयोज्य सहैव वियुज्यतः इति **उभयोरेव कर्म–** क्रिया तद्विभागे जनिकेति तद्विश्लेषहेतुक्रियाश्रयत्वमुभयोरिति सत्यम्, तु तथापि **तत्र** तादृशस्थलेऽपि **क्रिये** उभयमेषस्थ– विभागजनकक्रियाद्वयम्– **व्यवस्थिते** प्रतिनियते भिन्ने इति यावत् । तामेव व्यवस्थामाह– **मेषान्तरक्रियापेक्षम्—** इत्यादिना । अयमर्थः– यथा निश्चलमेषादपसरद्द्वितीयमेषस्थले निश्चलमेषस्यापसरन्मेषक्रियामादाय ध्रुवत्वम् । तथाऽत्रापि विभागैक्येऽपि क्रियाभेदादेकक्रियामादाय परस्य ध्रुवत्वमिति परस्परस्य ध्रुवत्वात्-अपादानसंज्ञासिद्धिः। तथा च विभागाश्रयत्वे सति तज्जनकतत्क्रियानाश्रयत्वं तत्क्रियायामपादानत्वमिति स्वीकार्यमिति भावः : क्रिया चात्र धात्वर्थो न तु स्पन्दः, तेन वृक्षकर्मजविभागवति वस्त्रे वृक्षाद् वस्त्रं पततीति संगच्छते । अन्यथा वस्त्रे स्वतः पतनानुकूलक्रियाकर्तृत्वस्यासंभवेन विभाजनकक्रियाया अभावादपादानत्वानापत्तिः । एवं चैतन्मते अवधिरेव पञ्चम्यर्थः । तच्च वैयाकरणभूषणसारे स्पष्टीकृतम् ।

अत्र वदन्ति—पञ्चम्या अवधिरिव आश्रय इव विभागोऽप्यर्थः, अविभागार्थकपतत्यादिसमभिव्याहारे, करणतृतीयाया व्यापारवत्-अनेकधातूनां विभागे शक्तिकल्पनापेक्षया एकस्याः पञ्चम्यास्तत्र शक्तिकल्पनायां लाघवात् । विभागस्य धात्वर्थत्वे द्वितीयादिस्थल इव विभागस्य धातुना लाभाद् आश्रयमात्रं पञ्चम्यर्थः इत्येव ब्रूयात् । अवधेराश्रयात् पृथगुपादानवैयर्थ्यात् त्यजिपत्योः पर्यायतापत्तेश्च प्रकृते वृक्षाद् वस्त्रं पततीत्यत्र अधोदेशसंयोगानुकूलक्रियैव पत्-धात्वर्थः । अधोदेशश्च संयोगांशे उपलक्षणम् गम्युपात्तसंयोगफले उत्तरदेशवत् विभागाधीनपूर्वदेशसंयोगनाशमन्तरेण क्रियायाः संयोगजनकत्वासम्भवात्, तस्य विभागजनकत्वमक्षतमेव समानप्रत्ययोपात्तत्वप्रत्यासत्त्या व्युत्पत्तिवैचित्र्येणाश्रयरूपपञ्चम्यर्थस्य विभागरूपापरपदार्थे आधेयतयाऽन्वयः, तस्य चानुकूलत्वसम्बन्धेन पतत्यर्थक्रियायाम् । एवञ्च विभागस्य धात्वर्थत्वाभावान्न कर्मताप्रसङ्गलेशोऽपि ।

यद्वा अवधिरवधिरित्यनुगतव्यवहारादवधित्वमाश्रयत्वव्याप्यमक्षुण्णोपाधिः, तदवच्छिन्न एव पञ्चम्यर्थः । अत एव आश्रयोऽवधिरुद्देश्य इत्यादि वैयाकरणभूषणकारिकायामवधेराश्रयात् पृथगुपादानम् । तस्य च स्वनिष्ठावधित्वनिरूपकविभागजनकत्वसम्बन्धेन क्रियायामन्वयः । एवं च पूर्वकल्पे विभागस्य पञ्चम्यर्थत्वपक्षे वृक्षात्पर्णं पततीत्यत्र वृक्षाभिन्नाश्रयकविभागजनकपर्णाश्रयकः संयोगानुकूलव्यापार इति बोधः । पतधातोर्गत्यर्थेऽनुशासनात् गतिशब्दस्य संयोगानुकूलव्यापार एव प्रसिद्धेः । त्यजत्यर्थे गतिव्यवहाराभावाच्च । फलावच्छिन्नव्यापारे व्यापारावच्छिन्नफले वा

धातोः शक्तिमङ्गीकुर्वतः स्वोक्तफलत्वानाक्रान्तविभागस्य धात्वर्थव्यापारावच्छेदकत्वासम्भवाच्च

पतेः संयोगरूपफलार्थकत्वे ग्रामं गच्छतीतिवत् ग्रामं पततीत्यापत्तिरिति तु न, शक्तिस्वाभाव्येन तदुपस्थितसंयोगस्याधोदेश एव अन्वयात् ग्रामस्य अधोदेशत्वविवक्षायां तु विहगो ग्रामं पततीतीष्टमेव अत एव नरकं पतित इति विग्रहे द्वितीयासमासविधानं संगच्छते । न च वृक्षमजहत्यपि पर्णे भूमिं स्पृशति सति वृक्षात्पर्णं पततीत्यापत्तिः, तदुपस्थाप्यक्रियाजन्यदेशान्तरविभागे वृक्षावधित्वानुगमात् । अन्यथा क्रियाजन्यसंयोगमात्रस्यैव विभागजन्यत्वेन भूमिपर्णसंयोगस्यापि तथात्वात्, त्वन्मतेऽपि तादृशप्रयोगस्य दुर्वारतापत्तेः । अत एव

गतिर्विना त्ववधिना नापाय इति कथ्यते ।
वृक्षस्य पर्णं पततीत्येव भाष्ये निदर्शितम् ! इति ( हरिकारिका ) ।

अवध्यन्वययोग्यविभागानुकूलत्वं विना संयोगजनिका-क्रिया नापायः । अतएव पर्णविशेषणतया वृक्षविवक्षायामपायस्याविवक्षणात् वृक्षस्य पर्णं पततीति भाष्ये षष्ठ्युक्तेति, तदर्थः । विभागजन्यसंयोगस्य पूर्वापरीभूतानवयवकत्वेन च व्यापारत्वाभावेन विभागस्य तदुक्तफललक्षणाक्रान्तत्वेन तदुभयार्थकस्य पतेर्धातुत्वापत्तेश्च ।

यत्र च वृक्षादपसरतीत्यादौ विभाग एव धात्वर्थः तत्राश्रयोऽवधिमात्रं वा पञ्चम्यर्थः । तस्याधेयतया स्वनिष्ठावधित्वनिरूपकत्वेन वा यथायथं विभागेऽन्वयः । परस्परस्मान्मेषावपसरत इत्यादौ तु मेषपदवाच्यत्वावच्छेदेनैव कर्तृत्वविवक्षा, न परस्परवाच्यत्वावच्छेदेनेति न पञ्चम्यनुपपत्तिरिति ।

विभागमात्रस्य पञ्चम्यर्थत्वं स्वीकुर्वतो वैयाकरणैकदेशिनः पूर्वोक्तं विचारं प्रत्याचक्षाणा नैयायिका इत्थमत्र प्रत्यवतिष्ठन्ते— एवं सति वृक्षात्— पर्णं पतति न पत्रादित्यत्र निषेधप्रतीत्यनुपपत्तेः, पतने पत्रसमवेतविभागजनकत्वाभावस्य नञा बोधनासम्भवात्, अयोग्यत्वात्, गुणान्न पततीत्यादाविव प्रकृत्यर्थसमवेतत्वाभावस्य पञ्चम्यर्थविभागे बोधनस्याप्यसंभवात् विभागस्य पत्रसमवेततया अयोग्यत्वात् । भेदस्य पञ्चम्यर्थतावादे तु पत्रनिष्ठभेदप्रतियोगितावच्छेदकत्वाभावस्य पतने नञा बोधनसम्भवान्निषेधप्रतीत्युपपत्तिः ।

नन्वेवमपि पत्रसमवेतविभागजनकत्वस्य पत्रान्तरनिष्ठभेदप्रतियोगितानवच्छेदकत्वस्य च द्वयोः पतने सत्त्वात् निषेधप्रतीत्यनुपपत्तिः पत्रात्पत्रं पततीति प्रयोगप्रसङ्गश्च । न च तत्तत्पत्रनिष्ठभेदप्रतियोगितावच्छेदकत्वस्य समुदायो नञा निषिध्यत इति निषेधप्रतीत्युपपत्तिः, तथाविधसमुदाय एव पञ्चम्याः साधुत्वान्न दर्शितप्रयोगापत्तिश्चेत्यादि साम्प्रतमितिवाच्यम्, तादृशसमुदायस्य युगसहस्रेणापि ग्रहीतुमशक्यत्वात् । न च स्ववृत्तिविभागजनकत्व—स्ववृत्तिभेदप्रतियोगितावच्छेदकत्वोभयसंसर्गावच्छिन्नप्रतियोगिताकः पत्रसामान्याभाव एव नञा बोध्यते, पञ्चमी तु प्रतियोगितावच्छेदकसंसार्गानुवादिकेत्यपि युज्यत इति वाच्यम्, वृत्त्यनियामकसम्बन्धस्य प्रतियोगिताच्छेदकतयाऽनभ्युपगमात्, अभ्युपगमे तु विभागप्रतियोगित्व विशिष्टजनकत्वस्वरूपसाक्षात्संसर्गावच्छिन्नप्रतियोगिताकस्य पत्रसामान्याभावस्य पत्रापादानकपतनेऽपि सत्त्वेन पत्रात्पतति पतङ्गे पत्रान्नायं पततीत्यपि प्रयोगप्रसङ्गात् । न च परम्परामुद्रया तादृशसंसर्गावच्छिन्नप्रतियोगिताक एव पत्रसामान्याभावः पञ्चम्यन्तपत्रपदपतधातुसमभिव्याहृतनञा बोध्यते, परम्परा हि विभागनिरूपकत्वजनकत्वानि भेदानुयोगित्वप्रतियोगित्वावच्छेदकत्वानि च परस्परविशृङ्खलितान्येव संसर्गः तत्र प्रथमपरम्परास्थले पत्रत्वावच्छिन्नप्रतियोगिता निरूपिता विभागसंसर्गता, तया निरूपिता निरूपकत्वे, तया निरूपिता जनकत्वे च संसर्गता; तन्निरूपिताऽनुयोगिता नञर्थेऽभावे भासते, द्वितीयपरम्परायामप्यनया रीत्या संसर्गता बोध्या । विभागप्रतियोगित्वविशिष्टजनकतास्वरूप-

साक्षात्संसर्गे तु विशिष्टधर्मावच्छिन्नजनकतावृत्तिरेकैव संसर्गता प्रतियोगित्वानुयोगित्वाभ्यां निरूप्यत इति परम्पराविशिष्टसंसर्गयोः संसर्गताविवेक इति न दर्शितप्रयोगप्रङ्ग इति वाच्यम्, परम्परासंसर्गतासु प्रथमा प्रतियोगितया चरमा पुनरनुयोगितया, प्रथमैवानुयोगितया चरमैव प्रतियोगितया निरूप्यत इत्यत्र विनिगमकाभावात् । दृश्यन्ते च प्राचां निबन्धेषु प्रतियोगिविश्रान्ताः रचनाः । न चोयमयथाऽपि परम्परातो विशिष्टस्य संसर्गताविवेक उपपद्यत इति वाच्यम् विलोमानुलोमपरम्परासंसर्गावच्छिन्नप्रतियोगिताकाभावयोरविशेषप्रसङ्गात्; इति परम्परायाः संसर्गत्वस्य नितरां प्रतियोगितावच्छेदकत्वस्य चानुपपत्त्या पत्रं न पत्रात्पततीत्यत्र निषेधप्रतीत्यनुपपत्तिरिति चेत्,

अत्र म. म. गोकुलनाथोपाध्याया आहुः—पुष्पवन्तौ नेत्यत्र विभक्त्युपस्थाप्यद्वित्वविशिष्टयोः सूर्याचन्द्रमसोर्नञर्थान्वये सूर्यचन्द्रोभयत्वावच्छिन्नप्रतियोगिताकाभावो बुध्यताम्, यत्र तु निष्पुष्पवन्तमित्यव्ययीभावस्तत्र द्वित्वोपस्थापकाभावात् द्वित्वावच्छिन्नव्यासज्यप्रतियोगिताकः सूर्याचन्द्रमसोरत्यन्ताभावः प्रतीयते यथा, तथा न पत्रादित्यादौ विभागजनकत्वभेदप्रतियोगितावच्छेदकत्वपर्याप्तप्रतियोगिताकोऽप्यभाव इति । यदि च पुष्पवन्तपदादेः सूर्यचन्द्रोभयमर्थः तदा पञ्चम्या अपि विभागनिरूपकजनकत्व–भेदप्रतियोगितावच्छेदकत्वोभयमर्थः तथाचोभयत्वावच्छिन्ना प्रतियोगिता जनकतात्वनिष्ठयाऽवच्छेदकत्वनिष्ठया चावच्छेदकतया निरूप्यते । अथवोभयत्वनिष्ठावच्छेदकता सामानाधिकरण्येन जनकतात्वावच्छेदकत्वाभ्यामवच्छिद्यते । तत्र जनकतात्वनिष्ठावच्छेदकता निरूपकत्ववृत्त्या सा च विभागवृत्त्या, अवच्छेदकतात्वनिष्ठा तु प्रतियोगितावृत्त्या, सा च भेदनिष्ठयाऽवच्छेदकतया निरूप्यते । स्रोतोद्वयमुखभूतं तु विभागभेदयोरवच्छेदकत्वद्वयमेकमेव पत्रत्वावच्छिन्नयाऽवच्छेदकतया निरूप्यत इति । अमुमेवाभावं पत्रपतनकर्तृपत्रे, विभागजनकत्वतन्निष्ठभेदप्रतियोगितावच्छेदकत्वं पतने नास्तीति वाक्येन प्रामाणिका व्यवहरन्ति । एतादृशाभावबोधः पत्रत्वाद्यवच्छिन्नैकप्रकारतानिरूपितविभागभेदोभयविशेष्यताकः सम्भवति । प्रकारताद्वयनिरूपितैकविशेष्यताकस्य संशयादेरिव विशेष्यताद्वयनिरूपितैकप्रकारताकबोधस्याभ्युपेयत्वात् । अत एव संशयाव्यवहितोत्तरं प्रत्यक्षमिति वाक्येन मानान्तरेण वा यस्मात्संशयादव्यवहितं तस्मादुत्तरं प्रत्यक्षमिति प्रत्याय्यते । संशयत्वावच्छिन्नैकप्रकारतयाऽव्यवधानोत्तरत्वविषयतयोः, ताभ्यां च प्रत्यक्षविशेष्यताया निरूपणेन, फलत एकतमसंशयाव्यवहितपूर्वस्य चिरातीतसंशयाव्यवहितोत्तरप्रत्यक्षस्यानवगाहनात् ;

एवमेव धूमत्वादिसामान्यधर्ममन्तर्भाव्य वह्न्यादेः कारणत्वमपि सुग्रहम् । तत्तद्धूमाव्यवहितपूर्वक्षणावच्छेदेन तत्तद्धूमाधिकरणे विद्यमानस्याभावस्य प्रतियोगितासामान्याभावो वह्नौ धूमकारणता, स चैक एवाभावः न तु धूमव्यक्तिघटितकूटात्मकः युगसहस्रेणापि तादृशाभावस्य दुर्ग्रहत्वात् । सम्भवति चैकयैव धूमत्वावच्छिन्नावच्छेदकतया निरूपितमव्यवहितक्षणावच्छिन्नत्वे अधिकरणत्वे चावच्छेदकताद्वयं ताभ्यां निरूपितं विद्यमानत्वे, तेन चाभावेऽवच्छेदकत्वमेकैकमेव परस्परनिरूपितम्-अभावनिष्ठावच्छेकत्वेन निरूपिता प्रतियोगितात्वावच्छिन्ना प्रतियोगितेति तन्निरूपितोऽनुगतः सामान्याभावः, तद्बुद्धिं प्रति धूमत्वावच्छिन्नैकप्रकारतानिरूपिताव्यवहितपूर्वक्षणावच्छिन्नत्वाधिकरणवृत्तिविशेष्यताद्वयनिरूपितविद्यमानत्वनिष्ठैकविषयताको व्यभिचारग्रह एव विरोधी न तु धूमान्तराव्यवहितपूर्वक्षणावच्छेदेन धूमान्तराधिकरणे विद्यमानं वह्न्यभावमवगाहमान इति पदवाक्यरत्नाकरे ।

वस्तुतस्तु विभागो भेदश्च पञ्चम्यर्थः, विभागस्य जनकत्वेन भेदस्य स्वसमानधिकरणविभागजनकत्वविशिष्टेन प्रतियोगितावच्छेदकत्वेन सम्बन्धेन पतनादिक्रियायामन्वयः । तरोः पत्रं पतति न पत्रादित्यत्र पत्रवृत्तिभेदस्य दर्शितेन विशिष्टप्रतियोगितावच्छेदकत्वेन सम्बन्धेनावच्छिन्नप्रतियोगिताकोऽभावो नञा पतने बोध्यते, अतो भेदस्य पत्रान्तरनि-

ष्ठस्य प्रतियोगितावच्छेदकत्वसम्बन्धेन पतने सत्त्वेऽपि न निषेधप्रतीत्यनुपपत्तिः । दर्शितविशिष्टप्रतियोगितावच्छेदकत्वसम्बन्धस्य प्रतियोगितावच्छेदकताया युक्तिसहत्वात् । यो हि वृत्त्यनियामकः सम्बन्धः प्रतियोगिताविशिष्टबुद्धिं नार्जयति स न प्रतियोगितावच्छेदकः यो हि विशिष्टबुद्धिमर्जयति स प्रतियोगितावच्छेदको भवत्येव । तद्वैशिष्ट्यंप्रति तत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य विरोधित्वात् दर्शिता चैतादृशी युक्तिर्द्वितीयार्थविचारे । यदि च वृत्त्यनियामकः सम्बन्धो न प्रतियोगितावच्छेदक इति वचनं मन्त्रपाठ-मण्यादिवत् (यथा अग्निशामकमन्त्रपाठेन चन्द्रकान्तादिप्रतिबन्धकमण्यादिसमवधानेन च वह्निनिष्ठा दाहकताशक्तिर्विरुध्यते तथेति भावः) प्रतियोगितावच्छेदकत्वबुद्धिं विरुणद्धि, तदा भेदस्य दर्शितविशिष्टप्रतियोगितावच्छेदकत्वविशिष्टा विशेषणतैव सम्बन्धः पतनादिक्रियायामन्वयघटको न पत्रानित्यत्र नञर्थस्य प्रतियोगितावच्छेदकश्चाभ्युपेयते ।

यदत्र परम्परासम्बन्धस्य न संसर्गत्वं न वा प्रतियोगितावच्छेदकसंसर्गत्वमिति बाधकमुक्तं तदप्यकिञ्चित्करम् सुरभि जलं लोहितः स्फटिक इत्यत्र समवायिसंसयोगस्य संसर्गतायाः 'कर्पूरगन्धो न तडागजले किन्तु कुम्भोदके, मञ्जिष्ठारागो न मैत्रवस्त्रे किन्तु चैत्रपटे' इत्यत्र प्रतियोगितावच्छेदकतायाः सर्वानुभवसिद्धत्वात् प्रकृतेऽपि विभागभेदयोः पञ्चम्यर्थयोः जनकत्वप्रतियोगितावच्छेदकताभ्यां परम्पराभ्यां पतनादिक्रियायामन्वयात् न पत्रादिति परम्परायाः प्रतियोगितावच्छेदकसंसर्गतया निषेधप्रतीत्युपपत्तिः । नञ्विनिर्मुक्तवाक्ये येन सम्बन्धेन यस्य यत्रान्वयः, तत्र नञ्समभिव्याहारे तत्सम्बन्धावच्छिन्नप्रतियोगिताकस्तदभावस्तत्रान्वेतीति व्युत्पत्तेः न च 'सुरभि जलम्' इत्यादिप्रत्यक्षादिबुद्धौ परम्परायाः संसर्गत्वेऽपि शाब्दे क्वापि संसर्गत्वाभावात् प्रकृतेऽपि न संसर्गत्वम्, न वा प्रतियोगितावच्छेदकसंसर्गत्वमिति वाच्यम्, पचतीत्यादौ विक्लित्त्यादिफलस्य जनकतया प्रयोजकतया वा फूत्कारादिव्यापारे, तस्य प्रयोजकतया त्वाद्यर्थे प्रयत्नेऽन्वयदर्शनात् । एवं चैत्रेण न पच्यत इत्यादौ तृतीयार्थप्रयत्नस्य प्रयोज्यतया सम्बन्धेनावच्छिन्नप्रतियोगिताकाभावः पाकेऽन्वेतीति इति सर्वानुभवात् । न हि जनकता, जन्यता, प्रयोजकता, प्रयोज्यता वा साक्षात्सम्बन्धः । न च जनकत्वमतिरिक्तपदार्थः, तस्य साक्षात्सम्बन्धत्वमिति वाच्यम्, जनकत्वस्य तथात्वे तु जन्यत्वस्यापि तथात्वावश्यकत्वात् । प्रतिजनकं जन्यं च जन्यत्वजनकत्वयोरतिरिक्तयोरनन्तकल्पनापेक्षया कार्याधिकरणवृत्त्यभावप्रतियोगितावच्छेदकस्य क्लृप्तस्य तथात्वौचित्यात् । जन्यत्वस्यातिरिक्तत्वपक्षेऽपि प्रयोजकत्वस्य साक्षात्सम्बन्धत्वाभावात्, प्रयोजकतया प्रयोज्यतया वाऽन्वये परम्परायास्तथात्वावश्यकत्वमिति ।

न च फलस्य व्यापारे तस्य प्रयत्ने जनकतयाऽन्वयो न तु प्रयोजकतयेति वाच्यम्, अधिश्रयणाद्यवतारणान्तानां व्यापाराणां विक्लित्त्यादिजनकत्वविरहात् । मध्यमव्यापाराणां जनकत्वेऽपि प्रथमव्यापारेषु प्रयोजकतयैव विक्लित्त्यादेरन्वयसम्भवात् । पचतीत्यत्रापि व्यापारस्य तथैवान्वयात् । न चात्र साध्यत्वाख्यविषयित्वसम्बन्धेनान्वय इति वाच्यम्, प्रथमव्यापारस्य चरमव्यापारानुकूलप्रयत्ने तथान्वयासम्भवात् । एवं चैत्रेण पच्यत इत्यत्र तृतीयार्थप्रयत्नस्यापि न साध्यत्वाख्यविषयत्वेन व्यापारेऽन्वयः, प्रथमव्यापारसाध्यकप्रयत्नस्य मध्यमचरमव्यापारेषु साध्यत्वविरहादिति प्रयोज्यतयैवान्वय इति चैत्रेण न पच्यत इत्यत्रप्रयोज्यतासम्बन्धावच्छिन्नप्रतियोगिताकः प्रयत्नाभावो व्यापारे प्रतीयत इति परम्परायाः संसर्गत्वं प्रतियोगितावच्छेदकतासंसर्गत्वं च सर्वसंमतमिति ।

यदि च भेदोऽपि पत्यादिधातोरेवार्थः सर्वत्र पञ्चमीघटितकतिपयशाब्दसामग्र्यां भेदोपस्थितेर्निवेशनापेक्षया पत्यादिधातुघटितकतिपयशाब्दसामग्र्यांतन्निवेशनस्यैवौचित्यात् । न च पत्यादिधात्वर्थस्य भेदस्य धात्वर्थे विशेषणतया अन्व-

यित्वात्, फलतया तदन्वयिनोऽपादानस्य कर्मत्वाद् द्वितीयापत्तिरिति वाच्यम् अपायवतो ध्रुवस्य निरवकाशयाऽपादान संज्ञया कर्मसंज्ञाबाधात्, संयोगभेदोभयफलवत एव पत्यादिकर्मत्वादित्यर्थस्य द्वितीयाविचारे प्रदर्शितत्वात्। धात्वर्थभेदेऽपादानस्यान्वये पञ्चम्यर्थस्य क्रियाजन्यविभागादिरूपापायस्यान्वयसामग्री प्रयोजिकाऽतः केवलं भेदान्वयपरया मेरोरयमायातीति न प्रयोग इति विभाव्यते तदा भेदो न पत्यादिधातोर्नवा पञ्चम्या अर्थः किन्तु विभागादिरूपे पञ्चम्यर्थे व्यापारवद् भेदावच्छिन्नसमवायावच्छिन्नाधेयतया प्रकृत्यर्थस्यान्वयः तत एव पत्रात्पत्रं पततीति न प्रयोगः। वृक्षात्पत्रं पतति न पत्रादित्यत्रापि दर्शिताधेयत्वसम्बन्धावच्छिन्नप्रतियोगिताकः पत्राभावो विभागे प्रतीयत इति निषेधप्रतीत्युपपत्तिः। दर्शिताधेयत्वस्य वृत्त्यनियामकत्वेऽपि प्रतियोगितावच्छेदकसम्बन्धत्वं सर्वसम्मतमेव। अन्यथा गुणान्न पततीत्यत्र निषेधप्रतीतेः कथमप्यनुपपत्तेः। दर्शिताधेयत्वसंसर्गावच्छिन्नप्रतियोगिताको गुणाभावो विभागे प्रतीयत इति निषेधप्रतीतिरित्थमेव सम्भवतीति। एवं च समवायादभावाद्वा न पततीत्यत्र दर्शिताधेयत्वं समवायादेर्व्यधिकरणः सम्बन्धः तत्सम्बन्धावच्छिन्नप्रतियोगिताकः समवायादेरभावो विभागे प्रतीयत इति निषेधप्रतीत्युपपत्तिः।

ननु यतःपतनादिकं प्रसिद्धं तस्यैव निषेधो नञा प्रत्याय्यते अत एव नञ्विनिर्मुक्तशब्दप्रयोगे यद्वैशिष्ट्यं यत्र प्रतीयते, नञि समभिव्याहृते तन्निषेधस्तत्र प्रतीयत इति व्युत्पत्तिः। इत्थं गुणाद्यपादानकपतनाप्रसिद्धया गुणात्समवायादभावाद्वा पततीति प्रयोगविरहात्, गुणात्समवायादभावाद्वा न पततीति वाक्यमयोग्यमेव, तत्कथं दर्शिताधेयत्वसम्बन्धावच्छिन्नप्रतियोगिताको गुणादेरभावो विभागे प्रतीयते येन वृत्त्यनियामकसम्बन्धस्य प्रतियोगितावच्छेदकसम्बन्धत्वं स्यात् इति चेत्, तर्हि न पत्रात्पततीत्यत्र दर्शिताधेयत्वेन सम्बन्धेन पत्रविशिष्टस्य विभागस्य जनकं यत्पतनं, तत्कर्तृत्वस्य पतङ्गादिनिष्ठस्य प्रसिद्धस्याभावो नञा पत्रे बोध्यत इति निषेधप्रतीत्युपपत्तिः। 'वृक्षात्पतनं पत्रस्य न तु पत्रात्' इत्यत्र तथा पत्रविशिष्टस्य विभागस्य जनकतासम्बन्धावच्छिन्नप्रतियोगिताकोऽभावो नञा पतने बोध्यते। यदि च जनकत्वस्य वृत्त्यनियामकतया न प्रतियोगितावच्छेदकसम्बन्धत्वं तदा पूर्ववत्पतनस्य पत्रात् पततीत्यत्र' अनुषङ्गेण तथा पत्रविशिष्टस्य विभागस्य जनकं यत्पतनं पतङ्गादिर्तृकं प्रसिद्धं तदन्यत्वं नञा वृक्षापादानकपतने बोध्यते इति निषेधप्रतीत्युपपत्तिः।

एवं यन्मूर्त्तापादानकं पतनमप्रसिद्धं तद्वाचकपदान्नञ्समभिव्याहारेऽपि न पञ्चमी। अत एव गुणान्न पततीतिवत् भूतलात् पातालाद्वा न पततीति न प्रयोगः। समवाये व्यापारवद्भेदस्येव मूर्त्तवृत्तित्वस्यापि वैशिष्ट्यं विशेषणम्। तेन व्यापारवद्भेदावच्छिन्नमूर्त्तवृत्तित्वावच्छिन्नसमवायावच्छिन्नाधेयत्वेन सम्बन्धेन प्रकृत्यर्थस्य पञ्चम्यर्थे विभागेऽन्वयोऽभ्युपेतव्यः। अतो वृक्षादिव गगनाज्जीवाद्वा पततीति न प्रयोगः। अन्यथा व्यापारवद्भिन्नगगनादिनिष्ठविभागजनकत्वस्य पतने सत्त्वात् दर्शितप्रयोगस्य दुर्वारत्वापत्तेः। गुणान्न पततीत्यत्रेव गगनाज्जीवाद्वा न पततीत्यत्रापि निषेधगतिरवसेथेतीयमभिनवा रीतिरिहानुसन्धेया।

नन्वेवमपि वृक्षाद्वेपते स्पन्दते वेत्यादिः प्रयोगो दुर्वार एव पञ्चम्यर्थविभागस्य धात्वर्थे कम्पादौ जनकतयाऽन्वयसम्भवात्। न च फलव्यापारोभयवाचकधातुजन्योपस्थितिः पञ्चम्यर्थविभागान्वयबोधे हेतुरिति वेपतिस्पन्दत्योर्व्यापारमात्रवाचकतया फलावाचकत्वात्तज्जन्योपस्थितेर्विभागान्वयबोधाहेतुत्वान्न दर्शितप्रयोगप्रसङ्ग इति वाच्यम्, तथा सति आसनाच्चलित इति प्रयोगानुपपत्तेः, चलतेरपि फलावाचकत्वात्। न च चलतेः सन्निहितदेशसंयोगफलकव्यापारवाचकत्वात् फलवाचकत्वमेव, तथात्वेऽपि धात्वर्थान्तर्भूतकर्मकत्वात् न सकर्मकत्वम् फलवाचकस्यापि धातोर्योगे पञ्चमी भवत्येव यथा पल्यङ्कात्पीठे समुपविशतीत्यादौ, यथा चास-

नाच्चलित इत्यत्रापि पञ्चमीप्रयोगो निष्प्रत्यूह एवेति वाच्यम् तथापि तरोस्त्यजतीति प्रयोगापत्तेः, त्यजेः फलव्यापारोभयवाचकतया तज्जन्योपस्थितेः पञ्चम्यर्थविभागान्वबोधहेतुत्वे बाधकाभावादिति चेत् ,

अत्रकेचित् 'फलव्यापारोभयविषयक ज्ञानोद्देश्यताकसङ्केतीयज्ञाननिष्ठविषयतायां विभागविषयकत्वानवच्छिन्नत्वस्य फलविषयकत्वावच्छिन्नतव्यापारविषयकत्वावच्छिन्नत्वयोश्च निवेशः, तथा सति तादृशज्ञाननिष्ठतादृशविषयताकसङ्केतज्ञानजन्यसंस्कारसहकृतधातुजन्योपस्थितिः पञ्चम्यर्थविभागान्वयबोधे हेतुरिति त्यजिजन्योपस्थितिर्न तथा, त्यजेः सङ्केतीयज्ञानजन्यविषयतायाः विभागविषयकत्वावच्छिन्नत्वात्, सङ्केतस्य विभागस्पन्दोभयविषयकज्ञानोद्देश्यत्वादिति त्यज्यर्थे पञ्चम्यर्थस्य नान्वय" इति वदन्ति ।

तच्चिन्त्यम्, त्यजेः संयोगस्पन्दोभयवाचकताभ्रमदशायां तादृशशाब्दप्रसक्त्या तादृशप्रयोगापत्तेः । न च सङ्केतज्ञाने भ्रमान्यत्वं विशेषणमतो न तादृशशाब्दप्रसक्तिरिति वाच्यम्, तथापि यत्र पचिनाऽवतारणव्यापारोऽभिहितस्तत्र चुल्याः पचतीति प्रयोगापत्तेः । किं च विभागार्थकविभजतियोगे वृक्षाद्विभजते इत्यत्रेव तरोस्त्यजतीति अवधित्वार्थकपञ्चम्यापत्तिरिति । शाब्दिकास्तु त्यजतिफलविभागवत्तया वृक्षस्य कर्मत्वात्, परया कर्मसंज्ञयाऽपादानसंज्ञाया बाधात् तरोस्त्यजतीति न प्रयोग इति प्राहुस्तदपि न सुन्दरम् , गोभ्यः पयांसि दोग्धीत्यत्रेवावधित्वविवक्षया तथाप्रयोगापत्तेः । न च विभागः, स्पन्दनं, व्यापारः एतत्रितयार्थकस्यापि दुहेर्विभागाविवक्षायामपादानार्थकपञ्चम्यन्तस्य गोभ्य इत्यस्य प्रयोग इति वाच्यम्, तथा सति त्यजेरपि विभागाविवक्षायां स्पन्दमात्रप्रतिपादने तरोस्त्यजतीति प्रयोगापत्तेः ।

तस्मादिदमत्र तत्त्वम् विभागानुयोगित्वस्वरूपमवधित्वम् तत्र विभागस्य धातुना अलाभे पञ्चम्या विभागोऽर्थः, पचम्यर्थविभागान्वये संयोगव्यापारोभयवाचकधातुजन्या व्यापारोपस्थितिस्तन्त्रम्, विभागस्य धातुलभ्यत्वे तु पञ्चम्या अनुयोगित्वमर्थः । पंचम्यर्थानुयोगित्वान्वये तु प्रधानीभूतधात्वर्थव्यापारे धातुजन्या साक्षाद्विशेषणताऽनापन्नविभागोपस्थितिस्तन्त्रम्, वृक्षाद्विभजत इत्यत्र विभागस्य प्रधानव्यापारे साक्षाद्विशेषणतानापन्नस्यैव धातुजन्योपस्थितिः, गोभ्यः पयांसि दोग्धीत्यत्र स्पन्दनविशेषणतयोपस्थितस्यापि विभागस्य प्रधानव्यापारे साक्षाद्विशेषणत्वात् दुहिजन्या विभागोपस्थितिस्तन्त्रम्, इत्थं च त्यजेः संयोगवाचकतया तदर्थे न पंचम्यर्थविभागस्यान्वयः इति प्रधानव्यापारे साक्षाद्विशेषणतयैव विभागस्य त्यजनोपस्थापना न तत्र पञ्चम्यर्थानुयोगित्वस्यान्वयः इति तरोस्त्यजतीति न प्रयोगः । प्रधानव्यापारे साक्षाद्विशेषणीभूतविभागवाचकधातुजन्योपस्थितिः पञ्चम्यर्थानुयोगित्वान्वये तन्त्रमिति तु फलितार्थः अतस्तरोस्त्यज्यते इति कर्माख्यातप्रयोगोऽपि निरस्तः । कर्माख्याते विभागस्य व्यापाराविशेषणतया भानेऽपि त्यजेर्विशेषणीभूतविभागवाचकत्वात् । प्राचां मते धातोः फलावच्छिन्नव्यापारार्थकतया, नव्यानां मते फलव्यापारोभयवाचकतया विभागस्य गमनादिव्यावर्त्तकत्वरूपं विशेषणत्वं त्यज्यर्थव्यापारे सर्वथैवोपेयमिति ।

नन्वेवं विभागव्यापारोभयवाचकस्यापसरत्यादेर्योगे सदसोऽपसरति इति प्रयोगो न स्यात् धातोर्विशेषणीभूतविभागवाचकतया, तदर्थे विभागे पञ्चम्यर्थानुयोगित्वस्य अन्वयाप्रसक्तेरिति चेन्न, धातोरपसरत्यादेर्विभागावाचकत्वात्, किं तु अपपूर्वक सरत्यादेः पूर्वदेशान्यदेशसंयोगफलकस्पन्दवाचकत्वम्, इति धात्वर्थान्तर्भूतकर्मकत्वमितितदर्थे स्पन्दे पंचम्यर्थविभागान्वयसम्भवात्—भवति सदसोऽपसरतीत्यादिकः प्रयोगः ।

संयोगफलकधातुयोगे पञ्चमी यथा—वृक्षात्पतति गच्छति वा पत्रमित्यादौ, पतेरधोदेशावच्छिन्नसंयोगफलको, गमेस्तु संयोगफलको व्यापारोऽर्थः । उपत्यकाभ्यो गिरि–

मधिरोहति आरोहति वेत्यादावधिपूर्वकस्य आङ्पूर्वकस्य वा रोहतेः ऊर्ध्वदिगवच्छिन्नसंयोगफलको व्यापारोऽर्थः। जलादुद्गच्छति, उन्मज्जति वा पद्ममित्यादौ उत्पूर्वकस्य गच्छतेर्मज्जतेश्च ऊर्ध्वदेशसंयोगफलको व्यापारोऽर्थः। पल्यङ्कादुपविशति पीठे इत्यादावुपविशतेः स्फिग्भूसंयोगस्य स्फिग्मूर्त्तसंयोगस्य वाऽनुकूलो व्यापारोऽर्थः। यदि च जलेषूपविष्टो योगी न निमज्जतीति प्रयोगः तदा स्फिग्मूर्त्तसंयोगः फलतया धात्वर्थो बोध्यः। ऊर्ध्वदेशादिकर्मणो धात्वर्थेऽन्तर्भावात् धात्वर्थान्तर्भूतकर्मकत्वादुद्गच्छत्यादीनामकर्मकत्वमिति पञ्चमीनां दर्शितेषु—जलादुद्गच्छति उन्मज्जति वा पद्ममित्यादिषु—प्रयोगेषु विभागोऽर्थः स च जनकतया व्यापारेऽन्वेति।

ग्रामादजां वनं नयति' 'विपणेः पण्यभारं गृहं वहति' इत्यादौ नयतेः प्रेरकदेशावधिकप्रेर्यदेशावृत्तिपरत्वनिरूपितापरत्वसमानाधिकरणः संयोगः कर्मव्यापारश्चार्थः। आङ्पूर्वकस्य नयतेरर्थे तादृशापरत्वसमानाधिकरण एव संयोगो निविशते, वहतेश्च संयोग, आधेयकर्म, आधारकर्मस्वरूपव्यापारश्चार्थः। वणिग्गृहात् कनकं स्वगृहं हरति तस्कर इत्यत्र हरतेः संयोगः कर्मव्यापारश्चार्थः। वृक्षाच्छाखां भूमिं कर्षतीत्यत्र कृषेः कर्षकदेशावधिककर्षणीयदेशवृत्तिपरत्वनिरूपितापरत्वसमानाधिकरणः संयोगः कर्मव्यापारश्चार्थः, तादृशापरत्वसमानाधिकरणः संयोग आङ्पूर्वकस्य कृषेरर्थे निविशते। एषु सर्वत्र पञ्चमीनां विभागोऽर्थः। स च जनकतया संयोगजनके अजाकर्मणि, भारकर्मणि, कनककर्मणि, शाखाकर्मणि चान्वेति, न तु व्यापारे ग्रामवर्त्तिनाऽपि ताडनादिनाऽजादेर्गते नयनादिति।

नगराद्वनं नयत्यरातीनित्यादावपि पञ्चम्यर्थो विभागो जनकतासम्बन्धेन अरातिरूपे कर्मण्येवान्वेति। स्थाल्या ओदनमुद्धरतीत्यादौ उद्धरतेरूर्ध्वदेशसंयोगानुकूलव्यापारोऽर्थः ऊर्ध्वदेशस्य कर्मणो धातुनाऽभिधानात् नास्य द्विकर्मकत्वम्। पञ्चम्या विभागोऽर्थः। स चोर्ध्वदेशसंयोगजनके ओदनकर्मण्येवान्वेति। मन्दुराभ्यो हयान् रथे युनक्तीत्यत्र पार्थिवद्रव्यसंयोगानुकूलकर्मानुकूलव्यापारो युजेरर्थः, पार्थिवस्य कर्मणो धातुनाऽभिधानात् नास्य द्विकर्मकत्वम्। अत्रापि पञ्चम्यर्थो विभागो जनकतया पार्थिवसंयोगजनके हयकर्मण्यन्वेति।

विभागार्थकधातुयोगे पञ्चमी, यथा वृक्षाद्विभजते पत्रं वायुः' अस्थ्नो विभजते मांसं कौणपः' इत्यत्रविभजतेः पार्थिवद्रव्यविभागानुकूलकर्मानुकूलव्यापारोऽर्थः। विभागफलवतः पार्थिवस्य कर्मणोधात्वर्थेऽन्तर्भावात् नास्य द्विकर्मकत्वम्। पार्थिवविशेषणात् जले जलाद्वा विभजते इति न प्रयोगः। पार्थिवविभागानुकूलकर्मानुकूलफलत्वात् पत्रमांसयोः कर्मत्वम्। अत्र पञ्चम्यर्थोऽनुयोगित्वस्वरूपमवधित्वम् निरूपकतयाऽनुयोगितानिरूपकत्वस्वरूपमवधिमत्त्वं वा स्वरूपेण सम्बन्धेन पार्थिवद्रव्यविभागेऽन्वेति। वृक्षात्पुष्पं चिनोतीत्यत्र प्रतियोग्युत्पत्तिद्वितीयक्षणोत्पन्नसंयोगप्रतिद्वन्द्वी विभागः कर्मव्यापारश्चिनोतेरर्थः। गोभ्यः पयांसि दोग्धीत्यत्र दुहेः विभागः स्पन्दनं कर्मव्यापारश्चार्थः, अत्रापि पञ्चम्यर्थोवधित्वमवधिमत्त्वं वा विभागेऽन्वेति न च चिनोतेर्दुहेश्च विभागाविवक्षायामत्र विभागार्थिका पञ्चमीति वाच्यम्, संयोगार्थकधातुयोग एव पञ्चम्या विभागार्थकत्वात्, अन्यथाऽतिप्रसङ्गः स्यादित्युक्तत्वात्।

यदि वाऽपसरत्यादेर्देशान्तरसंयोगफलको व्यापारो नार्थः तथा सति बिलादर्धमायाते सर्पे बिलात्सर्पोऽपसृत, इति प्रयोगप्रसङ्गात्। तस्मात्सर्वावयवावच्छिन्नपूर्वदेशविभागफलककर्मफलको व्यापारोऽपपूर्वकस्य निःपूर्वकस्य च सरतेरर्थः। अन्यस्यापि गमनार्थकधातोरेतदुभयोपसर्गपूर्वकस्य स एवार्थः। विभागफलवतः पूर्वदेशस्य धातुनाऽभिधानात् कर्मफलवतो व्यापारवत्तया कर्तृत्वाच्च नापसरत्यादेः

सकर्मकत्वमिति विभाव्यते, तदा सदसोऽपसरतीत्यादौ पञ्चम्या अवधित्वमवधिमत्त्वं वाऽर्थो विभागेऽन्वेति । यदि च सर्वावयवावच्छिन्नपूर्वदेशान्यदेशसंयोगफलको व्यापारोऽपसरत्यादेरर्थः तदा सदसोऽपसरति निःसरति, अपगच्छति निर्गच्छति अपैति निरेति वेत्यादौ पञ्चम्या विभागोऽर्थो जनकतया व्यापारेऽन्वेति ।

क्वचिदन्यादृशोऽप्यपायः——यथा वैपणिकान्मौक्तिकं क्रीणाति, नृपाद् गां प्रतिगृह्णाति, इत्यादौ स्वस्वामिभावसम्बन्धविगमोऽपायः पञ्चम्यर्थः क्रये प्रतिग्रहे प्रयोजकतयान्वेति क्रयस्तु स्वत्वेच्छाप्रयोज्यं दानं, प्रतिग्रहः स्वत्वोद्देश्यिकेच्छा । पञ्चम्याः स्वत्वनाशोऽयं खण्डशो वाऽर्थः तत्र प्रकृत्यर्थस्य निरूपितत्वेन सम्बन्धेन स्वत्वे तस्य प्रतियोगितानिरूपिताऽनुयोगितया नाशेऽन्वयः, तथाविधनाशस्य जनकतया क्रयव्यापारे दाने प्रतिग्रहव्यापारे स्वत्वेच्छयां चान्वयः । नरकात्पापाद्वा पितॄनुद्धरतीत्यत्रोर्ध्वलोकप्राप्तिफलकादृष्टफलकः श्राद्धादिव्यापार उद्धरतेरर्थः अदृष्टफलवता पितृकर्मणाऽस्य सकर्मकत्वं—प्राप्तिफलवत ऊर्ध्वलोकस्य धातुनाऽभिधानान्न तेन कर्मणा सकर्मकत्वमिति न द्विकर्मकत्वमिति । पञ्चम्यर्थोऽत्र नाशः प्रकृत्यर्थविशेषित ऊर्ध्वलोकप्राप्तिजनके पितृगते अदृष्टे जनकतयाऽन्वेति शताद्वियुज्यन्ते शुद्ध्यन्ति वा दशमिता इत्यत्र विपूर्वकस्य युजेर्धातोरपेक्षाबुद्धिविषयत्वाभावोऽर्थः, शतपदस्य शतत्वं सङ्ख्याऽर्थः । पञ्चम्या अनुत्पादोऽर्थः प्रयोजकतया धात्वर्थेऽन्वेति । तथा च शतत्वसङ्ख्यानुत्पादप्रयोजकस्यापेक्षाबुद्धिविषयत्वाभावस्याश्रया दशमिता इत्यन्वयबोधः । नरकात्पापाद्वा मुच्यत इत्यत्र दैवादिकस्य मुच्यतेः दुःखात्यन्तविमोक्षानुकूलस्तत्त्वज्ञानादिव्यापारोऽर्थः फलासमानाधिकरणव्यापारार्थकतयाऽस्य सकर्मकत्वमिति, पञ्चम्यर्थोऽनुत्पादो नाशश्च प्रयोजकतत्त्वज्ञानादौ व्यापारेऽन्वेति । नरकानुत्पादस्य पापनाशस्य वा 'प्रयोजको मोक्षानुकूलस्तत्त्वज्ञानादिव्यापारो वाक्यार्थः । सर्वपापैः स मुच्यत इति अत्र मुच्यतेः सम्बन्धाभावप्रयोजको नाशादिव्यापारोऽर्थः । तृतीयार्थः प्रतियोगिताकत्वं कर्तृत्वनाशेऽन्वेति व्युत्पत्तिवैचित्र्येण पापस्य सम्बन्धेऽप्यन्वयः । सम्बन्धाभावस्वरूपफलवत्तया तच्छब्दार्थस्य कर्मत्वमिति । तदा च पापप्रतियोगिताकनाशप्रयोज्यस्य पापसम्बन्धाभावस्याश्रयः स इत्यन्वयबोधः । बन्धनान्निगडाद्वा मुच्यत इत्यत्र मुच्यतेर्बन्धनाख्यसंयोगनाशकविभागोऽर्थः पञ्चम्या अवधित्वमर्थः विभागेऽन्वेति । विभागस्य धातुना प्राधान्येनोपस्थापनात् प्रधानव्यापरे साक्षाद्विशेषणतयोपस्थित्यविषयत्वात् । बन्धनशब्दस्य करणेऽनप्रत्ययेन रज्जुनिगडादिपरतया धातुनाऽनभिधानान्न ततः पञ्चम्यनुपपत्तिः ।

ननु पञ्चम्या नानाविधापायार्थकतामपेक्ष्यैकविधातिरिक्तावधित्वार्थकत्वमेवोचितम्, लाघवात् । दर्शितेषु सकलस्थलेषु एकविधस्यावधित्वस्य धात्वर्थेऽन्वयोपगमादभीष्टसिद्धेरिति चेन्मैवम् नानाविधापायस्य प्रतीयमानस्यापलापापत्तेः । अयमस्मात्तार इत्यत्रावधित्वस्यैकविधतया नामार्थान्वयेन कारकत्वहान्यापत्तेश्च । किं च पञ्चम्या एकविधावधित्वार्थकत्वं न सम्भवति । तथा हि वृक्षात्पचतीत्यत्र पाके वृक्षावधित्वान्वयवारणाय तदन्वयबोधं प्रति गमनार्थकधातुजन्योपस्थितेः कारणत्वं स्वीकरणीयम्, तथा च वृक्षाद्विभजते इत्यत्रानन्वयापत्तेः । न च यद्यद्धातुयोगे पञ्चमी दृश्यते तत्तद्धातुजन्योपस्थितिः पञ्चम्यर्थावधित्वान्वयबोधे हेतुरिति वाच्यम्, अननुगमाद्, वृक्षात्क्रीणातीति प्रयोगापत्तिश्चेत्यलं पल्लवितेन ।

अपादानसंज्ञाविधायकसूत्रव्याख्यायामपादानस्य त्रैविध्यमुक्तं बृहद्वृत्तौ तथाहि **तदेतत्त्रिविधम्, निर्दिष्टविषयम्, उपात्तविषयम् अपेक्षितक्रियंचेति ।** तदुक्तं हरिणापि—

**निर्दिष्टविषयं किञ्चिदुपात्तविषयं तथा ।**
**अपेक्षितक्रियं "चेति त्रिधापादानमुच्यत" इति ।**

विवृतं चैषां स्वरूपम्–यत्र **धातुनाऽपायलक्षणो विषयो निर्दिष्टस्तन्निर्दिष्टविषयम्** , इति। अत्र धातुनैव यत्र मुख्यया वृत्त्या विभागजनिका गतिर्निर्दिश्यते तदित्येकं लक्षणम्। उदाहरति यथा ग्रामादायातीति। अत्र ग्रामविभागपूर्वक एवोत्तरदेशसंयोगो धातुना प्रतिपाद्यत इति तत्रापायविषयस्य धातुनैव निर्देश इति भवति लक्षणसमन्वयः। यथा वा अश्वात्पततीति। अत्र पतनक्रिया ऽश्वावधिकविभागपूर्विकैव भवति स च विभागो धात्वर्थ एवान्तर्भूत इति धातुर्निर्दिष्ट एव। द्वितीयं लक्षयति यत्र धातुर्धात्वन्तरार्थाङ्गं स्वार्थमाह तदुपात्तविषयमिति। समभिव्याहृतधातुना स्वतो न विभागः प्रतिपाद्यतेऽपि तु धात्वन्तरार्थाङ्गविभागः प्रतिपाद्यते तत्र विषयस्यान्यत उपात्तत्वादुपात्तविषयता। यथा वलाहकाद्विद्योतते विद्युदिति। अत्र हि बलाहकान्निःसृत्य प्रकाशते इत्यर्थावगमात् निःसरणरूपो विभागो धात्वन्तरार्थाङ्गभूत इति भवति लक्षणसमन्वयः। यथा वा कुशूलात्पचतीति। अत्रापि कुशूलादुद्धृत्य पचतीत्यर्थावगतेः उद्धरणाङ्गभूतो विभागोऽन्यधात्वर्थभूत एव प्रतीयत इति लक्षणसंगतिः। तृतीयं लक्षयति—**यत्र तु क्रियावाचिपदं न श्रूयते केवलं क्रिया प्रतीयते तदपेक्षितक्रियमिति**। अपेक्षिता अन्वयित्वेनाकांक्षिता क्रिया यत्रेतिव्युत्पत्तेर्यत्रापायप्रतिपादको धातुर्नोक्तोऽपि तु तद्वाचकपदमध्याहृत्य, अर्थमेवाध्याहृत्य वा विभागावगतिर्भवति तदित्यर्थः। **सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा** इति। अत्र सांकाश्यकेभ्यः पाटलिपुत्राणामभिरूपतरत्वेन विभागः निर्धारणं वा बुद्ध्याऽपेक्षितमिति विभज्य पृथक्कृतिरूपोऽर्थोऽपेक्षित इति तदपेक्षयाऽपादानमुदाहरन्ति। अत्र हि आगच्छतीत्यादिक्रियार्थमपेक्ष्य पञ्चमी भवति। सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इत्यादि प्रयोगार्थं च तद्विषये पाणिनीयं सूत्रम् 'पञ्चमी विभक्ते' (पा०सू० २।३।४२) इति। यतश्च निर्धारणम् (२।३।४५) इति च जातिगुणक्रियादिभिः पृथक्कृतौ सप्तम्या सह वैकल्पिकीं पञ्चमीं शास्ति। 'पञ्चमी विभक्ते' इति च भेदप्रतिपादने नित्यमेव पञ्चमीं शास्ति। स्वमते च तृतीयापादनलक्षणेनैव गतार्थमिति न तदर्थं पृथक्सूत्रमारम्यते इति।

केचित्तु निर्दिष्टविषयमित्यादिलक्षणत्रयमित्थं व्याचक्षते यत्र विभागस्तज्जनकक्रिया चेत्युभयं समभिव्याहृतधातुनैव निर्दिश्यते तदाद्यम्। यत्र विभागोऽध्याहृतधातुना तज्जनिका क्रिया च समभिव्याहृतधातुना प्रतिपाद्यते तद्द्वितीयम्। यत्र तूभयमप्यध्याहृतधातुनैव प्रतिपाद्यं तत्तृतीयमिति। उदाहरणानि पूर्वोक्तानुसारीण्येवेति।

'सांकाश्यकेभ्यः पाटलिपुत्रकाः अभिरूपतरा' इत्यादौ मूर्तद्रव्यसंयोगनाशरूपविभागस्याप्रतीत्याऽपायाभावात्कथमपादानत्वमिति शङ्कां मनसिकृत्यापायद्वैविध्यमुक्तं बृहद्वृत्तौ अपायश्च **कायसंसर्गपूर्वको** वेति। अयमाशयः न केवलं मूर्तद्रव्यसंसर्गपूर्वक एव विभागोऽपायोऽपि तु बुद्ध्यापि ये पदार्थाः परस्परं केनापि सम्बन्धेन सम्बद्धाः प्रतीयन्ते तेषां केनापि हेतुना पृथक्कृतिबुद्धिर्यदि प्रतिपिपादयिषिता तदाऽपि विभागप्रतीतिर्जायत इति सोऽपि विभागोऽपायत्वेनैव ग्राह्य इति भावः। उक्तोदाहरणे सांकाश्यकैः सह पाटलिपुत्रकाणां गुणान्तरैः समानानामपि आभिरूप्यप्रकर्षाश्रयत्वेन बुद्ध्या पृथक्कृतिः प्रतिपाद्यत इत्यपायसिद्धिरिति भावः। पातञ्जलमहाभाष्येऽपि - प्रकृतप्रयोगे एवमेव समाधानमुक्तम्-"यस्तैः साम्यं गतवान् स एवम् प्रयुङ्क्ते" इति। विवृतं च कैयटेनैतत्–तैः सांकाश्यकैः पाटलिपुत्रकाणां यः साम्यमवगतवान् स प्रकर्षाश्रयेण पुनः (तान्) पृथक्कृत्वा वाक्यं प्रयुङ्क्त इति तदर्थ इति। इत्थञ्च द्विविधोऽपायः मुख्यो गौणश्च। तत्र मुख्योऽपायः कायसंसर्गपूर्वको विभागः-कायपदेन चेह मूर्तद्रव्यं लक्षितम्। अयं च स्थूलतया सर्वजनवेद्यः। अन्यश्च बुद्धिपरिकल्पितः। स च गौण इति व्यवह्रियते। गौणापायमेवोदाहरति प्राचां वचनेन—

बुद्ध्यासमीहितैकत्वान् पञ्चालान् कुरुभिर्यदा।
बुद्ध्याविभजते वक्ता तदाऽपायःप्रतीयत" इति।

बुद्ध्या विभागबुद्धेः प्राचीनया मत्या समीहितम् इष्टमेकत्वं—कुरुभिःसहापृथग्भावो येषां तादृशान् पञ्चालान् जनपदविशेषान् विभजते कुरुनिवासरूपेण पृथग्भूतेन धर्मेण विवेचयति तदा पञ्चालेभ्यः कुरवो निर्गताः प्रतीयन्त इत्यपायो बुद्धिकृतः प्रतीयत इति तदर्थः ।

न केवलमीदृशार्थस्यैव गौणापायस्वीकारेण संग्रहोऽपितत्वन्योऽपि बहवः प्रयोगा एतेन बुद्धिपरिकल्पितापायाश्रयणेन व्युत्पादनीया इति प्रतिपादयितुम् (बृहद्वृत्तौ) अतिदिशति-एवम् अधर्माज्जुगुप्सते इत्यादिना । अन्ये वैयाकरणाः तत्तद्विषयाण्यपादानसंज्ञासूत्राणि वार्त्तिकानि वाऽन्वारभन्ते, तैरपि अवश्यमेव तत्रापायस्य सम्बन्धः स्वीक्रियते चेन्न तेषां वचनानामावश्यकता भवेत् । पातञ्जलमहाभाष्ये च सर्वत्रात्र बुद्धिकल्पितमपायं स्वीकृत्य तानि तानि वचनानि प्रत्याख्यातप्रायाण्येव । स्वमतेऽपि तादृशवचनानामदर्शनात्तेषां लक्ष्याणामनेन गौणापायस्वीकारेणैव निर्वाहः इति यथायथं विवृतमेव वृत्तौ । तत्रैतेषु धात्वर्थविभक्त्यर्थादिविचारो नैयायिकैर्यथा क्रियते तदिह संक्षेपतः प्रदर्श्यते ।

अधर्माज्जुगुप्सते विरमति वेत्यत्र, गुपेर्गर्हा नाम द्वेषविशेषः, विरमतेर्निवृत्तिर्यत्नोऽर्थः । धर्मात्प्रमाद्यतीत्यत्र प्रमादेरनुद्बुद्धसंस्कारोऽर्थः । सर्वत्र पञ्चम्या विषयत्वमर्थः, तथा च पापविषयकगर्हाश्रयत्वम्, पापविषयकनिवृत्त्याश्रयत्वं, धर्मविषयकानुद्बुद्ध संस्काराश्रयत्वं वाक्यार्थ इति सम्प्रदायः । पञ्चम्यर्थो विषयत्वम्, गर्हाकरणयोरभावप्रतियोगिषु चान्वेति पापविषयकगर्हाप्रयुक्तः पापविषयकप्रवृत्त्यभावः । पापविषयककरणादनन्तरस्तदभावः धर्मविषयककर्तव्यतास्मरणाभावप्रयुक्तो धर्मविषयकप्रवृत्त्यभावः— क्रमशोवाक्यार्थ इत्याहुः ।

वस्तु तस्तु बुद्ध्यादिविगमस्वरूपापायवतो जुगुप्साद्यपादनत्वज्ञापनार्थमपादानसूत्रैकवाक्यतया तानि तानि वचनान्यारब्धानि तथा च य एवार्थोऽपायरूपो मुख्यापादानस्थलेषु प्रतीयते स एवाऽत्रापीति, तत्र यथा विभागोऽवधित्वं वा पञ्चम्यर्थस्तथेहापीत्येव स्वीकरणीयमिति विषयत्वार्थवर्णनमनुचितमनाकरमिति प्रतिभाति ।

पुनरन्ये नव्या आहुः :— एषु कर्तव्यत्वप्रकारकज्ञानविशेष्यत्वाभावः पञ्चम्या अर्थः । स च प्रयोजकतया जुगुप्सायामन्वेति । पञ्चम्यर्थे तादृशाभावे प्रकृत्यर्थस्याधेयतयाऽन्वयः, जुगुप्सा तु द्वेषविशेषः, यद्वा अपकर्षप्रतिपत्त्यनुकूलो व्यापारः । अत एव जुगुप्सतिः सकर्मकः, तत्र कर्मणोऽपादानत्वविवक्षायां पञ्चमी इतरथा तु पापकर्माणि जुगुप्सत इति द्वितीयैव उचिता । तथा च पापाज्जुगुप्सत इत्यत्र पापपदस्य पापकर्मपरतायां दुरितजनकत्वमपकर्षः, दुरितपरतायां तु दुःखजनकत्वमपकर्षः, तथा च पापवृत्तेः कर्तव्यत्वप्रकारकबुद्धिविशेष्यत्वाभावस्य प्रयोजकोऽपकर्षप्रतिपत्त्यनुकूलो व्यापारो वाक्यार्थः । पापस्यापकर्षप्रतिपत्तिविशेष्यत्वमर्थात्प्रतीयते । न ह्यन्यनिष्ठस्य कर्तव्यताबुद्धिविशेष्यत्वाभावस्य प्रयोजकोऽन्यनिष्ठापकर्षप्रतिपादकः संभवति । देवदत्ताज्जुगुप्सत इत्यत्र पञ्चम्या गुणाभावोऽर्थः गुणो धैर्यादिः, अपकर्षश्चात्र क्रोधलोभादिः । अन्वयः पूर्ववद्बोध्यः । एतेन जुगुप्सारूपद्वेषविषयस्य क्रियाफलेन विषयत्वेनाभिप्रेततया सम्प्रदानत्वमेव, यथा श्राद्धाय निगर्हत इति; तथा चात्रापादनत्वाभावात् पञ्चम्यप्रसक्तेः पापाज्जुगुप्सते इति प्रयोगो न स्यादित्यपास्तम् क्रियाफलेनापकर्षप्रतिपत्त्या अनभिप्रेतत्वात्सम्प्रदानत्वाप्रसक्तेरिति ।

पापाद्विरमति निवर्तते वेत्यत्र धातोर्निवृत्तिर्यत्न एवार्थः, पञ्चम्याः काम्यत्वाभावोऽर्थः । पापवृत्तेः काम्यत्वाभावस्य प्रयोजिका निवृत्तिर्वाक्यार्थः । पापे निवृत्तिविषयत्वं पूर्ववदर्थात्प्रतीयते । करणानन्तरमकरणं तु न विरमत्यादेरर्थः तथासति चैत्रः परस्त्रीगमनाद्विरतो निवृत्तो वेति प्रयोगानुपपत्तेः । धर्मात्प्रमाद्यतीत्यत्र प्रमाद्यतेर्निश्चयाभावोऽर्थः पञ्चम्याः प्रवृत्तिविषयत्वाभावोऽर्थः, धर्मवृत्तेः प्रवृत्तिविषयत्वाभावस्य प्रयोजको निश्चयस्त्वर्थात्प्रतीयते स च कर्तव्यत्वप्रकारकः । निश्चयविशेष्यत्वं धर्मे पूर्ववदर्थात्प्रतीयते ।

तीर्थात्प्रमाद्यतीत्यत्र तीर्थपदस्य तीर्थगमने धातोर्वा गमन-निश्चयाभावे लक्षणा। स्मरणं तु न प्रमाद्यर्थे निविशते। तथा सत्यनवगतान्धपुत्रो दशरथोऽन्धपुत्ररक्षणात् प्रमाद्य-दित्यत्र अपूर्वान्धपुत्ररक्षणविशेष्यकस्मरणाप्रसिद्ध्याऽनन्वया-पत्तेः।

एवं भयार्थानां त्राणार्थानां चापि धातूनां प्रयोगे पञ्चमीप्रयोगो दृश्यते यथा व्याघ्राद्बिभेति चोरात्त्रायत इत्यादि। अत्रापि— य एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति यदि मां व्याघ्राः पश्यन्ति, तर्हि ध्रुवो मे मृत्यु-रिति स बुद्ध्या व्याघ्रान् संप्राप्य ततो निवर्त्तत इति बुद्धि-कृतोऽपायोस्त्येवेति गौणापायलक्षणसत्त्वात् अपादानसंज्ञया पञ्चमी सिद्धा। चोरात्त्रायत इत्यत्रापि य एष मनुष्यः प्रेक्षापूर्वकारी दयालुः सुहृद्भवति स पश्यति यदीमं चौराः पश्यन्ति ध्रुवमस्य वधबन्धनादिपरिक्लेशाः स्युरिति स बुद्ध्या चोरान् संप्राप्य ततस्तं निवर्तयतीति बुद्धिकृतोऽ-पायोऽत्राप्यस्तीति गौणापायनिमित्तकमपादानत्वमिहापि सिद्धमिति विनैव वचनान्तरं पञ्चमी सिद्धा।

अत्र गौडाः परतोऽनिष्टसम्भावनास्वरूपं भयं तदर्थका बिभेत्यादयः। अनिष्टानुत्पत्त्यनुकूलव्यापारस्वरूपं त्राणं तदर्थकास्त्रायत्यादयः। एतेषां धातूनां योगेऽनिष्टप्रयोजक-स्यापादानसंज्ञां विधाय पञ्चमीं विदधति। पञ्चम्याश्च प्रयोजकत्वमर्थं इति वर्णयन्ति। स चार्थो धात्वर्थघटकेऽ-निष्टेऽन्वेति। यदि च यस्य पुंसो व्याघ्राधीनमनिष्टम-प्रसिद्धं किन्तु व्याघ्राधीनत्वेन मरणमसौ सम्भावयति तत्पुरुषपरो व्याघ्रादयं बिभेतीति प्रयोगस्तदा पञ्चम्यर्थः प्रयोज्यत्वप्रकारत्वं धात्वर्थेऽनिष्टसम्भावनायामन्वेति। दर्शित-स्थले तस्य पुंसो व्याघ्रप्रयोज्यत्वप्रकारिकाया अनिष्ट-संभावनायाः सत्त्वान्नानुपपत्तिः। एवं च शत्रुभ्रमेण मित्रा-द्बिभेतीति प्रयोगोऽप्युपपद्यते। अत्रानिष्टं च दुःखमेव सर्वत्रानुगतं बोध्यम्। यत्प्रयोज्यं दुखं न कस्यापि प्रसिद्धं तादृशस्याहिकण्टकादेर्यद्यपादानत्वमिष्टं तर्हि दुःखोपधातक-व्यापारविरहस्यानुकूलो व्यापारस्त्राणं तत्र दुःखवतः कर्म-त्वम्, तथाविधव्यापारविरहाधिकरणस्यापादानत्वम्, तथा च तथाविधाहिकण्टकाद्यपादानकं स्वकर्मकत्राणमेव प्रसिद्धम्। यत्राचेतनस्य घटादेः कर्मत्वं तत्रनाशोपधायकव्यापारविरह-स्यानुकूलो व्यापारस्त्राणं तत्र नाशवतः कर्मत्वम्। एवं तत्सर्पात्त्रायत इत्यादौ पञ्चम्या आधेयत्वमर्थ इत्यादि वदन्ति।

तच्चिन्त्यम्, नरकाद्बिभेतीत्यादौ नरकजन्यानिष्टान्तरस्या-भावादनन्वयापत्तेः। प्रयोज्यत्वप्रकारकत्वस्य पञ्चम्यर्थस्या-निष्टसम्भावनायामन्वयोपगमेऽपि प्रयोज्यत्वस्य अनिष्टान्वया-नुपगमे व्याघ्रप्रयोज्यो वृकनाशः वृकप्रयोज्यो बालनाशः. बालश्च मम पुत्रः सम्भाव्यते इति ज्ञानदशायां बालपुत्रोऽयं व्याघ्राद्बिभेतीति प्रयोगापत्तेः। अनिष्टान्वये तु यत्रानिष्टम-प्रसिद्धं तत्र दोष इति विज्ञेयम्। न च प्रयोज्यत्वप्रकारत्वस्य स्वनिरू पितानिष्टनिष्ठविशेष्यताप्रतियोगित्वेन सम्बन्धेन सम्भावनायामन्वयोपगमात् नोक्तदोष इति वाच्यम्, तथा सति सम्भावनामात्रस्य बिभेत्यर्थत्वापत्तेः। मैत्रस्य "व्याघ्र-प्रयोज्यं चैत्रस्य दुखं सम्भाव्यते"—इति ज्ञानदशायां मैत्रो व्या-घ्राद्बिभेतीति प्रयोगापत्तेः। तत्तत्पुरुषीयदुःखविषयकत्तत्त त्पुरुषीयसम्भावनाया धात्वर्थत्वेऽननुगमाद्दुर्ग्रहत्वापत्तेः। समानाधिकरणदुःखविषयकसम्भावनायास्तथात्वे न यत्र दुःख-त्वेन शरीरनाशादिः सम्भावितस्तत्र दुःखाद्बिभेतीतिवत् शरीरनाशाद्बिभेतीति प्रयोगानापत्तेः। नरकात्त्रायत' इत्या-दावपि नरकप्रयोज्यानिष्टान्तरस्याभावात् (नरकस्यैव तत्तद-निष्टसमुदायरूपत्वात्) अनन्वयापत्तेः।

भयत्वं द्वेषत्वावान्तरजातिः सैव बिभेतेः प्रवृत्तिनिमि-त्तम्, फलावाचकत्वादेवासौ यतिवदकर्मकः। तत्र दुःखगोचरे भये स्वस्मिन् भावित्वप्रतिसन्धानमेव कारणम्। अत्र द्वेष स्तत्सामग्री वा सहकारितयाऽपेक्ष्यतेऽतो रागान्धानामास्ति-कानां नरकाद्, यियक्षूणां यागश्रमात्, मुमुक्षूणां तितिक्षादि-क्लेशाद्वा, न भयमित्यादयः प्रयोगा उपपद्यन्ते। उपाय-

विषये भये भयापादानस्यानिष्टसाधनत्वमासन्नत्वं च ज्ञायमानं जनकम् । चौरेभ्यो हि आसन्नतया प्रतिसंहितेभ्य एव भयं भवति, आसत्तिप्रकर्षाच्च भयप्रकर्षः । आसत्तिरपि कालिकी दैशिकी वा यथायथमूहनीया । एवं विषयविषयिभावलक्षणहेतुतैव पञ्चम्यर्थः चौरेभ्यो बिभेतीत्यत्र चौरगोचरं भयं वाक्यार्थः । त्राणमपि भयाभावानुकूलो व्यापारः तत्र भयाभावस्वरूपफलवान् त्रातव्यः कर्म, भयाभावस्तु कारणविघटनद्वारा त्रातृ व्यापारप्रयोज्यः, 'व्याघ्राद्गां त्रायत इत्यत्र गोवृत्तेर्व्याघ्रविषयकभयप्रतियोगिकाभावस्य प्रयोजको व्यापारस्तत्कर्तृत्वं वाक्यार्थः । नन्वेवं 'स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् इत्यत्र 'भयात्त्रातुं दातुम्' इत्यत्र चानन्वयापत्तिः, भयस्य द्वेषतया त्राणस्य तदभावानुकूलव्यापारतया द्वेषविषयकद्वेषासत्त्वात् भयहेतुकत्राणाप्रसिद्धेः । भयस्यानिष्टसम्भावनास्वरूपत्वे तु त्राणस्यानिष्टानुत्पादकव्यापारस्वरूपतयाऽनिष्टसम्भावनाहेतुकानिष्टान्तरस्य सम्भावनाऽन्नान्वयानुपपत्तिरिति चेत्, मैवम्, तथा हि भयस्य द्वेषविशेषस्वरूपस्य दुःखविशेषसाधनत्वमनुभवसिद्धमिति भाविभयगोचरभयसम्भवात् भयगोचरभयानुत्पादनस्वरूपत्राणस्य नाप्रसिद्धिरिति । अत एव द्वितीयाद्धि भयं भवन्ती'ति श्रुत्या स्वस्याभयमिति परिसंख्यायते । द्वेषस्य विषयस्वाभाव्येन विषयतया द्वेषं प्रति द्वेषसमवायिभेदस्य हेतुत्वात् स्वविषयकभयाप्रसिद्धेः । भयस्यानिष्टसंभावनास्वरूपत्वे तु स्वहेतुकानिष्टसम्भावनायाः सम्भवात् न परिसंख्यानासंभव इति म०म०गोकुलनाथोपाध्यायाः ।

वस्तुतस्तु अनिष्टसम्भावनाजन्यदुःखं भयमनिष्टं च दुःखप्रयोजकतावच्छेदकधर्मविशिष्टं मरणादि, तत्र यद्धर्मावच्छिन्नस्य येन सम्बन्धेन मरणादिसाधनत्वमवगतं, स्वस्मिन् तद्धर्मावच्छिन्नस्य तत्सम्बन्धज्ञानं मरणाद्यनिष्टोत्पत्तिसम्भावनाया जनकम्, सा तु दुखं जनयति तथा मरणादिसाधनतयाऽवगतस्य व्याघ्रस्य स्वस्मिन् सन्निधिसम्बन्धज्ञानं मरणाद्युत्पत्तिं सम्भावयति. सम्भावना तु दुखं जनयति । अनिष्टसाधनताज्ञानादिसहकृतसम्बन्धज्ञानप्रयोज्यत्वस्वरूपं भयहेतुकत्वम् । ईदृशप्रयोज्यताविशेषस्य हेतुतासामान्यविलक्षणस्य धात्वर्थभय एवान्वयान्न कारकत्वहानिरिति । व्याघ्राद्बिभेतीत्यत्र पञ्चम्यर्थे दर्शितप्रयोज्यत्वे निरूपकतया प्रकृत्यर्थस्यान्वयः, तथाविधप्रयोज्यत्वस्यानिष्टसम्भावनाजन्यदुःखे भयेऽन्वयः, तथा च व्याघ्रप्रयोज्यं भयं वाक्यार्थः । व्याघ्रादेः स्वविशेष्यकानिष्टसाधकताज्ञानादिसहकृतस्वसम्बन्धज्ञानद्वाराऽनिष्टोत्पत्तिसम्भावनाजन्यदुःखप्रयोजकत्वं; सन्निधिस्वरूपस्य सम्बन्धस्यातिशयस्वरूपप्रकर्षेण ज्ञानं सम्भावनाकोटेरनिष्टोत्पत्तेरुत्कटत्वं प्रयोजयति; अथवाऽनिष्टोत्पत्तेरवधारणमेव जनयतीत्युभयथा दुःखमुत्कटं प्रयोजयतीति सन्निधिप्रकर्षेण भयप्रकर्षः । इत्थं च द्वितीयाद्धि भयमिति श्रुतिः भयेऽद्वितीयहेतुकत्वपरिसंख्यां बोधयति । इतरथा द्वितीयादित्यस्य वैयर्थ्यापत्तेः । परिसंख्या तु प्रकृते द्वितीयान्यहेतुकत्वस्य स्वहेतुकत्वपर्यवसन्नस्य व्यवच्छेदः । भयस्य स्वहेतुकत्वं न सम्भवति, स्वसन्निधानज्ञानस्यानिष्टोत्पत्तिसम्भावनां प्रत्यप्रयोजकत्वात् । अन्यथा सोऽहमात्मना सम्बद्ध इत्याकारके सकलदुःखोच्छेदके ज्ञाने विद्यमाने भयापत्तेः । एवं नरकाद्बिभेतीत्यादौ नरकपदस्य कुम्भीपाकादिसम्बन्धज्ञानं शरीरतापाद्यनिष्टोत्पत्तिं सम्भावयति, सम्भावना तु तापं जनयति इति नानुपपत्तिः । नरकपदस्यसुखासम्भिन्नदुःखपरता तु न युज्यते तथा सति दुःखाद्व्यथाया वा बिभेतीति प्रयोगापत्तेः । भयाद्बिभेतीत्यादौ भयपदस्य भयजनके व्याघ्रचोरादौ लक्षणेति नानुपपत्तिः । यदि तु दुःखाद्बिभेतीति प्रयोगोऽभ्युपेयते तदा दुःखस्य भोगस्वरूपानिष्टसाधनस्य सम्बन्धज्ञानं भोगस्वरूपानिष्टस्योत्पत्तिं सम्भावयति सम्भावना तु दुःखमिति नानुपपत्तिः । एवं भयाद्बिभेतीत्यादावपीयमेव गतिर्बोध्या ।

एतेन व्याघ्राद्भयाद्बिभेतीत्यत्रापादानस्य भयस्य विषयित्वं धात्वर्थे भयेऽन्वेति । व्याघ्रविषयित्वमपादानभयेऽन्वेति, भयं तु द्वेषविशेष, इति तु न युज्यते, यतो हि व्याघ्रविषयकद्वेषविषयको द्वेषो न सम्भवति । तथा हि व्याघ्रविषयकद्वेषस्यानिष्टसाधनत्वज्ञानं विना तद्विषयकद्वे-

धानुत्पादात्, तच्च ज्ञानं तदैव सम्भवति यदि व्याघ्रस्य बलवदनिष्टाननुबन्धीष्टसाधनत्वं स्यात्, तत्तु बाधितमिति न तज्ज्ञानं सम्भवति । न चानिष्टसाधनत्वभ्रमाद् द्वेषविषयकद्वेषसम्भवात् नानुपपत्तिरिति वाच्यम्; तथा सति व्याघ्राद्भयाद् बिभेषीत्यत्राभ्रान्तस्य वक्तुः, सम्बोध्यस्य शाब्दानुदयप्रसङ्गात्, इत्यादि परास्तम्; भयादिपदार्थस्य दर्शितत्वात् । व्याघ्रप्रयोज्यभयप्रयोज्यस्य भोगस्वरूपस्यानिष्टोत्पत्तिसम्भावनाजन्यदुःखस्वरूपस्य भयस्य कर्तरि सम्बोध्येऽन्यत्र च सम्भवात् ।

एवं चौरेभ्यो बिभेत्युद्विजते वेत्यत्र चौरप्रयोज्यमनिष्टं धनहरणादि तदुत्पत्तिसम्भावनया दुःखमिति, उद्वेगोऽपि भयमेव, यत्र दर्शितभयप्रयोज्यत्वस्य, तत्त्वेन न विवक्षा किंतु शेषत्वेन तत्र षष्ठ्येव प्रमाणम्, अत एव "कस्य विभ्यति देवाश्च जातरोषस्य संयुगे" इति "कुमार्य इव कान्तस्य त्रस्यन्ति स्पृहयन्ति च" इति च प्रयोग उपपद्यते ।

एवं व्याघ्राद् गां त्रायत रक्षति वेत्यत्र भयस्वरूपदुःखप्रतियोगिकाभावप्रयोज्यव्यापारो धात्वर्थः, तत्र भयाभावस्वरूपफलवत्तया गवादेः कर्मत्वम् । पञ्चम्यास्तथाविधप्रयोज्यत्वमर्थः फलैकदेशे भये व्युत्पत्तिवैचित्र्येणान्वेति । अथ वा भयमभावश्च खण्डशः फलतया धात्वर्थः, तत्र पञ्चम्यर्थस्य भये तस्य प्रतियोगितया अभावे, तस्य प्रयोजकतया व्यापारेऽन्वय इति ।

यस्या अहिकण्टकादिव्यक्तेः क्वापि न भयप्रयोजकत्वं तस्यास्तद्व्यक्तित्वेन न त्राणापादानत्वमपि, तद्व्यक्तेस्त्रायते इत्यप्रयोगात् । सर्पत्वादिनाऽपादानत्वमिष्यत एव । यद्धर्मावच्छिन्नस्य सम्बन्धज्ञानमनिष्टोत्पत्तिसंभावनां जनयति तद्धर्मवतस्तथात्वोपगमात् । भयात् त्रायत इत्यत्र भयप्रयोज्यस्य भयस्याभावप्रयोजकव्यापारः प्रतीयते, भयप्रयोज्यं यथा भयं तथोपरि प्रदर्शितमेव । भयं तु दुःखं प्रत्यक्षसिद्धमेव, भयमति दुःखमिति, भयेनातिदुःखितोऽस्मीति चानुभवात् । विभेत्याद्यर्थे भयं दुःखमेव, चेतनकर्तृकत्वनियमात् । यत्र चेतनकर्मकं रक्षणं तत्र दुःखस्वरूपभयाभावप्रयोजको व्यापार एव धात्वर्थः । यत्राचेतनकर्मकं रक्षणम् तत्र वह्नेः पटं रक्षति' काकेभ्यो दधि रक्ष्यताम्' इत्यादौ नाशानुत्पादप्रयोजको व्यापारो रक्षतेरर्थः, तत्र नाशान्वयिप्रयोज्यत्वसामान्यं पञ्चम्यर्थः । आतपात्कुसुमं रक्षत्यवति वेत्यत्र अपकारानुत्पादप्रयोजको व्यापारो धात्वर्थः, प्रकृते पुष्पापकारः शोष एव । प्रयोज्यत्वसामान्यं पञ्चम्यर्थोऽपकारेऽन्वेति नाशाद्यन्वयिनः पञ्चम्यर्थस्य प्रयोज्यत्वसामान्यस्य फलद्वारेण व्यापारेऽन्वयोपगमात्, तथा नामार्थानन्वयान्न कारककत्वहानिः ।

एवं पराजयतेर्योगे सोढुमशक्यस्यार्थस्यापादानत्वं परेऽन्वाचक्षते । तदपि पूर्वोक्तबौद्धगौणापायविवक्षयैव सिद्धमिति न तदर्थमपि वचनान्तरकल्पनाऽऽवश्यकता । यथा 'अध्ययनात्पराजयत' इति । अत्रापि य एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति—दुःखमध्ययनम् दुर्धरं च, गुरवश्च दुरुपचाराः इति, सबुद्ध्या संप्राप्य ततो निवर्तते इति अत्राऽपि निवृत्त्यङ्गे पराजये पराजेर्वृत्तौ, निवृत्तेश्चावधिरध्ययनमित्यपायसत्त्वादनेनैव सूत्रेणापादानत्वसिद्धिरिति स्वमतम् ।

अत्र गौडाः पराजेर्युद्धनिवृत्तिरर्थः, पञ्चम्या द्वेषोऽर्थः, तत्र प्रकृत्यर्थस्य विषयित्वेनान्वयः, द्वेषस्तु जन्यतया युद्धनिवृत्तावन्वेति तथा च 'रणात्पराजयत' इत्यत्र रणगोचरद्वेषजन्ययुद्धनिवृत्तिरित्यर्थः इति वदन्ति, तदसत्—युद्धनिवृत्तेर्धात्वर्थत्वे, अध्ययनात् पराजयते इत्यादावनन्वयापत्तेः । न च निवृत्तिमात्रं धात्वर्थः तत्र व्युत्पत्तिवैचित्र्येण पञ्चमीप्रकृत्यर्थस्य विषयित्वेनान्वय इति वाच्यम्, तथाऽपि विषात् पराजयते इति प्रयोगापत्तेः । तस्मात् पराजयतेर्भङ्गफलकव्यापारोऽर्थ इति परे । स च भङ्गः कर्तृगतश्चेत्तदा फलसमानाधिकरणव्यापारार्थकतया नास्य सकर्मकत्वमिति तत्र यद्विषयकद्वेषप्रयोज्यः पराजयव्यापारस्तद्वाचकपदात्-

पञ्चमी प्रयुज्यते। स्वविषयकद्वेषद्वारकप्रयोज्यत्वं पञ्चम्यर्थः स्वरूपेण व्यापारेऽन्वेति। 'अध्ययनात्पराजयत' इत्यत्र वादिवाक्यार्थदोषप्रतिपादकोत्तरवाक्यप्रयोक्तृत्वं भङ्गः फलं, शास्त्रार्थानभिज्ञानं व्यापारो धात्वर्थः। तत्र विषयितया प्रकृत्यर्थविशेषितः पञ्चम्यर्थो द्वेषः प्रयोज्यतयाऽथ वा निरूपितत्वेन; प्रकृत्यर्थविशेषितं स्वविषयकद्वेषद्वारकप्रयोज्यत्वं स्वरूपेणान्वेति। अध्ययनविषयकद्वेषसाध्यद्वेषस्याध्ययने प्रवृत्त्यनुत्पादद्वारा अध्ययनाभावप्रयोजकत्वम्, अध्ययनाभावप्रयोज्यं च शास्त्रार्थानभिज्ञानम् तथा चाध्ययनविषयकद्वेषप्रयोज्यं दर्शितभङ्गफलकशास्त्रार्थानभिज्ञानमध्ययनात्पराजयत इतिवाक्यस्यार्थः।

एवं 'रणात् पराजयते' इत्यत्र पलायननिलयनादिर्भङ्गः फलम्, शौर्याभावो व्यापारो धात्वर्थः। शौर्यं तु परकर्मकप्रहरणकर्तृत्वम् प्रकृते बोध्यम्। रणस्तु परस्परप्रहरणम्। रणगोचरद्वेषस्य रणे प्रवृत्त्यनुत्पादद्वारा रणाभावप्रयोजकत्वं, रणाभावप्रयोज्यो दर्शितशौर्यस्याभावो वाक्यार्थः। एवं 'विवादात्पराजयत' इत्यत्र परोद्भावितदोषानुद्धरणं भङ्गः फलम्, प्रतिज्ञातार्थोपपादकपरस्परवाक्यं विवादः। तद्गोचरद्वेषस्तु साक्षादेव दर्शितव्यापारप्रयोजकः। अविद्यमानद्वेष्यादेवाऽत्र पञ्चमी, न तु विद्यमानात्। अत एव शत्रोः पराजयत इति न प्रयोगः, तस्य विद्यमानतया (पूर्वसिद्धतया) सोढत्वात्, असोढादेव पूर्वाचार्यैस्तद्विधानात्! इत्थं च पराजेर्भङ्गफलकव्यापारार्थकत्वमेवेति हृदयम्।

वारणार्थकधातुयोगेऽपि पञ्चमी प्रयुज्यते—यथा यवेभ्यो गां वारयति रक्षति निषेधयतीत्यादि। एतदर्थमन्ये वारणार्थकधातुयोगे ईप्सितार्थस्य अपादानसंज्ञां विदधति। स्वमते त्वत्रापि गौणापायसत्त्वादपादानसंज्ञा प्रकृतसूत्रेणैव सिद्धा। तथाहि—यदि यस्य गौस्तस्यैव यवाः तर्हि स यवानां विनाशं संभाव्य ततो गां वारयति, अथ यस्य यवास्तदन्यस्य गौः सोऽपि परसस्यभक्षणे परकीयदुःखं, राजादिकृतं दण्डं वा संभाव्य तेभ्यो गां निवर्तयतीत्युभयथाऽपि निवृत्त्यङ्गे वारणे धातूनां वर्तनाद् बुद्धिकृतोऽपाय एष्वस्त्येवेति भवति प्रकृतसूत्रेणैवापादानसंज्ञा।

अत्र केचित्—वारणं क्रियाप्रतिषेधप्रतियोगिनी क्रिया; भक्षणगमनादिरूपा। तात्पर्यवशात्क्वचित्कस्यचित्प्रतिषेधो वारयत्यादिना बोध्यते। प्रतिषेधस्तु कर्तृत्वाभावानुकूलो व्यापारः। कर्तृत्वाभावस्वरूपफलवत्तया च गवान्धादेः कर्मता। पञ्चम्यास्तु देशादिगतत्वेनेच्छाविषयत्वमर्थः। गतत्वं तु आधेयत्वम्। तथा चाधेयत्वप्रकारकेच्छाविषयत्वं पञ्चम्यर्थो भक्षणगमनादिफले गलाधःसंयोगोत्तरदेशसंयोगादावन्वेति। प्रकृत्यर्थस्य निरूपकतया आधेयत्वेऽन्वयः। इच्छा तु भक्षणादिकर्तृबोध्या। एवं च यवाधेयत्वप्रकारकेच्छाविषय–गलाधः संयोगफलकभक्षणकर्तृत्वाभावस्य गोवृत्तेरनुकूलव्यापारः, कूपाधेयत्वप्रकारकेच्छाविषयोत्तरदेशसंयोगफलकगमनकर्तृत्वाभावस्यान्धवृत्तेरनुकूलव्यापारश्च, वाक्यार्थः। यद्यप्यन्धादेः कूपाधेयत्वप्रकारिकेच्छा नास्ति, तथाप्यभिमुखदेशाधेयत्वप्रकारिकेच्छा वर्तत एव, अभिमुखदेशत्वेन च कूपादिस्तत्र भासत एवेति नानुपपत्तिः। न च पञ्चम्या आधेयत्वमर्थो भक्षणादिफले गलाधः संयोगादावन्वियात्, किं पञ्चम्यर्थे इच्छान्तर्भावेणेति वाच्यम्, यत्रान्नपिहितविषभोजनप्रतिषेधव्यापारः, तत्र विषाद्वारयतीति न प्रयोगः, किन्तु सविषान्नाद्वारयतीत्येव प्रयोगस्तत्र पूर्वप्रयोगवारणेच्छायाः तदन्तर्भावात्; यस्य यवादेर्न केनापि भक्षणं तत्परात् यवाद् गां वारयतीति प्रयोगस्यानुपपत्तेश्च। इच्छायास्तदन्तर्भावे तु तद्यवाधेयत्वप्रकारकेच्छाविषयफलकभक्षणकर्तृत्वाभावानुकूलव्यापारबोधस्य संभवात् भवति तथाविधप्रयोगः। एवं च दर्शितस्थले, भक्षणादौ तद्यवाधेयत्वस्य गोकर्तृकत्वस्य चोभयस्याभावः प्रतीयते, तदर्थं व्युत्पत्त्यन्तरकल्पनं च न युक्तं गौरवात्। न च सर्वत्रैवोभयाभावबोधात्र व्युत्पत्त्यन्तरकल्पनमिति वाच्यम्, तथा सति गगनाद् गां वारयतीति प्रयोगापत्तेः, गगनाधेयत्व–गोकर्तृकत्वोभयाभावस्य भक्षणे सत्त्वात्। तस्मादिच्छायाः पञ्चम्यर्थान्तर्भावनमुचितमेवेत्याहुः, तच्चिन्त्यम्, तथा सति

क्षेत्राद् वन्यान् वारयति, नृपादातपं वारयतीत्यादावचेतनस्य वन्यादेरातपस्य वा गमनकर्तुरिच्छाविरहात् क्षेत्राद्याधेयत्वप्रकारकेच्छाविषयत्वस्य गमनफले संयोगादौ विरहादनन्वयापत्तेः ।

म० म० गोकुलनाथोपाध्यायास्तु– वारयत्यादिधातुः प्रवृत्तिनिमित्तत्वोपलक्षितपतनत्वाद्यवच्छिन्नप्रतियोगिताकम-भावं फलविधयाऽभिधत्ते । तत्प्रयोजकमपि 'मा पते'ति वाक्यादिर्व्यापारः । प्रधानतया तज्जनितपदार्थोपस्थिति–रुपलक्षणधर्ममोपेण पतनाभावत्वादिना फलमवगाहते । तत्राभावस्वरूपफलाधिकरणतया विवक्षिते कर्मसंज्ञा बलीयसीति ततो द्वितीया । फलीभूताभावप्रतियोगिक्रियाकार–काणि पुनरपादानसंज्ञकानीति तत्रस्था पञ्चमी तानि कारकाण्यभिधत्ते । कूपादन्धं वारयतीत्यत्र कूपाधिकरणकपतनप्रतियोगिकस्यान्धवृत्तेः, यवेभ्यो गांवारयतीत्यत्र यवकर्मकभक्षणप्रतियोगिकस्य गोवृत्तेः, परस्वेभ्यः पाणिं वारयतीत्यत्र परस्वकर्मकादानप्रतियोगिकस्य पाणिवृत्तेः, शरेभ्यः शरीरं वारयतीत्यत्र शरकरणकव्यधप्रतियोगित्वस्य शरीर–वृत्तेः पुष्पेभ्य आतपं वारयतीत्यत्र पुष्पकर्मकशोषणप्रति–योगिकस्यातपवृत्तेः, श्वपचेभ्यो दातारं वारयतीत्यत्र श्वपचसंप्रदानकदानप्रतियोगिकस्य दातृवृत्तेरभावस्यानुकूलो व्यापारो वाक्यार्थः इति प्राहुः ।

केचित्तु कूपादन्धं वारयतीत्यादौ धात्वर्थतावच्छेद–कत्वोपलक्षितधर्मावच्छिन्नक्रियागोचरनिवृत्त्यनुकूलो व्यापारो वारयतेरर्थः, तत्र निवृत्त्यन्वितं समवेतत्वं द्वितीयार्थः पञ्चम्यास्तु प्रकारित्वमर्थः, कूपे मा पतेयमित्याकारकनिवृत्तेः कूपप्रकारकत्वात् । तथा च कूपप्रकारिकाया अन्धसमवेतायाः पतननिवृत्तेरनुकूलो व्यापारो वाक्यार्थः इति वदन्ति, तन्न, पुष्पेभ्यः आतपं वारयतीत्यादौ अनन्वयापत्तेः आतपादेर–चेतनस्य निवृत्त्यसंभवात् । कूपादन्धं वारयति न पुनरन्धो निवृत्त इति प्रयोगानुपपत्तेश्च । किं च प्रकारित्वमपि न पञ्चम्यर्थः सम्भवति, तथा सति "क्षेत्रे खले वा यवेभ्यो गां वारयति" इत्यत्र क्षेत्रादिपदात् पञ्चम्यापत्तेः । क्षेत्रे यवं मा भक्षयेयमिति निवृत्तौ क्षेत्रादेः प्रकारित्वादिति ।

वस्तुतस्तु तथोपलक्षितधर्मावच्छिन्नक्रियागोचरप्रवृत्त्य–भावप्रयोजकज्ञानानुकूलो व्यापारो वारयतेरर्थः, तथाविध–ज्ञानस्वरूपफलवत्तया गवान्धादेः कर्मत्वम्, तथाविधं ज्ञानं तु प्रवृत्तिविषयक्रियानिष्ठस्यानिष्टसाधनत्वस्य कृत्यसाध्य–त्वस्य वाऽवगाहि बोध्यम्, तदनुकूलो दण्डोद्यमनादिर्वारयितु–र्व्यापारस्ताडनाद्यनिष्टफलको गवादेर्यवभक्षणप्रवृत्तिं विघट-यति, यवभक्षणं तु वारयितुरनिष्टसाधनमिति परम्परया ताडनाद्यनिष्टसाधनमिति, बन्धनादिर्वारयितुर्व्यापारो यव–भक्षणे कृत्यसाध्यताबुद्धिं गवादेर्जनयतीति न यवभक्षणे प्रवृत्तिः, अग्रे कूप इति कूपे मा पतेति वाक्यं तु कूपपतन–निष्ठानिष्टसाधनत्वस्य स्मारकमिति नान्धस्य कूपपतन–प्रवृत्तिरिति ।

एवं यवेभ्यो गां वारयतीत्यत्र पञ्चम्याः कर्मत्वमर्थः प्रवृत्तिविषयक्रियायामन्वेति । तथा च यवकर्मकभक्षणविषय-प्रवृत्त्यभावप्रयोजकज्ञानस्य गोवृत्तेरनुकूलो व्यापारो वाक्यार्थः । यत्र च गवादेर्यवभक्षणादावुत्कटो रागः, ताडनादौ न तथा द्वेषो वा तत्र दण्डिना वारिता अपि गावो यवभक्षणे प्रवर्तन्ते न निवर्त्तन्ते वेति प्रयोगः 'दण्डिकर्तृकव्यापारप्रयोज्यस्य यव-भक्षणप्रवृत्तिविरहप्रयोजकज्ञानस्याश्रया' इति वारिता इत्यन्त-स्यार्थः; वारयतेरुक्तार्थकत्व एव तथाविधप्रयोगः सङ्गच्छते । अत एव प्रवृत्तिविघातो वारणमिति प्राञ्चः । यस्य यवादेर्न केनापि भक्षणं तत्परत्वे यवेभ्यो वारयतीति न प्रयोगः । यदि प्रयोगस्तर्हि यवकर्मत्वस्य स्वावच्छिन्नतया भक्षणप्रकारि-तया प्रवृत्तावन्वय इति नानुपपत्तिः । एवमेव कूपादन्धं वारयति कारुणिक इति कारुणिकेन वारितोऽप्यन्धो न निवर्तते इति प्रयोगेऽप्यन्वयः ।

इयांस्तु विशेषो यदत्र कूपकर्मकगमनस्य प्रवृत्तावन्वय इति । पुष्पेभ्य आतपं वारयतीत्यादावचेतने कर्मणि क्रिया–भावप्रयोजकव्यापारो वारयतेरर्थः । क्रियाभावस्वरूपफलवतः

कर्मत्वात् तद्वाचकपदाद् द्वितीया । पञ्चम्याः कर्मत्वमर्थः, फलैकदेशक्रियायामन्वेति । तथा च पुष्पकर्मकगमनाभावस्य शोषणाभावस्य वा आतपवृत्तेरनुकूलो व्यापारो वाक्यार्थः । न चैवं क्रियाभावप्रयोजकव्यापार एव सर्वत्र वारयतेरर्थोऽस्तु इति वाच्यम्, वारिता अपि गावो यवं भक्षन्ते, वारितोऽप्य-न्धः कूपं गतः इति प्रयोगस्यानुपपत्तेः, भक्षणादिक्रियाऽभाव-स्वरूपफलाश्रयस्य वारणकर्मणो भक्षणादिक्रियाकर्तृत्वानुप-पत्तेरिति ।

ननु वारयतेर्नानाविधार्थकत्वाभ्युपगमे यवेभ्यो गां वारयतीत्यादौ चेतने कर्मणि क्रियाऽभावेच्छाप्रयोज्यव्यापार एवार्थोऽस्तु, किं प्रवृत्त्यभावप्रयोजकज्ञाननिवेशेन, तावतैव वार्यमाणा गावो भुञ्जत इत्यादिप्रयोगोपपत्तेः; फलीभूतायाः क्रियाभावेच्छाया विषयस्य गवादेर्वारणकर्मत्वेऽपि भक्षण-कर्तृत्वाविरोधादिति चेत्, स्यादेवं यदि यवभक्षणाभावेच्छया विधीयमाने क्षेत्रस्य कण्टकाद्यावरणेऽपि वारयतीति प्रयोगः । यदि च वारयतेर्नानाविधार्थकत्वेऽनुगतप्रवृत्तिनिमित्ताभावे० प्रयोगातिप्रसङ्गः, क्रियाभावप्रयोजकव्यापारार्थकत्वे तु यव-कर्मकत्यागाभावप्रयोजकव्यापारेऽपि यवेभ्यो गां वारयतीति-प्रयोगप्रसङ्ग इति विभाव्यते तदा संयोगाभावप्रयोजक-कार्यानुकूलो व्यापारो वारयतेरर्थः, तथाविधकार्यस्य फलतया तद्वतो गवादेः कर्मत्वम्, यदीयसम्बन्धस्याभावस्तद्वाचकपदात् पञ्चमी, 'कर्तुर्व्याप्यं कर्मेति' सूत्रवदाप्तिमत एवापादानत्व-विवक्षणात् । आप्तिस्तु प्राप्तिः सा च सम्बन्ध एव । तदभावप्रयोजकं क्वचिदनिष्टसाधनताज्ञानस्वरूपं कार्यं, यथा गवादेर्यवभक्षणत्वावच्छेदेन दण्डताडनाद्यनिष्टसाधनता-ज्ञानं कण्ठावच्छेदेन यवसम्बन्धस्य यवसंयोगस्याभावं प्रयो-जयति । यस्य यवादेर्न केनापि भक्षणं तत्संयोगाभावमपि सामान्यतो यवभक्षणत्वावच्छेदेनानिष्टसाधनताज्ञानमेव प्रयो-जयति । अन्यथा तद्व्यक्तिभक्षणस्यानुपस्थितया तद्गता-निष्टसाधनताज्ञानासंभवात् कुतोऽपि यवाद्वारणासम्भवात् । एवं कूपगमनत्वावच्छेदेन शरीरोपघातकपतनानिष्टसाधनता-ज्ञानं चरणावच्छेदेन कूपसंयोगस्याभावं प्रयोजयति । क्वचिदचेतने कर्मणि ज्ञानातिरिक्तं कार्यम्, यथा– आतपादेः छत्राद्यावरणसंयोगः नृपसंयोगाभावं पुष्पसंयोगाभावं वा प्रयोजयति । एवं च पञ्चम्या आधेयत्वं निरूपकत्वं वाऽर्थः, तच्च धात्वर्थैकदेशे सम्बन्धेऽन्वेति । तथा च यवेभ्यो गां वारयति दण्डीत्यत्र यवनिरूपितसंयोगाभावप्रयोजककार्यस्य गोवृत्तेरनुकूलो यो व्यापारस्तदनुकूलकृतिमान् दण्डीत्यन्वय-बोधः । एवं कूपादन्धं वारयति, पुष्पान्नृपाद्वाऽऽतपं वार-यति, इत्यादावप्यन्वयो बोध्यः । एवं चण्डालात्कनकं वारयति दातेत्यत्र चाण्डालसम्प्रदानककनकदाननिष्ठानिष्ट-साधनताज्ञानविषयत्वस्वरूपकार्यस्य कनकनिष्ठस्य प्रयोजकं तथाविधागमस्मरणं दातुः, तथाविधविषयत्वं तु कनके चाण्डालस्वत्वाभावं प्रयोजयति इत्थं च वारयतेर्न नानार्थता, न वा वार्यमाणा गावो भुञ्जत इत्यादिप्रयोगानुपपत्तिः । सम्बन्धस्तु प्रयोज्यो बोध्यः । तेन घटसमवेतत्वाभावप्रयोज-कस्याग्निसंयोगविशेषसामानाधिकरण्यस्य श्यामरूपनिष्ठस्या-नुकूले पाचकव्यापारे सत्यपि घटात् श्यामं रूपं वारयति पाचक इति न प्रयोगः ।

यत्र तु वारणान्तर्भूतस्य सम्बन्धाभावस्यैव वारयत्या-दिना विवक्षणं तत्र सम्बन्धस्याभावे विशेषणतया फलत्वात् तद्वतः कर्मत्वमिति तत्र परत्वाद् द्वितीयैव । यथा 'कूपं वारयति पान्थः' 'मांसं वारयति मुनि' रिति । अत्र कूप-वृत्तिसम्बन्धाभावप्रयोजककृतिमान् पान्थः इत्यादि प्रकारेणा-न्वयबोधः । यत्र चाभावप्रयोजकव्यापारस्यैव वारणान्त-र्भूतस्य विवक्षणं तत्र सम्बन्धस्य वारणानन्तर्भूतत्वात् तद्वतो नापादानत्वमिति तत्र न पञ्चमी वारणार्थकधात्वर्थान्तर्भूत-सम्बन्धवत एवापादानत्वविवक्षणात् । प्रतियोग्यविशेषितस्य फलीभूताभावस्य प्रतियोग्येव कर्म, न त्वधिकरणं, यथा 'घटं रहयति' इत्यादौ घटादिः प्रतियोगी, तथाऽत्रापि प्रतियोगिन्येव द्वितीया । यथा कूपगमनं कूपसंयोगं वा वारयति पान्थ इत्यादौ । अत्र द्वितीयायाः प्रतियोगित्वमर्थः, तच्च फलेऽभावेऽन्वेति । तथा च कूपगमनप्रतियोगिताकस्य कूपसंयोगप्रतियोगिताकस्य वाऽभावस्य प्रयोजको यो व्या-

पारस्तदनुकूलकृतिमान् पान्थ इत्यन्वयबोधः। एवं मांसभोजनं मांसकण्ठसंयोगं वा वारयति मुनिरित्यादावप्यन्वयबोधो बोध्यः। यत्राभावेऽधिकरणस्य संयोगो विवक्षितस्तत्र शेषे षष्ठ्येव प्रमाणं, यथाऽन्धस्य कूपगमनं कूपसंयोगं वा वारयति दयालुः, मांसभोजनं श्राद्धस्य वारयति मुनिः, पापकर्म स्वस्य वारयति विद्वान् इति। अत्रान्वयबोधः पूर्ववदेव। विशेषस्तु प्रतियोग्यन्विते प्रयोजकव्यापारविशेषणेऽभावे षष्ठ्यर्थसम्बन्धभानमिति। एवं वारयत्यादेरुक्तार्थकतायामेव दर्शितनिखिलप्रयोगोपपत्तिः, त्यागाभावप्रयोजकव्यापारे वारयतिप्रयोगानुत्पत्तिश्चेति। वारयतिपर्याया वर्जयति– निवर्तयति– निषेधयति– रक्षति-प्रभृतयो बोध्याः, तेन तादृशधातुप्रयोगेऽप्यपादानत्वविवक्षया यवेभ्यो गां वर्जयतीत्यादयः प्रयोगा बोध्याः।

दर्शितकार्यस्वरूपफलवतः कर्मत्वे सम्बन्धप्रयोजकक्रियादिमत्त्वं तन्त्रम्, अतः सान्निध्याभावस्वरूपस्य सम्बन्धाभावप्रयोजकस्य फलस्य प्रयोज्यस्य सत्त्वेऽपि वह्निकूपादेर्न कर्मत्वमिति माणवकादग्निं कूपमन्धाद्वा वारयतीति न प्रयोगः; सम्बन्धप्रयोजकक्रियादेः माणवकेऽन्धे च विद्यमानस्याग्नौ कूपे वा विरहादिति माणवकादेस्तथात्वात्कर्मत्वमेवेति।

## ( अन्तर्धौ पञ्चमीविचारः )

तिरोभावार्थकधातुयोगे यत्कर्तृकादर्शनेच्छया कर्ता तिरोहितो भवति तस्यापादानसंज्ञां विशिष्य विदधति परे। यथा 'उपाध्यायादन्तर्धत्ते शिष्यः' इत्यादौ। तत्रापि बुद्धिकृतोऽपायोऽस्त्येवेति तमादाय प्रकृतसूत्रेणैवापादानसंज्ञा सिद्धेति नावश्यकता पृथगपादानसंज्ञारम्भस्येति सूचयति– 'उपाध्यायादन्तर्धत्ते' इत्यादिना वृत्तौ। तथा हि– अन्तर्धत्त इत्यस्य आत्मकर्मकोपाध्यायकर्तृकदर्शनाभावेच्छया तिरोभवतीत्यर्थः। अत्र हि पश्यति शिष्यः– यदि मामुपाध्यायः पश्यति ध्रुवं मे प्रेषणं, पठनहानिप्रयुक्त उपालम्भो वेति; स बुद्ध्या उपाध्यायं सम्प्राप्य ततो निवर्तत इति निवृत्तिपूर्वकतिरोभवने धातोर्वृत्तेः प्रकृतसूत्रेणैवापादानसंज्ञा सिद्धेति। एवं उपाध्यायान्निलीयते शिष्यः, मातुर्निलीयते बाल इत्यादावपि गतिर्बोध्या। अत्रान्ये इत्थं वर्णयन्ति– स्वकर्मकदर्शनाभावप्रयोजको व्यापारोऽन्तर्दधातेर्निलीयतेस्तिरोभवतेरेतत्पर्यायाणामन्येषां चार्थः। पञ्चम्यास्तु वृत्तिमत्त्वप्रकारकेच्छाविषयत्वमर्थः, स च स्वकर्मकादर्शनेऽन्वेति। प्रकृत्यर्थस्य निरूपकतया वृत्तिमत्त्वेऽन्वयः। तथा चोपाध्यायनिरूपितवृत्तिमत्त्वप्रकारकेच्छाविषयस्य स्वकर्मकदर्शनाभावस्यानुकूलो व्यापारो वाक्यार्थः। इष्यते हि शिष्येण उपाध्यायो मां मा पश्येदिति उपाध्यायवृत्तित्वेन स्वकर्मकदर्शनाभावः। अतएव मातुर्निलीयते बालः, माता पुनरेवं पश्यत्येवेत्यादयः प्रयोगाः। अत एव पाणिनीये सूत्रे ( अन्तर्धौ येनादर्शनमिच्छति १।४।२८ इत्यत्र ) इच्छतिग्रहणम्। बालस्येच्छा तथास्त्येव, फलं भवतु मा वेत्यन्यदेतत्। एष एव सकलशाब्दिकाभिमतः पन्थाः।

परे तु दर्शनाभावप्रयोजकव्यापारो नान्तर्दधात्यादेरर्थः, तथा सति स्वकर्मकादर्शनेच्छया येन शत्रुचक्षुर्नाशितं तत्र, सोऽयं शत्रोर्निलीयत इति प्रयोगापत्तेः। तस्माच्चक्षुःसंयोगप्रतिबन्धकदेशसंयोगोऽन्तर्दधात्यादेरर्थः। प्रतिबन्धकस्तु व्यवहितदेशसंयोगः। यदि च तमसि निलीयत इति प्रयोगस्तदा चाक्षुषजनकसंयोगप्रतिबन्धकदेशसंयोगस्तथाविधधातूनामर्थः। पञ्चम्यास्तु दर्शनाभावेच्छाऽर्थः। तत्र प्रकृत्यर्थस्य कर्तृतया दर्शनेऽन्वयः, दर्शनाभावेच्छायाः प्रयोज्यतयाऽन्तर्धावन्वयः। मातुर्निलीयते बाल इत्यत्र मातृकर्तृकदर्शनाभावेच्छाप्रयोज्यचाक्षुषजनकसंयोगप्रतिबन्धकदेशसंयोगानुकूलकृतिमान् बाल इत्यन्वयबोधः। वस्तुतस्तु चाक्षुषाभावेच्छाप्रयोज्यव्यवहितादिदेशसंयोगोऽन्तर्धिः। पञ्चम्याः कर्तृत्वमर्थः स च चाक्षुषेऽन्वेति। चाक्षुषाभावस्तु चाक्षुषविषयत्वाभावः, स्ववृत्तिरन्तर्धौ निविशते। स्वान्यवृत्तिचाक्षुषविषयत्वाभावेच्छायां न पञ्चमीप्रयोगः, अत एवान्तर्धाविति किम्–

'चौरान्न दिदृक्षते' इति प्रत्युदाहृतं काशिकादौ। अत्र चौरवृत्तिचाक्षुषविषयत्वाभावेच्छाप्रयोज्यव्यापारस्य सत्वेऽपि न तिरोभाव इति। तथा च यत्र स्वकर्मकचौरकर्तृकदर्शनाभावेच्छया चौरकर्मकस्वकर्तृकदर्शनाभावेच्छा तत्र चौरेभ्योऽयं निलीयते इति न प्रयोगः। एवं मातुरन्तर्धत्ते निलीयते वा बाल इत्यत्र मातृकर्तृकचाक्षुषविषयत्वाभावस्य स्ववृत्तेरुद्देश्यिनी येच्छा तत्प्रयोज्यस्य व्यवहितादिदेशसंयोगस्वरूपस्य व्यापारस्याश्रयो बाल इत्यन्वयबोधः। अत एव निलीनमपि बालं माता पश्यतीति प्रयोगोपपत्तिः। चाक्षुषाभावेच्छाप्रयोज्यव्यवहितादिदेशसंयोगरूपान्तर्धेराश्रयस्य निलीनशब्दार्थतया तत्र दर्शनकर्मत्वस्याविरोधात्। अत एवोपाध्यायान्निलीयतेऽन्तर्धत्ते वेत्यादिवृत्त्यादिग्रन्थः सङ्गच्छते।

## ( जन्यादिधातुप्रयोगे प्रकृतेः पञ्चमी )

जन्यादिप्रादुर्भावार्थकधातुयोगे प्रकृतिभूतात्पञ्चमी दृश्यते। तदर्थमप्यन्यैराचार्यैः सूत्रारम्भः क्रियते। स्वमते तु न तदर्थं सूत्रारम्भः। गौणापायसद्भावादेव तत्रापादानसंज्ञया पञ्चम्युपपत्तिः। यथा 'शृङ्गाच्छरो जायते' 'गोमयाद्वृश्चिको जायते' गोलोमाविलोमभ्यो दूर्वा जायते' इत्यादयः प्रयोगाः। तदुक्तं बृहद्वृत्तौ अत्र शृङ्गादिभ्यः शरादयो निष्क्रामन्तीति स्फुट एवापाय' इति। लोकप्रसिद्ध्याश्रयेणैतदुच्यते। लोके हि यद् यस्माज्जायते, तत्तस्मान्निर्गच्छतीत्युच्यते- एतेन समवायकारणे समवेततयोत्पद्यमानस्य कथं ततोऽपक्रम इति समाहितं विज्ञेयम्- यथा वृक्षजन्ये फले वृक्षादपक्रान्तत्वव्यवहारः। अत्र शास्त्रप्रक्रियाभेदेन भिन्नो व्यवहारः। वैशेषिकदर्शने परमाण्वादिसमवेतं कारणेभ्योऽपृथग्देशं कार्यमुत्पद्यते इति नास्ति कार्यस्यापक्रमः। सांख्यदर्शनेऽप्याविर्भावतिरोभावलक्षणजन्मनाशयोरभ्युपगमान्नास्त्यपक्रमः। लोकरीत्या त्वेतदुक्तं यद् यस्माज्जायते तत्ततो निर्गच्छतीत्युच्यत इति। यद् यतोऽपक्रामति तत्पुनस्तत्र न दृश्यते इति प्रसिद्धम् इह तु तत्रास्ति दर्शनम्- यथा शृङ्गे शरस्य- बीजेऽङ्कुरस्येति शङ्कायामाह यदि निष्क्रामन्ति किं नात्यन्ताय निष्क्रामन्ति? इति। समाधत्ते- सन्ततत्वादन्यान्यप्रादुर्भावाद्वेति। सन्ततत्वादित्यस्याविच्छेदादित्यर्थः। दीर्घभोगो भोगी यथा बिलान्निष्क्रामन्नपि बिलेऽपि समुपलभ्यतेऽविच्छेदात् तथा शरादयोऽपीति भावः। क्षणिकपक्षं, द्रव्यान्तरारम्भपक्षं वाऽऽश्रित्य समाधानान्तरमुक्तम्- अन्यान्यप्रादुर्भावादिति। शृङ्गादिभ्यो ये शराः ( तृणविशेषाः ) प्रथमं प्रादुर्भूतास्तत एवान्येऽपि पश्चात्प्रादुर्भवन्ति, ततश्चाविच्छेदो विज्ञायत इति भावः। ननु सतो जन्मायोगाद् असतश्च कर्तृत्वासम्भवात्कथं 'जायत' इति व्यवहार इति चेन्मैवम् बुद्धिव्यवस्थापितस्यार्थस्य क्रियायां कारकत्वोपगमात्। तथा च बुद्ध्याऽपायमाश्रित्य सर्वत्राऽत्रापादानत्वात्पञ्चमीति तत्त्वम्।

'शृङ्गाच्छरो जायत' इत्यादौ प्रकृतिविकृतिभावदर्शनेन प्रकृतेरियं पञ्चमीति- प्राचीनाचार्यसूत्ररीत्याऽप्यवगम्यते। अत्र गौडाः— प्रकृतित्वं न विकारित्वम्, प्रकृतिविकृतिभावविरहेऽपि- 'रघोरजोऽजायत' इत्यादौ पञ्चमीदर्शनात्। न च सुतशरीरं पित्रोः शरीरविकृतिरूपमेव तदीयशुक्रशोणितादिविकृतित्वादिति वाच्यम् शुक्रशोणितादेः शरीरसम्बन्धित्वेऽपि मलमूत्रादेरिव शरीरावयवत्वाभावात्, तदवयवारभ्यत्वस्यैव तद्विकारत्वात्। न चात्र ( रघोरजोऽजायत इत्यादौ ) हेतौ पञ्चमी, नत्वपादाने इति वाच्यम्, ऋणगुणातिरिक्तहेतौ पञ्चम्यनुशासनविरहात्। तस्मात्कारणत्वमेव प्रकृतित्वम्, दण्डाद्घटो जायत इत्यादयोऽपि प्रयोगा इष्यन्त एव। अत एवेश्वरस्य कार्यप्रकृतित्वेऽपि— "जन्माद्यस्य यतः" 'यतो द्रव्यं गुणाः कर्म' इत्यादौ पञ्चमीप्रयोगः। न चात्र ( यतो द्रव्यं गुणा इत्यादौ ) क्रियायोगाभावात्कथमपादानत्वमिति वाच्यम्। अगत्या- जायन्ते इत्यादिक्रियाध्याहारेण पञ्चम्या उपपादनीयत्वात्। निरूप्यत्वं पञ्चम्यर्थः, शृङ्गादिविशेषितं धात्वर्थं जन्यादावन्वेतीत्याहुः, तदसत्; पुत्रस्य पितृविकृतित्वात्। न हि मलमूत्रादिसदृशं

शुक्रशोणितादि, तेषां शरीरारम्भकत्वात्। अत एव– षाट्–कौशिकं शरीरम्, त्रीणि पितृतः, त्वङ्मांसरुधिराणि, त्रीणि मातृतः– अस्थिस्नायुमज्जान इति शारीरका आहुः। यदपि– ऋणगुणातिरिक्तहेतौ न पञ्चमी अनुशासनविरहा–दित्युक्तं; तदपि, दाहो दहनान्न तु जलादेरित्यादिशिरोमणि-वचनप्रतिकूलम्; निमित्तादिपदमध्याहृत्य तद्योगे पञ्चम्याः सुलभत्वात्। अत एव "यतो द्रव्यं गुणाः कर्म तथा जातिः परापरेत्यादौ" जायत इतिपदाध्याहारेण पञ्चम्युपपादन–मपि न युक्तम्, 'जातिः जायते इति स्वमतेऽनुपपत्तेः, जातेर्नित्यत्वाभ्युपगमात्, तथा चेदृशस्थले हेतुपञ्चम्यैवोप–पत्तेः। अत एवोत्पादकत्वं ज्ञापकत्वं चेति द्विविधं हेतुत्वम् इति साम्प्रदायिकाः। तस्मात्– प्रकृतित्वं समवायिहेतुत्वम्, तथा च पञ्चम्याः समवायावच्छिन्नत्वमर्थः। तत्र प्रकृत्यर्थ-स्य समवाये निरूपकतयाऽन्वयः। समवायावच्छिन्नत्वस्य जन्यादिधात्वर्थे जन्यत्वेऽन्वयः। एवं तन्तुभ्यः पटः कपाले–भ्यो घटः, शृङ्गाच्छरो वा, जायते इत्यादौ तन्तुनिरूपित–समवायावच्छिन्नजन्यत्वाश्रयः पट इत्यादिरन्वयबोधः।

यदि च विकारित्वमेव प्रकृतित्वं, तच्च विद्यमाननाश–प्रतियोगित्वम्, अन्यथा रूपस्य घटः प्रकृतिरितिव्यवहारा–पत्तेः। न च तथापि महापटः खण्डपटस्य प्रकृतिरिति व्यवहारापत्तिरिति वाच्यम्, समवायिहेतोर्भष्टजातीयस्य तथात्वात्, न हि महापटः समवायिहेतुः। एवं तन्तुभ्यः पटः इति नापादानपञ्चमी किन्तु हेतुपञ्चमी। अपादान–पञ्चमी तु मृत्पिण्डाद् घटो जायत इत्यादौ; साजात्यं तु येन रूपेण प्रकृतित्वं तेनैव रूपेण बोध्यम्। अतो द्रव्य–त्वादिना तन्त्वादेर्नष्टमहापटादिसाजात्येऽपि न प्रकृतित्वं, द्रव्यत्वादेः प्रकृतिताऽनवच्छेदकत्वात्। पुत्रस्य शुक्रशोणित-नाशजन्यत्वेऽपि पितरौ न प्रकृतिः, पित्रादिगतचैत्रत्वादि–जातेरवयविमात्रवृत्तितया शुक्राद्यवृत्तित्वात्। एवं दध्नो दुग्धम्, शरस्य शृङ्गम्, भस्मनः काष्ठं प्रकृतिरिति, दुग्ध–परमाणूनां दुग्धत्वेन नष्टदुग्धसाजात्यम् शृङ्गावयवस्य शृङ्ग-त्वेन नष्टशृङ्गसाजात्यं, काष्ठपरमाणूनां काष्ठत्वेन नष्ट–काष्ठसाजात्यम्। दुग्धत्वादिजातेरवयवावयविवृत्तित्वात् भवत्युपपत्तिरिति विभाव्यते– तदा पञ्चम्याः स्वप्रकृत्यर्थता-वच्छेदकत्वोपलक्षितजातिमत्प्रतियोगिको नाशोऽर्थः, तत्र प्रकृत्यर्थस्य आधेयतयाऽन्वयः तथाविधनाशस्तु प्रयोज्यतया जन्यादिधात्वर्थे उत्पत्तावन्वेति। एवं दुग्धाद्दधि भवति, काष्ठाद् भस्म भवति, शृङ्गाच्छरो जायते, गोमयाद् वृश्चिक उत्पद्यते, पाषाणाद् भेको भवति, इत्यादौ दुग्धवृत्तिदुग्ध–नाशप्रयोज्योत्पत्त्याश्रयो दधि इत्यादिरूपेणान्वयबोधः।

## ( उत्पत्तिस्थानात् पञ्चमी )

उत्पद्यमानस्य उत्पत्तिस्थानवाचकात्पदादपि पञ्चमी–प्रयोगो दृश्यते, यथा 'हिमवतो गङ्गा प्रभव'तीति। तदर्थ–मप्यन्ये वैयाकरणा वचनान्तरमारभन्ते। स्वमते च पूर्व–वद्बौद्धापायमाश्रित्यैवापादानत्वम्। तदुक्तम्– बृहद्वृत्तौ– अत्राप्यपायः संक्रामन्तीत्यपायोऽस्त्यैवेति। अयमाशयः– गङ्गा हि जलप्रवाहरूपा। हिमवतो निर्गच्छत्येवेति विश्लेष–रूपोऽपायः स्फुट एवाऽत्रापीति प्रकृतसूत्रेणैवात्रापादानत्वं सिद्धमिति न सूत्रान्तरारम्भावश्यकता। पुनः शङ्कते– यद्यपक्रामन्ति किंनात्यन्तमपक्रामन्तीति। अयमाशयः कुतश्चिन्निर्गतस्य तत्र स्थितिर्न दृश्यते। हिमवतश्च निःसृता गङ्गा तत्रापि दृश्यत एवेति कथमिह निःसरणस्यापक्रमणस्य वा प्रयोग इति। समाधत्ते– सन्ततत्वादन्यान्यप्रादुर्भावाद्वेति। अविच्छिन्नरूपेण निःसरणस्य सर्वदा विद्यमानत्वेन नात्यन्तमपक्रमो दृश्यते। अथवा– अन्याश्चान्याश्च नूतना एवापः प्रादुर्भवन्तीति ता भिन्ना अपि सादृश्यमूलकाभेदाध्य-वसायादभिन्ना इवोपलक्ष्यन्ते इति।

## ( धात्वर्थादिविषये मतान्तराणि )

प्रथमः प्रकाशः प्रभवतेरर्थः। पञ्चम्या अधिकरणत्व–माधेयत्वं वाऽर्थः। स च धात्वर्थे प्रथमप्रकाशेऽन्वेति। हिमवद्वृत्तिप्रथमप्रकाशवती गङ्गेत्यन्वयबोधः इति केचित्।

सम्बन्धाधीनत्वं षष्ठ्यर्थः, धात्वर्थं प्रथमप्रकाशेऽन्वेतीत्यन्ये । म० म० गोकुलनाथोपाध्यायास्तु– दर्शनयोग्यत्वाभावावच्छेदकदेशाव्यवहितदेशावच्छेदेन दर्शनयोग्यत्वं प्रकाशः प्रभवतेरर्थः, द्वितीयदेशान्वयितादात्म्यं पञ्चम्यर्थः, तथा च हिमवद्भिन्नो यो दर्शनयोग्यत्वाभावावच्छेदकदेशाव्यवहितदेशः तदवच्छिन्नदर्शनयोग्यतावती गङ्गेति वाक्यार्थ इत्याहुः ।

परे तु प्रथमप्रकाशः प्रभवत्यर्थो न सम्भवति, प्रकाशे दर्शनरूपे प्रथमत्वासम्भवात् । तथा हि तत्प्रागभावाधिकरणसमयवृत्तित्वं तत्प्रथमत्वम् तच्च प्रकृते न सम्भवति, हिमवदन्यदेशे प्रकाशस्यापि प्रकाशान्तरप्रागभावाधिकरणसमयवृत्तित्वात् । न चात्र सजातीयाधिकरणसमयध्वंसानधिकरणसमयवृत्तित्वं प्रथमत्वम्, तच्च प्रथमप्रकाश एव, द्वितीयादिप्रकाशे प्रथमप्रकाशाधिकरणसमयध्वंसाधिकरणसमयवृत्तित्वान्न प्रथमत्वम् इति वाच्यम्, दर्शनस्वरूपाणां ज्ञानस्वरूपाणां वा प्रकाशानामनादौ संसारे दर्शनाधिकरणसमयध्वंसानधिकरणसमयवृत्तित्वासंभवात् प्रथमत्वाप्रसिद्धेः । न च गङ्गाविषयकत्वेन प्रकाशस्य साजात्यं विवक्षणीयमतो नाप्रसिद्धिरिति वाच्यम् । हिमवद्गङ्गासम्बन्धात्प्राग्वर्तिनां जनानां गङ्गोपनीतभानादिसम्भवात् अप्रसिद्धितादवस्थ्यात् प्रकाशस्याननुगमापत्तेश्च । तस्मात् प्रथमावयवावच्छेदेन लौकिकं चाक्षुषं प्रत्यक्षं वा प्रकाशः । अवयवानां प्रथमत्वं तु स्वारम्भारम्भकावयवाधिकरणसमयध्वंसानधिकरणसमयवर्तित्वम् । इदमेव मूलत्वम्, हैमवतस्य च गङ्गावयवस्य स्वोत्पादकसमयवर्तितया तथात्वम्, देशान्तरीयस्य तु हैमवताधिकरणसमयध्वंसाधिकरणसमयवर्तितया न तथात्वमिति । एवं वृक्षमूलस्यापि मध्यशाखाद्यपेक्षया प्रथमत्वं ज्ञेयम् ।

एवं हिमवतो गङ्गा प्रभवतीत्यत्र प्रभवत्यर्थो दर्शितः । विषयत्वरूपं कर्तृत्वं त्याद्यर्थः । पञ्चम्याः प्रकाशान्वयिकर्तृघटितसम्बन्धावच्छिन्नमाधेयत्वमर्थः, तथा च हिमवद्वृत्तेः चाक्षुषस्य प्रथमावयवावच्छिन्नस्य विषयो गङ्गेत्यन्वयबोधः । दर्शिते प्रभवत्यर्थे प्रथमत्वमवयवे एव विवक्षितम्, अतो हिमवतो गङ्गा प्रभवति, काश्मीरेभ्यो वितस्ता प्रभवति, इत्यादौ 'प्रथमत उपलभ्यते' इत्यर्थवर्णनं बृहन्न्यासादौ दृश्यते । अयं चार्थो धातूनामनेकार्थत्वाद्बोद्धव्यः । यदि च प्रथमत्वं धात्वर्थविशेषणं स्यात्– प्रथममुपलभ्यतइत्युच्येत । तस्प्रत्ययान्त– ( प्रथमतः इति ) निर्देशेन च अविच्छिन्नत्वमर्थो लभ्यते । अविच्छिन्नत्वं तु प्रकृते स्वरूपसम्बन्धविशेषो विषयित्वं वेत्यन्यदेतत् ।

अथवा हिमवतो गङ्गा प्रभवतीत्यादौ पञ्चम्या हेतुत्वमर्थः । हेतुत्वं च दैशिकं बोध्यम्, प्रथमावयवाधीनस्य दर्शितप्रकाशस्य प्रयोजकता प्रथमावयवसत्ताप्रयोजकस्य हिमवत इति । अत एव 'क्षेत्रात् शालिः' 'वृक्षात् पुष्पं वा प्रभवती'ति न प्रयोगः, शालिपुष्पयोर्मूलवृन्तयोः प्रथमावयवयोः क्षेत्रवृक्षाभ्यामन्यत्रापि परेणानयने सति संयोगसम्भवात्– क्षेत्रवृक्षयोः मूलवृन्तसत्ताप्रयोजकत्वविरहात् । प्रयोजकत्वं तु प्रकृते नियामकत्वं, व्यापकत्वमिति यावत् । एवं "वल्मीकाग्रात् प्रभवति धनुःखण्डमाखण्डलस्य" इति मेघदूतस्थकालिदासप्रयोगे शक्रधनुःखण्डस्य प्रथमावयवसत्तानियामकं वल्मीकाग्रं शक्रधनुःखण्डस्य दर्शितप्रकाशे हेतुः । मेघाद्विद्युत्प्रभवतितराम् इत्यादौ– विद्युदादिप्रथमावयवसत्तानियामको मेघादिः दर्शितप्रकाशे हेतुः । प्रभवतिपर्यायाविर्भवत्यादियोगे न पञ्चमी किन्तु सप्तमीति केचित् तन्न, आविर्भवत्यादियोगेऽपि बहुशः पञ्चमीप्रयोगस्य प्रामाणिकैरादृतत्वात् । तथाहि– यस्मादाविरभूच्चराचरमिदं यत्रैव चास्तं गतम्– एवमादयः प्रयोगा दृश्यन्ते । तथा च यैरेतद्विषयकं सूत्रम् 'भुवः प्रभवः' इत्यादिरूपेणारभ्यते, तैः सामान्यस्य भूधातोर्निर्देशः कृतो न तूपसर्गविशिष्टयुक्तस्येति दर्शितप्रकाशार्थकस्य भूधातोर्योगेपञ्चमी भवत्येव ।

इत्थञ्च गौणापायमाश्रित्य बहुषु प्रोक्तेषु निर्वाहेण, तन्त्रान्तरीयैतद्विषयकसूत्राणामानर्थक्यमनतिप्रयोजनकत्वं च सूचितम् । यद्यपि प्रोक्तेषु प्रयोगेषु अपायो न धात्वर्थतया

भासते तथापि फललोऽपायस्य सर्वत्र प्रदर्शितत्वेन, धातूनामनेकार्थत्वेन च निर्वाहोऽञ्जसैव भवति । परेषां सूत्रारम्भकरणं तु बालोपलालनं मन्दबुद्धिशिष्यप्रयोजनकं वेति विज्ञेयम् ।

एवमध्वकालावधिभूतादपि पञ्चमीप्रयोगो दृश्यते सोऽपि बौद्धमपायं परिकल्प्यापादानत्वेन समाधेय इति वलभ्याः शत्रुञ्जयः षड् योजनानीत्यादिना बृहद्वृत्तौ प्रतिपादितः । सर्वत्रैषु अवधिरेव पञ्चम्यर्थः स्वमते, परमतानि तु तत्र तत्र विशदस्य वर्णितान्येव । 'विवक्षातः कारकाणि' इति न्यायानुसारमपायविवक्षाभावे च यथायथमन्या विभक्तयोऽपि भवन्त्येवेति– विवक्षान्तरे त्वपादानत्वाभावे यथायोगं विभक्तयो भवन्ति इत्यादिवृत्तिग्रन्थेन पञ्चितमिति दिक् ।।२।२।७२।

## आङाऽवधौ ।।२।२।७०।।

अनेन सूत्रेणावधौ वर्तमानादाङा युक्तान्नाम्नः पञ्चमी वधीयते । अवधिश्च मर्यादा– अभिविधिरिति द्विविधः । योऽवधित्वेन गृह्यते ततः प्रागेव यदि क्रियायाः परिसमाप्तिर्भवति तदा स मर्यादारूपोऽवधिः, यदि चावधिभूतोऽपि पदार्थस्तया क्रिययाऽभिव्याप्यते तदा सोऽभिविधिरूपोऽवधिः । द्वावप्येताविह निमित्तत्वेन ग्राह्यौ विशेषानभिधानात्– लक्ष्येषूभयविधस्यार्थस्य विवक्षादर्शनाच्च । 'आपाटलिपुत्राद् वृष्टो देवः' इत्यत्र पाटलिपुत्रं परित्यज्य तं मर्यादीकृत्य वृष्ट इति, पाटलिपुत्रमप्यभिव्याप्य परदेशं परित्यज्य वृष्ट इत्यर्थद्वयं प्रतीयते । पञ्चम्या अवधित्वमर्थः मर्यादाभिविधिरूपो विशेषश्चाङा द्योत्यते ।

तार्किकास्तु– आङो मर्यादाभिविधिश्चार्थः । तत्र मर्यादा व्यवधानसंसर्गयोरभावौ । तत्र व्यवधानं क्वचित्कालिकं क्वचिद्दैशिकं क्वचिदन्यादृशमपि । तदभावो मर्यादायां भासते । संसर्गस्य तादात्म्य– संयोग– सादेश्य– समानकालिकत्वादेरभावोऽपि तत्र यथायथं तात्पर्यवशादुपतिष्ठते । 'आमुक्तेः संसार' इत्यत्र संसारे मुक्तिनिरूपितं कालिकमव्यवधानं मुक्तिसमानकालिकत्वरूपसंसर्गाभावश्च प्रतीयते । आसमुद्रान्मृदः इत्यत्र मृदां समुद्रनिरूपितं दैशिकमव्यवधानं तादात्म्यस्य सादेश्यस्य वा संसर्गस्याभावश्च भासते ।

अभिविधौ वर्तमानस्याङो व्यापकत्वमितरसम्बन्धश्चार्थः । स च व्यापकताघटक इतरनिरूपितश्चैक एव संसर्गः प्रतीयते आपरमाणोः पृथिवीत्यादौ पृथिवीत्वसामानाधिकरण्येन तादात्म्यसंसर्गावच्छिन्ना पच्यमान– (पृथिवी) परमाणुव्यापकता तदितरतादात्म्यं च भासते । 'आसमुद्रायशः' इत्यादौ यशसि समुद्राभिव्यापकत्वं समुद्रेतरसम्बन्धश्च भासते इति पदवाक्यरत्नाकरे म० म० गोकुलनाथोपाध्यायाः ।

केचित्तु यावच्छब्दतुल्यार्थकस्याङो मर्यादाऽभिविधिश्चार्थः । मर्यादा तु सीमा कालरूपा देशरूपा यथा– तस्यामारभ्य तां देवीमा दशाम्याः प्रपूजयेत्, इत्यादौ । (तस्यामाश्विन(भाद्र)कृष्णनवम्याम्– दशमीम् आश्विनशुक्लदशमीम्) अत्र कालनिष्ठं सीमात्वं तु समभिव्याहृतकालप्रागभावानधिकरणस्वप्रागभावाधिकरणस्वसजातीय – यावत्कालवृत्तिसमभिव्याहृतक्रियानधिकरणत्वम् । दर्शितस्थले पूजारूपक्रियायाः शुक्लदशमीनिष्ठसीमात्वनिरूपकत्वमाङ्शब्देन प्रत्याय्यते, तावतैव शुक्लदशम्या मर्यादात्वं लभ्यते । तन्निष्ठसीमात्वनिरूपकत्वं च तद्वृत्तित्वे सति कृष्णदशमीप्रागभावानधिकरणतत्प्रागभावाधिकरणतिथिकूटव्यापकत्वम्, तावता षोडशतिथ्यधिकरणकषोडशपूजारूपस्यैककर्मणो विधेयतया लाभः । व्याप्यकालसमुदाये सजातीयत्वविशेषणात्– पूजाया उक्तविशेषणद्वयाक्रान्तदण्डादिसमुदायाव्यापकत्वेऽपि न बाधः । अन्वयितावच्छेदकघटकरूपेण साजात्यस्य विवक्षणादुक्तस्थले च तिथेरित्यध्याहारेण, दशमीपदार्थतावच्छेदकस्य तिथित्वघटितत्वेन वाऽऽङ्शब्दार्था-

न्वयितावच्छेदकतया तिथित्वलाभात् तेन रूपेण दण्डादेर्दशमी-सजातीयत्वाभावात् । तिथिः सखण्डकालविशेषरूपः ।

ननु चन्द्रमण्डलकलावस्थाऽप्यणुक्रियाप्रचयरूपा, पूजाया-स्तावत्क्रियावृत्तित्वासम्भवात् तत्र प्रागभाव एवाङोऽर्थः, प्रतियोगित्वमनुयोगित्वं वा, तत्र प्रकृत्यर्थस्य दशम्या अन्वयः, तावता च दशमीप्रतियोगिकप्रागभावलाभः, तस्य स्वप्रति-योग्यवृत्तित्वविशिष्टव्यापकतासम्बन्धेन पूजारूपसमभिव्या-हृतक्रियायामन्वयः । व्यापकत्वं च स्वाधिकरणतिथिनिष्ठा-भावप्रतियोगितानवच्छेदकपूजाविशेषत्ववत्त्वम्, स्वाधिकरण-कृष्णनवमीप्रतियोगिकप्रागभावावच्छिन्नाभेदविशिष्टकालिक-विशेषणतासम्बन्धेन बोध्यम् । तेन कृष्णनवमीप्रतियोगिक-प्रागभाववत्प्रतियोगिकभेदस्याप्रसिद्धावपि न क्षतिः; तद्दशमी-प्रागभावाधिकरणकालस्य स्वाधिकरणकृष्णनवमीप्रागभावा-वच्छिन्नभेदवत्त्वसम्बन्धेन तत्प्रागभावाधिकरणत्वाक्षतेः । न चैवं व्यवहितकृष्णनवमीप्रतियोगिकप्रागभावावच्छिन्नभेद-घटितसम्बन्धेन प्रकृतकृष्णनवमीपूर्वतिथीनामपि तत्तद्दशमी प्रागभाववत्त्वात् तदधिकरणतिथिव्यापकत्वं पूजाविशेषेऽपि न सम्भवतीति वाच्यम्, स्वावच्छिन्नकृष्णनवमीप्रागभावाधि-करणत्वसम्बन्धेन स्वावच्छिन्नभेदस्य सम्बन्धघटकत्वोप-गमात्तेन सम्बन्धेन प्रकृतनवमीपूर्वतिथीनां तत्तद्दशमीप्राग-भावानधिकरणत्वात् पूजाविशेषस्य व्यापकत्वाक्षतेरिति ।

देशरूपा च यथा— 'काशीत आप्रयागाद् गच्छति' इत्यत्र प्रयागस्य गमनसीमात्वं प्रतीयते, तच्च काशीपश्चिम-प्रयागपूर्वदेशव्यापकगमनानधिकरणत्वमाङ्शब्देन प्रयागान-धिकरणत्वे सति काशीपश्चिमप्रयागपूर्वदेशव्यापकत्वम् गमने प्रत्याय्यते । तत्राङ्शब्दार्थः पूर्वदेशः, तदन्वय्यवधि-मत्त्वं पञ्चम्यर्थः, तत्र प्रकृत्यर्थस्य प्रयागस्यान्वयः, तावता प्रयागावधिकपूर्वदेशलाभः, तस्य स्वावधीभूतप्रयागवृत्तित्व-विशिष्टव्यापकतासम्बन्धेन गमनेऽन्वयः । व्यापकत्वं च काशीपश्चिमाभिन्नस्वनिष्ठाभावप्रतियोगितानवच्छेदकगमन-विशेषवत्त्वमिति ।

अभिविधिरपि कालरूपो देशरूपश्च । कालरूपो यथा कार्तिकमारभ्य आ चैत्रात् शीतो भवति इत्यादौ । देशरूपो यथा काशीत आपाटलिपुत्राद् वृष्टो देव इति । प्रथमे कार्तिकपूर्वकालोत्तरचैत्रोत्तरकालपूर्वकालव्यापकत्वं चैत्रोत्तर-कालावृत्तित्वसहितं शीतभवने; द्वितीये, काशीपश्चिमदेश-पूर्वपाटलिपुत्रपूर्वदेशपश्चिमदेशव्यापकत्वं पाटलिपुत्रपूर्वदेशा-वृत्तित्वसहितं वृष्टौ आङ्शब्देन प्रत्याय्यते, शेषः पूर्वदिशा-अवसेय इत्याहुः; तच्चिन्त्यम् मर्यादायां व्यापकताभाने मानाभावात्, 'प्रभासत आगङ्गासागरान्मृदः' इत्यादौ प्रभासपूर्वभूतगङ्गासागरपश्चिमदेशानां सरित्कासारदेव-खातादीनां मृदन्यत्वात्— मृदां तादृशदेशाव्यापकत्वात् तद्भावायोगाच्च । एवम् 'आपरमेश्वरादात्मनां कर्मबन्ध' इत्यादौ पूर्वोत्तरादिदेशकालान्यतरस्वरूपसीम्नोऽप्ययोगा-दिति । एवमभिविधावपि व्यापकत्वस्य सीम्नश्चानुपपत्ति-रूहनीया ।

तस्मान्मर्यादायामाङः सम्बन्धाभावः सम्बन्धिसम्बन्ध-श्चार्थः । यथा— 'प्रभासत आसमुद्रान्मृदः' इत्यत्र समुद्र-परदेशसम्बन्धाभावः तत्सम्बन्धि ( तदवधिक ) पूर्वदेश-सम्बन्धश्च प्रतीयते । तत्र पञ्चम्या निरूपितत्वमर्थः, तथा च समुद्रनिरूपितपरदेशसम्बन्धाभाववत्यः, समुद्रावधिक-पूर्वदेशसम्बन्धवत्यश्च मृद इत्यन्वयबोधः । अभावप्रतियोगी सम्बन्धिनिरूपितश्चैक एव सम्बन्धो ज्ञेयः । तेन समुद्र-तादात्म्याभावसमुद्रसमकालिकसम्बन्धयोश्च गगने सत्त्वेऽपि 'आसमुद्राद्गगनम्' इति न प्रयोगः । यत्र चाङ्प्रयोगे द्वितीयोऽवधिर्न दृश्यते, तत्राङ् प्रयोगाधिकरणम् कालो वा देशो वाऽवधिः । तत्र कालो यथा— 'आमरणाद् हितमभि-सन्धत्ते धीरः' इत्यादौ । अत्र हिताभिसन्धानस्य मरणकाला-धेयत्वाभाव आङ्प्रयोगोत्तरमरणप्रागभावाधिकरणकाला-धेयत्वं च प्रतीयते । अत्रापि न व्यापकत्वस्य भानम्, मरणप्रागभावाधिकरणसुषुप्त्यादिकाले हितानुसन्धाना-भावात् । अत्र सम्बन्धाधेयत्वं कालिकसम्बन्धावच्छिन्नं

बोध्यम्, अतो नानुपपत्तिः। तथाविध ( आङ्प्रयोगाधि–करण )– देशो यथा 'आसमुद्रात्क्षितिः' इत्यादौ । अत्र तादात्म्याभावः, संयुक्तदेशतादात्म्यं चाङोऽर्थः। तत्र संयुक्तदेशे आङ्प्रयोगाधिकरणपार्थिवावधिकं पूर्वत्वं दक्षिणत्वमुत्तरत्वं पश्चिमत्वं समुदितं प्रत्येकं वा तात्पर्यवशादवगम्यते। अतः समुद्रवर्त्तिनां नेदृशप्रयोगः। तथा च 'आसमुद्रात्क्षितिः' इत्यत्र समुद्रतादात्म्याभाववती– आङ्प्रयोगाधिकरणपार्थिवावधिकपूर्वदक्षिणादिना समुद्रसंयुक्तवेलादिदेशेनाभिन्ना क्षितिरित्यन्वयबोधः।

क्वचित् सजातीयोऽप्यवधिः, यथा– 'मिथ्याज्ञानमापरमात्मनः' इत्यादौ। अत्र समवेतत्वाभावो भोक्तृसमवेतत्वं चाङोऽर्थः। भोक्ता तु साजात्यसम्बन्धवानिति नानुपपत्तिः। भोक्तुर्व्यापकतासम्बन्धेन समवायेऽन्वयः। तथाविधसमवायसम्बन्धावच्छिन्नाधेयत्वमवधिं विनाऽनुपपन्नमिति स्थावरजीवन्मुक्तादिर्भोक्ताऽवधिः। तस्यावधित्वं परमात्मन इव बोध्यम्। तथा च स्थावरजीवन्मुक्तासमवेतत्वविशिष्टं तथाविधभोक्तृसमवेतत्वमथ वा स्थावरजीवन्मुक्तभिन्नभूता एव भोक्तृतया भासन्ते, तथा च परमात्मासमवेतं स्थावरजीवन्मुक्तभिन्नभोक्तृव्यापकसमवायावच्छिन्नाधेयत्ववन् मिथ्याज्ञानमित्यन्वयबोधः।

क्वचिन्न द्वितीयोऽवधिः– यथा– आमुक्तेः संसार इत्यादौ। अत्र मुक्तिकालावृत्तित्वं मुक्तिप्रागभावकालवृत्तित्वं च पूर्वावधिरहितं संसारे प्रतीयते। क्वचिद् द्वितीयावधियोगः– यथा "तत आरभ्य तां देवीमादशम्याः प्रपूजयेत्" इत्यादौ। अत्र पूर्वकालावृत्तित्वमुत्तरकालवृत्तित्वमारभ्यशब्दार्थः। तत्र पूर्वत्वघटकप्रागभावान्वयि प्रतियोगित्वमुत्तरत्वघटकाधिकरणान्वयि निरूपकत्वं च पञ्चम्या अर्थः। आङस्तु समानकालिकत्वाभावः प्रागभावकालिकत्वं चार्थः। कालान्वयिनिरूपकत्वं प्रागभावान्वयि प्रतियोगित्वं च पञ्चम्यर्थः। तथा च कृष्णनवमीप्रतियोगिकप्रागभावकालावृत्तिः कृष्णनवमीनिरूपिताधिकरणकालध्वंसाधिकरणकालस्वरूपोत्तरकालवृत्तिः दशमीप्रतियोगिताकप्रागभावकालिकी देवीकर्मिका पूजा वाक्यार्थः। कृष्णनवम्यादिसकलतिथिवृत्तित्वं तु पूजायां प्रतितिथिपूजाङ्गविशेषोपदेशादवगम्यते। नवम्यादितिथिस्तु तत्तच्चन्द्रकालानुक्रियाप्रचयाधिकरणकालस्वरूपा तथाविधक्रियापचयमात्रावस्थायिजन्यपदार्थस्वरूपा वेत्यन्यदेतत्। देशस्वरूपोभयावधियोगो यथा 'आपाटलिपुत्राद्वृष्टो देव आ मथुरायाः' इत्यादौ। अत्र दैशिकसंसर्गावच्छिन्नाधेयत्वस्याभावः तथाविधं पश्चिमदेशाधेयत्वं च प्रथमस्याङोऽर्थः, पञ्चम्यास्तु आधेयत्वान्वयि निरूपितत्वं पश्चिमत्वान्वय्यवधिमत्वं चार्थः, एवं द्वितीयस्याङस्तथाविधाधेयत्वाभावस्तथाविधं पूर्वदेशाधेयत्वं चार्थः, पञ्चम्यास्तु निरूपितत्वमवधिमत्त्वं चार्थः। तथा च पाटलिपुत्रावृत्तेः पाटलिपुत्रावधिकपश्चिमवृत्तेः मथुरानिरूपिताधेयत्वाभाववत्याः मथुरावधिकपूर्वदेशवृत्तेः वृष्टेः कर्ता देव इत्यन्वयबोधः।

'आ कृष्णनवमीपूर्वतिथि आशुक्लदशमि देवीं पूजये'–दिति, 'आपाटलिपुत्रमामथुरं वृष्टो देव' इति चाव्ययीभावसमासे त्वाङो निपाततया तदर्थे भेदान्वये बाधकाभावाद्दर्शित एवान्वयबोधः। इयांस्तु विशेषः,– समासेविभक्तेर्लुप्तया पञ्चम्यर्थयोर्निरूपितत्वप्रतियोगित्वाद्योः संसर्गतया भानमिति।

आङोऽभिविधिरप्यर्थः, स च तत्सम्बन्धतदितरसम्बन्धौ। आ परमाणोः पृथिवीत्यादौ पृथिवीत्वसामानाधिकरण्येन परमाणोस्तदन्यस्य च तादात्म्यं प्रतीयत इति केचित्। परे तु तद्व्यापकत्वं तदितरसम्बन्धश्चाभिविधिः। व्यापकताघटक इतरनिरूपितश्चैक एव सम्बन्धो बोध्यः तेन सम्बन्धान्तरेण व्यापकत्वे नातिप्रसङ्गः। आपरमाणोः पृथिवीत्यादौ पृथिवीत्वसामानाधिकरण्येन पच्यमानपरमाणुव्यापकत्वं परमाणुभिन्नतादात्म्यं च प्रतीयत इत्याहुः; तदुभयमपि चिन्त्यम्, आ गुणाज्जातिरिति प्रयोगप्रसङ्गात्।

अन्ये तु कार्तिकमारभ्याचैत्राच्छीतमित्यत्राङ उत्तरकालोऽर्थः। तस्य स्वपूर्वकालव्यापकत्वेन स्वावृत्तित्वेन चापरपदार्थेऽन्वयः। पञ्चम्या उत्तरत्वान्वयि निरूपकत्वमर्थः। आरभ्यशब्दस्य पूर्वकालोत्तरकालोऽर्थः, पूर्वत्वान्वयि प्रतियोगित्वं द्वितीयार्थः। तावता कार्तिकपूर्वकालोत्तरकाललाभः; स चायं कालः संसर्गीभूतव्यापकताघटकस्वपूर्वकालस्य विशेषणं, न तु क्वाप्यन्वेति। पूर्ववदेव कार्त्तिकपूर्वकालोत्तरस्वपूर्वकालनिष्ठाभावप्रतियोगिताऽनवच्छेदकधर्मवत्त्वं व्यापकत्वं संसर्गः। आरभ्यान्तवाक्यं दर्शितव्यापकतासंसर्गकान्वयतात्पर्यग्राहकम्, तथा च चैत्रोत्तरकालावृत्ति कार्त्तिकपूर्वकालोत्तरीभूतचैत्रोत्तरकालपूर्वकालव्यापकं च शीतमित्यन्वयबोधः।

एवं काशीत आ पाटलिपुत्राद्वृष्टो देव इत्यादौ पूर्वदेश आङोऽर्थः, पूर्वत्वान्वय्यवधिमत्त्वं पञ्चम्यर्थः, तावता पाटलिपुत्रपूर्वदेशो लभ्यते। तस्य तु काशीपश्चिमदेशावधिकपूर्वीभूत– स्वपश्चिमदेशव्यापकत्वेन स्वावृत्तित्वेन चापरशब्दार्थेऽन्वयः, तथा च पाटलिपुत्रपूर्वदेशावृत्तित्वं, काशीपश्चिमदेशावधिकपूर्वभूतपाटलिपुत्रपूर्वावधिकपश्चिमदेशव्यापकत्वं च वृष्टौ प्रतीयते, आरभ्यान्तवाक्यं पूर्ववत् तात्पर्यग्राहकमेवेति वदन्ति। तदपि चिन्त्यम्, आ शैशवादधीतमायौवनादित्यादौ यौवनोत्तरकालपूर्वीभूतशैशवपूर्वकालोत्तरकालव्यापकत्वस्याध्ययने विरहात् तादृशानध्यायरोगादिकालेऽध्ययनाभावात् इति।

तस्मात् सम्बन्धिसम्बन्धाभावः, सम्बन्धः, इतरसम्बन्धश्चाभिविधिराङोऽर्थः। सम्बन्ध्यन्वयि निरूपितत्वम् इतरान्वयि प्रतियोगित्वं च पञ्चम्यर्थः। आ परमाणोः पृथिवीत्यादौ परमाणुतादात्म्यवतो जलादिपरमाणोः तादात्म्याभावः पार्थिवपरमाणुतादात्म्यं पार्थिवपरमाणुभिन्नद्व्यणुकादितादात्म्यं च पृथिव्यां प्रतीयते। यादृशसम्बन्धस्याभावो भासते तादृश एव सम्बन्ध इतरसम्बन्धश्च प्रतीयते। अतः समुद्रसंयुक्तशैवालतादात्म्याभाव–समुद्रसमकालिकत्वसमुद्रेतरशब्दवत्तादात्म्यानां गगने सत्त्वेऽपि आ समुद्राद्गगनमिति न प्रयोगः। न वा गगनसमवेतशब्दतादात्म्याभाव–गगनतादात्म्य– गगनेतरपृथिव्यादिसमकालिकत्वानां गगने सत्त्वेऽपि आ गगनाद्गगनमिति प्रयोगः। आ चैत्राच्छीतं भवतीत्यत्र उत्तरकालाधेयत्वस्याभाव आधेयत्वम्– इतराधेयत्वं चाङोऽर्थः। उत्तरत्वं ध्वंसाधिकरणत्वं बोध्यम्। पञ्चम्याः प्रतियोगित्वं निरूपितत्वं चार्थः। प्रतियोगित्वध्वंसेतरत्वयोः निरूपितत्वमाधेयत्वेऽन्वेति। आधेयत्वं तु कालिकविशेषणतावच्छिन्नं बोध्यम्, तथा च चैत्रप्रतियोगिताकोत्तरकालवृत्ति– चैत्रवृत्ति– चैत्रेतरकालवृत्ति शीतं तद्भवनं वा वाक्यार्थः।

आ प्रयागादन्तर्वेदिरित्यत्र पूर्वदेशतादात्म्याभावः, तादात्म्यम्, इतरदेशतादात्म्यं चाङोऽर्थः, पञ्चम्याः पूर्वत्वान्वयि अवधिमत्त्वम्, तादात्म्यान्वयि निरूपितत्वम्, इतरत्वान्वयि प्रतियोगित्वं चार्थः। तथा च प्रयागपूर्वदेशभिन्ना प्रयागप्रतियोगिताकेतरपश्चिमादिदेशाभिन्ना चान्तर्वेदिरिति वाक्यार्थबोधः। आकीटादाकैटभारेरभीष्टलाभप्रयुक्तकृतकृत्यतेत्यादौ कैटभार्यवधिकोत्कृष्टपरमात्मावृत्तित्वमाधेयत्वमितरात्मवृत्तित्वं द्वितीयस्याङोऽर्थः, प्रथमस्य तु कीटावधिकापकृष्टनारकिकात्मवृत्तित्वमाधेयत्वमितरात्मवृत्तित्वं चार्थः। पञ्चम्या उत्कर्षापकर्षान्वय्यवधिमत्त्वं निरूपितत्वं प्रतियोगित्वं च पूर्ववदेवार्थः। तथा च कैटभार्यवधिकोत्कृष्टपरमात्मावृत्तिः कैटभारिवृत्तिः तदितरवृत्तिः, कीटावधिकापकृष्टनारकिकात्मावृत्तिः कीटवृत्तिः तदितरवृत्तिः (कीटप्रतियोगिताकेतरात्मवृत्तिः) च अभीष्टलाभप्रयुक्ता कृतकृत्यतेत्यन्वयबोधः। एवम् "आकीटमाकैटभवैरि तुल्यः स्वामीष्टलाभात्कृतकृत्यभावः" इति श्रीहर्षप्रयोगेऽव्ययीभावसमासेऽपि दर्शितदिशैव वाक्यार्थबोधो विज्ञेयः। केवलमिह पञ्चम्यर्थस्य संसर्गतया भानमिति विशेषः। एवं कीटतदितराधेयत्वयोः, कैटभारितदितराधेयत्वयोश्चाविशेषेण प्रतीत्या कीटकैटभारिवृत्ति– कृतकृत्यभावस्य नारकिकेतरीभूतपरमात्मेतरसकलात्मव्यापकत्वमर्थतः प्रतीयते। एवं

'तस्या आरभ्यादशम्याः पूजयेज्जगदम्बिकाम्' इत्यादि-मर्यादास्थलेऽपि आश्विन- ( शुक्लादिरीत्या- भाद्र ) कृष्ण-नवमीप्रभृतितिथिवृत्तित्वस्य दशमीपूर्वकालवृत्तित्वेन लाभात्पूजायां नवमीप्रभृतिषोडशतिथिव्यापकत्वमर्थतः प्रतीयते बाधकविरहात् ।। इत्येवं प्रकारा वाग्विलासा एतत्पञ्चम्यर्थ-विषये तार्किकाणामिति दिग्दर्शनायोक्तमेतावदिति ।।२।२।७०।।

## पर्यपाभ्यां वर्ज्ये ।।२।२।७१।।

वर्ज्येऽर्थे वर्तमानाभ्यां पर्यपाभ्यां योगे पञ्चमी विधी-यतेऽनेन सूत्रेण । परिपरि पाटलिपुत्रात् वृष्टो देवः, अप पाटलिपुत्राद् वृष्टो देव' इत्युदाहृणे । अत्र पर्यपौ वर्जनार्थौ-विति- स्पष्टीकृतं 'पाटलिपुत्रं वर्जयित्वेत्यर्थ' इति वृत्या । वर्जनञ्चेहात्यन्ताभावरूपेण प्रतीयते । पञ्चम्याश्चाधेय-त्वमर्थः । स चात्यन्ताभावेऽन्वेति । अत्यन्ताभावश्च वृष्ट्या-दावन्वेति । तथा पाटलिपुत्रवृत्त्यत्यन्ताभावप्रतियोगिवृष्टिकर्ता देव इत्यन्वयबोधः इति शाब्दिकादिसम्प्रदायः । अत्रसमान-कालिकत्वसम्बन्धेनाप्यत्यन्ताभावस्य समभिव्याहृतार्थे वृष्ट्यादावन्वयः, तेन कालान्तरावच्छेदेन पाटलिपुत्रवृत्तेर-त्यन्ताभावस्य प्रतियोगिन्यपि पाटलिपुत्रवृत्तिवर्षणे न तथा प्रयोगः ।

वस्तुतस्तु समभिव्याहृतार्थस्यान्वयितावच्छेदकावच्छिन्न-प्रतियोगिताकत्वेन सम्बन्धेनात्यन्ताभावेऽन्वयः । तथाविधा-त्यन्ताभावस्य समानकालिकतया समभिव्याहृतार्थेऽन्वयस्तथा च पाटलिपुत्रवृत्तेर्वृष्ट्यत्यन्ताभावस्य समानकालिकी या वृष्टिः तत्कर्ता देव इत्यन्वयबोधः । तेन पाटलिपुत्रवृत्ते-र्वृष्टिगगनाद्युभयाभावस्य प्रतियोगिनि समानकालिकेऽपि पाटलिपुत्रवर्षणे तथा न प्रयोगः इत्यलमधिकप्रपञ्चेन ।।२।२।७१।।

## यतः प्रतिनिधिप्रतिदाने प्रतिना ।।२।२।७२।।

अनेन सूत्रेण प्रतिना योगे प्रतिनिधिप्रतिदाने यमपेक्ष्य भवतस्तद्वाचिनो नाम्नः पञ्चमी विधीयते । 'प्रद्युम्नो वासुदेवात्प्रति' इति प्रतिनिधौ 'तिलेभ्यः प्रतियच्छति माषान्' इत्यादिः प्रतिदाने उदाहरणम् । प्रतिनिधौ प्रतेः सादृश्यमर्थः । प्रतिदाने च ऋणध्वंसजनकत्वमर्थः । यत इत्यनेन च यत्प्रतियोगि प्रतिनिधित्वं विवक्षितं सोऽर्थो गृह्यते, इति- प्रतिनिधिस्थले सादृश्यस्य उभयनिष्ठत्वेऽपि प्रतिदानस्थले च प्रतिदीयमानस्यापि, प्रतिना युक्तत्वेऽपि यमपेक्ष्य प्रतिनिधित्वम्, यस्य च विशेष्यत्वं तस्यैव पञ्चमी-प्रकृतित्वमिति गम्यते । तथा च प्रतिनिधौ प्रद्युम्नपदात् प्रतिदाने च माषपदान्न पञ्चमी । यद्यपि "उपपदविभक्तेः कारकविभक्तिर्बलीयसी" इति प्राचामाचार्याणां न्यायादेव क्रियाकारकभावसम्बन्धमूलकत्वेन कारकविभक्तेर्बलवत्स्वरूप-स्वतः सिद्धमूलकात् प्रतिनिधीयमानात्- प्रतिदीयमानाच्च पदाद् द्वितीयैव पञ्चमीं प्रबाध्य भविष्यतीति यत इति पदमनावश्यकमिति शङ्कितुं शक्यते, तथापि न्यायसिद्ध-स्यैवार्थस्य मन्दबुद्धीनामपि लाभाय यत इति पदमिति विज्ञेयम् । उपपदविभक्तयश्च सर्वाः प्रायः सम्बन्धसामान्ये विधीयन्ते इतीहापि पञ्चम्याः सम्बन्धसामान्यमेवार्थ इति यादृशस्थले, यथा- सम्बन्धः प्रतिभासेत स तत्र वाक्यार्थ-बोधविषयो बोध्यः । तथा च वासुदेवस्य स्थाने तत्कार्य-कारी- तत्सदृशो वा प्रद्युम्न इति, पूर्वगृहीततिलानां विशोधनाय माषान् प्रयच्छतीति च वाक्यार्थबोधो ज्ञेयः इति शाब्दिकसम्प्रदायः ।

अत्र तार्किकमतम्— प्रतिनिधौ वर्तमानस्य प्रतेः भेद-स्तत्कार्यकारित्वं चार्थः । पञ्चम्या भेदान्वयि प्रतियोगित्वं कार्यान्वयि निरूपितत्वं चार्थः, तथा च वासुदेवप्रतियोगिक-भेदवान्- वासुदेवनिरूपितकार्यकृत्प्रद्युम्न इत्यादिरूपेणान्वय-बोधः । प्रतिदाने वर्तमानस्य प्रतेः ऋणध्वंसजनकत्वमर्थः । पञ्चम्यास्तु ऋणत्वान्वयि आदानजनकत्वमर्थः, ऋणत्वं तु

स्वत्वमिव पदार्थान्तरम्, पापविशेषो वेत्यन्यदेतत् । तथा चैतत्सम्प्रदानकं तिलादानजन्यर्णध्वंसजनकं माषकर्मकदानं यत्तत्कर्तृकत्वं वाक्यार्थ इति सम्प्रदायः ॥ वस्तुतस्तु सदृश एव प्रतिनिधिशब्दार्थः अत एव चन्द्रस्य प्रतिनिधि- र्मुखमिति कविप्रयोगः तथा च प्रतेरपि सदृश एवार्थः । सादृश्यान्वयि प्रतियोगित्वं पञ्चम्यर्थः । अत एव **मुख्यस्य सदृशः प्रतिनिधिरिति** वृत्तिः । तत्र मुख्यतोक्त्या कार्य- सदृशकार्यकारी प्रतिनिधिरिति ज्ञाप्यते । तत्र पञ्चम्याः प्रथमकार्यान्वयि जन्यत्वमर्थः, कार्यं तु कार्यतावच्छेदकत्वोप- लक्षिततत्तद्धर्मविशिष्टं बोध्यम्, यद्धर्मविशिष्टे पञ्चम्यर्था- न्वयः तद्धर्मविशिष्ट एव सादृश्यान्वयः । 'वासुदेवात्प्रति प्रद्युम्न' इत्यादौ वासुदेवजन्यकार्यसदृशकार्यकर्ता प्रद्युम्न इत्येवं प्रकारेणान्वयो बोध्यः । यदि निपातार्थस्याभेदान्वयो न मन्यते, तदा कार्यसदृशकार्यकारित्वं प्रतेरेवार्थो बोध्यः । एवमश्वो रथात्प्रति इत्यादौ रथजन्यगमनसदृशगमनकर्ताश्व इति बोधः । प्रतिदानं द्वितीयदानं सदृशदानमिति यावत् । माषानस्मै तिलेभ्यः प्रतियच्छतीत्यादौ पञ्चम्यर्थहेतु- त्वस्य माषदानेऽन्वयः । माषाणां श्यामत्वादिना तिल- साम्यात् **बृहद्वृत्तौ तु गृहीतस्य प्रत्यर्पणं** प्रतिदान- मित्युक्तम् । तथा चैतत्सम्प्रदानकतिलहेतुकमाषकर्मकं प्रत्यर्पणं तत्कर्ता वाक्यार्थः । यत्तु ऋणापाकरणं प्रतिदान- मिति मत्वा प्रतिदानस्थले ऋणध्वंसजनकत्वं प्रतेरर्थ इत्युक्तं तच्च सूत्रवृत्तिविरुद्धम् । तथा हि सूत्रे प्रतिदान- ग्रहणमात्रं कृतं, नहि ऋणप्रयोग उद्धारो वा वृत्तावपि प्रद- र्शितः । गृहीतस्य प्रत्यर्पणमित्येतावदेवोक्तम् । न हि केवलमृणमेव गृहीतं भवति । विनिमयार्थमपि किञ्चिद्गृही- त्वाऽन्यद्वस्तु दीयते । एवं वलयौ मित्राय कुण्डलाभ्यां प्रति- यच्छतीत्यादौ, नलोऽश्वहृदयज्ञानम्- ऋतुपर्णायाक्षहृदय- ज्ञानात्प्रतियच्छति इत्यादयोऽपि प्रयोगा गृहीतस्य प्रत्यर्पण- मात्रविषयकत्वेन सङ्गमनीयाः । तथा च 'यत' इति सूत्रस्था पञ्चमी हेत्वर्थिकेति केचित् । तदनुसारमेव- तिलहेतुक- माषकर्मकं प्रत्यर्पणमिति वाक्यार्थबोधः प्रदर्शितः । सम्बन्ध- सामान्यान्तः हेतुहेतुमद्भावस्यापि गृहीतुं शक्यत्वादित्येवं यथारुचि व्याख्यानं प्रेक्षावतामिति दिक् ॥२।२।७२॥

## आख्यातर्युपयोगे ॥२।२।७३॥

अनेन सूत्रेण नियमपूर्वकविद्याग्रहणे आख्यातृवाचका- न्नाम्नः पञ्चमी विधीयते । आख्याता च शास्त्रप्रति- पादयिता । अत्रोपयोगग्रहणस्य नियमपूर्वकविद्याग्रहणार्थत्वं कथमिति बृहन्न्यासादौ विवेचितं तदिह नोपयुज्यत इति विरम्यते । उपाध्यायादधीते आचार्यादागमयति, श्रावका- च्छृणोति- इत्यादौ सर्वत्र, नियमपूर्वकविद्यास्वीकारसत्त्वा- त्पञ्चमी भवति । सर्वत्राऽत्र पञ्चम्या अवधित्वमाश्रयत्व- रूपमर्थः । तच्च कर्तृत्वरूपमेव । तच्च प्रयोज्यतासम्बन्धेन उच्चारणे अर्थज्ञाने च धात्वर्थेऽन्वेति । अध्ययनं हि द्विविधम्- उच्चारणफलकं श्रावणं प्रत्यक्षम्- अर्थज्ञानफलकं वा श्रावणं प्रत्यक्षम् । उच्चारणं तु वर्णोत्पादकतयोपलक्षितो विवृतादिः प्रयत्नः आख्याने तु प्रकृत्यर्थस्य कर्तृतयाऽन्वयः । एवं चोपाध्यायकर्तृकवाक्यप्रयोज्यस्योच्चारणस्यार्थप्रतिपादकता- ज्ञानस्य वाऽनुकूलं यच्छ्रावणं तदाश्रयत्वं वाक्यार्थः । अथ-

अयि विधुं परिपृच्छ गुरोः कुतः
स्फुटमशिक्ष्यत दाहवदान्यता ।
ग्लपितशम्भुगलाद्गरलात्त्वया,
किमुदधौ जड ! वा वडवानलात् ॥
( नै० ४।४८ )

इति श्रीहर्षप्रयोगे नियमपूर्वकविद्याग्रहणाऽप्रतीतेः कथं पञ्चमीप्रयोगः ? अस्यार्थः- अयि सखि ! विधुं चन्द्रं परिपृच्छ, किमिति चेदत्राह, हे जड निर्बोध ! त्वया कुतः गुरोः दाहवदान्यता दाहदातृत्वम्- स्फुटं स्पष्टम् अशिक्ष्यत उपादीयत द्वावेवेदृशशिक्षायां गुरू संभाव्येते तौ विकल्प्य पृच्छति- किं ग्लपितो ग्लानिं मालिन्यं प्रापितो शम्भोः

शिवस्य गलः कण्ठदेशो येन तस्मात्, गरलात् कालकूट–विषात्; अशिक्ष्यत ? त्वं शम्भोः शिरसि तिष्ठसि तद्विषं च तस्य गले वर्तते, अतः सामीप्यात्ततस्तवेयं शिक्षा संभाव्यत इति भावः। किं वा उदधौ समुद्रे वडवानलात् वाडवाग्नेः (दाहदातृत्वम्) अशिक्ष्यत ? त्वं समुद्राज्जातो बडवानलश्च तत्र सर्वदा सन्निहित इति ततोऽपि तवेयं शिक्षा संभाव्यत इति भावः। अत्रोपयोगाभावात् हेतु–पञ्चम्येवेति केचित्। तादृशानुशासनविरहात् उपयोग–कल्पनामाश्रित्य प्रकृतसूत्रेणैव पञ्चमीति प्रमाणिकाः। तत्र आख्यानपूर्वकं ज्ञापनं तच्च क्रियाकर्तव्यताज्ञानानुकूलो व्यापारः पञ्चम्यर्थः प्रयोज्यतया शिक्षाणादिफले प्रवृत्ताव–न्वेति। शिक्षतेस्तु प्रवृत्तिफलकं परकर्तृकक्रियाया दर्शनं ज्ञानसामान्यं वाऽर्थः। वडवानलादेस्तु दाहकर्तव्यताज्ञान–प्रयोजकम्, इति नानुपपत्तिः। पञ्चम्यर्थे तथाविधव्यापारे प्रकृत्यर्थस्याधेयतयाऽन्वयः।

एवं 'पाचकात्पाकं शिक्षते', 'नटान्नाट्यं शिक्षते' इत्यादौ इत्थं पक्तव्यमिति पाकाङ्गस्य चुल्लीप्रज्वालनादि–कर्मणः प्रदर्शनस्वरूपः पाचकव्यापारः पाककर्तव्यताज्ञानं जनयति, तथाविधज्ञानं तु पाकप्रवृत्तिप्रयोजकम्–इति। इत्थं नटनीयमिति नाट्याङ्गस्याङ्गुलिचेष्टादिकर्मणः प्रदर्शनरूपो नटव्यापारो नाट्ये कर्तव्यताज्ञानं जनयति, तच्च प्रवृत्तिं प्रयोजयति इत्येवं रीत्योपपत्तिः करणीया। न हि आग–मादिशास्त्राध्ययनार्थविहितनियमेन तादृशशास्त्रग्रहणमेवोप-योगः किन्तु यस्य शास्त्रस्य ग्रहणे यादृशो नियमोऽपेक्षितस्त-त्पूर्वकं तच्छास्त्रग्रहणमेवोपयोगशब्देन गृह्यते। तथा च पाककर्तव्यताज्ञापनस्वरूपो यो व्यापारस्तत्प्रयोज्यायाः पाकसाध्यिकायाः प्रवृत्तेरनुकूलं यत्परकर्तृकपाकस्य दर्शनं ज्ञानसामान्यं वा तदाश्रयत्वं वाक्यार्थः। एवं नटवृत्तितथा–विधव्यापारप्रयोज्यायाः नाट्यसाध्यिकायाः प्रवृत्तेरनुकूलं यदन्यकर्तृकनाट्यदर्शनं तद्विषयं ज्ञानसामान्यं वा तदाश्रयत्वं वाक्यार्थः।

एवं पण्डितात्पुराणं शृणोति, इत्यादौ पण्डितकर्तृक–वाक्यप्रयोज्यं यत् पुराणकर्मकं श्रवणं तदाश्रयत्वं वाक्यार्थः। अत्रोपयोगः पुण्यजनकत्वमधर्मध्वंसजनकत्वं वा श्रवणे स्व–रूपसदपेक्षितम्, तस्य तु बोधः पञ्चमीसाधुत्वार्थं मानान्तरे-णैवेति यत्र नेदृश उपयोगस्तत्र न पञ्चमी– यथा नटस्य गाथां शृणोतीत्यादौ।

एवं

'पिकाद्वने शृण्वति भृङ्गहुङ्कृतै–
र्दशामुदञ्चत्करुणे वियोगिनाम्।
अनास्थया सूनकरप्रसारिणीं
ददर्श दूनः स्थलपद्मिनीं नलः॥''

(नै० १।८८)

इत्यत्र नोपयोग इति नेयं पञ्चमी किन्तु हेतुपञ्चम्ये–वेति प्रामाणिकाः। अस्यार्थः– दूनो दमयन्तीविरहसन्तापेन खिन्नो नलः उदञ्चन्तः पुष्पविकासेनैव विकसन्तः करुणाः करुणनामानो वृक्षाः, यस्मिन् तत्र, पक्षे उदञ्चन्ती विरहि–दुर्दशाश्रवणेन उत्पद्यमाना करुणा दया यस्य तत्र, वने उद्याने (कर्तरि) भृङ्गानां भ्रमराणां हुङ्कृतैः हुङ्कृत्यनु–कारिभिर्गुञ्जनैः (श्रोतुः सावधानतासूचकैः 'हुं' 'हुं' इति शब्दैः) पिकात् दृष्टवियोगिदशात् कोकिलात् वियोगिनां प्रियारहितानां नराणां प्रियविरहितानां नारीणां च–(वियोगिनश्च वियोगिन्यश्चेति विग्रहे एकशेषे पुंलिङ्गस्य शिष्टत्वाद् वियोगिनामिति) दशां कष्टामवस्थां शृण्वति सति, अनास्थया– किमत्र चित्रमिति– किमेतस्य श्रवणेन फलमिति वा विचार्यानपेक्षया– सूनं पुष्पमेव करः पाणिः तं प्रसारयति तत्कथनश्रवणयोर्वारिणाय विस्तारयति तच्छीलां स्थलपद्मिनीं ददर्श। अत्र वनस्य श्रोतुराख्यातस्य वृत्तान्त–स्योपयोगाभावः स्पष्ट एवेति नेयं पञ्चमी तत्र युक्ताऽपि तु हेतुपञ्चम्येवेति हृदयम्। बौद्धमपायमाश्रित्य पञ्चमी–विधाने तु– प्रकृतसूत्रकृतो नियम एव बाधक इत्यग्रे स्फुटी भविष्यति।

इदमपि सूत्रं नावश्यकम्, यो हि यतः किञ्चिदधीते तज्ज्ञानं स शब्दो वा आख्यातुरपक्रामत्येव । तथा च बौद्धोऽपायोऽत्राप्यस्त्येवेति तमाश्रित्यापादानसंज्ञया पञ्चमीसिद्धेः । ननु यदि ततः ( आख्यातुः ) तत् शास्त्रं ज्ञानं वा ततोऽपक्रामति तर्हि तत्र तन्नोपलभ्यते, यथा वृक्षात्फलमपक्रान्तं पुनस्तत्र नोपलभ्यते । आख्यातुस्तु न सर्वथा तदपक्रान्तं दृश्यते इति कथमपाय इति चेत् न, सन्ततत्वात् । शब्दस्य व्यञ्जका ध्वनय उपाध्यायेनोत्पाद्यमाना भिन्ना अपि सादृश्यात्तत्त्वेनाध्यवसीयमानाः श्रोतुः पुनः पुनः श्रोत्रप्रदेशं गच्छन्तो व्यक्तिस्फोटरूपं जातिस्फोटरूपं वा शब्दमभिव्यञ्जयन्तीति नात्यन्तायापक्रामन्ति । अथवा ज्वालारूपं ज्योतिरविच्छेदेनोत्पद्यमानं सादृश्यात्तत्त्वेनाध्यवसीयमानं सन्ततं, तथैवोपाध्यायस्य ज्ञानानि भिन्नानि भिन्नशब्दरूपतामापद्यमानानि सन्ततानि प्रतीयन्ते । ज्ञानमेव शब्दरूपमापद्यते । तथा चोक्तं हरिणा—

> वायोरणूनां ज्ञानस्य, शब्दत्वापत्तिरिष्यते ।
> कैश्चिद्दर्शनभेदो हि प्रवादेष्वनवस्थितः । इति ।

अयमर्थः, वायोः परमाणूनां शब्दतन्मात्रादिरूपाणां कैश्चिद् दार्शनिकैः ज्ञानस्य शब्दरूपत्वमिष्यते । अयं हि दर्शनभेदः प्रवादेषु परस्परवाक्यप्रबन्धेषु शास्त्रेषु वा अनवस्थितः, प्रतिष्ठामप्राप्तः । अग्रेऽपि तेनैवोक्तम्—

> लब्धक्रियः प्रयत्नेन वक्तुरिच्छानुवर्तिना ।
> स्थानेष्वभिहतो वायुः शब्दत्वं प्रतिपद्यते ।। इति ।

वक्तुरिच्छानुवर्तिना प्रयत्नेन लब्धक्रियो वायुः ताल्वादिस्थानेष्वभिहतः शब्दत्वं प्रतिपद्यत इत्यन्वयः । एतेनैकस्यैव वायोः तत्तत्स्थानविशेषसम्बन्धादनेकरूपशब्दत्वमित्युक्तम् । किं च —

> अणवः सर्वशक्तित्वाद् भेदसंसर्गहेतवः ।
> छायातपतमः शब्द—भावेन परिणामिनः ।।
> स्वशक्तौ व्यज्यमानायां प्रयत्नेन समीरिताः ।
> अभ्राणीव प्रचीयन्ते शब्दाख्याः परमाणवः ।। तथा—
> अथायमान्तरो ज्ञाता सूक्ष्मवागात्मना स्थितः ।
> व्यक्तये स्वस्वरूपस्य शब्दत्वेन विवर्तते ।।
> स मनोभावमास्थाय तेजसा पाकमास्थितः ।
> वायुमाविशति प्राणमथासौ समुदीर्यते ।।
> अन्तःकरणतत्त्वस्य वायुराश्रयतां गतः ।
> तद्धर्मेण समाविष्ट— स्तेजसा सोऽपि पच्यते ।।
> विभज्य स्वात्मनो ग्रन्थीन् श्रुतिरूपैः पृथग्विधैः ।
> प्राणो वर्णानभिव्यज्य वर्णेष्वेवोपलीयते ।। इति ।

वायुपरमाणव एव सर्वशक्तिमन्तः अनेकशब्दरूपेण परिणमन्ते । वृत्तिविशिष्टं चान्तः करणं वायुरूपेण वायुद्वारा स्वस्वरूपं व्यञ्जयति । अन्तः करणतत्त्वस्याश्रयभूतो वायुः, तेजोधर्मेणाविष्टः स्वात्मनोग्रन्थीन् नानाध्वनिरूपेण विभज्य वर्णानभिव्यज्य वर्णेष्वेव प्रलीयत इति समुदितार्थः । तथाचायं वायुप्रवाहोऽविच्छिन्न इत्यपक्रामन्नपि नात्यन्तायापक्रामतीति— अपायसत्त्वात् पञ्चमी यद्यपि सिद्धा, तथाऽपि उपयोगे सत्येव पञ्चमी प्रयोक्तव्या नान्यत्रेति नियमार्थमिदं सूत्रमिति नटस्य गाथां शृणोतीत्यादौ नटान्न पञ्चमीति बृहद्वृत्त्यादिषु प्रतिपादितमिति विरमामः ।।२।२।७३।।

## गम्ययपः कर्माधारे ।।२।२।७४।।

अनेन सूत्रेणाप्रयुज्यमानस्यार्थतः प्रतीयमानस्य यबन्तस्य कर्मणि आधारे च पञ्चमी विधीयते । यथा प्रासादात् प्रेक्षते आसनात् प्रेक्षत इति । अत्र प्रासादमारुह्य प्रेक्षते, आसन उपविश्य प्रेक्षत इत्यर्थतः यबन्तस्य कर्मत्वं प्रासादस्य, आधारत्वं चासनस्येति तत्र पञ्चमी । सा च क्रमशः कर्मत्वमाधारं चाहेति तदर्थत्वमेवास्याः । अन्यो च यबन्तस्य लोपोऽत्र आरुह्येत्यादेः स्मारकः अथवा पञ्चम्या एव कर्मताविशिष्टारोहणस्य समानाधिकरणमुत्तरकालिकत्वमर्थः,

यत्प्रेक्षणादावन्वेति । तथा च प्रसादकर्मकारोहणस्य समानाधिकरणमुत्तरकालिकं यत्प्रेक्षणं तत्कर्तृत्वं वाक्यार्थः । एवमासनात्प्रेक्षत इत्यादावपि आधेयताविशिष्टस्योपवेशनस्य तथाविधमुत्तरकालिकत्वं पञ्चम्यर्थः । एवमन्यत्र कारकान्तरेऽपि प्रयोगदर्शनात्– यत्कारकार्थकविभक्तिसमभिव्याहृतस्य यबन्तस्य लोपः ( अप्रयोगः ) तत्कारिकार्थिका तत्र पञ्चमी । घनान्निःसृत्य विद्योतते इत्यत्रापादानार्थकपञ्चमीसमभिव्याहृतस्य यबन्तस्याप्रयोगे अपादानार्थिकैव पञ्चमी यथा बलाहकाद्विद्योतते विद्युदित्यत्र पञ्चम्या अपादानत्वमर्थः । अथ वा घनापादानकनिःसरणस्य तथाविधमुत्तरकालिकत्वं पञ्चम्यर्थः, विद्योतनेऽन्वेति । एवञ्चात्रापि निःसृत्येति पदाध्याहारप्रयुक्ता एव पञ्चमी युक्तेति सूत्रे 'कर्माधारे' इति पदमुपलक्षणं कारकान्तरस्यापीति प्राहुः; तन्न; "गम्यमानापि क्रिया कारकविभक्तीनां निमित्तम्" इति शाब्दिकनयेन निःसृत्येत्यादिक्रियामपेक्ष्य तत्रापादानत्वस्य न्यायत एव लभ्यत्वेन पञ्चमीसिद्धौ तदर्थं कर्माधारपदस्य सूत्रस्थस्योपलक्षणत्वस्वीकारविषयाऽऽचार्यवचसि न्यूनताऽऽक्षेपस्यानौचित्यात् । अत एव कुसूलात्पचतीत्यादयोऽपि प्रयोगाः 'आदाय' 'उद्धृत्य' इत्यादिक्रियामपेक्ष्यैवोपपादनीयाः । नन्वेवं प्रासादात्प्रेक्षते इत्यादावपि– प्रेक्षणस्य नयनरश्मिनिर्गमनरूपत्वेन, तत्रापि अपायसत्त्वादपादानसंज्ञयैव पञ्चमी सिद्धेति व्यर्थमिदं पञ्चमीविधायकसूत्रमित्याशङ्कितं बृहद्वृत्तौ– ननु यथा कुसूलादादायेत्यादिना । शङ्कां स्वीकृत्य समाहितञ्च तत्रैव, सत्यम्– किन्तु आरुह्योपविश्येति यबन्तार्थोऽपि गम्यत इत्यादिना । अयमाशयः आरुह्योपविश्येत्यादिप्रतीयमानक्रियामपेक्ष्य साक्षादेव प्राप्तस्य कर्मत्वस्याधारत्वस्य च वाचिका विभक्तिर्नयनरश्मिनिष्क्रमणरूपं धात्वर्थान्तर्भूतमपायमाश्रित्यापादानसंज्ञाप्रयुक्तां पञ्चमीं दुर्बलां बाधिष्यत इति 'प्रासादं प्रेक्षते' 'आसने प्रेक्षते' इत्यादिप्रयोगापत्तिः स्यात्तद्वारणाय कर्माधारयोरनुवादिका पञ्चमी विधीयत इति । किञ्च नयनरश्मिनिर्गमनं दर्शनस्थले न सर्ववादिप्रतिपन्नमिति तदपेक्षयाऽपायो न सर्वाभिमत इति दुर्लभैव पञ्चमी स्यादिति सर्वथा विधानमावश्यकमेव । अस्तु वा स्वमते नयनरश्मिनिर्गमनस्वीकारः, तथापि यदि चक्षुरिन्द्रियस्येह कर्तृत्वं प्रतीयते तर्हि तद्व्यापारं रश्मिनिर्गमनरूपमाश्रित्यापायः स्यादपि, किन्तु नैतत्प्रतीयते 'चक्षुः प्रेक्षत' इति । किन्तु 'देवदत्तश्चक्षुषा प्रेक्षत' इत्येव प्रतीयते । तथा– च करणभूतेन चक्षुषा स्वव्यापारः स्वोत्तरतृतीयाविभक्त्यैवोक्त इति तमपेक्ष्य न पञ्चमी सम्भवति । यतः चाक्षुषो व्यापारो विषयग्रहणरूपः निःसरणमन्तर्भावयन्नपि न केनापि शब्देनोपस्थापित इति अशाब्दस्य तस्यापादानत्वे निमित्तत्वासंभव एव । स्यादेवं यदि सर्वत्राशाब्दव्यापारमादायैवापादानसंज्ञा चारितार्थ्यं लभेत, नत्वेवमस्ति ग्रामादायातीत्यादौ सर्वत्र शाब्दापाय एव तस्य चारितार्थ्यं प्रसिद्धमिति अनुमितक्रियापेक्षया साक्षादशब्दोपात्तव्यापारकारकभावमाश्रित्य पञ्चमीसमर्थनमनुचितमिति । किं च नयनरश्मिनिर्गमनमपेक्ष्य यद्यपायो भवेदपि तर्हि तदवधिर्न प्रासादोऽपि तु नयनमेवेति प्रासादात्पञ्चमी दुर्लभैव । यदि च पारम्पर्येण प्रासादोऽवधिः– यतः प्रासादस्थितस्यैव जनस्य नयनात्ते निर्गच्छन्ति स च जनः प्रासादसम्बद्धः नयनं च जनसम्बद्धम्– ततश्च रश्मीनां निर्गमनमिति भवति प्रासादस्य निर्गमनावधित्वं परम्परितमित्युच्यते; तर्हि 'मुखात्प्रेक्षत' इत्यादयोऽपि प्रयोगाः कुतो न स्वीक्रियेरन् । यथा प्रासादस्थनयनाद्रश्मिनिर्गमनमपेक्ष्य प्रासादस्यापादानत्वं तथा मुखस्थान्नयनाद्रश्मिनिर्गमनपेक्ष्य ततः पञ्चमी दुर्वारैव स्यादिति विरम्यतामनुशासनविरुद्धकल्पनायाः । किं च दर्शनस्थले नयनरश्मिनिर्गमो न सर्ववादिसम्मत इत्यावेदितमेव ।२।२।७४।।

## प्रभृत्यन्यार्थ– दिक्शब्दबहिरारादितरैः ।।२।२।७५।।

अनेन सूत्रेण प्रभृति– अन्यशब्दार्थकशब्दैः, दिग्वाचकैः शब्दैः, बहिः, आरात्– इतर– शब्दैश्च योगे पञ्चमी विधीयते । सा च सम्बन्धार्थिका । स च सम्बन्धः प्रति–

योगित्वादिर्यथालक्ष्यं प्रतीयते। प्रभृतिशब्दः पूर्वावध्यर्थकः, तदर्थक एवारम्भशब्दोऽपि। पञ्चम्याश्चावधिसमन्वितं निरूपकत्वमर्थः। तार्किकास्तु प्रभृतिशब्दस्याधिकरणकाल-ध्वंसाधिकरणसमयोऽर्थः, पञ्चम्यास्तु अधिकरणान्वयि निरूपकत्वमर्थः। प्रभृत्यर्थः क्रियायां व्यापकतया आधेयतया वाऽन्वेतीत्याद्याहुः। तथा च कार्तिक्याः प्रभृति चैत्रान्तं शीतम् इत्यादौ स्वमते कार्तिकीपूर्वावधिनिरूपकं चैत्रान्त-समयव्यापकं शीतमित्यन्वयबोधः। तार्किकमते च कार्तिक्य-धिकरणध्वंसाधिकरणं यः समयश्चैत्रान्तः समयस्तद्व्यापकं शीतमिति बोधः। अन्यो मैत्रादित्यादौ मैत्रप्रतियोगिकभेद-वांश्चैत्र इत्यादि रूपेणार्थबोधः। अन्यार्थाश्च शब्दाः भिन्नार्थान्तरविलक्षणपृथग्- हिरुगादयः। यद्यपि पृथक्-शब्दस्यान्यार्थत्वमन्यो न मन्यन्ते 'अयं देवदत्तो न' 'अयं देवदत्तात्पृथक्' इत्यादिप्रतीतेर्वैलक्षण्यस्य स्वीकारात्। तथापि स्वमते उभयत्र भेदप्रतीतेः पर्यायत्वमेव स्वीकृत-मित्युदाहरणदानेन प्रतीयते। इतरशब्दस्यान्यार्थत्वेन प्रसिद्ध-स्यापि, द्वयोर्मध्ये एकस्य निर्धारण एव प्रयोगाद्विलक्षणार्थं मत्वा पृथग्ग्रहणं कृतम्। तच्चाग्रे बृहद्वृत्तौ विवृतमेव। दिक्शब्दादियोगे तु अवध्यवधिमद्भावादिः सम्बन्धः प्रतीयते। 'ग्रामात्पूर्वस्यां दिशि' इत्यादौ ग्रामावधिकपूर्वदिगवस्थितत्वं प्रतिभासते अन्यत्वादीनामुभयनिष्ठत्वेन- प्रतियोगिन एव पञ्चमी भवति नानुयोगिनः, जिनदत्ताद्भिन्नश्चैत्रो मैत्रस्य इत्येवमादिषु अयमिति निर्दिश्यमानाच्चैत्रादेः पञ्चमी न भवति। तस्य स्वत एवान्यशब्दार्थत्वात्। अन्यशब्दार्थो हि भेदवान्- स च मैत्र एवेति तदपेक्षैव- जिनदत्तात्पञ्चमी, न चैत्रात्। अथ मैत्रशब्दात्कुतो न भवति, तस्यापि अन्यार्थचैत्रेण सम्बन्धस्य प्रतीयमानत्वादित्याशङ्कां स्वीकृत्योत्तरितं बृहद्वृत्तौ "**उच्यते, प्रत्यासत्तेर्यस्यैवान्यत्वा-दिधर्मनिमित्तोऽन्यशब्दादिना योगस्तत एवेत्यादिना**। अयमर्थः अन्यार्थचैत्रादिना मैत्रादेर्नान्यत्वेन रूपेण सम्बन्धो विवक्षितोऽपि तु बुद्धिस्थ--पुत्र-मित्र-भ्रातृत्वादिना। यद्यपि सोऽप्यन्यार्थो भवति किन्तु नान्यत्वेन प्रतीयतेऽपि तु विवक्षिततत्तद्रूपेणेति न भवति ततः पञ्चमी। विवृतश्चा-यमर्थः शब्दमहार्णवन्यासे इति न प्रतन्यते।

## अत्र विशेषविचारः।

अन्यशब्दस्य भेदविशिष्टोऽर्थः। भेदविशिष्टार्थक-नामशब्दः पर्यायः तादृशशब्दः भिन्न-विलक्षण-पदार्थान्त-रादिः। 'शक्रादन्यो नहुषः' इत्यत्र पञ्चम्याः स्वप्रकृत्य-र्थतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नप्रतियोगित्वमर्थः। तच्च व्युत्पत्तिवैचित्र्येण अन्यपदार्थैकदेशे भेदे स्वनिरूपितानुयो-गित्वेन सम्बन्धेनान्वेति। प्रकृत्यर्थस्याधेयतया तथाविध-प्रतियोगित्वेऽन्वयः। तथा च शक्रवृत्तिशक्रत्वावच्छिन्न-प्रतियोगिताकभेदवदभिन्नो नहुष इत्यन्वयबोधः। न च प्रतियोगित्वमात्रं पञ्चम्यर्थोऽस्तु, किमवच्छिन्नान्तनिवेशनेति वाच्यम्, तथा सति घटादन्यो घटः इति प्रयोगापत्तेः; घटनिष्ठप्रतियोगिताकस्य नीलघटभेदस्य पीतघटे सत्त्वात्। ननु प्रकृत्यर्थस्य प्रकृत्यर्थतावच्छेदकावच्छिन्नत्वेन, आधेयत्वेन चोभाभ्यां सम्बन्धाभ्यां पञ्चम्यर्थे प्रतियोगित्वेऽन्वयोपगमात् नोक्तदोष इति चेत्, सत्यम्, तथा सति पञ्चमी साधुत्वा-र्थिकैव, प्रकृत्यर्थस्यान्वयितावच्छेदकावच्छिन्नप्रतियोगिता-कत्वेन सम्बन्धेनान्यत्वेऽन्वय इत्येव ज्यायः। अत एव अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वमिह व्युत्पत्ति-बललभ्यम्, न हि भवति नीलो घटो घटादन्य इति दीधितिकारेणानुमानप्रकरणे उक्तम्। समानविभक्तिक-नामार्थयोरेव भेदान्वयो न व्युत्पत्तिसिद्धः। अत एव विभक्तेनिरर्थकतावादिनां मते राज्ञः पुरुषः इत्यादौ स्वस्वामिभावसम्बन्धेन राजपदार्थस्य पुरुषपदार्थेऽन्वयः इति। यदि विरुद्धविभक्तिकनामार्थयोरपि न भेदान्वयोऽ-भ्युपेयते तदा प्रतियोगित्वमात्रं पञ्चम्यर्थः। तस्य प्रकृ-त्यर्थतावच्छेदकावच्छिन्नप्रतियोगित्वीयनिरूपितानुयोगितया भेदेऽन्वयः, अथवा दर्शितोभयसम्बन्धेन प्रकृत्यर्थस्य प्रतियो-गित्वे, तस्य स्वनिरूपितानुयोगितया भेदेऽन्वयः। वाक्यार्थ-

बोधस्तु पूर्ववदेव। एवमेव शक्रादितरः, परः भिन्नः भेदवान् इत्यादावपि वाक्यार्थो बोध्यः।

इयांस्तु विशेषः—भिन्न इत्यत्र भेदाश्रयः, भेदवानित्यत्र भेदसम्बन्धी प्रतीयते। नञ्पदं न भेदविशिष्टार्थकमिति तद्योगे न पञ्चमी किन्तु प्रथमोपात्ता प्रथमैव। न चैवं 'गुणाद्भेदो द्रव्यस्य' इत्यादौ भेदशब्दस्य विशिष्टार्थत्वाभावात् भेदमात्रार्थकतया पञ्चम्यनुपपत्तिरिति वाच्यम्, गुणाद्वैधर्म्यमित्यत्रेव गुणाद्भेद इत्यादावपि विभक्तार्थक-पञ्चमीसम्भवात् इत्यस्यार्थस्याग्रे प्रतिपिपादयिषितत्वात्। भवतु वाऽन्यशब्दस्य भेदार्थकः शब्दः पर्यायः, तथापि सूत्रे निपातातिरिक्तपर्यायग्रहणात् नञ्प्रयोगे न पञ्चमीति।

यत्तु अन्यपदस्य पृथक्त्वगुणविशिष्टोऽर्थः, पृथक्त्वार्थकः शब्द एव तत्पर्यायः, भिदिधातोरपि पृथक्त्वमेवार्थः, नञ्पदं तु न पृथक्त्वार्थकमिति तद्योगे पञ्चमी न भवति। अत एव पृथक्त्वगुणसिद्धिरिति; तत्तुच्छम्, अन्यादिशब्दस्य पृथक्त्वार्थकत्वासंभवात्, द्रव्यादन्यो गुण इति प्रयोगानुपपत्तेः। भिदेरपि न पृथक्त्वमर्थः, द्रव्यात् कर्मादिभ्यश्च भिद्यते गुण इति प्रयोगात्, अन्यथा गुणे गुणानङ्गीकारात्, पृथक्त्वान्वयासम्भवात्। भेदस्यान्वयसम्भवात् भेदार्थकत्वस्यावश्यकत्वात्। भेदत्वस्याखण्डोपाधितया शक्यतावच्छेदकगौरवविरहात्, प्रकृते लक्षणानुपपत्तेः। पृथक्त्वसिद्धिस्तु मल्लान्मल्लोऽपयाति मेषान्मेषोऽपसरतीत्यादौ पृथक्त्वस्यापि पञ्चम्यर्थतया, तत्र प्रकृत्यर्थस्यावधितयाऽन्वयः, तथाविधस्य पृथक्त्वस्य क्रियायां सामानाधिकरण्येनान्वयः। न चात्र भेदः पञ्चम्यर्थः, तस्य प्रतियोगितावच्छेदकतया क्रियायामन्वयः इति वाच्यम्, परस्परस्मान्मल्लौ मेषौ वापसरत इत्यादावपादानकर्त्रोरुभयोः क्रियावत्त्वाद् भेदान्वयासम्भवात्। न च तत्तत्क्रिया भेदप्रतियोगितावच्छेदिकेति वाच्यम्, तत्तत्क्रियादेर्भेदप्रतियोगितावच्छेदकत्वेऽपि धातुना तद्रूप्येणानुपस्थापनात्, तत्रान्वयासम्भवात्। भेदप्रतियोगितावच्छेदकमपसरणमिति सामान्यतो बोधस्य स्वस्मादपसरन् इत्यादावपि सम्भावितत्वादित्यादियुक्तेर्गुणग्रन्थादौ पृथक्त्वसाधकस्यानुसन्धानेन पृथक्त्वं साधनीयम्। प्रकृते तु पृथक्त्वानुपपत्तिः। नञोऽभावत्वं प्रवृत्तिनिमित्तं न तु भेदत्वम्। अनुयोगिवाचकपदे प्रथमान्ते सति प्रथमान्तार्थस्य तादात्म्यावच्छिन्नप्रतियोगितया नञर्थेऽभावेऽन्वयोपगमात् घटो न पटः इत्यादौ घटादिषु पटादेः भेदस्यार्थतः प्रतीतिसम्भवात् इति नञ्योगे पञ्चम्यप्रसक्तेः घटो न घटादित्यादिको न प्रयोगः इत्यादि वदन्ति। स्वमते तु पृथक्शब्दस्यान्यपर्यायत्वं पृथक्त्वार्थकत्वञ्चोभयमाश्रीयते। तत्र पृथक्त्वमसहायत्वम्, तादृशार्थकस्य योगे वैकल्पिकी पञ्चमी वक्ष्यते, अन्यार्थकस्य योगे तु नित्यैवानेन सूत्रेण। तदन्ये न मन्यन्ते पृथक्त्वस्यान्यार्थताया उक्तरूपेण प्रत्युक्तत्वात्। ऋते शब्दोऽपि प्रकृतसूत्रेऽन्यैः पठ्यते। स्वमते च तद्योगे वैकल्पिकी पञ्चमी वक्ष्यते। ऋते शब्दश्चाभावार्थकः। यथा ऋते धर्मान्न सुखम् इत्यादौ। ऋते शब्दार्थो भेदोऽपि यथा 'कृष्णादृते जनो गोवर्धनासहः' इत्यादौ। क्वचिदत्यन्ताभाववान् भेदवांश्च ऋतेशब्दार्थः यथा रामादृते न लक्ष्मणः इत्यत्रात्यन्ताभाववान्; 'रामादृते भक्तिः प्रीतिर्वा लक्ष्मणस्य न, इत्यत्र भेदवान् प्रतीयते। दिक्शब्दैर्योगेऽपि पञ्चमी प्रकृतसूत्रेण विधीयते। यदि दिग्वाचकः शब्दो दिक्शब्दः इत्याश्रीयेत तर्हि दिग्वाचकानामपि पूर्वादीनां देशादिपरत्वे तद्योगे पञ्चमी न स्यादिति दिशि दृष्टः शब्दो दिक्शब्द इत्येवार्थ आद्रियते। तेन सम्प्रति दिशिप्रयुक्तत्वाभावेऽपि क्वचिद्दिशिप्रयुक्तत्वमात्रेण पूर्वादीनां दिक्शब्दत्वं विज्ञेयम्। एतच्च बृहद्वृत्तावपि प्रकटितम्। ग्रामात् पूर्वस्यां दिशि वसतीति। अत्रोदयाचलसंनिहिता दिक् पूर्वपदार्थः। मलयाचलसन्निहिता दिक् दक्षिणपदार्थः। अस्ताचलसन्निहिता दिक् पश्चिमपदार्थः। सुमेरुसन्निहिता दिगुत्तरपदार्थः। पदार्थैकदेशतत्तत्सान्निध्यान्वयि अवधित्वं पञ्चम्यर्थः: तच्च तत्तत्सान्निध्यस्वरूपपरम्पराघटकसंयोगान्वयि परम्परान्तर-

घटकसंयोगसंख्यान्यूनसंख्यावत्त्वम् । तत्र प्रकृत्यर्थस्य स्वसंयोगघटितत्वसम्बन्धेन परम्परान्तरेऽन्वयः । तथा च ग्रामसंयोगघटितोदयाचलपरम्पराघटकसंयोगन्यूनसंख्याकसंयोग--घटितोदयाचलपरम्पराघटकसंयोगनिरूपकवासाश्रयो देवदत्त इत्यादिक्रमेण बोधः । एवं मलयाचलादिसान्निध्यमादाय दक्षिणादिशब्दयोगे पञ्चम्यर्थोवर्णनीयः ।

वस्तुतस्तु तत्सान्निध्यं तु तत्संयोगघटितपरम्परान्तर--घटकसंयोगघटितपरम्पराघटकसंयोगवत्त्वम्, भवति हि ग्रामविश्रान्तोदयाचलसंयोगघटितपरम्परायां घटिका उदया--चलसंयोगघटिता देवदत्तविश्रान्ता परम्परेति ग्रामापेक्षया उदयाचलस्य अन्तिके देवदत्तवास इति । एवं च परम्परान्वयिसंयोगघटितत्वं पञ्चम्यर्थः । प्रकृत्यर्थस्य संयोगे आधेयतयाऽन्वयः । एवं कृत्वा अन्वयबोधः स्वयमूहनीयः । घटकत्वं तु तद्विषयताव्यापकविषयतावत्त्वम् घटितत्वं तु तद्विषयताव्याप्यविषयतावत्त्वम् ।

परे तु उदयाचलाद्यवधिकापरत्वविशिष्टः पूर्वादि--पदार्थः । पञ्चम्याः परत्वमर्थः । तत्र प्रकृत्यर्थस्याधेयतया परत्वेऽन्वयः । तथा च ग्रामवृत्तिपरत्वनिरूपकमुदयाच--लावधिकं यदपरत्वं तदाश्रयदेशवासी देवदत्त इत्यन्वयबोधो ग्रामात्पूर्वस्यां दिशि वसति देवदत्त इत्यादौ बोध्यः ।

पूर्वादिशब्दस्य दिगन्यार्थवृत्तितायामपि पञ्चमीविधानार्थमेव दिशि दृष्टाः शब्दाः इत्येवं विग्रहोदर्शितः, तथा च तस्य देशकालवाचकत्वे प्रयोगाः प्रदर्शिताः । पूर्वं उज्जयिन्या गोनर्दः 'उत्तरो विन्ध्यात् पारियात्रः' इति देशवृत्तित्वे, पूर्वो ग्रीष्माद् वसन्तः, 'पश्चिमो रामाद् युधिष्ठिरः' इति च कालवृत्तित्वे उदाहरणानि । तत्र देशवृत्तित्वे दिग्वृत्तित्वसाम्यमेवेति तत्र पूर्ववदेव पूर्वादिशब्दार्थः पञ्चम्यर्थश्च विज्ञेयौ कालवृत्तित्वे तु कालिकसम्बन्धेन प्रागभाववान् पूर्वपदार्थः । प्रागभावा--न्वयि प्रतियोगित्वं पञ्चम्यर्थः, तत्र च प्रकृत्यर्थस्याधेय--तयाऽन्वयः । तथा च ग्रीष्मवृत्तिप्रतियोगिताकप्रागभाववान् वसन्त इत्येवमन्वयबोधः । प्रागभावकालिकोत्पत्तिमत्त्वं न पूर्वपदार्थतावच्छेदकम्, प्रागभावापेक्षया गुरुत्वात् । अन्ये तु कालिकपरत्ववान् पूर्वपदार्थः । परत्वान्वयि अपरत्व--निरूपकत्वं पञ्चम्यर्थः । तत्र प्रकृत्यर्थस्याधेयतयाऽपरत्वे--ऽन्वयः तथा च ग्रीष्मवृत्तिपरत्वनिरूपकापरत्ववान् वसन्त इत्यन्वयबोधः इत्याहुः । यदि च 'शब्दात्पूर्वं गगनम्' 'जन्यज्ञानात्पूर्वो जीवः' 'कार्यमात्रात्पूर्व ईश्वरः' इत्यादिः प्रयोगः; तदा प्रागभावाधिकरणकालवर्तित्वं पूर्वत्वम्, अथ वा अधिकरणसमयध्वंसानधिकरणत्वविशिष्टस्याधिकरणभेदस्य विशिष्टे समये वर्तमानत्वं पूर्वत्वम् । तथा च द्वितीयादिक्षणमात्रवर्तिन्यतिप्रसङ्गवारणाय विशिष्टस्येत्यन्तं भेदस्य विशे--षणम् । आद्यक्षणवर्तिनि स्वस्मिन् पूर्वत्ववारणायाधिकरण--भेदस्य वैशिष्ट्यं, समयविशेषणं—कालिकसम्बन्धेन । वस्तुमात्रानधिकरणे जीवादौ वर्तमानस्य ज्ञानसुखादेः घटादिपूर्वत्ववारणाय समये इति । तेन कालिकसम्बन्धावच्छिन्ना--धेयत्वं तथाविधानधिकरणनिरूपितं पूर्वत्वम् तच्च जीवादौ कालिकेन सम्बन्धेन वर्त्तमाने ज्ञानसुखादौ नातिप्रसक्तमिति । अधिकरणत्वं ध्वंसाधिकरणत्वं च कालिकेनैव सम्बन्धेन बोध्यम्, तेन कपालादिस्वरूपाधिकरणध्वंसानधिकरणकपालिकादिभिन्ने तन्तुसमुदाये वर्तमानस्य न घटादिपूर्वत्वम् । विशेषणान्तरप्रयोजनमप्येवमेव विज्ञेयम् तथाविधध्वंसानधि--करणत्ववैशिष्ट्यमधिकरणभेदस्य विशेषणताघटितसामाना--नाधिकरण्येन बोध्यम्, अतः स्वोत्तरवर्त्तिनि नातिप्रसङ्गः । एवं पञ्चम्या निरूपितत्वमर्थः । तच्चभेदप्रतियोगिन्यधि--करणे ध्वंसप्रतियोगिन्यधिकरणसमये चान्वेति । तथा च शब्दनिरूपिताधिकरणसमयध्वंसानधिकरणे शब्दनिरूपिताधि--करणभिन्ने समये वर्तमानं गगनमित्यादिरन्वयबोधः । एवं 'माधवात्पूर्वो मधुः' 'अर्जुनात्पूर्वो युधिष्ठिरः इत्यादावप्य--न्वयोबोध्यः । अञ्चूत्तरपदस्यापि प्राक्प्रत्यगादेर्दिशि दृष्टत्वेन दिक्शब्दत्वमिति तद्योगेऽपि पञ्चमी प्रकृतसूत्रेणैव विधीयते, यथा—नगरात् प्राक्, अवाक्, प्रत्यक्, उदक् वा पर्वतः इत्यादौ । प्रागादिशब्दाश्च पूर्वादिशब्दवदेव उदयाचलसन्नि-

हितादिदेशवाचिनः इति दिग्वाचकत्वं तेषाम् अत्रापि पूर्वोक्त-तत्तत्सान्निध्यान्वयि पूर्वोक्तमवधिमत्त्वं पञ्चम्यर्थः । ग्रामात्पूर्वस्यां दिशि वसतीत्यादावुक्तरीत्यैवान्वयबोधः प्रकृतेऽपि विज्ञेयः । एवमेव 'ग्रीष्मात्प्राक् वसन्तः, अर्जुनात्प्राक् युधिष्ठिर इत्यादावप्यन्वयो बोध्यः ।

एवं बहिः शब्दयोगेऽप्यनेन पञ्चमी विधीयते 'ग्रामाद्बहिरारामः, इति यथा । अत्र अवयवसंयुक्तोऽन्यावयवसंयुक्तो बहिः पदार्थः । पञ्चम्या अवयवान्वयि समवायित्वमन्यत्वान्वयि प्रतियोगित्वं चार्थः । बहिः पदार्थस्याधेयतया आरामादावन्वयः । तथा च ग्रामसमवाय्यवयवसंयुक्तो यो ग्रामप्रतियोगिताकभेदवत्सम्बन्ध्यवयवसंयुक्तः तद्वृत्तिराराम इत्यन्वयबोधः । 'काश्या बहिः सौराष्ट्रम् इत्यादिप्रयोगवारणाय अवयवसंयुक्तत्वमन्यावयवसंयुक्ते विशेषणम् । अत एवानधिकरणं बहिः पदार्थ इत्यपि प्रत्युक्तम्—घटस्य घटानधिकरणतया 'घटे जलं घटाद्बहिः' इति प्रयोगप्रसङ्गाच्च । "मणिबन्धादाकनिष्ठं करस्य करभो बहिः" इत्यादौ बहिः शब्दयोगसत्वेऽपि सम्बन्धसामान्यविवक्षया षष्ठी बोध्या अत्र पृष्ठावयवयुक्तो ऽवयवो बहिरर्थः तत्र षष्ठ्यर्थसम्बन्धस्यान्वयः ।

आरात्–शब्दयोगेऽपि पञ्चमी प्रकृतसूत्रेण विधीयते यथा ग्रामादारात् तटाकः इत्यादौ । आराच्छब्दो दूरसमीपयोर्वर्त्तते । सामीप्यं च सामान्यतः संयुक्तसंयोगित्वम्, विशेषतः स्वल्पेतरसंयोगघटितपरम्परासम्बन्धवत्त्वम्, इतरापेक्षं तदन्यत्सामान्यतः समीपान्यत्वं दूरत्वं, विशेषतो बहुतरसंयोगघटितपरम्परावत्त्वम् । परम्पराघटकप्रथमसंयोगान्वयि प्रतियोगित्वं तु पञ्चम्यर्थ : सामीप्य–दूरत्वघटकचरमसंयोगयोः तटाकादावन्वयः । तथा च ग्रामप्रतियोगिताकसंयोगवद्देशसंयोगवांस्तटाक इत्यन्वयबोधः । साम्प्रदायिकास्तु परत्वमपरत्वं चारादर्थः, अवधित्वं पञ्चम्यर्थः । तथा च ग्रामादारादित्यत्र ग्रामावधिकपरत्वापरत्ववांस्तटाक इत्यन्वयबोध इति वदन्ति ।।२।२।७५।।

## ऋणाद्धेतोः ।।२।२।७६।।

अनेन सूत्रेण हेतुभूत ऋणवाचिनो नाम्नः पञ्चमी विधीयते । हेतुश्च 'फलसाधनयोग्यः पदार्थ इति विवृतो बृहद्वृत्तौ । स च हेतुकर्तृकरण० (२।२।४४) इति सूत्रानुरोधेन कर्तृभिन्नो ग्राह्यः । शताद्बद्ध इत्युदाहरणम् । अत्र पञ्चमी हेत्वर्थिका, तथा च शतहेतुकबन्धनकर्मीभूत इत्यर्थबोधः । 'शतेन बन्धित' इत्यादौ शतं बन्धनस्य प्रयोजककर्तृ इति तत्र तृतीयैव भवति न पञ्चमीत्यर्थमेव हेतोरित्युक्तम्; हेतुश्च कर्तृभिन्न एव ग्राह्य इत्यावेदितं चेति दिक् ।२।२।७६।।

## गुणादस्त्रियां नवा ।।२।२।७७।।

अनेन सूत्रेणास्त्रियां वर्तमानात्–हेतुभूतगुणवाचिनः पञ्चमी विधीयते । सा च हेत्वर्थिका । 'जाड्याद्बद्ध' इत्यादौ जाड्यहेतुकबन्धनकर्मीभूत इत्यर्थः, जाड्यं मोहो मिथ्याज्ञानं वा । तस्य गुणत्वं स्फुटमेव । गुणादिति कथनाच्च धनेन कुलमित्यादौ न पञ्चम्यपि तु हेतुतृतीयैव । गुणभिन्नादपि हेतोः पञ्चमी दृश्यते यथा 'अस्त्यत्राग्निर्धूमात्' 'नास्ति घटोऽनुपलब्धेः' इत्यादौ । सा कथम् ? अत्र हि नाग्न्यादेर्धूमादिहेतुरपि तु धूमस्याग्निरेव जनकः । किन्तु वह्निज्ञानस्य हेतुत्वं धूमे । घटाभावज्ञानस्य हेतुत्वमनुपलब्धौ । तथा च पञ्चमी प्रयोगोऽनुचित इत्याशङ्कां वारयितुमाह बृहद्वृत्तौ–गम्ययपः कर्माधारे इति । गम्यमानस्य यबन्तस्य कर्मणि आधारे च "गम्ययपः कर्माधारे" (२।२।७४) इति पूर्वोक्तसूत्रेण पञ्चमी विहिता सैवेह भवतीति भावः । तथाविधं वाक्यमुपदिशति धूमादिकमुपलभ्येत्यादिना । तथा च धूमादेः यबन्तकर्मत्वमिति तत्र पञ्चमी सिद्धेति ।

अन्ये तु प्रकृतसूत्रे न वेति योगे विभज्य गुणभिन्नादपि स्त्रीलिङ्गादपि च हेतोः पञ्चमीं साधयन्ति । अस्ति चात्र धूमस्य कार्यकारणसम्बन्धमूलकसहचारव्याप्तिग्रहणद्वारा

वह्न्यनुमापकत्वरूपं हेतुत्वम् । एवमनुपलब्धेः स्त्रीलिङ्गस्यापि अभावज्ञापकत्वस्वीकाराज्ज्ञापकहेतुत्वमिति सिद्धयति पञ्चमीति वर्णयन्ति । तदपरे न सहन्ते, तथाहि तावताऽपि 'घटो दण्डाद्' 'दाहो दहनात्' इत्यादौ पञ्चम्यनुपपत्तेः । धूमादित्यादौ ज्ञापकत्वस्वरूपहेतुत्वस्य सूत्रादलाभात् । ज्ञापकत्वे पञ्चम्यनुपपत्तेश्च। तथा च गुणादप्रधानात् कर्तृभिन्नाद्धेतोः ( ऋणभिन्नात् ) विकल्पेन पञ्चमी भवतीति सूत्रार्थः। अत एव यतः प्रतिनिधिप्रतिदाने ( २।२।७२ ) इति सूत्रेऽपि यत इति हेतौ पञ्चमी प्रयुक्ता। एवं च घटो दण्डादित्यादौ पञ्चम्या जनकत्वमर्थः । तच्च निरूपकतया घटादावपरपदार्थेऽन्वेति। प्रकृत्यर्थस्याधेयतया पञ्चम्यर्थजनकत्वेऽन्वयः । तथा च दण्डवृत्तिजनकतानिरूपको घट इत्यन्वयबोध इति ।

एकदेशिनस्तु निरूपकतादिसम्बन्धस्य वृत्त्यनियामकस्य प्रतियोगितानवच्छेदकत्वात् दाहो दहनात् न तु जलादित्यादौ जनकत्वाभावप्रतीत्यसम्भवात् निरूपकत्वान्यसम्बन्धानच्छिन्नप्रतियोगिताकस्य जनकत्वाभावस्य दाहेऽपि सत्त्वाद् दाहो न दहनादित्यादिप्रयोगस्याप्यापत्तेः । अतश्च जनकत्वं न पञ्चम्यर्थः किं तु जन्यत्वं, तस्य स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकोऽभावो नञा प्रत्याय्यते । जन्यत्वे प्रकृत्यर्थस्य निरूपितत्वसम्बन्धेनान्वयः –तथा च जलनिरूपितजन्यत्वाभाववान् इत्यन्वयबोध इति वदन्ति । तदत्र वृत्त्यनियामकसम्बन्धस्यापि प्रतियोगितावच्छदकत्वे युक्तेः पूर्वं द्वितीयार्थप्रकाशे प्रकाशितत्वात्, न किञ्चिदेतत् । प्रतियोगिवैशिष्ट्यबुद्ध्यजनकस्य वृत्त्यनियामकस्य सम्बन्धस्यैव प्रतियोगितानवच्छेदकत्वात् । गगनादिसंयोगस्य वृत्त्यनियामकस्य प्रतियोगिवैशिष्ट्यबुद्ध्यजनकत्वादेव तथात्वम् । अन्यथा 'घटो न पारिमाण्डल्या' –दित्यत्र जन्यत्वाभावस्यापि नञा बोधयितुमशक्यत्वात् जन्यत्वस्यापि पञ्चम्यर्थत्वानुपपत्तेः । तस्माज्जनकत्वं जन्यत्वं वा पञ्चम्यर्थोऽस्तु, उभयथापि वृत्त्यनियामकसम्बन्धस्यापि प्रतियोगितावच्छेदकत्वम् –इति घटो न पारिमाण्डल्यादित्यत्र प्रकृत्यर्थस्य पञ्चम्यर्थे जनकत्वे आधेयतासम्बन्धावच्छिन्नप्रतियोगिताको, –जन्यत्वे पञ्चम्यर्थे निरूपकतासम्बन्धावच्छिन्नप्रतियोगिताकोऽभावो नञा प्रत्याय्यते । गगनं न पारिमाण्डल्यादित्यत्र गगनमन्धो न पश्यतीत्यत्रेव द्विधा न नञर्थस्य भानमित्यन्यत्र प्रपञ्चितम् । यदि च वृत्त्यनियामकसम्बन्धस्य प्रतियोगितावच्छेदकत्वे शापभयम्, घटो न पारिमाण्डल्यादित्यादिवाक्यं चायोग्यमेवेति मन्यते, तदा जन्यत्वं पञ्चम्यर्थोऽस्तु ।

तथैव ज्ञापकत्वमपि पञ्चम्यर्थः । 'सिद्धिः स्याद्वादात्' ( १।१।२ ) इति स्वसूत्रे 'तदशिष्यं संज्ञाप्रमाणत्वात्' ( पा. सू. १।२।५३) इति पाणिनिसूत्रे च पञ्चम्या ज्ञापकत्वार्थकत्वावश्यकत्वात् । तथा च पर्वतो वह्निमान् धूमादित्यत्र पञ्चम्यर्थो ज्ञापकत्वं निरूपकतया वह्न्यादिपदार्थेऽन्वेति । प्रकृत्यर्थस्याधेयतया ज्ञापकत्वेऽन्वयः । तथा च धूमवृत्तिज्ञापकतानिरूपितवह्निमान् पर्वत इतिबोधः, । चिन्तामणिकारास्तु– प्रतिज्ञासमभिव्याहृतपञ्चम्यन्तधूमादिपदस्य ज्ञाने लक्षणा, हेत्ववयवसमभिव्याहृतप्रतिज्ञाघटकसाध्यवाचिवह्न्यादिपदस्यापि ज्ञाने ज्ञायमानवह्नौ वा लक्षणा। पञ्चम्या जनकत्वं जन्यत्वं क्लृप्तमेवार्थः, तच्च ज्ञाने लक्ष्ये लक्ष्यतावच्छेदकघटके वाऽन्वेति । तथा च धूमज्ञानहेतुकवह्निज्ञानविषयः पर्वत इति धूमज्ञानहेतुकज्ञानविषयवह्निमान् पर्वत इति वाऽन्वयबोधः इति वदन्ति ।

यत्तु प्रतिज्ञाघटकसाध्यवाचिपदस्य ज्ञाने लक्षणाभ्युपगमे प्रतिज्ञाया विप्रतिपत्तिसमानशब्दार्थकत्वप्रदर्शनपरस्यावृत्तौ सैव प्रतिज्ञेति वाक्यस्य विरोधः, विप्रतिपत्तिवाक्ये साध्यवाचिपदस्य ज्ञाने लक्षणाविरहात् । 'पर्वतो वह्निमान्' इत्युक्ते कुत इति जिज्ञासायां धूमादित्युत्तरवाक्येऽपि धूमपदस्य धूमज्ञाने न लक्षणा, प्रयोजनविरहात्, कोशादिज्ञापित रूढिविरहाच्च । तस्माज् ज्ञापकत्वं पञ्चम्यर्थः, तत एव प्रतिज्ञाहेत्वोरेकवाक्यतासम्भवः । तत्रापि 'जलं स्पर्शवत् रूपात्, न गन्धात्, नापिशब्दात्' इत्यादौ निरूपकत्वादि–

वृत्त्यनियामकसम्बन्धस्य प्रतियोगितानवच्छेदकतया ज्ञापकत्वाभावस्य नञा बोधयितुमसम्भवात्, नञर्थानुरोधात् ज्ञाप्यत्वं, ज्ञानज्ञाप्यत्वं वा पञ्चम्यर्थ इति नव्यैरुक्तम्, तच्च न शोभनम्:, तथा हि– विप्रतिपत्तिसमानार्थत्वं प्रतिज्ञाया हेत्ववयवासंवलिताया अक्षतमेव, केवलप्रतिज्ञायाः साध्यवाचिपदस्य ज्ञाने लक्षणाविरहात् । यदपि रूढिप्रयोजनान्तराभावो लक्षणाबाधक इत्युक्तम्, तत्र दर्शितनिर्देशाद्रूढेरेव जागरूकत्वम्, अन्यथा ज्ञापकत्वे पञ्चम्या अपि लक्षणाविरहप्रसङ्गात् ।

ननु साध्यहेतुपदयोर्ज्ञाने लक्षणाऽभ्युपगमेऽपि 'जलं स्पर्शवद् रूपात् न गन्धात् इत्यादौ निषेधप्रतीत्यनुपपत्तिः तथाहि नञा न तावज्जले गन्धज्ञाप्यस्पर्शस्याभावः, तद्वदन्योन्यभावो वा बोधयितुं शक्यते जलपक्षकभ्रमात्मकगन्धपरामर्शानुमेयस्पर्शस्य सत्त्वात् । अत एव स्पर्शज्ञाने गन्धज्ञानजन्यत्वाभावोऽपि न बोधयितुं शक्य इति । न वा गन्धप्रमानुमेयस्पर्शस्यात्यन्तभावादिस्तथा, पृथिवीपक्षकगन्धप्रमानुमितिविधेयतावच्छेदकस्पर्शत्वावच्छिन्नस्य जले सत्त्वात् । न च स्पर्शत्वावच्छिन्नस्य जले सत्त्वेपि गन्धप्रमानुमेयस्पर्शव्यक्तेः पृथिवीवृत्तेरत्यन्ताभावोऽविकल एवेति निषेधप्रतीत्युपपत्तिरिति वाच्यम्, तथापि जलं द्रव्यत्ववत् स्पर्शात् न गन्धादित्यत्र गन्धप्रमानुमेयद्रव्यत्वव्यक्तेर्जले सत्त्वान्निषेधप्रतीत्यनुपपत्तेः । अत एव द्रव्यत्वज्ञाने गन्धप्रमाहेतुकत्वाभावो न तथा, पृथिवीपक्षकद्रव्यत्वानुमितौ गन्धप्रमाहेतुकत्वस्य सत्त्वात् । न च कस्याश्चिद्द्रव्यत्वानुमितेः गन्धप्रमाहेतुकत्वेऽपि सर्वस्या न तथात्वमिति निषेधप्रतीत्यनुपपत्तिरिति वाच्यम्, तथा सति पृथवी द्रव्यत्ववती स्पर्शात् न गन्धादित्यादिप्रयोगप्रसङ्गात्, स्पर्शलिङ्गकद्रव्यत्वानुमितेर्गन्धप्रमाहेतुकत्वाभावात्, निषेधप्रतीत्यापत्तेः । अत एव द्रव्यत्वे गन्धज्ञानज्ञाप्यत्वाभावोऽपि न प्रतीयते, बाधात्; इति चेत् अत्र म. म. गोकुलनाथोपाध्यायाः—गुरु–(मीमांसक) मते प्रतिज्ञाहेत्वन्तभागात् हेतौ पक्षसम्बन्धोऽपि प्रतीयते । अत एवोदाहरणान्त एव न्यायः । तथा च प्रकृते जलसम्बन्धाभाव एव नञा प्रत्याय्यत इति । मतान्तरे तु विशेष्यताद्वयासंवलितमेव प्रकारतानिरूपितविशेष्यत्वं तत्प्रतियोगित्वेन लिङ्गविशिष्टं भ्रमसामान्यभिन्नं ज्ञानं यत् तस्यैव लिङ्गपदलक्ष्यत्वात्, तादृशज्ञानस्य पञ्चम्यर्थहेतुतायां, तस्य प्रकृतपक्षकप्रकृतसाध्यकानुमितित्वावच्छिन्ननिरूपकतया संसर्गेण साध्यपदलक्ष्यार्थे साध्यज्ञानेऽन्वय इति व्युत्पत्त्या जलं द्रव्यत्ववत्, स्पर्शान्न गन्धादित्यत्र दर्शितविषयताकभ्रमसामान्यभिन्नस्पर्शज्ञाननिष्ठहेतुताया जलपक्षकद्रव्यत्वसाध्यकानुमितित्वावच्छिन्ननिरूपकतासंसर्गः द्रव्यत्वज्ञाने भासते, तत्संसर्गावच्छिन्नप्रतियोगिताको दर्शितविषयताकभ्रमसामान्यभिन्नगन्धज्ञाननिष्ठहेतुत्वस्याभावोऽपि प्रतीयत इति विशेष्यताद्वयासंवलननिवेशात् 'जलं द्रव्यत्ववत् स्पर्शात्' पृथवी द्रव्यत्ववती गन्धात् इत्यादि न्यायजसमूहालम्बनपरामर्शजन्यत्वस्य जलपक्षकद्रव्यानुमितौ सत्त्वेऽपि न प्रकृतवाक्यार्थबाधः समूहालम्बनविषयतायाः विशेष्यताद्वयसंवलनादिति प्राहुः । वस्तुतस्तु साध्यवाचिवह्न्यादिपदस्य ज्ञानविधेयवह्न्यादौ लक्षणा, ज्ञानविधेयवह्नेस्तु स्वनिष्ठविधेयतानिरूपितोद्देश्यतया स्वविधेयकज्ञानीययाऽपि सम्बन्धेन पक्षे पर्वतादावन्वयः । अत एव पर्वते एकत्र द्वयमिति रीत्या वह्निगुणयोः साध्यतायां पर्वतो वह्निमान् गुणवान्, धूमात् द्रव्यत्वादितिन्यायजस्य वह्निव्याप्यधूमवान्, गुणव्याप्यद्रव्यत्ववानित्याकारकस्य एकत्र द्वयमिति रीत्या धूमत्वद्रव्यत्वोभयप्रकारकैकविशेष्यताकस्य परामर्शस्य जन्यत्वेऽपि, पर्वतो वह्निमान् गुणवान् इत्याकारकानुमितेः पर्वतो वह्निमान् धूमात् न द्रव्यत्वादित्यादौ न निषेधप्रतीत्यनुपपत्तिः, वह्निविधेयताकज्ञानत्वावच्छिन्नं प्रति द्रव्यत्वप्रमाया अजनकत्वात्, वह्निविधेयताविशेषणज्ञाने द्रव्यत्वप्रमाहेतुकत्वाभावप्रतीतिसम्भवात् । एवं जलं द्रव्यत्ववत् स्पर्शात् न गन्धादित्यादौ स्पर्शप्रमाया द्रव्यत्वविधेयताकज्ञानं प्रति जनकत्वात् द्रव्यत्वविधेयकज्ञानोद्देश्यतया जले सत्त्वात्, स्पर्शप्रमाजन्यज्ञानविधेयस्य द्रव्यत्वदर्शितोद्देश्यतया जलेऽन्वयः सम्भवति । गन्धप्रमाया द्रव्यत्वविधेयताकज्ञानत्वावच्छिन्नं प्रति जनकत्वे-

ऽपि गन्धप्रमाजन्यज्ञानोद्देश्यतायाः जले विरहात्, पक्षनिष्ठोद्देश्यताकज्ञानं प्रति पक्षसम्बन्धविषयकलिङ्गविषयकज्ञानस्य–हेतुत्वात्। गन्धप्रमाया जलसम्बन्धविषयकत्वात् गन्धप्रमाजन्यज्ञाने जलोद्देश्यताकत्वविरहात्—दर्शितोद्देश्यतासंसर्गेण गन्धप्रमाजन्यज्ञानविधेयत्वापन्नस्य द्रव्यत्वस्य जले वैशिष्ट्यविरहान्नान्वयः। दर्शितोद्देश्यतासंसर्गावच्छिन्नप्रतियोगिताकस्य गन्धप्रमाजन्यज्ञानविधेयद्रव्यत्वाभावस्य नञा बोधन–सम्भवान्निषेधप्रतीत्युपपत्तिः।

ननु दर्शिते पर्वतो वह्निमान् गुणवान् धूमान् द्रव्यत्वा–दित्यादौ वह्निविधेयताकज्ञानत्वाच्छिन्नं प्रति द्रव्यत्वप्रमाया अजनकत्वेऽपि वह्निगुणोभयसमूहालम्बनजनकत्वस्याक्षतत्वात्, द्रव्यत्वान्न वह्निमान् इत्यादौ कथं वह्निज्ञाने द्रव्यत्वप्रमा–हेतुकत्वाभावस्य नञा बोधनसम्भव इति चेन्मैवं, यतो भ्रमाजन्यत्वविशिष्टविषयितासंसर्गेण लिङ्गविशिष्टज्ञानस्य लिङ्गपदलक्ष्यस्यार्थतो लिङ्गविषयकज्ञानत्वावच्छिन्नस्य ज्ञान-विधेयताविशेषेण ज्ञानेऽन्वय इति द्रव्यत्वप्रमानिष्टहेतुताया निरूपितवह्निविधेयताकज्ञानत्वावच्छिन्नजन्यत्वस्य व्यधिकर-णसम्बन्धतया तत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावो वह्नि-गुणोभयानुमितौ वह्निविधेयकत्वावच्छेदेन नञा बोध्यते बाधकाभावात्।

वस्तुतस्तु पञ्चम्या जन्यत्वमर्थोऽस्तु लिङ्गप्रमाया लिङ्ग विषयकज्ञानत्वावच्छिन्ननिरूपितत्वेन सम्बन्धेनान्वयः तादृश-जन्यत्वस्य लक्ष्ये साध्यज्ञानेऽन्वयो, व्युत्पत्तिवैचित्र्येण विधे-यितासम्बन्धावच्छिन्नजन्यताऽवच्छेदकतया साध्येऽन्वेतीति। ज्ञानविधेयसाध्यस्य लक्ष्यत्वे तु तादृशजन्यत्वस्य स्वरूपेण ज्ञाने, अवच्छेदकतया साध्ये तद्विधेयतायां वाऽन्वय इति द्रव्यत्वप्रमाजन्यत्वावच्छेदकतासम्बन्धावच्छिन्नप्रतियोगिताको-ऽत्यन्ताभावो नञा साध्ये तद्विधेयतायां वा बोध्यत इति दर्शितोद्देश्यतासम्बन्धः साध्यज्ञानस्य ज्ञानविधेयसाध्यस्य च तुल्य इति तदन्वय ऊहनीय इति। दर्शितसंसर्गेण लिङ्ग-प्रमानिष्ठहेतुतायाः साध्यविधेयताविशेषणज्ञानेऽन्वयोपगमे तु धूमादग्निमानित्यादिपक्षवाचकपदासमभिव्याहृतवाक्येऽपि नान्वयबोधानुपपत्तिः। न वा 'गन्धाच्छब्दाद्वा न स्नेहवान्' इत्यादिपक्षासमभिव्याहृतवाक्ये निषेधप्रतीत्यनुपपत्तिः।

अथवा साध्यपदस्य साध्यज्ञाने लक्षणा तत्र लिङ्ग–प्रमानिष्ठहेतुताया पूर्वदर्शितसंसर्गेणैवान्वयः। साध्यता–ज्ञानस्य साध्यतावच्छेदकावच्छिन्नविधेयतानिरूपितोद्देश्यतया, तादृशोद्देश्यतास्वरूपसम्बन्धवतो मत्वर्थस्य तादात्म्येन वा पक्षतावच्छेदकविशिष्टे पक्षेऽन्वयः। पर्वतो वह्निमान् धूमा-दिति हेत्वन्तवाक्ये धूमप्रमाहेतुताकवह्निज्ञानीयवह्नित्वा–वच्छिन्नविधेयतानिरूपितोद्देश्यतावदभिन्नः पर्वत इत्यन्वय-बोधः। 'जलं द्रव्यत्ववत् न गन्धात्' इत्यत्र गन्धप्रमाहेतुकं यद् घटो द्रव्यत्ववानिति ज्ञानं तदीयद्रव्यत्वनिष्ठविधेयतानि-रूपितोद्देश्यताया जले विरहात्, तादृशोद्देश्यत्वस्यात्यन्ता-भावोऽन्योन्याभावो वा जले नञा बोध्यते इति निषेधप्रती-त्युपपत्तिः। न च 'द्रव्यत्वव्याप्यगन्धवान् घटः' द्रव्यत्वव्याप्य स्पर्शवज्जलमिति समूहालम्बनगन्धप्रमात्मकपरामर्शजन्या-नुमित्युद्देश्यताया जले सत्वात् कथं तादृशोद्देश्यत्ववदन्यो-न्याभावस्य प्रतीतिः इति वाच्यम्, मुख्यविशेष्यताद्वयाप्रति-योगित्वेन लिङ्गप्रमाया विशेषणीयत्वात्। तथा च मुख्य-विशेष्यताद्वयाप्रतियोगिनी 'घटो द्रव्यत्वव्याप्यगन्धवान्' इत्येकाकारिकैकविशेष्यिका या गन्धप्रमा तज्जन्यानुमित्यु-द्देश्यताया जले विरहात् निषेधप्रतीत्युपपत्तेः। मुख्यविशे-ष्यताद्वयप्रतियोगिदर्शितसमूहालम्बनस्वरूपगन्धप्रमाजन्यानु–मित्युद्देश्यताया जले सत्वेऽपि अकिञ्चित्करत्वात् इति प्राचीनपथपरिष्कारः।

वृत्यनियामकसम्बन्धस्य प्रतियोगितावच्छेदकत्वे ब्रह्म-शापं मन्वानानां नव्यनैयायिकानां मते पर्वतो वह्निमान् धूमान्नतु द्रव्यत्वादित्यादौ वह्निज्ञाने द्रव्यत्वप्रमाहेतुत्वस्या-भावो न नञा बोधयितुं शक्यते, दर्शितसंसर्गस्य वृत्यनिया-मकतया तदवच्छिन्नप्रतियोगिताकाभावाप्रसिद्धेः। स्वरूपा-दिसंसर्गावच्छिन्नप्रतियोगिताकाभावस्य द्रव्यत्वप्रमाजन्ये

गुणादिज्ञानेऽपि सत्त्वात् —इति पञ्चम्या ज्ञानज्ञाप्यत्वमर्थः, तदेकदेशे ज्ञाने प्रकृत्यर्थो विषयित्वेनान्वेति, कर्तृकृदर्थैकदेशे कृतौ धात्वर्थवत्; आकांक्षावैचित्र्यात् । विषयित्वं चमसामान्यभिन्नत्वविशिष्टमन्वयघटकं बोध्यम् । तथा च द्रव्यत्व-प्रमाजन्यज्ञानविषयत्वस्य गुणादौ प्रसिद्धस्य स्वरूपसंसर्गावच्छिन्नप्रतियोगिताकोऽभावो वह्नौ नञा बोध्यत इति निषेधप्रतीत्युपपत्तिः । जलं द्रव्यत्ववत् स्पर्शान्न तु गन्धादित्यादौ गन्धप्रमाजन्यज्ञानविषयत्वस्याभावो द्रव्यत्वे जलावच्छेदेन नञा प्रत्याय्यते इति निषेधप्रतीतेर्नानुपपत्तिः । धूमादग्निमान् इत्यादौ पक्षपदासमभिव्याहृतवाक्येऽपि नान्वयबोधानुपपत्तिः धूमप्रमाजन्यज्ञानविषयवह्निमान् इत्याकारकान्वयबोधस्य निष्प्रत्यूहत्वात् इति ।

एतन्मते पुनरिदं चिन्त्यम्, तथा हि—ज्ञानज्ञाप्यत्वस्य पञ्चम्यर्थताऽभ्युपगमे गन्धाद् द्रव्यत्ववानित्यादौ नान्वयबोधः स्यात्, जलावच्छेदेन द्रव्यत्वे गन्धप्रमाजन्यज्ञानविषयत्वाभावस्य सत्त्वात् । न च पृथिव्यवच्छेदेन द्रव्यत्वे गन्धप्रमाज्ञाप्यत्वस्य सत्त्वात् अन्वयबोधोपपत्तिरिति वाच्यम् तथासति जलावच्छेदेन तदभावस्य सत्त्वात् गन्धान्न द्रव्यत्ववदिति वाक्यस्य प्रयोगप्रसङ्गात्, द्रव्यत्वं गन्धान्न गन्धाच्चेति प्रयोगप्रसङ्गाच्च । न च जलं द्रव्यत्ववत् गन्धादित्यत्र गन्धप्रमाज्ञाप्यद्रव्यत्वस्यात्यन्ताभावः तद्वदन्योन्याभावो वा नञा जले प्रत्याय्यत इति वाच्यम्, 'घटो द्रव्यत्ववान् गन्धात्' 'जलंद्रव्यत्ववत् न गन्धात्' इत्यत्र गन्धप्रमाज्ञाप्यत्वविशिष्टस्य द्रव्यत्वस्य घट इव जलेऽपि सत्त्वात् निषेधप्रतीत्यनुपपत्तेः । यदि च गन्ध प्रमाज्ञाप्यद्रव्यत्वस्य स्वज्ञानीयस्वनिष्ठविधेयतानिरूपितोद्देश्यतया घटादावन्वयः तादृशोद्देश्यतासम्बन्धावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः तादृशोद्देश्यतावच्छिन्नप्रतियोगितावच्छेदकताकस्तद्वदन्योन्याभावो वा जले नञा प्रत्याय्यत इत्यभ्युपेयते तदा वृत्त्यनियामकसम्बन्धस्य तादृशोद्देश्यत्वस्यात्यन्ताभावीयप्रतियोगितायाः अवच्छेदकत्वं भेदप्रतियोगितावच्छेदकतायाश्चावच्छेदकत्वं स्वयमेवाभ्युपेतमिति साध्यपदस्य साध्यज्ञाने लक्षणाया युक्तत्वात् साध्यज्ञानस्य तादृशोद्देश्यत्वसंसर्गेण पक्षेऽन्वयस्य समुचितत्वादित्यस्योक्तत्वादिति प्राचीनमतमेव श्रेयः इति पञ्चम्या ज्ञानज्ञाप्यत्वे लक्षणाकल्पनं वृथैवेति ।।२।२।७७।।

## आरादर्थैः ।२।२।७८।।

आरादर्थाः—दूरार्था अन्तिकार्थाश्च तद्योगेऽनेन पञ्चमी विधीयते । दूरविप्रकृष्टशब्दौ दूरार्थौ अन्तिक--सन्निकृष्ट--समीपादिशब्दा अन्तिकार्थाः । आराच्छब्दोऽपि आरादर्थोऽस्त्येव यद्यपि तथापि प्रभृत्यन्येतिसूत्रे तस्य पाठेन तद्योगे नित्यमेव पञ्चमी भवति, तदतिरिक्ततदर्थकशब्दयोगे तु प्रकृतसूत्रेण विकल्पेन पञ्चमी प्रवर्त्तते । पञ्चमी च सम्बन्धसामान्यार्थिकेति तदभावे सम्बन्धसामान्ये षष्ठ्येवेति दूरं ग्रामाद्, ग्रामस्य वा, अन्तिके ग्रामात् ग्रामस्य वेत्युदाहरणम् । दूरशब्दो व्यवहितदेशवाची, अन्तिकशब्दश्च सन्निहितदेशवाची । तथा च ग्रामसम्बद्ध तद्व्यवहितदेशवृत्तिः, ग्रामसम्बद्धतत्सन्निहितदेशवृत्तिरिति स्वमते बोधः । तार्किकाश्च दूरादिशब्दस्य दैशिकपरत्वविशिष्टः, दैशिकपरत्वव्यञ्जकबहुतरसंयोगघटितपरम्पराश्रयो वाऽर्थः । पञ्चम्याः षष्ठ्याश्चावधित्वमर्थः स च परत्वे बहुतरसंयोगे वाऽन्वेति । तथा च ग्रामावधिकपरत्ववानित्यन्वयबोधः । एवं ग्रामादन्तिकं ग्रामस्य वा ऽन्तिकम् इत्यत्र अन्तिकशब्दस्य दैशिकापरत्वविशिष्टः, दैशिकापरत्वव्यञ्जकस्वल्पतरदेशसंयोगघटितपरम्पराश्रयोऽवाऽर्थः पञ्चम्याः षष्ठ्याश्चावधित्वमर्थः सचापरत्वे स्वल्पतरसंयोगे वाऽन्वेति । तथा च ग्रामावधिकापरत्ववानित्येवार्थः इत्याहुःतदयुक्तम् परत्वाऽपरत्वयोर्दिगर्थानुस्यूततया ग्रामात्पूर्ववर्त्तिनि ग्रामाद् दूरमिति प्रयोगानुपपत्तेरिति व्यवहितसन्निहितदेशपरत्वमेव तयोरास्थेयमिति पञ्चम्या अपि सम्बन्धार्थकत्वमेव युक्तम् । स च सम्बन्धोऽवध्यवधिमद्भावरूपोऽर्थतः प्रतीयमानश्चेदन्यदेतत् । पाक्षिकषष्ठीसिद्धये तस्य सम्बन्धसामान्यार्थतयैव ग्रहीतुमौचित्यमिति प्रतीमः ।।२।२।७८।।

## स्तोकाल्पकृच्छ्रकतिपयादसत्त्वे करणे ॥२।२।७९॥

द्रव्यादेः करणत्वेऽविवक्षिते सति स्तोकादिभ्यः शब्देभ्यः पञ्चमी वा विधीयतेऽनेन सूत्रेण । असत्त्व इत्यस्य कथं द्रव्यादिव्यावृत्तार्थकत्वमिति प्रतिपादितं बृहद्वृत्तौ **"यतो द्रव्ये शब्दप्रवृत्तिः स पर्यायो गुणोऽसत्त्वम्"** इति । द्रव्यं हि बहुपर्यायात्मकं तत्र प्रवर्तमानः शब्दो न युगपत्सर्वान्पर्यायानाख्यातुमलमिति कञ्चिदेव पर्यायमुपादाय प्रवर्तत इति यत्र तस्य ( द्रव्यस्य ) गुणरूपपर्यायमुपादाय प्रवर्त्तते, तत्र स गुणोऽसत्त्वम् इत्यर्थः । स्तोकान्मुक्त इत्यत्र गुणस्य स्वरूपतः कारणत्वं न प्रतीयतेऽपि तु स्तोकत्वविशिष्टस्य द्रव्यस्यैवेति कथं तस्य गुणपर्यायवाचकत्वमिति शङ्कायाम्—पक्षान्तरमप्याह—**तेनैव वा रूपेणाभिधीयमानं द्रव्यादीति** । अयमाशयः तत्तद्रव्यनिष्ठं विशेषं परित्यज्य गुणतादात्म्यापन्नरूपेणैव यदा द्रव्यादि विवक्ष्यते तदापि तस्यासत्त्वरूपत्वमेवेति । तथा च तेन तेन द्रव्यादिना सामानाधिकरण्यमनापन्नं स्तोकादि गुणतया प्रतीयमानमसत्त्वरूपमेव तथा चोक्तं स्तोकेन विषेण हत इत्यत्र—**विषादिद्रव्यसामानाधिकरण्यादत्र सत्त्ववृत्तितेति** । तथा चात्र करणत्वार्थिका पञ्चमी स्तोककरणकमुक्तिविषय इति वाक्यार्थबोधः । तार्किकास्तु प्रकृते पञ्चम्याः करणव्यापारोऽर्थः स च प्रयोज्यतया धात्वर्थेऽन्वेति । व्यापारस्य प्रकृत्यर्थे प्रयोज्यतयाऽन्वयः तथा च स्तोकप्रयोज्यव्यापारजन्यमोचनकर्मेत्यादिरन्वयबोधः । बहुतरदाने द्वेषादल्पसंख्याया द्वेषानुत्पादद्वारा स्वाश्रयज्ञाने प्रयोजकत्वमिति स्तोकस्य दानं व्यापारः । कृच्छ्रस्य स्वविषयको द्वेषो व्यापारो बोध्य इत्याहुः ।।२।२।७९।।

## पृथग्नाना पञ्चमी च ॥२।२।११३॥

अनेन सूत्रेण पृथक्—नानाशब्दाभ्यां योगे पञ्चमी विधीयते । पृथग्नानाशब्दौ चेहासहायार्थौ । अन्यार्थेन योगे पञ्चम्याः प्रभृत्यन्यार्थ ( २।२।७५ ) इति सूत्रेणैव विहितत्वात् । पञ्चम्यर्थः सम्बन्धसामान्यं तच्च निरूपितत्वरूपं प्रतियोगित्वरूपं वा तच्चासहायार्थन्तिः पातिसहागे ऽन्वेति । तथाच मैत्रात्पृथक् इत्यादौ मैत्रनिरूपितसहायत्वाभाववानित्यर्थः । तार्किकास्तु पृथगादिशब्दानां वर्जनमत्यन्ताभावस्तद्वान्, अन्योन्याभावस्तद्वांश्चार्थः । पञ्चम्याः प्रतियोगित्वमर्थः । तत्र प्रकृत्यर्थस्य स्ववृत्तिप्रकृत्यर्थावच्छेदकाद्यन्वयितावच्छेदकावच्छिन्नत्वेन संसर्गेणान्वयस्तथा च मैत्रत्वावच्छिन्नमैत्रप्रतियोगितात्यन्ताभाववान् इत्यन्वयबोध इत्याहुः ।।२।२।११३।

## ऋते द्वितीया च ॥२।२।११४॥

अनेन सूत्रेण ऋतेशब्देन योगे चकारबलात् समुच्चीयमाना पञ्चमी विधीयते । सा च स्वमते सम्बन्धसामान्यार्था, तार्किकमते च—प्रतियोगित्वार्था । ऋते शब्दार्थश्चात्यन्ताभावः । ऋते धर्मात् कुतः सुखमित्यादौ धर्मवृत्तिधर्मत्वावच्छिन्नप्रतियोगिताकाभाववत् सुखं सम्भावनाविषयाभाववदित्यन्वयबोधः । एवं द्वितीयाऽपि यथामतं सम्बन्धसामान्यार्था प्रतियोगित्वार्था वेति दिक् ।।२।२।११४।।

## विना ते तृतीया च ॥२।२।११५॥

विनाशब्देन युक्ताद्गौणान्नाम्नः पञ्चमी विधीयते प्रकृतसूत्रेण । विनाशब्दाऽर्थोऽत्यन्ताभावो वर्जनं वा । पञ्चम्याद्यर्थश्च सम्बन्धसामान्यम् तथा च विना वातमित्यादौ वातं वर्जयित्वा, वातसम्बन्ध्यभावेन वेत्यर्थः विनाशब्दस्य तृतीयान्ताव्ययत्वस्वीकारात् वातवर्जनेन प्राणस्थितिः कुत इत्यादिरन्वयो बोध्यः ।

"आद्यः करणविन्यासः प्राणस्योर्ध्वं समीरणम् ।
स्थानानामभिघातश्च न विना शब्दभावनाम् ।।

इत्यादौ शब्दभावनाभावेन प्राथमिकः करण ( इन्द्रिय ) विन्यासादिः ( वागिन्द्रियप्रेरणादिः ) न संभवतीत्यर्थबोधः ।। तार्किकमते च, वर्जनम्, अत्यन्ताभावस्तद्वान्, अन्योन्याभावस्तद्वांश्च विनार्थः । पञ्चम्यादीनां प्रतियोगित्वमर्थः । तत्र प्रकृत्यर्थस्य स्ववृत्तिप्रकृत्यर्थतावच्छेदकाद्यन्वयितावच्छेदकावच्छिन्नत्वेन संसर्गेणान्वयः । विना वातमित्यादौ वातत्वावच्छिन्नप्रतियोगिताकात्यन्ताभाववद् यत्किञ्चिदित्यन्वयबोधः । प्रकृत्यर्थतावच्छेदकादेः संसर्गमध्ये निवेशात् पर्वतीयवह्नेर्विरहेऽपि महानसे वह्निसत्त्वे वह्निं विना महानसमिति न प्रयोगः । न वा पर्वतीयां वह्निं विना महानसमिति प्रयोगानुपपत्तिः । क्वचिद्विनार्थात्यन्ताभावस्य व्याप्यव्यापकभावेन सम्बन्धेनान्वयः, यथा वह्निं विना न धूमः इत्यादौ वह्निप्रतियोगिताकात्यन्ताभावव्याप्यो धूमो नेत्याद्यर्थात् । क्वचित्प्रयोज्यप्रयोजकभावसम्बन्धेनान्वयः यथा दण्डं विना न घट इत्यादौ, तत्र दण्डत्वावच्छिन्नप्रतियोगिताकाभावप्रयोज्याभाववान् घट इत्यन्वयबोधः । क्वचिदन्योन्याभावो विनार्थः-यथा "अर्जुनाद् विना पाण्डवाः सैन्धवेन वारिताः" इत्यत्र । अत्र चान्योन्याभावो विशेषणतयाऽन्वेति । अर्जुनान्योन्याभाववन्तः ( अर्जुनभिन्नाः ) पाण्डवाः सिन्धुराजेन वारिता इत्यर्थः । अत्यन्ताभाववान् विनाशब्दार्थो यथा—रूपाद्विना स्पर्शः अत्र रूपात्यन्ताभाववतः आधेयतया स्पर्शेऽन्वयः । अन्योन्याभाववान् विनाशब्दार्थो यथा—'पाण्डवान् विना प्रीतिर्दुर्योधनस्य' इत्यत्र अन्योन्याभावत आधेयतया प्रीतावन्वयः । इत्यादिरूपेण यथाप्रयोगमर्थं वर्णयन्ति । ।।२।२।११५।

इति स्याद्यर्थप्रकाशे पञ्चम्यर्थप्रकाशः ।।

# अथ षष्ठी—विभक्त्यर्थ—प्रकाशः ।

## अज्ञाने ज्ञः षष्ठी ।।२।२।८०।।

अनेन सूत्रेण ज्ञानादन्यत्रार्थे वर्तमानस्य जानातेः करणे षष्ठी विधीयते । जानातेर्ज्ञानार्थकत्वेन धातुपाठपठितत्वेऽपि धातूनामनेकार्थत्वाज्ज्ञानादन्यत्रार्थेऽपि प्रयोगसंभवः । 'सर्पिषो जानीते' इत्युदाहरणम् । तदर्थमाह वृत्तिकृत्—**सर्पिषा करणभूतेन प्रवर्तत इत्यर्थ** इति । भोजनादाविति शेषः । भोजने प्रवृत्तौ स्वविषयक—प्रत्यक्षद्वारा सर्पिषः करणत्वमिति भावः । जानातेः ज्ञानादन्यत्रार्थे प्रयोग इति सूचयितुं प्रयोगार्थमुक्त्वाऽपि स्पष्टप्रतिपत्तये धात्वर्थमाह वृत्तिकृदेव **प्रवृत्तिरत्र जानातेरर्थ** इति । वस्तुतस्तु जानातेः प्रवृत्त्यर्थतया प्रतीतिर्न स्पष्टतया भवतीति मनसिकृत्य पक्षान्तरमप्युक्तं तत्रैव अथवा **सर्पिषि रक्तो विरक्तो** वेत्यादिना । आत्यन्तिकरागेण तादृशेन द्वेषेण वाऽऽविष्टो जनः सर्वत्र तदेव वस्तु पश्यति, यत्र रागो वा द्वेषो वेति, तद्दर्शनन्तस्य न ज्ञानमपि तु मिथ्याज्ञानमित्यज्ञानमेव । भ्रान्तिज्ञानस्यैवाज्ञानत्वेन सकलदार्शनिकसम्मतत्वात् । ज्ञानं हि वस्तुतत्त्वप्रत्यक्षम् । अतत्त्वप्रतीतिश्चाज्ञानमेवेति भावः । तथा च भ्रान्त्या सर्पिष्ट्वेन जानीत इति वाक्यार्थः ।।

अत्र तार्किकाः अज्ञानं ज्ञानभिन्नमथवा मोहो मिथ्याज्ञानमिति यावत् । सर्पिषो जानीत इत्यत्र ज्ञानभिन्नः प्रवृत्तिरूपोऽर्थः । षष्ठ्याः स्वजन्यं स्वविषयकप्रत्यक्षं व्यापारः करणत्वमर्थः । स च प्रयोज्यतया प्रवृत्तिरूपे धात्वर्थेऽन्वेति मिथ्याज्ञानरूपे धात्वर्थे तु षष्ठ्या लयो व्यापारोऽर्थः, लयस्तु तथाविधं धारावाहि प्रत्यक्षं तज्जन्यदृढसंस्कारजन्यं स्मरणं वा । तथा च सर्पिःप्रत्यक्षप्रयोज्यप्रवृत्त्याश्रयत्वं वाक्यार्थः अथवा सर्पिर्लयप्रयोज्यं सर्पिस्तादात्म्यावगाहि सकलवस्तुविषयकं यन्मिथ्याज्ञानं तदाश्रयत्वं वाक्यार्थः । यो यद्विषयकलयवान् स तन्मयं जगत्पश्यतीति वर्णयन्ति ।।२।२।८०।।

## शेषे ॥२।३।८१॥

विभक्तिनिमित्तत्वेन ये कर्मत्वादयोऽर्था उक्तास्तदवशिष्टेऽर्थेऽनेन सूत्रेण षष्ठी विभक्तिर्विधीयते । तत्र शेषपदस्यानेकार्थत्वेन प्रयुक्तत्वादिह किमर्थपरत्वमित्याकांक्षायां तदर्थमाह वृत्तिकृत्-कर्मादिभ्योऽन्यः क्रियाकारकभावपूर्वकः सम्बन्धविशेष शेष इति। तेन उपयुक्तेतरवाचक इह शेष शब्द इति स्पष्टम् । कर्मादयोऽर्था द्वितीयादिविभक्त्यर्थत्वेन पूर्वमुपयुक्ताः, नामार्थोऽपि प्रथमाविषयकत्वेनोक्त एवेति सम्बन्ध एव विभक्तिवाच्यत्वेनावशिष्यते इति तत्रैव षष्ठी भवति । स च सम्बन्धः क्रियाकारकभावपूर्वक एव ग्राह्यः । प्रायः सर्वस्यैव स्वस्वामिभावादेः सम्बन्धस्य क्रियाकारकभावपूर्वकत्वात् । यथा 'राज्ञः पुरुष' इतिस्वस्वामिभावसम्बन्धस्योदाहरणम् , यत्र योऽयं राजपुरुषयोः सम्बन्धः स न कारणानपेक्षः, अकस्मात् केनाऽपि सह कस्यापि सम्बन्धस्य स्वीकारे सर्वैः सह स सम्बन्धस्तस्य स्वीकार्यः स्यात् । तस्मादवश्यमत्र कारणेन भवितव्यमिति अस्ति प्रकृतेऽपि कश्चन क्रियाकारकभावमूलकः सम्बन्धोऽनुस्यूत इति, स चायं-पुरुषो योगक्षेमकामः स्वात्मानं राज्ञेऽर्पयति राजा तं स्वत्वेन स्वीकरोति -इति, अन्यद्वा दानादानादि क्रियान्तरमत्रान्तर्भूतमिति क्रियाकारकपूर्वक एव स्वस्वामिभावादिः । एवमुपगोरपत्यमित्यादौ जन्यजनकभावः सम्बन्धोऽपि जनिक्रियाजनित एवेति रीत्या सर्वस्य सम्बन्धस्य क्रियाकारकभावपूर्वकत्वमवधार्यम् । ननु सर्वोऽपि क्रियाकारकभावमूलकः सम्बन्धः कर्मत्वादिना कारकत्वविशेषेण व्याप्त एवेति तत्र तत्र विभक्तयो विहिता एवेति किमन्यदवशिष्यते यत्रेयं षष्ठी प्रवर्तेतेति चेद् अत्राह-कर्माद्यविवक्षालक्षण इति । अयमर्थः यत्र सम्बन्धमूलभूता क्रिया श्रूयते तत्र तां क्रियामपेक्ष्य कर्तृत्वकर्मत्वादिकं प्रतीयत इति तत्र तास्ताविभक्तयः स्युर्नाम, यत्र च सम्बन्धमूलभूता क्रिया न श्रूयते तत्र न तन्मूलकं कर्तृत्वादि सम्भवति यथा राज्ञः पुरुष इत्यादौ; किंच यत्र च क्रिया श्रूयतेऽपि तत्रापि यदि तस्य कारकस्य क्रियया सह सम्बन्धविशेषः कर्तृत्वकर्मत्वादिर्न विवक्ष्यते तत्रापि सम्बन्धसामान्यत्वेन प्रतीतये काचन विभक्तिः स्वीकार्यैवेति तत्प्रतिपादिका षष्ठी अनेन सूत्रेण विधीयते । एतदेव स्पष्टीकृतम् अश्रूयमाणक्रियः श्रूयमाणक्रियो वेत्येतेनांशेन । तस्य सम्बन्धस्य सामान्यं स्वरूपमाह-'अस्येदंभावरूपः' इति । अस्य षष्ठीप्रकृतिवाच्यस्य इदं पुरुषादि वस्तु तस्य भावः सत्तैव रूपं यस्येत्यर्थः । तथा हि षष्ठ्या सामान्यतोऽस्येदंभाव एवाख्यायते -स च प्रकरणादिवशात् -स्वस्वामिभावादिविशेषरूपेण प्रतिभासत इत्यर्थः । राज्ञः पुरुष इत्यत्र स स्वस्वामिभावरूपः, उपगोरपत्यमित्यत्र जन्यजनकभावरूपः, पशोः पाद इत्यत्र अङ्गाङ्गिभावरूपः, क्षीरस्य विकार इत्यत्र प्रकृतिविकृतिभावरूपः, गवां समूह इत्यत्र संहतसङ्घभावः कुम्भस्य समीपम् इत्यत्र अव्यवहितपूर्वापरीभावरूपः, पृथिव्याः स्वामीत्यत्र रक्ष्यरक्षकभावरूपः, न माषाणामश्नीयात् इत्यत अन्नस्य नो देहि इत्यन्तं कर्मक्रियाभावरूपः, अक्षाणां दीव्यतीत्यत्र कर्मक्रियाभावरूपः, करणक्रियाभावरूपो, वा घ्नतः पृष्ठं ददातीत्यत्र सम्प्रदानसम्प्रदेयभावरूपः नटस्य श्रृणोतीत्यत्र अवध्यवधिभावरूपः, वृक्षस्य पर्णं पततीत्यत्रापि स एव महतां विभाषते इत्यत्र विरोधिविरोध्यभावरूपः सम्बन्धः प्रतीयते । अथवा माषाणामश्नीयात् इत्यत्र भोज्यभोजकभावरूपः, सुभाषितस्य शिक्षते इत्यत्र ग्राह्यग्रहीतृभावरूपः, न ते सुखस्य जानते इत्यत्र ज्ञेयज्ञातृभावरूपः न तस्य सायमश्नीयात् इत्यत्र अभोज्याभोजकभावरूपः अन्नस्य नो देहि इत्यत्र देयदातृभावरूपः, अक्षाणां दीव्यतीत्यत्र देव्यदेवितृभावरूपः, प्रतीयते । अत एव अस्येदंभावरूपत्वमेव षष्ठ्याः सामान्यमर्थः इति स्वमतम् ।

तार्किकास्तु-शेषत्वं सम्बन्धत्वम् सप्रतियोगिकत्वे सति सानुयोगिकत्वम् प्रतियोगित्वानुयोगित्वनिरूपकतावच्छेदकधर्मवैशिष्ट्यमिति यावत् । एकशतं यावन्तो वा षष्ठ्यर्था इति महाभाष्योक्तिसत्त्वेऽपि, न प्रवृत्तिनिमित्तानामनेकविधत्वम्, किन्तु शेषव्यक्तीनां सम्भवति शक्त्यैक्ये अनन्त-

शक्तिकल्पनाया अन्याय्यत्वात् । दर्शितधर्मवान् शेषः संयोग-समवायस्वत्वकर्तृत्वादिकारकविषयत्वादिभेदादनेकविधः । हिमानां गिरिः, गजस्यालानं, वलिकायाः स्तम्भः इत्यादौ षष्ठ्यर्थः संयोगः तत्र प्रकृत्यर्थस्य प्रतियोगितयाऽन्वयः । हिमप्रतियोगिकसंयोगवान् गिरिरित्यादिरूपेणान्वयबोधः । पुरुषस्य दण्डः, कर्णस्यावतंसः, हृदयस्य हारः इत्यादौ षष्ठ्यर्थसंयोगे प्रकृत्यर्थस्यानुयोगितयाऽन्वयः । पुरुषानुयोगिकसंयोगवान् दण्डः इत्यादिरन्वयबोधः । वृक्षस्य शाखा इत्यादौ समवायः षष्ठ्यर्थः, प्रकृत्यर्थस्य प्रतियोगितयाऽन्वयः वृक्षप्रतियोगिकसमवायवती शाखेत्यन्वयबोधः । पटस्य नीलिमेत्यादौ समवेतत्वं षष्ठ्यर्थः तत्र प्रकृत्यर्थस्य निरूपितत्वेनान्वयः । पटनिरूपितसमवेतत्ववान्नीलिमेत्यन्वयबोधः । राज्ञः पुरुष इत्यादौ स्वत्वं षष्ठ्यर्थः, तत्र प्रकृत्यर्थस्य निरूपितत्वेनान्वयः, राजनिरूपितस्वत्ववान् पुरुष इत्यन्वयबोधः । 'पुरुषाणां राजा' चित्राणां गवामयम्, नक्षत्राणां शशी इत्यादौ स्वामित्वं षष्ठ्यर्थः, तत्र निरूपितत्वेन प्रकृत्यर्थस्यान्वयः, पुरुषनिरूपितस्वामित्ववान् राजेत्यादिरन्वयबोधः । सतां गतमित्यादौ कर्तृत्वं षष्ठ्यर्थः, तत्राधेयतया प्रकृत्यर्थस्यान्वयः । ओदनस्य पक्तेत्यत्र कर्मत्वं षष्ठ्यर्थः तत्र निरूपितत्वेन प्रकृत्यर्थस्यान्वयः, 'फलानां तृप्तः' पयसामभिषेक इयादौ करणत्वं व्यापारः षष्ठ्यर्थः, तत्र प्रयोज्यतया प्रकृत्यर्थस्यान्वयः। ब्राह्मणस्य दानमित्यादौ सम्प्रदानत्वं षष्ठ्यर्थः, तच्च स्वत्वोद्देश्यताया अवच्छेदकत्वस्वरूपम् । तत्राधेयतया प्रकृत्यर्थस्यान्वयः । कान्तस्य त्रस्यतीत्यादौ दर्शितभयहेतुत्वस्वरूपमपादानत्वं षष्ठ्यर्थः, तत्राधेयतया निरूपकतया वा प्रकृत्यर्थस्यान्वयः, पाकस्य गृहमित्यादावधिकरणत्वं, पीठस्योपवेशनमित्यादावाधेयत्वस्वरूपमधिकरणत्वम् षष्ठ्यर्थः तत्र निरूपकतया प्रकृत्यर्थस्यान्वयः । शास्त्रस्य ज्ञातेत्यादौ विषयत्वं षष्ठ्यर्थः, भ्रमस्य रजतमित्यत्रापितद् एव षष्ठ्यर्थः तत्र निरूपकतया प्रकृत्यर्थस्यान्वयः । 'अस्य पिता अस्य पुत्र' इत्यादौ जनकत्वं जन्यत्वं षष्ठ्यर्थः तत्र प्रकृत्यर्थस्य निरूपकतया अन्वयः । यदि च पितृत्वं जनकत्वघटितं, पुत्रत्वं जन्यत्वघटितं, तदा निष्ठत्वं षष्ठ्यर्थः, तत्र प्रकृत्यर्थस्य प्रतियोगितयाऽन्वयः । एवं यथाप्रयोगमन्यादृशोऽपि शेषपदार्थो बोध्य इत्याहुः ।।२।२।८१।।

## रि-रिष्टात्-स्तादस्तादसतसाता ।।२।२।८२।।

रि-रिष्टात्-स्तात्-अस्तात्-अस्-अतस्-आत्-इत्येतत्प्रत्ययान्तैर्युक्तान्नाम्नः षष्ठी विधीयते प्रकृतसूत्रेण । एते च प्रत्यया दिग्वाचकेभ्यः स्वार्थे विधीयन्ते इति दिग्वाचकशब्दत्वात् तद्योगे प्रभृत्यन्यार्थ ( २।२।७५ ) इति सूत्रेण पञ्चमी विहिता तदपबाधनार्थमिह षष्ठीविधानम् । षष्ठ्याश्च सम्बन्धसामान्यमर्थः । उपरीत्यादिशब्दाश्चाव्ययानीति तेषां प्रायः सप्तम्यर्थप्रधानत्वम् । ग्रामसम्बन्ध्यूर्ध्वदेशे इत्यादिक्रमेण सर्वत्र वाक्यार्थबोधः । यत्र च पञ्चमी न प्राप्ता तत्र सम्बन्धसामान्ये षष्ठीविधानार्थमपीदमित्यादि स्पष्टं शब्दमहार्णवन्यासादौ ।।

## शेषषष्ठीविशेषविचारः ।

विवक्षावशात् कर्मादीनामपि शेषत्वमिति पूर्वमुक्तम् । एवं विवक्षावशात्षष्ठीप्रयोगस्य स्वतः सिद्धत्वेऽपि प्राञ्चो वैयाकरणाः कानिचिद्विशेषसूत्राणि तत्तत्कारकाणां शेषत्वविवक्षया षष्ठीविधायकानि पठन्ति तानि स्वमते पूर्वोक्तरीत्यैव गतार्थान्यपि छात्रबुद्धिवैशद्यार्थं तत्र तत्र विशिष्यषष्ठ्यर्थप्रकाशाय संक्षिप्य प्रदर्श्यन्ते । तथा हि-स्मरणार्थकस्य दय धातोरीशधातोश्च कर्मणि शेषत्वेन विवक्षिते षष्ठी तैर्विधीयते । मातुः स्मरति चिन्तयति वा, इति तदुदाहरणम् तत्र षष्ठ्याः कर्मत्वमर्थः, तच्चाधेयत्वस्वरूपम् फले विषयत्वेऽन्वेति । मातृवृत्तिविषयताप्रतियोगिस्मरणाश्रयत्वं वाक्यार्थः ।।

दय धातुर्दानगतिरक्षणेषु पठितः । तत्र दाने-सर्पिषो दयते इति सर्पिष्कर्मकं यद्दानं तदाश्रत्वं वाक्यार्थः । गतौ-तीर्थस्य

दयते इति, तीर्थकर्मकगमनाश्रयत्वं वाक्यार्थः। रक्षणे यथा दीनस्य दयते इत्यत्र दीनकर्मकरक्षणाश्रयत्वं वाक्यार्थः। ईश धातुरैश्वर्ये पठितः। ऐश्वर्यं च स्वत्वफलनिरूपकं स्वामित्वम्, ऐश्वर्यस्य कर्मणि षष्ठी यथा सर्पिष ईष्टे इति। अत्र सर्पिर्वृत्तिस्वत्वनिरूपकत्वाश्रयत्वं वाक्यार्थः। एवं ग्रामस्य ईष्टे इत्यादावपि बोध्यम्।

एवं गुणान्तराधानरूपप्रतियत्नेऽर्थे करोतिप्रयोगे कर्मणि शेषत्वेन विवक्षिते षष्ठी विधीयते यथा 'एधो दकस्योपस्कुरुते' इति। अत्र षष्ठ्याः कर्मत्वमर्थः धात्वर्थ उपकरणेऽन्वेति। उपकरणं सन्निधापनं तथा च उदककर्मकगुणान्तरोत्पत्त्यनुकूलव्यापाराश्रय एध इति वाक्यार्थबोधः। अन्ये तु प्रतियत्नो द्वितीययत्नः स चोपकारस्वरूपःउपपूर्वकस्य करोतेरर्थः। उपकारश्च द्विविधः, उप समीपे करणं स्थापनं सन्निधापनमिति यावत् इत्येकः। एतस्मिन्नेवार्थे प्रतियत्नस्य द्योतकः स्सडागमो भवति। द्वितीयस्तु दुःखनाशसुखान्यतरव्यापारस्वरूपः। अत्र च न स्सडागमः। आद्यो यथा 'एधो दकस्योपस्कुरुते' इति। अन्वयबोधः पूर्ववदेव। द्वितीयो यथा दीनस्योपकुरुते इति। अत्र आधेयत्वरूपं कर्मत्वं दुःखनाशादौ फलेऽन्वेति। तथा च दीनवृत्तिदुःखनाशानुकूलप्रयत्नाश्रय इति बोधः। क्वचित्प्रतिक्रियाऽपि प्रतियत्नः। प्रतिक्रिया च क्रियाविघातकक्रिया, सा च प्रतिपूर्वकस्य करोतेरर्थः। तत्कर्मण्यपि षष्ठी। यथा—"गुरु-विप्र-तपस्विदुर्गतानां प्रतिकुर्वीत भिषक् स्वभेषजैः" इति। अत्र प्रतिक्रिया—क्रियाभिघातक्रिया धात्वर्थः, तत्र गुर्वादिकर्मत्वस्य षष्ठ्यन्तार्थस्यान्वयः। एतन्मते क्रियाविशेषणस्य कर्मत्वात्, उपक्रियाविशेषणस्यापि कर्मत्वमिति तत्रापि षष्ठी। यथा "स हि तत्त्वतो ज्ञातः स्वात्मसाक्षात्कारस्योपकरोति" इति अत्र स्वात्मसाक्षात्कारभिन्नोपकारप्रयत्नाश्रय इत्यन्वयबोधः॥

भावकर्तृकाणां रुजार्थानां धातूनां कर्मणि शेषत्वेन विवक्षितेऽपि षष्ठी विधीयते तैः। रुजार्थके च ज्वरेर्वर्जनं पठ्यते। चौरस्य रुजति रोग इत्यादौ रुजेर्दुःखानुकूलव्यापारोऽर्थः। ण्यादेः प्रयोजकत्वमर्थः। षष्ठ्या आधेयत्वस्वरूपं कर्मत्वमर्थः। पित्तादिविकारो रोगः, तथा च चौरवृत्ति दुःखानुकूलधातुविकाररूपव्यापारप्रयोजकः पित्तादिविकार इत्यन्वयबोधः। एवं चौरस्य रोगस्य रुजा इत्यादावप्यन्वयो बोध्यः। एवं भोक्तृरुजति बहु भोजनम्, कामुकस्य क्षयिष्यत्यनवरतरतमित्यादयोऽपि प्रयोगा रुजार्थयोगे कर्मणि षष्ठीविषयका विज्ञेयाः। आशीरर्थस्य नाथतेः कर्मणि शेषत्वेन विवक्षिते षष्ठी विधीयते। आशीराशंसा लिप्सेति यावत्। सर्पिषो नाथते इत्यादौ षष्ठ्या आधेयत्वस्वरूपं कर्मत्वमर्थः। तच्च धात्वर्थेच्छाफले विषयत्वे उद्देश्यत्वे वाऽन्वेति। तथा च सर्पिर्वृत्तिविषयताकेच्छाश्रयत्वं वाक्यार्थः। आशीरर्थस्येति कथनात् माणवकमुपनाथतीत्यादौ कर्मणि न षष्ठी। अत्र नाथतेरुपतापोऽर्थः॥

हिंसार्थकानां जासि—नि—प्र—हण—नाट—क्राथ—पिषां धातूनां शेषत्वेन विवक्षिते कर्मणि षष्ठी विधीयते। प्राणात्यन्तवियोगफलकव्यापारो हिंसा। तदर्थका एते धातवः। नि—प्रेत्युपसर्गयोर्व्यस्तयोः समस्तयोर्विपर्यस्तयोश्च यथाकथंचित् प्रयुक्तयोर्ग्रहणं, सति हिंसार्थे प्रयोगे। चौरस्योज्जासयति, निहन्ति प्रहन्ति निप्रहन्ति, प्रणिहन्ति, उन्नाटयति, क्राथयति, पिनष्टि वा इत्यादौ प्रयुक्तानामेषां हिंसार्थत्वमिति तत्कर्मणश्चौरस्य षष्ठ्यन्तत्वम्। षष्ठ्या आधेयत्वस्वरूपं कर्मत्वमर्थः। तच्च हिंसाफले प्राणात्यन्तवियोगेऽन्वेति। तथा च चौरवृत्तिप्राणात्यन्तवियोगानुकूलव्यापाराश्रयत्वं वाक्यार्थः। यत्र च न हिंसार्थत्वं तत्र न कर्मणि षष्ठी, यथा धानाः पिनष्टि। आरम्भकसंयोगनाशफलिका, आरम्भकसंयोगफलिका च विजातीया पार्थिवक्रिया पिनष्टेरर्थः। तत्राद्यं फलमादाय धानाः पिनष्टीति प्रयोगः। द्वितीयं फलमादाय माषं पिनष्टीति प्रयोगः।

द्यूते क्रयविक्रयव्यवहारे च वर्तमानयोः व्यवहृ—पणोः कर्मणि शेषत्वेन विवक्षिते षष्ठी भवति। शतस्य व्यवहरते

पणते वा इत्यत्र, द्यूतं क्रयो विक्रयश्चैतयोरर्थः। त्यागला-भान्यतरफलकाक्षपातनादिव्यापारो द्यूतम्। त्यागे स्वत्व-नाशप्रकारतानिरूपितविशेष्यत्वस्य तत्सम्बन्धावच्छिन्नाधेय-त्वस्य वा कर्मत्वस्यान्वयः। लाभः स्वत्वेच्छा, तत्र स्वत्व-प्रकारतानिरूपितविशेष्यत्वस्य तत्सम्बन्धावच्छिन्नाधेयत्वस्य वा कर्मत्वस्यान्वयः। तथा च शतकर्मताकस्य त्यागस्य लाभस्य वा फलकं यदक्षपातनादिकं तदनुकूलकृतिर्वाक्यार्थः। एवं शतकर्मताकक्रयकर्तृत्वं, शतकर्मताकविक्रयकर्तृत्वं च वाक्यार्थः। अर्थविशेषोपादानाच्च शलाकां व्यवहरति इत्यादौ न षष्ठी, तत्र व्यवहरतेर्गणनार्थत्वात्। तथा च शलाकाकर्मताकपरिगणनकर्तृत्वं वाक्यार्थः। एवं ब्राह्मणं पणायतीत्यादावपि कर्मणि न षष्ठी, तत्र पणतेः स्तुत्यर्थक-त्वात्। तथा च ब्राह्मणकर्मताकस्तुतिकर्तृत्वं वाक्यार्थः॥

एवं कृत्वोऽर्थस्य प्रत्ययस्य प्रयोगे कालवाचिन्यधिकरणे षष्ठीं विदधति। 'पञ्चकृत्वोऽह्नो भुङ्क्ते' इत्यादौ क्रिया-म्यावृत्तिगणने वारे कृत्वस् प्रत्ययो भवति तस्य अभ्यावृत्ति-मात्रमर्थोऽनन्यलभ्यत्वात्। क्रियाया धातुना, गणनस्य संख्यार्थकशब्देन लाभात्। अभ्यावृत्तिः पौनः पुन्येनोत्पत्तिः। तत्रोत्पत्तौ तद्धितार्थे पञ्चशब्दार्थस्य पञ्चत्वसंख्याविशिष्टस्य प्रतियोगितयाऽन्वयः। पञ्चान्वितोत्पत्तेः धात्वर्थतावच्छेदकै-कधर्मावच्छिन्नसमानाधिकरणभूते धात्वर्थे प्रतियोगितयाऽ-न्वयः। तत एव क्रियाजन्मसंख्यानलाभः। धात्वर्थतावच्छेद-कैकधर्मावच्छिन्नत्वनिवेशात् चैत्रस्य त्रिर्भोजने द्विर्गमने सति चैत्रः पञ्चकृत्वो भुङ्क्ते गच्छति चेति न प्रयोगः। सामा-नाधिकरण्यनिवेशात् चैत्रस्य त्रिर्भोजने मैत्रस्य द्विर्भोजने सति चैत्रो मैत्रश्च पञ्चकृत्वो भुङ्क्ते इति न प्रयोगः, इति प्रकृत्यर्थविशेषितेन कृत्वोऽर्थप्रत्ययार्थेन विशेषिते धात्वर्थे प्रकृत्यर्थकालविशेषविशेषितस्य षष्ठ्यर्थस्याधेयत्वस्यान्वयः। तथा च पञ्चप्रतियोगितानिरूपकोत्पत्तिप्रतियोग्याहवृत्ति-भोजनकर्तृत्वं वाक्यार्थः। व्युत्पत्तिवैचित्र्येण समानाधिकरणे एकधर्मावच्छिन्ने धात्वर्थे षष्ठ्यर्थस्याधेयत्वस्यापि व्युत्पत्ति-वैचित्र्येणान्वयः। अत एव कृत्वोर्थप्रयोगोपादानं सङ्गच्छते। तदुपादानफलं तु कृत्वोर्थप्रयोगशून्ये 'अह्नि भुङ्क्ते शेते वेत्यादौ कालेऽधिकरणे न षष्ठी।

एवं च—एकेन सूत्रेण अज्ञानार्थस्य जानातेः करणे, षट्सूत्रैरुक्तानां धातूनां कर्मणि एकेन च कालरूपेऽधिकरणे या षष्ठी विहिता सा च शेषत्वेन विवक्षया सिद्धाऽपि, समासप्रकरणे शेषे विहिताया एव षष्ठ्याः समासो यथा स्यात्—पूर्वरीत्या तत्तद्धातुयोगे विशिष्य विहिताया मा भूदित्येतदर्थमेवेयं प्रतिपदं षष्ठी विहितेति सर्पिषोज्ञानम्, मातुः स्मरणमित्यादौ न समास इति। तच्च—'षष्ठ्य-यत्नाच्छेषे' इति समाससूत्रे 'अयत्नात् शेषे इति पदद्वयेन सूचितम्। अविवक्षावशात्कारकान्तराणां शेषत्वं यत्न-पूर्वकमिति तत्र न समासः। ये च स्वसमासविधायकसूत्रे 'अयत्नाच्छेषे' इति न पठन्ति तैः प्रतिपदविधाना षष्ठी न समस्यते इति वचनमारभ्यते। तथा च तन्मते गुरुचरणयोः भजति इत्यादावेव वास्तविकी शेषत्वविवक्षा सर्पिषो ज्ञानम्, मातुः स्मरणमित्यादौ च विशिष्य करणे कर्मणि च विहिता षष्ठी करणत्वादिनैव स्वार्थमाह न तु शेषत्वेन सम्बन्ध-सामान्येन ( अस्येदंभावरूपेण ) इति फलति। हरिरप्याह—

"कारकैर्व्यपदिष्टे च श्रूयमाणक्रिये पुनः।
प्रोक्ता प्रतिपदं षष्ठी समासस्य निवृत्तये॥" इति

कारकैः कर्मत्वादिभिर्व्यपदिष्टे, तत्तत्कारकव्यपदेशवती-त्यर्थः। न तु शेषत्वव्यपदेशवतीति भावः। श्रूयमाणक्रिये सूत्रोक्ततत्क्रियायोगे इति भावः, समासनिवृत्त्यर्थां प्रति-पदं पदसम्बन्धिनी षष्ठी समासनिवृत्तये प्रोक्तेति तदर्थः। पदसम्बन्धस्तु कारकविशेषसम्बन्धेन धातुविशेषसम्बन्धो बोध्यः। गुरुस्मरणमित्यादिसमासस्तु कृद्योगषष्ठ्या समास इति बोध्यम्। तथा च समासनिवृत्त्यर्थमेव प्रतिपदषष्ठी-विधानमिति तेषामाशयः।

अत्रोच्यते तथाभ्युपगमे सुरेशिता जवेशितेत्यादिप्रयोगे

षष्ठीसमासो न स्यात् कर्मषष्ठ्याः तृन्नुदन्ताव्यय० (२।२।९०) इति निषिद्धत्वात् पूर्वोक्त-ईशधातुयोगे विहित-षष्ठ्याश्च भवद्भिः समासनिषेधविषयत्वकल्पनात्। तस्मात् करणे कर्मणि अधिकरणे वा तत्त्वेन विवक्षिते एभिः सूत्रैः षष्ठी विधीयत इत्येव वक्तुं शक्यते न तु शेषत्वेन विवक्षित इति। तथा च यथा पुष्पेभ्यः पुष्पं वा स्पृहयती-त्यादौ यथा चतुर्थीद्वितीये प्रयुज्येते तथा एष्वपि करणादौ षष्ठ्यास्तत्तद्विभक्तेश्च प्रयोग इति तद्वारणार्थं षष्ठीविधानं स्यात्। अथवा धातूनामेषामर्थे कश्चनातिशयितानति-शयितभेदः कल्पनीयः। तथा चातिशयिते तदर्थे षष्ठी, सामान्ये च विवक्षिते द्वितीयेति कल्पनोपपत्तेः। एवं चातिशयितस्य द्विविधाविदर्थस्य जानातेः करणे, अतिशयि-तस्य स्मरणार्थस्य कर्मणि, दयत्यर्थत्रितयस्यैश्वर्यस्य च प्रतियत्नादेश्च तत्तत्सूत्रोक्तधात्वर्थस्य कर्मणि षष्ठी। अनतिशयितस्य तु कर्मणि करणे च पूर्वोक्ते सामान्यतस्तृतीया-द्वितीययोर्विधानम्। कृत्वोऽर्थप्रयोगेऽधिकरणे कालिक-सम्बन्धावच्छिन्नाधेयत्वस्य विवक्षायां षष्ठीविधानादाधेय-त्वसामान्यविवक्षायां सामान्यतः सप्तमीविधानात् द्वितीया-तृतीया सप्तमीनामपि तत्तद्धातुयोगे नानुपपत्तिः। न चैवं दर्शित- हरिकारिकाविरोध इति वाच्यम्, तस्या अपि कारकषष्ठ्याः समासनिषेधपरत्वाशयात्। अतएव कारकै-र्व्यपदिष्टे इत्येव तत्र पठितम्। एवं च गुरुस्मरणम् जनेशितेत्यादयः शेषषष्ठीविषयाः प्रयोगा इति बोध्यम्॥

एवं द्यूतव्यवहारार्थकस्य दीव्यतेः कर्मण्यपि षष्ठीं विदधति। शतस्य दीव्यति इत्युदाहरणम्। शतकर्मताक देवनकर्तृत्वं वाक्यार्थः। केचन क्रयविक्रयव्यवहारावपि दीव्यतेः कर्मणः षष्ठीविधिप्रयोजकाविति मन्यन्ते। यदि च तदर्थेऽपि दीव्यतेः प्रयोगः प्रामाणिकः तर्हि शतकर्मताकक्रय- विक्रय कर्तेति वाक्यार्थो बोध्यः। सोपसर्गस्य दीव्यतेः कर्मणि वैकल्पिकीं षष्ठीमाहुः। शतस्य शतं वा प्रतिदीव्यतीति प्रयोगः। द्यूतादिभिन्नार्थस्य दिवः सोपसर्गस्यापि कर्मणि द्वितीयैव न तु षष्ठी- यथा शलाकां प्रतिदीव्यतीति॥

एवं यज- धातोः करणे षष्ठीं पठन्ति। यजेश्च कर्मणः करणसंज्ञा, सम्प्रदानस्य च कर्मसंज्ञा तैः विधीयते पुष्पैर्देवं यजते इति, पुष्पाणि देवाय ददातीत्यर्थः। एवं च करणे विधीयमाना षष्ठी फलतः कर्मण्येव भवति। 'घृतस्य घृतेन वा यजते' इति प्रयोगः। षष्ठी तृतीये अत्र कर्मार्थिके एव। यजेर्देवतोद्देश्यको विहितो वा त्यागोऽर्थः। त्यागस्तु स्वत्वनाशानुकूला इच्छा। षष्ठ्यास्तृतीयायाश्च स्वत्वनाशस्वरूपफलान्वय्याधेयत्वमर्थः। तथा च घृतवृत्ति-स्वत्वनाशानुकूलेच्छाश्रयत्वं वाक्यार्थः। एतच्च विधानं छन्दोविषयकमेवेति केचित्। तेन लोके घृतेन यजते इत्येव प्रयोगः। इत्थं तेषां प्रक्रिया प्रायः संक्षिप्य प्रदर्शिता।

## स्वमते विशेषः।

स्वमते च न पूर्वोक्तानां धातूनां योगे कर्मणि अधिकरणे च षष्ठी विधीयते। केवलम् अज्ञाने ज्ञः षष्ठी (२।२।८०) इति सूत्रेणाज्ञानार्थकस्य जानातेः करणे षष्ठी-विभक्तिर्दर्शितपूर्वा। किञ्च नाथः (२।२।१०) इत्यारभ्य उपसर्गाद्दिवः (२।२।१७) इत्येतत्पर्यन्तमष्टसूत्र्या सूत्रोक्त-धातूनां व्याप्यस्य वैकल्पिकी कर्मसंज्ञा विधीयते। तथा च कर्मसंज्ञाऽभावे सम्बन्धसामान्यविवक्षायां षष्ठी भवति। तथाहि- नाथः (२।२।१०) इति सूत्रेणात्मनेपदविषय-स्यातएवाशीरर्थे प्रयुक्तस्य नाथेः व्याप्यस्य कर्म संज्ञायाम् सर्पिर्नाथते, तदभावे सर्पिषो नाथत इति। पूर्वत्र सर्पिर्मे-स्यादित्याशास्ते इत्यर्थेन सर्पिर्विषयिणीमाशंसां कुरुते इति बोधः। परत्र सर्पिः सम्बन्धिनीमाशंसां कुरुत इति बोधः। कर्मसंज्ञाऽभावे च न कर्मत्वेन बोधः इति न कर्मणि प्रत्य-योत्पत्तिरिति सर्पिषो नाथ्यते इति भाव एव प्रत्ययो न कर्मणि। सर्पिर्नाथ्यत इत्यत्र कर्मणि प्रत्ययो च सर्पिरिति प्रथमान्तमेव। तथा च सर्पिषो नाथ्यत इति षष्ठीप्रयोग-प्रसङ्गे नाथ्यत इत्येकवचनान्तमेव सर्वत्र प्रयोक्ष्यते सर्पिषो-नाथ्यते, सर्पिषां नाथ्यत इति। सर्पिर्नाथ्यत इति कर्मणि

प्रयोगविषये च सर्पिषो नाध्येते, सर्पींषि नाध्यन्ते इत्येवं प्रयोग इति विशेषो विज्ञेयः ॥

## स्मृत्यर्थदयेशः ॥२।२।११॥

एवं स्मृत्यर्थकानां दयतेरीशश्च व्याप्यस्य वा कर्मत्वमनेन विधीयत इति कर्मत्वे मातरं स्मरति इति तदभावे शेषे षष्ठी भवतीति मातुःस्मरतीति प्रयोगः। कर्मत्वे सति कर्मणि प्रत्ययाः यथा माता स्मर्यते, स्मर्तव्या, स्मृता सुस्मरेति। षष्ठ्यां च भावे प्रत्ययाः यथा– मातुः स्मर्यते, स्मर्तव्यम्, स्मृतम्, सुस्मरमिति। एवं च कर्मणोऽपि शेषत्वविवक्षायां शेषषष्ठी सिद्धैवेति व्याप्यस्य कर्मत्वं वैकल्पिकषष्ठीसिद्ध्यर्थं विधीयमानं व्यर्थमेवेत्याशङ्कामुद्भाव्य समाहितं वृत्तौ– सत्यम् किन्तु षष्ठ्ययत्नाच्छेषे ( ३।१।७६ ) इति शेषे षष्ठ्याः समास इत्यादिना। अयमाशयः विवक्षावशाद्धि कर्मत्वाभावे शेषे षष्ठीविधाने षष्ठी न यत्नसाध्येति तस्यां सत्यां समासः स्यात्, वैकल्पिककर्मत्वविधाने हि शेषत्वार्थं शास्त्रकृतो यत्नः सूचितो भवतीति यत्नसाध्यशेषे षष्ठ्याः समासो न भवतीति मातुः स्मरणमित्यसमस्त एव प्रयोगो यथा स्यात्– न तु मातृस्मरणमिति समस्त इत्येतदर्थमिह कर्मत्वविकल्पप्रकरणमारब्धम्। किं च कर्मण एवैषां धातूनां शेषत्वविवक्षा न तु करणादीनामिति नियमार्थत्वमपि प्रकृतप्रकरणस्य तेन करणादीनां शेषत्वविवक्षा न भवति इति न तत्र षष्ठीप्रयोगः। एवं कृगः प्रतियत्ने ( २।२।१२ ) इत्यनेन सतो गुणाधानायापायपरिहाराय वा समीहारूपे प्रतियत्ने कृगो व्याप्यस्य कर्मत्वं विकल्प्यते एधो दकस्योपस्कुरुते, एधो दकमुपस्कुरुते इति। रुजार्थस्याज्वरिसन्तापेर्भावे कर्तरि ( २।२।१३ ) इति सूत्रेण ज्वरिसंतापिवर्जितस्य रुजार्थस्य धातोः व्याप्यस्य, वा कर्मत्वं विधीयते भावप्रत्ययान्तश्चेत्कर्ता भवति। रोगश्चौरस्य चौरं वा रुजतीति। जासनाटक्राथपिषो हिंसायाम् ( २।२।१४ ) इत्यनेन हिंसार्थानामेषां धातूनां व्याप्यस्य वा कर्मत्वं विधीयते चौरस्य चौरं वोज्जासयतीत्यादि एवं निप्रेभ्यो घ्नः ( २।२।१५ ), विनिमेयद्यूतपणं पणव्यवह्रोः (२।२।१६) उपसर्गाद्दिवः ।२।२।१७।। इत्येतानि सूत्राणि यथोक्तानां धातूनां व्याप्यस्य वा कर्मत्वं अनुपसर्गस्य दिवश्च व्याप्यस्य कर्मत्वाभावः 'न' ( २।२।१८ ) इत्यनेन, विधीयते। तेन विनिमेयद्यूतपणार्थस्य दिवो व्याप्ये षष्ठ्येव प्रयुज्यते तत्रापि कर्मत्वनिषेधान्न कर्मत्वेन बोधोऽपि तु सम्बन्धसामान्येनैव। कर्मणि च षष्ठीं विदधतां मतेऽत्र षष्ठ्याः कर्मत्वमेवार्थः, स्वमते च नेति विशेषः। अनयोर्युक्तायुक्तत्वविचारो लक्षणैकचक्षुष्कैरशक्य इति विरमामः। षष्ठीसमासाभावरूपं फलमुभयत्रापि तुल्यमेव। स्वरे भेदस्य स्वमते विचाराभाव एवेति प्रकृतमनुसरामः ॥२।२।८१॥

## कर्मणि कृतः ॥२।२।८३॥

अनेन सूत्रेण कृत्प्रयान्तस्य कर्मणि षष्ठी विधीयते। कर्मणि च द्वितीया प्राप्ता तद्बाधनार्थं विधानम्। कर्मणि विधानात् कर्मत्वमेव षष्ठ्यर्थः, द्वितीयार्थवत्। तस्य सर्गादौ धात्वर्थेऽन्वयः। तथा च 'अपां स्रष्टे'त्यादौ– अप्कर्मकसृष्टिकर्तेति बोधः। 'कृतपूर्वी कटमिति तद्धितान्तनिष्ठशक्तिग्रहप्रयोज्यक्रियानिरूपिते कर्मणि षष्ठीबाधनार्थमिह कृत इत्युक्तं सूत्रे। अत्र हि न कृदन्तमात्रनिष्ठशक्तिग्रहप्रयोज्यक्रियानिरूपितं कर्मत्वं कटस्य अपि तु तद्धितान्त 'कृतपूर्विन्' इत्येतन्निष्ठशक्त्यैवोपस्थितायां क्रियायां कटस्य कर्मत्वं विवक्षितमिति न भवति ततः षष्ठी। तथा हि, पूर्वं कर्मणोऽविवक्षया सामान्यतो धात्वर्थमात्रविवक्षायां कृधातोः क्ते कृतमिति संसाध्य– कृतं पूर्वमनेनेति विग्रहे– तद्धितेन प्रत्ययेन कृतपूर्वीति भवति, ततः कर्माकाङ्क्षायां कटमित्यनेन योग इति– कटस्य तद्धितान्तपदनिष्ठशक्तिसमर्पितक्रियां प्रति कर्मत्वं स्पष्टम्।

अत्र केचित्– कृतशब्दस्य तद्धितवृत्त्यन्तर्गतत्वेन तस्य कटमिति कर्मणा सम्बन्धो न घटते, 'सविशेषणानां वृत्तिर्न,

वृत्तस्य च विशेषणयोगो नेति वृत्तिकारोक्तेः, तथा च त्याद्यन्तकर्मणि तद्वेत्यधीते ( ६।२।११७ ) इति निर्देशादेव षष्ठीप्रसक्तिविरहात् परिशेषात् कृदन्तकर्मण्येव भविष्यतीति कृत इति व्यर्थमेवेत्याहुः, तत्र सविशेषणानामिति नियमस्याऽवश्यसाकाङ्क्षातिरिक्तविषयत्वेन कृतेत्यस्य च कर्मणाऽवश्यसाकाङ्क्षत्वेन कटमित्यनेन सम्बन्धे बाधकाभावात् । तथा च कृतपूर्वीति सिद्धयनन्तरं कर्मण आकाङ्क्षायां क्तस्य कर्मावाचकत्वेन कर्मणो गौणत्व- (अनुक्तत्व) सत्त्वात् कटमिति तेन सम्बध्यत एवेति तत्र षष्ठीं वारयितुं कृतइत्यावश्यकमेव ।

भाट्टास्तु– कारकाणां सर्वत्र प्रत्ययार्थभावनायामेवान्वयः न तु धात्वर्थे, 'गुणानां च परार्थत्वादसम्बन्धः समत्वात् स्यात्' इति न्यायात् । कर्मभावप्रत्ययाव्ययकृतोऽपि भावनामभिदधत्यन्यथा कारकान्वयानुपपत्तेः । कर्तृकृतां तु शक्त्या भक्त्या वा भावनाबोधकत्वमिति ग्रामं गतवानित्यादौ कृदर्थभावनायां ग्रामकर्मत्वस्येव कृतपूर्वीकटमित्यादौ कर्तृ–वाचकतद्धितेनिप्रत्ययार्थभावनायां कटकर्मत्वस्यान्वयः कृदर्थ–भावनाकर्मणो निष्ठया(क्तान्तेना)भिधानेऽपि तद्धितार्थ–भावनाकर्मणोऽनभिधानान्न द्वितीयानुपपत्तिः । तथा च कृदु–पात्तभावनायाः कर्मण्येव षष्ठी न तु तद्धितार्थभावनायाः कर्मणीत्यावेदयितुं सूत्रे कृत इत्युक्तम् । यदाह हरिः—

ततः क्रियावता कर्त्रा योगो भवति कर्मणाम् ।
अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः ।
क्रिया सम्बध्यते तद्वत्कृतपूर्व्यादिषु स्थिता ।।" इति ।

यथा ग्रामं गतवान् इत्यादौ भावनावता कर्तृसंज्ञकेन कर्मणां सम्बन्धो भवति तथा प्रधानकारकान्वयिनी क्रिया 'कृतपूर्वी' इत्यादिपदप्रतिपाद्या भावनाकर्मणा सम्बध्यत इति तदर्थ इति वदन्ति । तच्चिन्त्यम्, कृतशब्दार्थस्य करण-कर्मणः तद्धितार्थभावनायामन्वये तटमिति द्वितीयान्तार्थ–स्यानन्वयापत्तेः, एककर्मावरुद्धायां कर्मान्तरस्यानाकाङ्क्षितत्वात् । किं च भावनायामेव कारकान्वय इति न सम्भवति ओदनस्य पाक इत्यादौ षष्ठ्यर्थकर्मणोऽनन्वयप्रसङ्गात्, भावकृतां भावनाबोधकत्वविरहात् । तथात्वाभ्युपगमे तु कर्म–कर्तृभावनायां कर्मकर्त्रोराक्षेपेऽनभिहिताधिकारीययोः कर्म–कर्तृषष्ठ्योरनुपपत्तिप्रसङ्गात् । न चौदनस्य पाकः, चैत्रस्य पाक इत्यादौ शेषषष्ठीव कृद्योगषष्ठी कर्मकर्तृकृत्सु चोपेयत इति वाच्यम्, नोभयोर्हेतोः ( २।२।८९ ) इत्यस्य निर्विषयत्वापत्तेः । न च करणादिकृत् तद्धितविषय इति वाच्यम्, करणादिकृतोऽपि भावनाबोधकत्वस्य विरहात्, कर्तृकर्मणो–रन्वयाप्रसक्त्या निर्विषयत्वतादवस्थ्यात् । करणादिभावनाया अतिरिक्ताया अभ्युपगमे तत्रापि कर्तृकर्मणोरन्वयाऽसम्भ–वात् निर्विषयत्वतादवस्थ्यात् । यदि 'गुणानां च परार्थ–त्वादसम्बन्धः समत्वात् स्यात्' इति न्यायेन भावनायां कारक-त्वेनान्विते धात्वर्थे न कारकान्वय इत्येवाभ्युपेयते, न तु घञाद्यन्तेन प्रधानवदुपस्थापिते तस्मिन्निति, तदा भवतु भावकृदन्तार्थे षष्ठ्यर्थकारकान्वयः तावता न नः कापि क्षतिरिति ।

ननु कृतपूर्वी कटमित्यादौ कृतशब्दार्थस्य करणकर्मण–स्तद्धितार्थभावनायामनन्वयेऽसामर्थ्यात् वृत्तिर्नोपपद्येतान्वये तु तेनैव कर्माकाङ्क्षाविच्छित्तेः कटादेः कर्मतया तत्रान्वया–सम्भवः, ततश्च सूत्रे कृत इति व्यर्थं, कर्मणोऽभिहितत्वात् षष्ठ्यप्रसक्तेः, अत्राऽपि कटमिति द्वितीयाऽनुपपत्तिश्चेति चेत्– अत्र शाब्दिकाः– कृतमिति भावक्तान्तमविवक्षित–कर्मकम्, पूर्वशब्देन समासमासाद्य कर्तृतद्धितस्य प्रकृतिर्भव–तीति कृतपूर्वीशब्दः सिद्धः प्राक्कालिककरणकर्तेति बोधमर्ज–यति, तत्र भावक्तान्तकृगर्थे कटकर्मत्वस्यान्वय इति वदन्ति, अत्र– म० म० श्री गोकुलनाथोपाध्यायाः– नेदं युक्तम्, कर्मान्वयिनः कृगो भावे प्रत्ययस्य दौर्लभ्यात्, अन्यथा भाव–प्रत्ययान्तगम्यर्थे ग्रामकर्मत्वस्यान्वयसम्भवेन गतं ग्रामं, गम्यते वा ग्रामम् इति प्रयोगापत्तेः । अविवक्षितकर्मत्वे कदापि कर्मत्वान्वयस्य, विवक्षितकर्मत्वे च भावे प्रत्यय–

स्यानुपपत्तेरवश्याभ्युपेयत्वात् । कर्मप्रत्ययान्तकृतपदस्य वृत्यभ्युपगमे तु कर्मणि षष्ठीप्रसक्तेर्द्वितीयोत्पत्तेश्चासम्भव एव वर्तते । किञ्च कृगोऽर्थे कर्मान्वयोपगमे कथं कृत इत्यनेन तद्वारणम्, तस्मात् कृतपूर्वीत्यत्र कृतादिपदार्थपरित्यागेन तद्धितस्य प्राक्कालिकभावनावानर्थः । यदि च पक्वपूर्वी सूपान् अधीतपूर्वी वेदान् इत्यादेः पर्यायत्वमाशंक्यते तदा पाकादिभावनावानेव तद्धितार्थः, तद्धितार्थैकदेशे पाकादौ षष्ठ्यर्थकर्मत्वान्वयवारणाय सूत्रे कृत इत्युपात्तम् ।

ननु विग्रहे समासे च विवक्षितस्यापि निष्ठार्थस्य कर्तृतद्धितोत्पत्तौ सत्यां निष्ठाया अविवक्षाया निरर्थकत्वं युज्यते न तु धातोः, अतो धात्वर्थे तदुपहिततद्धितार्थभावनायां वा कर्मान्वयः सम्भवति, तावतैव, कृत इत्युपादानस्य सार्थक्यम्, किं तद्धितानां पाकादिनानाभावनावदर्थकतया नानार्थताभ्युपगमेनेति चेत्, मैवम्, यतो निष्ठाया निरर्थकत्वाभ्युपगमेऽपि धातोः कृदन्तत्वमक्षतमिति षष्ठीप्रसक्तेर्दुर्वारतया सूत्रे कृत इत्युपादनमनर्थकं स्यादिति तत्सामर्थ्यात् क्तान्तसमुदायस्यैव निरर्थकत्वमवसीयत इति तद्धितेन्प्रत्ययस्य नानार्थत्वमनन्यगतिकतयाऽभ्युपेयते क्तान्तन्तु प्रकरणादिवत् तत्तद्भावनावन्तमुपस्थापयति, तेन पक्वपूर्वीत्यत्र पाकानुकूलभावनावान्, कृतपूर्वीत्यत्र करणानुकूलभावनावान् प्रतीयते, तत्र तद्धितार्थैकदेशे पाके भावनाया अथवा ओदनकर्मत्वस्य, करणे भावनायां वा कटकर्मत्वस्य विवक्षायामोदनपदात् कटपदाच्च षष्ठीं वारयति सूत्रे कृत इति पदं, द्वितीया तु सामान्यतो विहिता भवत्येवेति पक्वपूर्वी ओदनं, कृतपूर्वी कटमित्यादौ कर्मणि न षष्ठी किन्तु द्वितीयैवेति पदवाक्यरत्नाकरे प्राहुः ।

शाब्दिकनव्यास्तु– कृतं पूर्वमनेनेति विग्रहेऽविवक्षितकर्मतया भावे क्तप्रत्यये कृते कर्मसापेक्षत्वाभावात् समासतद्धितौ भवत एव, तथा च कृतपूर्वीत्ययं 'पूर्वं कृतवान्' इत्यनेन समानार्थकः सम्पद्यते, तद्धिते सति वृत्तिभेदात् कर्मणो विवक्षायां गुणभूतयाऽपि क्रियया कारकाणां सम्बन्धस्य कटं कृतवानित्यादौ दर्शनात्, अत्रापि कटकर्मत्वान्वयः, तत्र कर्मणि षष्ठीवारणाय सूत्रे कृत इति समुपात्तम् । न च क्तस्य कृत्वात् कृदुपादानेऽपि षष्ठीप्रसक्तिर्दुर्वारैवेति वाच्यम्, सूत्रे कृतपदस्य प्रत्ययान्तराप्रकृतिभूतस्यैवोपादनात् कृतपूर्वीशब्दस्य तद्धितप्रकृतितया क्तान्तकृतशब्दस्य तद्धितप्रकृतित्वात् । तण्डुलस्य पाचकतम इत्यादौ षष्ठ्या असाधुत्वमिष्टमेव अत एव तण्डुलं पाचकतम इत्यादिप्रयोगं कालापाः साधुं मन्यन्ते इत्याहुः; तच्चिन्त्यम्, विग्रहवाक्येऽविवक्षितकर्मकस्य वृत्तिवाक्ये सकर्मकत्वस्यान्यत्रादृष्टचरत्वात् । शोभनं पचनमत्रेति विग्रहेऽविवक्षितकर्मतया भावे अनप्रत्यये पचनशब्दस्य समासतद्धितयोः कर्मविवक्षायां तण्डुलं शोभनपचनवद्गृहमिति प्रयोगापत्तेः । यदपि प्रत्ययान्तराप्रकृतित्वं कृतो-विशेषणमुक्तं तदपि न शोभनम्, तण्डुलं पाकतरः, तण्डुलं पाकवद्गृहमिति प्रयोगापत्तेश्च ।

वस्तुतस्तु भावप्रत्ययमात्रस्याकर्मकेभ्यो न विधानम्, 'ओदनस्य भुक्तम्' तण्डुलस्य पाक इत्यादौ षष्ठ्यर्थकर्मत्वस्यानन्वयप्रसङ्गात् । किन्तु भावे आख्यातस्यैवाकर्मकेभ्यो विधानम् । न चैवमोदनं भुक्तम्, तण्डुलं पाकः इत्यादिकः कर्मद्वितीयासमभिव्याहृतः प्रयोगः स्यादिति वाच्यम्, कृतः षष्ठ्या द्वितीयाऽपवादात् । एतदर्थमेव सूत्रे कृत इत्युपादानम् । अन्यथा सामान्यतः कर्मणि द्वितीयाषष्ठ्योरुभयो विधाने वैकल्पिकतापत्तेः । नन्वेवं कृतपूर्वीकटमित्यादौ निष्ठास्वरूपकृद्योगस्यावैकल्यात् कर्मणि षष्ठीप्रसङ्गो द्वितीयापवादप्रसङ्गश्च । न च क्तयोरसदाधारे (२।२।९१) इति क्तयोर्योगे षष्ठीनिषेधान्नैवमिति वाच्यम्, वा क्लीबे (२।२।९२) इति सूत्रेण भावे क्तस्य योगे षष्ठीप्रतिप्रसवात्; इति चेन्मैवम्, सूत्रे कृत इत्यत्र कृत्पदस्य विशेषपरत्वात् । तथा हि कृत्प्रकृतिकत्वेन विहितस्य प्रत्ययस्य प्रकृतिभूतो यः कृत् तस्यैव कर्मणि षष्ठीविधानम्, इन्प्रत्ययविधाने पूर्वशब्दस्य सपूर्वकत्वं क्तान्तशब्दपूर्वकत्वमेव,

अन्यथा कुड्यपूर्वीत्यादिप्रयोगापत्तेः । क्तान्तपूर्वकपूर्वशब्द-प्रकृतिकत्वेन विहितस्येन्प्रत्ययस्य, विशिष्टप्रकृतिकतया विशेषणक्तान्तप्रकृतिकत्वेनापि विधानमिति इन्- प्रकृति-भूतक्तान्तकृच्छब्दस्य विवक्षितकृत्त्वविरहात्, तद्योगे तु न षष्ठीप्रसक्तिः, द्वितीया तु सामान्यतो विहिता भवत्येवेति नानुपपत्तिः । इत्थं च तण्डुलस्य पाचकतरः तण्डुलस्य पाकवान् इत्यादौ अकघञादेर्विवक्षितकृत्त्ववत्त्वात् तद्योगे कर्मषष्ठ्या नानुपपत्तिः । तरब् मत्वादेः कृत्प्रकृतिकत्वेना-विधानात् । अतिशायनसम्बन्धाद्यर्थे विहितस्य तस्य 'गुणवत्तरः सौन्दर्यवान् पुरुषः', कपोति गृहमित्यादौ तद्धित-प्रकृतिकत्वेन दर्शनात् । अत एव 'कर्तुरीप्सिततमं कर्म (१।४।४९) इत्यत्र पाणिनिसूत्रे कर्तरि षष्ठीनिर्देशः । एवमिष्टी सुराम् इत्यादौ क्तान्तप्रकृतिकत्वेनेनो विधानात् क्तस्य विवक्षितकृत्त्वविरहात् तद्योगे कर्मणि न षष्ठी, किन्तु द्वितीया सप्तमी चेत्यादिकमग्रे वक्ष्यते । अत एव ग्रामं गतवानित्यादौ कृदर्थभावनायां ग्रामकर्मत्वस्यैव कृत-पूर्वीकटमित्यादौ तद्धितार्थभावनायां कटकर्मत्वस्यान्वयः । तत्र निष्ठादिभिन्नकृदर्थभावनायां षष्ठ्यर्थकर्मत्वस्यान्वयो न तु तद्धितार्थभावनायामित्यावेदयितुं सूत्रे कृत उपादान-मिति भाट्टमतेन कृतः समर्थनमित्यपि न युक्तम्, तन्मतेऽपि भाव्यसंस्कार्याभ्यामतिरिक्तस्य भावनाकर्मत्वविरहात् । ग्राममिति द्वितीयान्तार्थः ग्रामसम्बन्धः गमने भावनायां चान्वेतीत्यस्य द्वितीयाविवरणे सक्तून् जुहोतीत्यत्रोक्तत्वात् । भाव्यस्यापि कटस्य तद्धितार्थभावनायां नान्वयः द्वितीयार्थ-कर्मत्वान्वयस्य तिङर्थे कृदर्थे वा भावनायां वा व्युत्पन्नत्वात्, तद्धितार्थे व्युत्पत्तिविरहात् । अन्यथा नावा तरतीति व्यु-त्पत्तिनिष्पन्ननाविकशब्दयोगे द्वितीयापत्त्या नदीं नाविक इति प्रयोगप्रसङ्गात् । न च तद्धितार्थभावनायां द्वितीयार्थस्य कर्मत्वस्यान्वये धातुसमभिव्याहारस्तन्त्रमिति कृतसमभि-व्याहारस्य तथात्वात् द्वितीयार्थकर्मत्वस्यान्वयः, नाविक इत्यत्र धातुसमभिव्याहारविरहात् नान्वय इति वाच्यम्, तथापि शीर्षहारेण हारेण वा हरतीति व्युत्पन्नस्य शीर्ष-हारिकशब्दस्य हारिकशब्दस्य वा योगे द्वितीयापत्त्या भारं शीर्षहारिको हारिको वेति प्रयोगप्रसङ्गात्,- धातुसम-भिव्याहारस्यात्र-सत्त्वादित्यादि तार्किकाणामत्र वाग्जालः ।

तत्रेदं वक्तव्यम्- प्रोक्तधातुसमभिव्याहारस्य सत्त्वे कृतपूर्वीकटमित्यत्र कर्मत्वान्वयस्य समाहितत्वेन- शीर्ष-हारिकादौ हारशब्दस्य हृधातुनिष्पन्नत्वेऽपि तदर्थभावनायाः कर्मत्वान्वयं प्रति निराकाङ्क्षत्वेनैव भारं शीर्षहारिक इत्यादि प्रयोगप्रसक्तस्य वारितत्वेन कृतपूर्वीकटमित्यादौ षष्ठीप्रसक्तिवारणाय कृत इत्यस्यावश्यकत्वमक्षतमेवेति न किञ्चिदेतत् ॥२।२।८३॥

## द्विषो वाऽतृशः ॥२।२।८४॥

अनेनातृश्प्रत्ययान्तस्य द्विषः कर्मणि विकल्पेन षष्ठी विधीयते । तृन्नुदन्ताव्यय ( २।२।९० ) इति सूत्रे प्रति-षिद्धायाः षष्ठ्याः पाक्षिकः प्रतिप्रसवः क्रियत इति सत्त्वम् चौरस्य चौरं वा द्विषन् । विषयत्वं षष्ठ्यर्थः, धातोः प्रीत्यभावोऽर्थः, तथा च चौर विषयकप्रीतिप्रतियोगिका-भावाश्रय इति बोधः ।२।२।८४॥

## कर्तरि ।२।२।८५॥

कृत इति पूर्वतोऽनुवर्त्य कृतः कर्तरि षष्ठी विधीयते अनेन । भवत आसिकेति । आसिका- शब्दः पर्यायाद्यर्थेषु णकप्रत्ययान्तः । भवत्कर्तृकोपवेशनस्य क्रमः इति वाक्यार्थः । भवतः शायिकेत्यादौ- शयनस्य क्रम इत्येवं रूपेण बोधः ।२।२।८५॥

इति षष्ठीविभक्तिप्रकाशः संक्षिप्तः ।

# अथ सप्तम्यर्थप्रकाशः

## सप्तम्यधिकरणे २।३।३६॥

ङि ओस्– सुप्– इति त्रिकं सप्तमी विभक्तिः। सा चाधिकरणकारकगत एकद्विबहौ ( एकत्वे द्वित्वे बहुत्वे च ) वाच्ये गौणान्नाम्नो विधीयते– प्रकृत सूत्रेण। अधिकरण–पदसङ्केतग्राहकं च सूत्रम्– क्रियाश्रयस्याधारोऽधिकरणम् ( २।२।३० ) इति। क्रिया च धातोरर्थः स च फलव्यापारोभयरूप एव वैयाकरणसम्मतः, तत्र फलाश्रयः कर्म, व्यापाराश्रयः कर्ता इति क्रियाश्रयत्वमुभयोरिति तन्मध्ये यस्य कस्यचनाधारः कारकमधिकरणसंज्ञं भवतीति तदर्थः। अत्र यं प्रति यत्प्रसिद्धं तम्प्रति तदनुवादेनाप्रसिद्धस्य विधानमिति रीतिमाश्रित्य यद्याधारः प्रसिद्धस्तर्हि तमनूद्य–तमुद्दिश्याधिकरणसंज्ञा विधीयते, यम्प्रति चाधिकरणमेव प्रसिद्धं तम्प्रति अधिकरणमेवानूद्य आधारसंज्ञा विधीयत इति विज्ञेयम्। तत्र कर्त्राश्रयस्याधिकरणस्योदाहरणं 'कटे आस्ते' इति। कर्माश्रयस्याधिकरणस्योदाहरणं 'स्थाल्यां पचतीति'। उभयत्र सूत्रार्थस्य सङ्गमनमित्थं वृत्तौ प्रति–पादितम्, "चैत्रसमवायिन्यामासिक्रियायां तदाश्रयं चैत्रं धारयन् कटादिर्हेतुतां प्रतिपद्यत" इति। कटे आस्ते चैत्र इति वाक्ये क्रिया 'आसिः' सा च समवायेन चैत्रे वर्तते इति स तदाश्रयः तं च कटो धारयति इति तदाधारत्वेन तस्यासि-क्रियां प्रति हेतुत्वरूपकारकत्वसत्त्वादधिकरणत्वम् इति अधिकरणे सप्तमी भवतीति भावः। स्थाल्यां पचतीति प्रयोगे सूत्रार्थं सङ्गमयति– तण्डुलसमवायिन्यां च विघटन–क्रियायां तदाश्रयांस्तण्डुलान् धारयन्ती स्थाली हेतुतां प्रति–पद्यत इति। विघटनक्रिया हि विक्लित्तिः सा च समवायेन तण्डुलेषु वर्तते इति तदाश्रयास्तण्डुलाः तान् स्थाली धारय-तीति तण्डुलधारणद्वारा क्रियायां स्थाल्या हेतुत्वेन कारक–त्वात्। एतच्च ( अधिकरणम् ) षोढा विभक्तम्। वैषयिकम्, औपश्लेषिकम्, अभिव्यापकम्, सामीप्यकम्, नैमित्तिकम्, औपचारिकं चेति। तत्र विवृतम्– अनन्यत्र–भावो विषयः तस्मै प्रभवति वैषयिकमिति। अन्यत्र सत्त्वा–भावरूपं विषयं प्रतिपादयति यत्तद्वैषयिकमधिकरणमित्यर्थः। दिवि देवा, नभसि तारका इत्यादौ देवादीनां दिवोऽन्यत्र सत्ताया अभावद्वारा दिवि सत्ता प्रतिपाद्यते इति भावः। औपश्लेषिकं विवृणोति– एकदेशमात्रसंयोग उपश्लेषः तत्र भवमिति। कटे आस्ते इत्यादौ कटादेर्न सर्वावयवावच्छेदेन चैत्रादिना सह संयोगोऽपि तु केनचिदेकदेशेनैवेति औप–श्लेषिकाधिकरणोदाहरणत्वम्। अभिव्यापकं विवृणोति यस्याधेयेन समस्तावयवसंयोग इति। संयोगश्चेह सम्बन्ध–सामान्यम्– तेन समवायादेरपि परिग्रह इति तिलेषु तैलम्–इतिवत् तन्तुषु पटः इत्यपि तदुदाहरणम्। तेषु पटस्य समवायेनैव वृत्तेः। अस्ति च तिलस्य सर्वावयवावच्छेदेन तैलस्याधेयत्वम्। सामीप्यकं विवृणोति यदाधेयसन्निधि–मात्रेण क्रियाहेतुरिति। सन्निधिरदूरावस्थितिः तन्मात्रेणा–धारो यथा– गङ्गायां घोष इत्यादि। गङ्गादयो घोषादि–सत्तायां साक्षादनुपकुर्वन्तोऽपि स्वसन्निधिमात्रेण तदाधारतां व्रजन्ति– यथा राजादयः पुरुषादीनामाश्रयताम्– यामादाय राजाश्रयः पुरुष इत्यादिव्यवहारः। यदि च गङ्गादिशब्दाः स्वसमीपतटादिपराः तर्हि अयमपि औपश्लेषिक एवाधारः। निमित्तमेव नैमित्तिकमिति स्वार्थिकेकण् प्रत्ययेन नैमित्तिक-शब्दो निमित्तमात्रार्थकः, निमित्तमात्रेण यः क्रियाऽऽधारो भवति तन्नैमित्तिकमधिकरणम्– यथा युद्धे सन्नह्यते इत्यादि। अत्र युद्धादयो निमित्तमात्रेण सन्नाहादीनामधि–धिकरणानि। औपचारिकम्– उपचारे भवमिति। अन्यत्रा-वस्थितस्यान्यत्रारोप उपचारः, तत्र भवमित्यर्थः अङ्गुल्यग्रे करिशतमास्ते, इत्यादौ हि करिशतासनस्य नाङ्गुल्यग्रं वास्तविकमाश्रयोऽपि तु अन्यत्र सदेव तदङ्गुल्यग्रे वर्तमान–तयोपचर्यते इति भवति अङ्गुल्यग्रं तदधिकरणमिति। अन्ये च अभिव्यापकौपश्लेषिकातिरिक्तानां सर्वेषामेवा–धाराणां वैषयिकत्वेन संग्रहं कृत्वा त्रिविधमेवाधारमाहुः–

आधारस्त्रिविधो ज्ञेयः कटाकाशतिलादिषु ।
औपश्लेषिको वैषयिकोऽभिव्यापक एव च ।। इति ।

तथा च सामीप्यौपचारिकयोरौपश्लेषिक एवान्तर्भावः, तत्र सामीप्योदाहरणे गङ्गायां घोष इत्यादौ गङ्गाशब्दस्य स्वसमीपे तटे लक्षणायां, अङ्गुल्यग्रे करिशतमित्यादौ अङ्गुल्यग्रादिशब्दानामुपचारादाधेयाधिष्ठिते देशे वृत्तौ चौपश्लेषिक एवाधारः, एवं नैमित्तिकस्य वैषयिकेन सङ्ग्रहो बोध्य इति त्रिविध एवाधार इति तेषामाशयः। एषामाधाराणामधिकरणसंज्ञायां सप्तमीविभक्तिर्भवति । तस्याश्चाश्रयत्वमाधेयत्वं वाऽर्थ इति मतभेदोऽत्र दृश्यते । तथा हि— तार्किकाः— अधिकरणादेः सप्तम्यर्थस्य कर्तृकर्मान्यतरद्वारकस्यैव क्रियायामन्वयात् कारकत्वं, न तु कारकान्तरद्वारकोऽधिकरणस्य क्रियायामन्वयोऽभ्युपेयते । यदाहुः—

"कर्तृकर्मव्यवहितामसाक्षाद्धारयत् क्रियाम् ।
उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं मतम् ।।" इति ।

निरधिकरणयोः कर्तृकर्मणोः क्रियासिद्ध्यनुपार्जकत्वात्– अधिकरणस्य क्रियासिद्धिसहकारित्वमित्यर्थः । न च गगनमस्ति, गगनं जानातीत्यादौ निरधिकरणस्य कर्तुः कर्मणश्च क्रियासिद्ध्युपयोगित्वान्नेदं युक्तमिति वाच्यम्, कालाधिकरणस्य गगनादेः सत्तादिक्रियाकर्तृत्वकर्मत्वयोगित्वात्–'इदानीं गगनमस्ति' इदानीं गगनं जानातीति प्रत्ययात् । न चैवं "काशीस्थो राजा मथुरायां ब्राह्मणेभ्यो धनं ददाति" "गिरौ वृक्षात्पर्णमधो गच्छति" इत्यादौ सम्प्रदानापादानाधिकरणयोः क्रियाविषयकप्रतीतिविषयत्वात् क्रियायां कुतो नान्वय इति वाच्यम्, निर्वर्त्यविकार्ययोरेव कर्मणोः कर्तृत्वविवक्षायां कर्मवद्भावस्येव कर्तृकर्माधिकरणयोरेव क्रियायामन्वयस्याचार्यैरभ्युगमात् । तस्मात्कर्तृकर्मान्यतरद्वाराधिकरणं क्रियान्वयित्वात्कारकमिति निर्विवादम् । एवं 'कटे आस्ते चैत्रः' गेहे पचति मैत्रः इत्यादौ कर्तृघटितपरम्परासम्बन्धावच्छिन्नमाधेयत्वं सप्तम्यर्थस्तच्च प्रकृत्यर्थविशेषितं व्यापारेऽन्वेति । "स्थाल्यामोदनं पचति चैत्रः" "तरौ फलं गच्छति शकुनिः" इत्यादौ कर्मघटितपरम्परासंसर्गावच्छिन्नमाधेयत्वं सप्तम्यर्थः, तच्च प्रकृत्यर्थविशेषितं फलेऽन्वेति ।

ननु दर्शिततत्तत्सम्बन्धावच्छिन्ननानाविधाधेयत्वस्य सप्तम्यर्थत्वे गौरवादधिकरणमेव सप्तम्यर्थोऽस्तु लाघवात्, अधिकरणस्य स्वनिरूपितेन तत्तत्सम्बन्धावच्छिन्नाधेयत्वेन संसर्गेण फलव्यापारयोरन्वयाभ्युपगमान्नानुपपत्तिरिति शाब्दिकमतमेव सम्यक् इति चेन्नैवम्, अधिकरणताविशिष्टस्याधिकरणस्य तथात्वे गौरवादाधेयस्य तथात्वे लाघवात् । प्रपञ्चेन चास्यार्थस्य द्वितीयार्थविवरणे प्रदर्शितत्वात् । न चाधिकरणतात्वस्याखण्डोपाधितया शक्यतावच्छेदकलाघवादधिकरणत्वस्य सप्तम्यर्थत्वमस्त्विति वाच्यम्, परम्परान्वयिनोऽधिकरणत्वस्यापेक्षया साक्षादन्वयिन आधेयत्वस्यैव तथात्वौचित्यात् । न च नानासंसर्गावच्छिन्नत्वस्याधेयत्वे प्रवेशाद्गौरवमिति वाच्यम्, अधिकरणत्वादावपि तुल्यत्वात् । यदि चाधिकरणत्वादेर्नानासम्बन्धावच्छिन्नाधेयत्वेन सम्बन्धेनान्वय इति मन्यते, तदा आधेयत्वमेव सम्बन्धः तस्य कर्तृघटितपरम्परावच्छिन्नाधेयत्वीयस्वरूपेण सम्बन्धेनान्वय इति नानुपपत्तिः वृत्त्यनियामकसम्बन्धस्य प्रतियोगितावच्छेदकत्वमते ऽधिकरणत्वादेः सप्तम्यर्थत्वं न युक्तम्, 'गेहे न पचति,' 'गेहे न पक्ता वा' इत्यत्र निषेधप्रतीत्यनुपपत्तेः, इत्येतत्सर्वमेव द्वितीयाविवरणे प्रतिपादितम्, इति नेह प्रतन्यते ।

फलव्यापारयोः स्वाश्रयसम्बन्धावच्छिन्नस्य आधेयत्वस्य सप्तम्यर्थस्यान्वयोऽभ्युपेयते । स्वाश्रयसम्बन्धस्तु क्वचित्संयोगः, यथा कटे आस्ते चैत्र इत्यादौ कर्तृसंयोगः, स्थाल्यामोदनं पचतीत्यादौ कर्मसंयोगः । क्वचित्समवायः, यथा घटे रूपमस्तीत्यादौ कर्तृसमवायः, अमुष्मिन् गां विक्रीणीते इत्यादौ कर्मणो गोः स्वामित्वम्, तथा घटे नीलरूपं करोती-

त्यादौ कर्मसमवायः, क्वचित्कालिकविशेषणता यथा,पौर्णमास्यां चन्द्रं ग्रसते राहुः इत्यादौ कर्तृकर्मणोः कालिकविशेषणता, क्वचिद्विषयता—यथा मोक्षे इच्छाऽस्ति इत्यादौ कर्तृविषयता, क्वचित्कर्मविषयता—यथा घटे चाक्षुषं जनयति, सूते वा इत्यादौ, क्वचिदन्यादृशोऽपि स्वाश्रयसम्बन्धः प्रयोगानुसाराद्बोध्यः ।

अपादानादेः फलव्यापारयोरनधिकरणत्वात् तदधिकरणनिरूपितस्य दर्शितसम्बन्धावच्छिन्नाधेयत्वस्याप्रसिद्धेरपादानाद्यधिकरणे न कारकत्वमित्यतः कर्तृकर्मणोरेवाधिकरणस्य कारकत्वमाचार्या मन्यन्ते । म० म० गोकुलनाथोपाध्यायास्तु—कटे आस्ते चैत्र इत्यादौ संयोगावच्छिन्नमाधेयत्वं कर्तृनिष्ठं स्थाल्यामोदनं पचतीत्यादौ संयोगावच्छिन्नमाधेयत्वं कर्मनिष्ठं सप्तम्यर्थः । कर्तृकर्मनिष्ठयोराधेयत्वयोः सामानाधिकरण्येन सम्बन्धेन व्यापारफलयोरन्वयः इत्यपादानादिनिष्ठाधेयत्वस्य सामानाधिकरण्येन धात्वर्थेऽन्वयासम्भवात् नापादानाद्यधिकरणस्य कारकत्वम् । एवमाधेयत्वं क्वचिदाख्यातोपस्थापितकालावच्छिन्नं सप्तम्या प्रतिपाद्यते यतो गेहान्निर्गत्य प्राङ्गणे पचमाने चैत्रे गेहे चैत्रः पचतीति न प्रयोगः । क्वचिदन्यकालावच्छिन्नमप्याधेयत्वं तथा, यथा भाविनीं चैत्राधिकरणतामभिसन्धाय चैत्रो ग्रामे गच्छतीति प्रयुज्यते । आतपे तिष्ठतीत्यादौ आतपपदमातपसंयुक्तदेशपरम् अतो नानुपपत्तिः । सविषयकार्थकधातुयोगे विशेष्यतानिरूपितप्रकारत्वस्वरूपं वैज्ञानिकमाधेयत्वं सप्तम्यर्थः यथा रजतत्वं जानातीत्यादौ शुक्तिनिष्ठविशेष्यतानिरूपितप्रकारत्वं रजतत्वाद्यात्मककर्मघटितपरम्परया ज्ञानादावन्वेतीति पदवाक्यरत्नाकरे प्राहुः ।। शास्त्रस्य व्यापकत्वात् कर्तृकर्माघटितेनापि सम्बन्धेनाधिकरणेऽवच्छिन्ने आधेयत्वे वा सप्तमी प्रकृतसूत्रेण विधीयते । अत एव भूतले घट इत्यादौ न सप्तम्यनुपपत्तिः । यत्तु भूतले घट इत्यादावस्तीति क्रियाध्याहारेण सप्तमी भवतीति शाब्दिकैरुक्तं, तदसत् गिरौ वृक्षाद्भूमिं गच्छति विहग इत्यादावध्याहारस्य कर्तुमशक्यत्वात् । पञ्चम्यन्तार्थस्य त्याद्यर्थे कर्तृत्वेऽन्वयस्याव्युत्पन्नत्वात् । अत एव "वैदर्भीकेलिशैले मरकतशिखरादुत्थितैरंशुदर्भैः ।। इति नैषधप्रयोगे न सप्तम्यनुपपत्तिः । न चोत्थानकर्तृरधिकरणं शैल इति शङ्क्यम्, यत उत्थानाधिकरणमूर्ध्वदेश एव, न हि शैलः शिखरादूर्ध्वो भवति इति सम्बन्धमात्रावच्छिन्नमाधेयत्वं सप्तम्यर्थः । सूत्रेऽधिकरणपदोपादानात् तत्र स्वाश्रयसम्बन्धावच्छिन्नमाधेयत्वं क्रियान्वयि कारकतयोपेयते इति तु परमार्थः । एवं भूतले घट इत्यादौ संयोगावच्छिन्नमाधेयत्वं सप्तम्यर्थो घटादावन्वेति, तथा च भूतलवृत्तिर्घट इत्यादिरन्वयबोधः । घटे रूपमित्यादौ समवायावच्छिन्नं, स्फटिके जवालौहित्यमित्यादौ परम्परासम्बन्धावच्छिन्नमाधेयत्वं सप्तम्यर्थः । धनं दुरधिकारिणि' इत्यादौ स्वामित्वावच्छिन्नाधेयत्वं सप्तम्यर्थः । स्फटिके लौहित्ये जपाकुसुममुपाधिरित्यादौ स्वेतरविशेष्यताकस्वधर्मप्रकारताकज्ञानजनक उपाधिशब्दार्थः । तत्र लौहित्याधेयत्वं प्रकारतायां स्फटिकाधेयत्वं विशेष्यतायामन्वेति । स्फटिकलौहित्येऽयमुपाधिरित्यत्र स्वप्रकारताकज्ञानविशेष्यतासम्बन्धावच्छिन्नाधेयत्वात्मकस्फटिकपदलक्ष्यस्तादात्म्येन लौहित्येऽन्वेति, तादृशलौहित्याधेयत्वस्योपाधिशब्दार्थैकदेशे प्रकारत्वे पूर्ववदन्वयो व्युत्पत्तिवैचित्र्यादिति । 'धूमे साध्ये वह्नौ हेतावार्द्रेन्धनसंयोग उपाधिः इत्यत्र साध्यव्यापक उपाधिशब्दार्थः तादात्म्येनार्द्रेन्धनेऽन्वेति, तादृशार्द्रेन्धने व्याप्यत्वसम्बन्धावच्छिन्नं धूमाधेयत्वमन्वेति । अत एव व्याप्यत्वव्यभिचारित्वसम्बन्धौ वृत्त्यनियामकाविति तान्त्रिकाः । साध्यशब्दार्थस्तु सिसाधयिषोद्देश्यसिद्धिविधेयतावच्छेदकधर्मवान् बोध्यः इति प्रभाते गोष्ठे, मध्याह्ने कच्छे गौरित्यादौ कालिकसम्बन्धावच्छिन्नमाधेयत्वमर्थः सप्तम्याः । यदि च कालिकाधेयत्वं गोष्ठादिदेशविशेषणतया भासते तदावच्छेदकतात्वेन व्यपदिश्यते अत एवावच्छेदकत्वार्थिका सप्तमीति मन्यन्ते तान्त्रिकाः, न हि स्वरूपसम्बन्धविशेषोऽतिरिक्तं वाऽवच्छेदकत्वं सप्तम्यर्थः सम्भवति अनुशासनविरहात् । एवं गोष्ठादिदेशाधेयत्वं यदि प्रमाता-

दिकालविशेषणतया प्रतीयते तदा तदपि दैशिकावच्छेदकतात्वेन व्यपदिश्यते। न च देशाधेयत्वेन प्रभातादि, कालविशेषणं न सम्भवति अव्यावर्तकत्वादिति वाच्यम् द्वीपान्तरप्रभातव्यावर्तकैतद्द्वीपवृत्तित्वस्येव गोष्ठादिवृत्तित्वस्यापि व्यावर्तकत्वसंभवात्। यत्र तु दैशिककालिकाधेयत्वयोः कालदेशयोर्न विशेषणत्वम् अव्यावर्तकत्वात्, तत्र नावच्छेद्यावच्छेदकभाव उपेयते यथा इदानीं गुणे सत्त्वत्यादौ। अत्र गुणाधेयत्वं न प्रत्यक्षकाले, प्रत्यक्षकालवृत्तित्वं वा गुणे विशेषणम्, अव्यावर्तकत्वात्, किंतु प्रत्यक्षकालाधेयत्वं गुणाधेयत्वं च स्वातन्त्र्येण सत्तायामेव प्रतीयतेऽन्यथाऽनुपपत्तेरिति। एवं वृक्षे शाखायां कपिसंयोग इत्यादौ शाखाधेयत्वं वृक्षविशेषणं शाखावच्छेदकत्वेन व्यपदिश्यते इति। यस्मिन्नग्नौ पचेदन्नं तत्र होमो विधीयते" इत्यादौ प्रयोजनकव्यापारस्वरूपः सम्बन्धो वृत्तिनियामकः तत्सम्बन्धावच्छिन्नमाधेयत्वं सप्तम्यर्थोऽग्निविशेषितः पाकेऽन्वेति। अत एव व्यापारः, तत्प्रयोज्यत्वं वा सप्तम्यर्थ इति तान्त्रिकवाक्ये दर्शिताधेयत्वमेव व्यापारशब्देन व्यपदिश्यते। क्वचिद्व्यापकतासम्बन्धोऽपि वृत्तिनियामकः यथा कारणतायामनन्यथासिद्धनियतपूर्ववर्त्तित्वं वेत्यादौ। अत्र व्यापकतासम्बन्धावच्छिन्नमाधेयत्वं सप्तम्यर्थोऽन्यथासिद्धिविरहे नियतपूर्ववर्त्तित्वे चान्वेति। व्यापकत्वार्थिका सप्तमीति तान्त्रिकवाक्ये व्यापकत्वशब्देन व्यापकतासम्बन्धावच्छिन्नमाधेयत्वं प्रतिपाद्यते। अतो व्यापकत्वस्य न सप्तम्यर्थत्वमनुशासनविरहादिति यदुक्तम् तत्प्रत्युक्तं वेदितव्यम्।

साधुशब्दस्य सङ्केतसम्बन्धोऽपि वृत्तिनियामकः। यथा 'कर्तरि कृत्' भू सत्तायामित्यनुशासने "विनायके विघ्नराजद्वैमातुरगणाधिपाः" इत्यादौ कोशे। अत्र सङ्केतसम्बन्धावच्छिन्नमाधेयत्वं सप्तम्यर्थः, कृच्छब्दार्थे त्याद्यन्यप्रत्यये भूधातौ विघ्नराजादौ चान्वेति।

ननु भूसत्तायामित्यत्र भूशब्दे कथं सप्तम्यर्थस्यान्वयबोधः स्वरूपपरशब्दस्य सिप्रकृतेरेव साधुत्वात्। न च स्वरूपपरस्यापि धातुशब्दस्य अधातु इति पर्युदासात् (अधातु० १।१।२७ इति सूत्रे) नामसंज्ञाविरहात् सिप्रकृतित्वविरहेऽपि साधुत्वान्नानुपपत्तिरिति शाब्दिकमतं युक्तमिति वाच्यम्, तथा सति भुवः इत्यादिनिर्देशे धातुशब्दस्य स्यादिप्रकृतित्वविरहप्रसङ्गात्। न च श्रोत्रोपस्थिते भूशब्दे सप्तम्यर्थस्यान्वयबोध इति वाच्यम् वृत्त्या शब्देनोपस्थापित एवार्थे तथाभूतस्यार्थस्यान्वयबुद्धेर्व्युत्पत्तिसिद्धत्वात्, वृत्त्यनुपस्थापितेऽर्थेऽन्वयबोधस्याप्रामाणिकत्वात्। अन्यथा श्रोत्रोपस्थिते मृदङ्गशब्दे गुणपदोपस्थापितगुणस्य तादात्म्येनान्वयबोधसामग्रीसत्त्वात् मृदङ्गशब्दो गुण इत्यन्वयबोधप्रसङ्गात् इति चेत्, अत्र म० म० गोकुलनाथोपाध्यायाः— यदर्थशक्त्या धातुत्वं निपातत्वं वा शब्दानां तदर्थसम्बन्धस्वरूपलक्षणायामपि तेषां शब्दानां धातुत्वं निपातत्वं वाऽक्षतमेवेति, यथा— वाशब्दस्य गत्याद्यर्थकत्वे धातुत्वं, विकल्पाद्यर्थकत्वे निपातत्वं तत्तदर्थस्वरूपसम्बन्धलक्षणायां धातुत्वं निपातत्वं चेति भूशब्दस्य स्ववाच्यवाचकत्वस्वरूपलक्षणायां धातुत्वं निराबाधमिति भूशब्दस्य न सिप्रकृतित्वमिति भूधात्वर्थे स्ववाच्यवाचकत्वेन लक्ष्ये भूशब्दे सप्तम्यर्थस्यान्वय इति न काप्यनुपपत्तिरिति प्राहुः।

केचित् अनुकरणशब्दाः साधव इति सामान्यत एव भूसत्तायामित्यनेन ज्ञाप्यते। अत एव गवित्याह प्रतिजानीते प्रत्यक्षवित्यादीत्यादिष्वनुकरणनिरर्थकशब्दान्तर्गतस्यौतोऽवादेशः। हेलयो हेलय इति वदन्तोऽसुराः पराबभूवुरिति श्रुतापभ्रंशानुकरणालयशब्दस्याकारस्य पूर्वरूपत्वं (लोपः) संगच्छते। अन्यथाऽवादिविधीनां साधुशब्दमात्रविषयतया गो आलोके अलञ्जिअई इत्यादौ भाषायामिव प्रसक्तिर्न स्यादिति अनुकरणसाधुभूते भूशब्दे श्रोत्रोपस्थिते सप्तम्यर्थस्यान्वयः। अत एव श्रोत्रोपस्थिते पचतीतिशब्दे पाकं करोतीति विवरणवाक्यार्थस्य पाककर्तृत्वस्य प्रतिपादकतया संसर्गेणान्वयः विवणवाक्ये त्यादेः साधुत्वार्थं प्रयोगः। अथवा विवरणवाक्यं पाककर्मत्वमिव करणाश्रमत्वमभिकं

प्रतिपादयदपि पाककर्तृत्वमर्थतः प्रतिपादयतीति पाककर्तृत्वस्य प्रतिपादकतया विव्रियमाणे पचतीति वाक्येऽन्वयः । न हि विव्रियमाणविवरणवाक्ययोरन्यूनानतिरिक्तार्थकतानियमः । एवं 'चान्वाचये समाहार इतरेतरसमुच्चय' इत्यादावप्यन्वयो बोध्यः इत्याहुः, तन्न सुन्दरम्, अनुकरणशब्दस्य विभक्तिविनाकृतस्य श्रोत्रोपस्थितस्यान्वयोपगमे 'शब्दो गौ' इत्यादावप्यन्वयबोधप्रसङ्गात् । अनुकरणशब्दस्यान्वयोपगमेऽपि अनुकार्यशब्दस्यान्वयानुपपत्तेश्च अनुकार्यस्य साधुतायाः केनाप्यज्ञापनात् । पचतीत्यादौ तु पचेः पचतिपदे त्यादेः प्रतिपाद्यत्वे लक्षणा । पचतिप्रतिपाद्यत्वं, विवरणवाक्यार्थे पाककर्तृत्वेऽन्वेति, त्याद्यर्थस्य प्रथमान्तार्थ इव त्याद्यर्थेऽप्यन्वयोपगमात् । अत एव 'पचति भवति' इत्यादावन्वयोपपत्तिरिति 'चान्वाचये' इत्यादौ चशब्दस्य निपाततया भूसत्तायामित्यादाविवान्वयोपपत्तिः सम्भवतीति गोकुलनाथोपाध्यायरीतिः ।

वस्तुतस्तु शब्देनार्थ इवार्थेनापि शब्दः स्मार्यते शब्दार्थयोरुभयोः सङ्केतसम्बन्धेन सम्बन्धित्वात् । अत एवार्थं ज्ञात्वा, अर्थेन तद्वाचकशब्दं स्मृत्वा वाक्यं प्रयुञ्जते प्रयोक्तारः, तथा च यथा किं पचति भवतीति प्रश्ने वधूपदर्शितकलायादौ कलायादिदर्शनेन कलायादिवाचकं कलायादिपदं द्वितीयान्तं स्मृतवतः प्रष्टुः कलायं पचति भवती इत्यन्वयबोधो भवति तथा भूशब्दस्वरूपेणार्थेन स्वरूपपरो भूशब्दः प्रथमतः स्मार्यते, तेन तु भूशब्दस्वरूपोऽर्थः स्मार्यते तत्र भूशब्दे सङ्केतसम्बन्धावच्छिन्नस्य सत्ताधेयत्वस्यान्वय इति न काप्यनुपपत्तिरिति । यदि च वधूपदर्शितकलायादौ कलायं पचतीति मानसोपनीतभानमेव, तदा सत्ताधेयत्वस्य भूशब्दार्थे मानसोपनीतभानमेवेति । इयमेव रीतिः 'चान्वाचये' इत्यादौ, पचति पाकं करोतीति विवरणे च बोध्या । एवं वाचकत्वार्था सप्तमीति तान्त्रिकवाक्ये वाचकत्वशब्देन सङ्केतसम्बन्धावच्छिन्नाधेयत्वमेव व्यपदिश्यते अतो वाचकत्वस्य सप्तम्यर्थत्वेऽनुशासनविरहेऽपि न क्षतिः ।

दाने वलिः, काव्ये कालिदासः, तपसि धूर्जटिरयमित्यादौ वलिप्रभृतिपदानां वल्यादिसदृशे लक्षणा, कर्तृतानिरूपकसम्बन्धावच्छिन्नं दानाद्याधेयत्वम् इदं पदार्थे पुंसि अन्वेति । विशिष्टान्वयबलाद्दानवैशिष्ट्यमपि पुंसि प्रतीयते । तथा च वल्यादिसादृश्यं दानादिके प्रतीयते । अथ वा सप्तम्यन्तदानादिशब्दसमभिव्याहारबलाद्दानादिस्वरूपतादात्म्येन वल्यादिपदार्थानामिदम्पदार्थे पुंस्यन्वयः । यथा समवायेन नील इत्यादौ तृतीयान्तसमभिव्याहारबलात्समवायेन नीलादिवैशिष्ट्यं प्रतीयते । एवं पटे कुविन्दोऽयमित्यादौ जन्यतासम्बन्धावच्छिन्नं पटाधेयत्वमिदंपदार्थे पुंस्यन्वेति, कुविन्दपदलक्ष्यकुविन्दसदृशस्य तादात्म्येनान्वयः । अथ वा पटजनकत्वस्वरूपतादात्म्येन कुविन्दादेरन्वये सप्तम्यन्तपटादिसमभिव्याहारस्तन्त्रम् इति ।

क्रियान्वयी सप्तम्यर्थो यथा कारणतावच्छेदकेऽप्रामाण्यज्ञानाभावो निविशतेऽनुप्रविशति वेत्यादौ धातोर्घटकत्वमर्थः तच्च विषयिताव्यापकविषयिताकत्वम्, तत्र निरूपकतासम्बन्धावच्छिन्नमाधेयत्वं सप्तम्यर्थेऽन्वेति । तथा च निरूपकतया कारणतावच्छेदकवृत्तिविषयिताव्यापकविषयिताकत्वाश्रयोऽप्रामाण्यज्ञानाभाव इत्यन्वयबोधः । निरूपकत्वार्थिका सप्तमीति तान्त्रिकवाक्येऽपि निरूपकत्वशब्देन निरूपकतासम्बन्धावच्छिन्नमाधेयत्वमेव व्यपदिश्यते । रजते शुक्तौ वा रजतत्वं जानातीत्यादौ विशेष्यतासम्बन्धावच्छिन्नमाधेयत्वं सप्तम्यर्थो धात्वर्थे ज्ञानेऽन्वेति । रजतादिविशेष्यतानिरूपितरजतत्वादिप्रकारताकत्वं ज्ञानस्यार्थतः प्रतीयते । विशेष्यत्वार्थिका सप्तमीति तान्त्रिकवाक्ये विशेष्यत्वशब्देन विशेष्यतासम्बन्धावच्छिन्नाधेयत्वमेव व्यपदिश्यते । पर्वते वह्निमनुमिनोत्यापादयति वा इत्यादावुद्देश्यतासम्बन्धावच्छिन्नाधेयत्वं सप्तम्यर्थो धात्वर्थेऽनुमितावापत्तौ वाऽन्वेति, पर्वतोद्देश्यतानिरूपितवह्निविधेयताकत्वमनुमितेरापत्तेर्वाऽर्थतः प्रतीयते । उद्देश्यत्वार्थिका सप्तमीति तान्त्रिकवाक्ये उद्देश्यत्वशब्देनोद्देश्यतासम्बन्धावच्छिन्नाधेय-

त्वमेव व्यपदिश्यते । क्वचिद्घटकतासम्बन्धोऽपि वृत्ति-नियामकः, यथा न्यायेऽवयवाः प्रतिज्ञादिकं वेत्यादौ घटकता-सम्बन्धावच्छिन्नाधेयत्वं सप्तम्यर्थोऽवयवादावन्वेति । घट-कत्वं तु विषयिताव्यापकविषयिताकत्वं प्रागेवोक्तम् । घट-कत्वार्थिका सप्तमीति तान्त्रिकवाक्ये घटकत्वशब्देन घटकता-सम्बन्धावच्छिन्नाधेयत्वमेव व्यपदिश्यते । एवमन्यत्रापि सप्तम्यर्थतया यद्यत् तान्त्रिका व्यपदिशन्ति तत्तत्सम्बन्धा-वच्छिन्नाधेयत्वमेव सप्तम्यर्थ इति बोध्यम् । तथा चाधेय-त्वमेव सप्तम्यर्थः इति तार्किकमतनिष्कर्षः । स्वमते चानु-शासनानुसरणस्यैव युक्तत्वेनाधिकरणमेव सप्तम्यर्थः, अधि-करणत्वं च तदवच्छेदकम् । तच्चाश्रयत्वरूपमखण्डोपाधि-रिति तत्र तत्सम्बन्धावच्छिन्नत्वादेरप्रवेशान्नाननुगमो गौरवं वेति विवेचितं विस्तरेणान्यत्र॥२।२।९५॥

## न वा सुजर्थैः काले ॥२।२।९६॥

सुचोऽर्थ एवार्थो येषां प्रत्ययानां तदन्तैर्युक्तात्काल-वाचिनोऽधिकरणेऽर्थे सप्तमी विकल्पेन विधीयतेऽनेन सूत्रेण । पक्षे च सम्बन्धसामान्यविवक्षायां षष्ठी । सप्तम्या अधिकरणमेवार्थः । षष्ठ्याश्च सम्बन्धसामान्यमेव परमत-मत्र विषये शेषे ( २।२।८१ ) इति सूत्रव्याख्यायामेव प्रद-र्शितम् ॥२।२।९६॥

## कुशलाऽऽयुक्तेनाऽऽसेवायाम् ॥२।२।९७॥

आसेवा तत्परता तस्यां द्योत्यायां कुशलायुक्तशब्दयो-र्योगेऽधिकरणे सप्तमी विधीयते प्रकृतसूत्रेण । "कुशलो विद्याग्रहणे' आयुक्तस्तपश्चरणे" इत्यादौ– सप्तम्या वैषयिक आधारोऽर्थः पौनः पुन्येन विद्याग्रहणविषये तत्पर इति गम्यते । तार्किकास्तु कुशलशब्दार्थो दक्षः स च पुनः– पुनः कर्ता, अत्र पुनः पुनः करणान्वयि प्रयोजकत्वं सप्तमी षष्ठ्योरर्थः, तथा च विद्याग्रहणप्रयोजक-पुनः पुनः करणा-श्रय इत्यन्वयबोधः । आयुक्तशब्दार्थो व्यापृतः तत्र व्या-पारान्वयि– प्रयोजकत्वं षष्ठीसप्तम्योरर्थः । तथा च तपश्चरणप्रयोजकव्यापाराश्रय इति बोधः । यत्र क्रियान्तर-तात्पर्यं नास्ति तत्र केवलमधिकरणे सप्तम्येव, न षष्ठी; वैकल्पिकसप्तम्यास्तत्राप्रवृत्तौ षष्ठ्या अवकाशाभावात्, यथा 'आयुक्तो गौः शकटे' इत्यत्र ईषद्युक्त आकृष्य युक्त इति वार्थात्, तात्पर्यार्थाभावात् इत्याहुः ॥२।२।९७॥

## स्वामीश्वराधिपतिदायादसाक्षि-प्रतिभूप्रसूतैश्च ॥२।२।९८॥

एभिः ससम्बन्धकैः शब्दैर्युक्तान्नाम्नः सप्तमी वा विधी-यते । पक्षे च सम्बन्धसामान्ये षष्ठी प्राप्तैव । एते च ससम्बन्धकाः शब्दा इति एतत्प्रकृतिकसप्तम्या अपि सम्बन्ध-एवार्थः । स्वामीश्वराधिपतिशब्दाः पर्याया एवेत्येकस्यैवो-पादानेऽर्थग्रहणे च त्रयाणामपि योगे सप्तमी भविष्यत्येवेति द्वयोर्ग्रहणं गौरवायेति आशङ्क्य– पर्यायान्तरव्यावृत्त्यर्थ-मन्ययोर्ग्रहणमिति समाहितं बृहद्वृत्तौ तेन स्वाम्यर्थकै राजादिशब्दैर्योगे न सप्तमी भवति । एतैर्योगे षष्ठीसप्तम्योः निरूपितत्वरूपः सम्बन्धोऽर्थः, गोनिरूपितस्वामित्ववान् पुरुष इति– गोषु गवां वा स्वामीत्यादेरर्थः । दायं स्वांशमादत्ते इति दायादः । गोषु गवां वा दायाद इत्यादौ वृत्तित्वं विभक्त्यर्थः तच्च दायादशब्दार्थैकदेशे दायेऽन्वेति व्युत्पत्ति-वैचित्र्यात्– तथा च गोवृत्तिदायग्राहक इत्यर्थः । एवमन्य-त्रापि यथायथं सम्बन्धसामान्यं विशेषो वा विभक्त्यर्थत्वेन बोध्यः ।

तार्किकास्तु– गवां गोषु वा स्वामीत्यादौ षष्ठीसप्तम्योः स्वामित्वान्वयि निरूपितत्वमर्थः । गवां गोषु वा ईश्वर इत्यादावपि तयोरैश्वर्यान्वयि निरूपितत्वमेवार्थः । ऐश्वर्यं स्वामित्वमेव । अथवा ऐश्वर्यं सामर्थ्यं स्वत्वोत्पादकत्वम् ।

तत्र स्वत्वान्वय्याधेयत्वं तयोरर्थः। गवां गोषु वाऽधिपतिरित्यादौ अधिपतिशब्दः स्वामिपर्यायस्तत्र स्वामिशब्दयोगवत्सर्वं बोध्यम्। गवां गोषु वा दायाद इत्यादौ दायादशब्दस्य धनग्राहकोऽर्थः, तत्र धनान्वयि तादात्म्यं विभक्त्योरर्थः। गवां गोषु वा साक्षीत्यादौ वृत्तनिश्चयप्रमावान् साक्षिशब्दार्थः तत्र वृत्तान्वयी सम्बन्धस्तयोरर्थः। गवां गोषु वा प्रतिभूरित्यादौ अन्यकर्तृकावधिकालिकधनदानाभावप्रयोज्यधनदानकर्ता प्रतिभूशब्दार्थः तत्र द्वितीयधनान्वयि तादात्म्यं तयोरर्थः। वादिनो वादिनि वा प्रतिभूरित्यादौ अवधिकालिकदर्शनकर्ता प्रतिभूशब्दार्थः, तत्र दर्शनान्वयि विषयत्वं तयोरर्थः। गवां गोषु वा प्रसूत इत्यादौ प्रसवकर्मप्रसूतशब्दार्थः तत्र प्रसवान्वयि विज्ञानानुगुणत्वं तयोः (षष्ठी सप्तम्योः) अर्थः, अत एव गा एवानुभवितुं जात इत्यर्थ इति शाब्दिकाः। वस्तुतस्तु प्रसवान्वयि धर्मोपार्जकत्वं तयोरर्थः, तथा च गोधर्मोपार्जकप्रसवकर्मेत्यन्वयबोधः। गोधर्मो जाड्यादिः। अत एव "तदन्वये शुद्धिमति, प्रसूतः शुद्धिमत्तरः" इति दिलीपवर्णनं रघुवंशे प्रथमसर्गे। तदन्वयधर्मः शुद्धिमत्त्वं तत्र प्रसूते दिलीपे युक्तमिति तदाशयात्-इत्याद्याहुः ॥२।२।९८॥

## व्याप्ये क्तेनः ॥२।२।९९॥

क्तप्रत्ययान्तात् य इन् तदन्तस्य व्याप्ये सप्तमी विधीयते प्रकृतसूत्रेण। क्तान्ताच्च इन् प्रत्ययः इष्टादेः (७।१।१६८) इति सूत्रेण कर्त्तरि विधीयते। अधीती व्याकरणे इति प्रयोगः। तत्र अधीतम् अनेन इति सामान्यविवक्षायां कर्तरि इन्प्रत्ययं विधाय ततः कर्मविशेषविवक्षायां व्याकरणपदार्थयोगे ततः कृतपूर्वी कटमित्यादाविव व्याकरणशब्दाद् द्वितीयायां प्राप्तायां सप्तम्यनेन विधीयते। क्तान्तद्विहितस्येनोऽर्थेन कर्त्रा स्वक्रियाऽध्ययनेन व्याप्यं हि व्याकरणमेवेत्यस्य कर्मत्वे सति ततो द्वितीयाया दुर्वारत्वात्। न चाधिकरणत्वविवक्षया सिद्धैव सप्तमीति भणितव्यम् प्रकृत- सूत्रारम्भसामर्थ्यात् क्तेनो विषये कर्मणि विवक्षान्तराभावस्यापि प्रत्यायनात्। विषयत्वं कर्मत्वमेव वा सप्तम्यर्थः- तच्च क्तान्तेन्- प्रत्ययान्तैकदेशे धात्वर्थेऽन्वेति। व्याकरणकर्मकभूतकालिकाध्ययनकर्तेति वाक्यार्थबोधः। एवमन्यत्रापि वाक्यार्थो बोध्यः ॥२।२।९९॥

## तद्युक्ते हेतौ ॥२।२।१००॥

तदिति पूर्वसूत्रोक्तं व्याप्यं परिगृह्यते, तथा च व्याप्ययुक्तहेतौ वर्तमानान्नाम्नः सप्तमी विधीयते। तथा च सप्तम्या हेतुत्वमेवार्थः। हेत्वर्थे च तृतीया विहितेति तदपवादोऽयं योगः। वृत्तौ हेतुर्निमित्तं कारणमिति- कथनं हेतुपदस्य- कर्तृप्रयोजकहेतुपरत्वव्युदासार्थम्। अनेकदेशस्थविनेयप्रतिबोधनार्थं वा शब्दत्रयोपादानं यत्र देशे येन शब्देन प्रसिद्धिस्तत्परिग्रहार्थमिति शब्दमहार्णवन्यासे। किं च हेतुशब्दोऽत्र विशिष्टनिमित्तवाची, यदर्थं तस्यां क्रियायां कर्ता प्रवर्त्तते तस्य प्रयोजनस्य परिग्रहार्थं इति यावत् तेन क्रियासाधकतमस्य करणादिनिमित्तस्य योगे न सप्तमी भवति, यथा दात्रेण लूनवान् इत्यादौ। न चात्र कारकविभक्त्या तृतीययोपपदविभक्तेः सप्तम्या बाध इति वाच्यम् व्याप्यसम्बन्धाद्धि विधीयमाना सप्तमी परम्परया क्रियासम्बद्धत्वात् कारकविभक्तिरेव, सैव हि उपपदविभक्तिर्यत्र कारकसम्बन्धलेशोऽपि न स्यात् यथा शक्तार्थादियोगे चतुर्थी विधीयमाना न क्रियासम्बन्धभागिनीत्युपपदविभक्तिरेव तथा च क्रियारम्भप्रयोजकं प्रयोजनमेवेह निमित्तार्थकहेतुशब्देनोच्यते इति विज्ञेयम्। चर्मणि द्वीपिनं हन्तीत्यादौ कर्मभूतद्वीपिना सह चर्मणोऽवयवावयविभावः सम्बन्धः, एवमेव- दन्तयोर्हन्तिकुञ्जरमित्यादावपि विज्ञेयः। तथा च चर्मादिशब्देभ्यः सप्तमी भवति। तस्याश्च हेतुत्वमेवार्थः, चर्मप्रयोजनकं द्वीपिकर्मकं हननम्, तत्कर्तेति बोधः। द्वीपी व्याघ्रः। व्याघ्रचर्मण आसनादिप्रयोजनसत्त्वात्तदर्थं द्वीपिनं हन्तीति भावः। दन्तयोः कुञ्जरं हन्ति, अत्रापि दन्तिनो

दन्तेन सहावयवावयविभावः सम्बन्धः तत्र दन्तनिमित्तकं कुञ्जरकर्मकं हननं तत्कर्तेति बोधः। सीमा अण्डकोशः 'पुष्कलको गन्धमृगः सीमाऽघाटस्थितक्षेत्रेष्वण्डकोषे च स्त्रियाम् 'अथ पुष्कलको गन्धमृगे क्षपणकीलयोः' इति च मेदिनीकोशात्। तथा चाण्डकोषार्थ- तदण्डकोशस्थित-कस्तूरीप्राप्त्यर्थं पुष्कलककर्मकं हननं तत्कर्तेति बोधः। सीमा आघाटः, तज्ज्ञानार्थं पुष्कलकः शङ्कुर्निहतो निखात इत्यर्थ इति हरदत्तः।

अत्र तार्किकाः— यस्य प्राप्तिः क्रियाफलं तत्र सप्तमी भवति। यथा— चर्मणि द्वीपिनं हन्ति' इत्यादौ सप्तम्याः प्राप्तिः स्वस्वामिभावादिसम्बन्धोऽर्थः। स तु धात्वर्थे हननादावनुकूलतयाऽन्वेति, तथा च चर्मप्राप्तिफलकं द्वीपिहन-मित्यादिर्वाक्यार्थबोधः। निमित्तं फलं यत्र हेतुतृतीयावत् तादर्थ्यचतुर्थीवच्च सप्तमी भवतीति केचित्— तन्न, न हि चर्म द्वीपिहननफलं हननात् प्रागेव द्वीपिचर्मणः सिद्धत्वात्, 'अध्ययनेन वसति', 'यूपाय दारु' इत्यादौ वासात् प्रागध्यय-नस्य दारुणः प्राक् यूपस्य चासिद्धत्वात् वासस्याध्ययनफल-कत्वं दारुणो यूपार्थकत्वं चेति। यदि च द्वीपिनं हन्तुर्न चर्मप्राप्तिः किन्तु बलादाहर्तुरन्यस्य तत्राऽपि दर्शितप्रयोगो-ऽभ्युपेयते तदा सप्तम्याः प्राप्तीच्छैवाऽर्थः तस्याः प्रयोज्य-तया धात्वर्थे हननेऽन्वयः। अत एव—

हन्तेः कर्मण्युपष्टम्भात् प्राप्तुमर्थे तु सप्तमीम्।
चतुर्थीबाधिकामाहुः शिलिभागुरिवाग्भटाः॥

इति हरिरप्याह।

उपष्टम्भः संयोगविशेषः, स च कुञ्जरे हननकर्मणि दन्तयोरतिदृढः द्वीपिनि हननकर्मण्यवयवे चर्मणि आरम्भक-संयोगस्वरूपः, गोत्वादिवत् द्वीपित्वादिजातेरवयवावयविवृत्ति-त्वादवयवस्यापि द्वीपित्वम्, गम्यस्याप्ये (२।२।६२) इति सूत्रेण प्रसक्तायाश्चतुर्थ्याः हन्तिकर्मोपष्टम्भे चर्मादौ बाधिका सप्तमी न तु सर्वत्र; तथा सति गम्यस्याप्ये इति सूत्रस्य वैयर्थ्यापत्तेः। दार्शनिकाः (वयं नैयायिकाः) तु कर्म क्रिया तस्या योगे सम्बन्धे (निमित्तात्कर्मयोगे' इति वचन-मनुसृत्येदं व्याख्यानम्) निमित्तवाचकात्सप्तमी भवतीति वचनार्थः निमित्तं तु यत्प्राप्तीच्छाप्रयोज्या, यत्प्रयोजिका वा क्रिया तदुभयम्। तत्राद्ये चर्मणि द्वीपिनं हन्तीत्यादौ सप्तमी। अन्ते "अविद्यारजनीक्षये यदुदेति' इत्यादौ सप्तमी। तथा च चर्मणीत्यत्र सप्तम्याः प्राप्तीच्छैवाऽर्थः, अविद्यारजनीक्षये इत्यादौ तादर्थ्यमनुकूलत्वं वा सप्तम्यर्थः। एवं सहकारित्वं जनकत्वं च निमित्तत्वम्, तत्राद्यं यथा— उपरागे स्नानं, विवाहे श्राद्धम् इत्यादौ। अत्र सप्तम्याः स्वजन्येष्टविशेषजनकत्वमर्थः स्नानादावन्वेति। द्वितीयं यथा गोवधे प्रायश्चित्तमित्यादौ। अत्र दुरितनाशकत्वं प्रायश्चित्तशब्दार्थः। सप्तम्या जन्यत्वमर्थः प्रायश्चित्तैकदेशे दुरितेऽन्वेति। एवमन्यत्रापि निमित्तत्वं बोध्यमित्याहुः॥ अत्र ब्रूमः सहकारित्वं जनकत्वं वा निमित्तत्वमन्यत्र सप्त-म्युत्पत्तौ निमित्तं भवितुमर्हति, प्रकृतसूत्रप्रवृत्तिविषयभूतं हेतुस्वरूपं निमित्तत्वं तु पूर्वोक्तं प्रयोजनरूपमेव, तत्रैव कर्मणा सम्बन्धस्य सत्त्वे प्रकृतसूत्रप्रवृत्तेः। कर्मसम्बन्धा-भावेऽपि निमित्तार्थिका सप्तमी राहूपरागे स्नानमित्यादौ वचनान्तरसाध्यैवेति तस्या न प्रकृतसूत्रविषयत्वमिति विरमामः॥२।२।१००॥

## अप्रत्यादावसाधुना॥२।२।१०१॥

असाधुशब्देन योगे सति सप्तमी विधीयतेऽनेन। प्रत्यादिनिपातयोगे तु न। अत्र सप्तम्या विषयत्वरूपः सम्बन्धोऽर्थः। साधुशब्देन सदाचारवान् कथ्यते। आचरणं क्रियारूपमिति तदिह परिचर्यादिरूपमेव ग्राह्यमिति मातृपदं तत्परिचर्यापर्यन्ते लाक्षणिकम्। नञा च सदाचार-वैपरीत्यमुच्यते न तु तदभावः, तथा सति मातृशब्दस्य पूर्वं साधुनैव योगः स्यात्— पश्चात्साधुशब्दार्थस्याभावेन। स च न युक्तः, समस्तनञः समस्यमानपदार्थेनैव पूर्वं

सम्बन्धस्य योग्यत्वात्, अन्यथा सामर्थ्याभावात्समासो न स्यात् । असामर्थ्येऽपि नञ् समासः— असूर्यम्पश्या राजदारा इत्यादौ गमकविशेषसद्भाव एव स्वीकृतो न सर्वत्र । किं च तथा सति उत्तरसूत्रेण सप्तमी सिद्धैवेति अस्य सूत्रस्य वैयर्थ्यं प्रसज्येत । एवं च मातृपरिचर्याविषयकविपरीताचरणवान् मैत्र इति असाधुर्मातरि मैत्र इत्यत्रान्वयबोधः । अन्ये तु अप्रियकर्तृत्वमसाधुत्वम्, अप्रियं द्विष्टम् । सप्तम्याः समवेतत्वमर्थः, स च द्विष्टपदार्थैकदेशे द्वेषेऽन्वेति । तथा च मातृसमवेतद्वेषविषयकार्यकर्ता मैत्र इत्यन्वयबोध इत्याहुः । परन्तु समवेतत्वस्य सम्बन्धसामान्यत्वेनैव विभक्त्यर्थत्वं न तु तेनैव रूपेणेति स्वीकरणीयम्, तत्तद्रूपेण प्रतिलक्ष्यं सप्तम्यर्थस्वीकारे विनिगमकाभावात् । वाक्यार्थबोधे विशेषरूपेण भानन्त्वाकाङ्क्षादिवशादित्यवधेयम् ।।२।२।१०१।।

## साधुना ।२।२।१०२।।

साधुशब्देन युक्तान्नाम्नः सप्तमी विधीयतेऽनेन । अप्रत्यादावित्येव । साधुशब्दश्च सदाचारवति प्रसिद्धोऽपि प्रियाचरणशीलमिह प्रत्याययति । विषयत्वरूपः सम्बन्ध एव सप्तम्यर्थः । तथा च साधुर्मैत्रो राजनीत्यादौ राजविषयकप्रियाचरणशील इति बोधः । रणे साधुरित्यादौ च समर्थार्थः साधुशब्दः रणविषयकसामर्थ्यवानिति बोधः । अन्ये चात्र सप्तम्या निरूपितत्वमर्थः सामर्थ्येऽन्वेति । तथा च रणनिरूपितसामर्थ्यवानित्यन्वयबोध इत्याहुः । साधुर्भृत्यो राज्ञ इत्यादौ तु राज्ञो भृत्येन सम्बन्धस्तद्विशेषणतया च साधुशब्दः प्रयुक्त इति साधुशब्देन राज्ञो योगाभावात् सप्तमी न भवति, राज्ञः तत्सम्बन्धविवक्षायां साधुर्भृत्यो राजनीति भवत्येव सप्तमीति बृहद्वृत्यादौ स्पष्टम् ।।२।२।१०२।।

## निपुणेन चार्चायाम् ।२।२।१०३।।

अत्र चकारेण साधुनेति पूर्वसूत्रं समुच्चीयते । तथा च निपुणशब्देन साधुशब्देन च योगे सप्तमी विभक्तिर्भवति अर्चायां गम्यमानाम् । अर्चा च प्राशस्त्यानुकूलो व्यापारः स च प्रयोगोपाधितया गम्यमान एवापेक्षितो न तु विभक्त्यर्थः । विभक्त्यर्थस्तु विषयत्वरूपः सम्बन्धविशेष एव । साधुशब्दार्थः प्रियकारित्वरूपः । निपुणशब्दार्थश्च कर्तव्यगोचराप्रमत्त कृतिमत्त्वम् । मातरि निपुणः इत्यत्र मातृविषयककर्तव्यविषयकाप्रमत्तकृतिमत्तया प्रशस्त इति बोधः । पितरि साधुरित्यत्र पितृविषयकप्रियकारितया प्रशस्त इति बोधः । प्रशंसांशश्च न शाब्दतया भासतेऽपि तु पार्ष्णिकः प्रयोगोपाधित्वेन प्रतीयमानः ।। अन्ये तु— समर्थः साधुशब्दार्थः, सामर्थ्यं जनकतावच्छेदकधर्मवत्त्वं सदेव स्वरूपयोग्यत्वम् । सावहितकृती निपुणशब्दार्थः । सावहितकर्तृत्वमप्रमत्तकर्तृत्वम्, तदपि कर्तव्यतागोचर— पुनः— पुनःस्मरणाधीनकृतिमत्त्वम् । तत्र सप्तम्यर्थोऽर्चा, सामर्थ्यैकदेशे जनकत्वे निरूपकतया, निपुणपदार्थैकदेशे तादृशस्मरणाधीनकृतौ च विषयितयाऽन्वेति । अर्चा तु प्रीत्यनुकूलो व्यापारः, तत्र प्रीतौ प्रकृत्यर्थस्य समवेतत्वेनान्वयः । प्रीतिः सुखं, सुखसाधनं वा तथा च मातृसमवेतप्रीत्यनुकूलव्यापारनिरूपितजनकतावच्छेदकधर्मवान्; मातृसमवेतप्रीत्यनुकूलव्यापारविषयिणीकर्तव्यतागोचरपुनः पुनःस्मरणाधीना या कृतिस्तद्वान्— इति च मातरि साधुः, मातरि निपुण इत्यत्र क्रमशो बोधः । अर्चायां गम्यमानायामिति वृत्तौ यदुक्तम्, तन्न युक्तम् अत्र सूत्रेऽर्चायाः सप्तम्यर्थत्वेनैव विवक्षितत्वात् । न तु तस्या मानान्तर गम्यत्वम् । तथा सति पूर्वसूत्रवैयर्थ्यापत्तेः । मातृप्रियकारित्वावगमे मात्रर्चाया अवश्यं गम्यत्वात्, पृथक्सप्तमीविधानप्रयोजनाभावात् । पृथक्सप्तमीविधानस्य हि एतदेव प्रयोजनं यत्रार्चा न विवक्षिताऽपि तु तत्त्वकथनमात्रं तत्रापि साधुशब्दप्रयोगे सप्तमी यथा स्यादिति । साधुशब्दप्रयोगे चार्चाया गम्यमानत्वं

निश्चितमिति प्रकृतसूत्रेणैव तत्र सप्तमी भविष्यतीति पृथक्-सूत्रारम्भस्य वैयर्थ्यं स्पष्टमेव । सप्तम्या अर्चार्थकत्वोपगमे तु पूर्वसूत्रस्य न वैयर्थ्यम्, तत्र सप्तम्या अर्थान्तरपरत्वात् इति प्राहुः, तन्न युक्तम्, साधुशब्दस्य सदाचारपरत्वार्थक-त्वस्य पूर्वसूत्रे वर्णितत्वेन सदाचारश्च तत्सम्बन्धिपरिचर्यादि-क्रियायामुचितकर्त्तव्यपरायणतैवेति तावता तत्र अर्चाया गम्यमानत्वस्य नैयत्याभावात् । अर्चा हि प्रशंसा, सा चोत्कृष्टकृतिमत्तया भासते, यश्च यथोचितमाचरति-नासावुत्कृष्टकृतिमान्, उचितादभ्यधिकमाचरन्नेवोत्कृष्टतया मण्यते । तथा च तत्त्वकथने पूर्वसूत्रं प्रवर्त्ततेऽर्चाविवक्षायां चेदमिति विषयविभागसत्त्वात् पूर्वसूत्रस्य न वैयर्थ्यम् अर्चा ह्यत्र च मातुर्विवक्षिताऽपि तु साधुकारिणः पुत्रस्य, तस्या विभक्त्यर्थत्वे तु प्रकृत्यर्थे एवान्वयः स्यादिति न पुत्रे तत्प्र-तीतिः स्यादिति वृत्तौ यदर्चाया गम्यमानत्वमुक्तं तदेव युक्तम्— न तु तस्या विभक्त्यर्थत्वमिति साधीयः पश्यामः ॥ २।२।१०३॥

## स्वेशेऽधिना ।२।२।१०४॥

स्वम्— ईशितव्यम्, ईशः ईश्वरः, उभयवाचकपदा-त्पर्यायेण सप्तमी भवति अधिना योगे सति । अधिः स्वस्वामिभावं सम्बन्धं द्योतयति, सप्तमी तु विषयत्वरूप-सम्बन्धार्थिका । स्वस्वामिभावस्य चेशेशयितव्योभयनिष्ठ-तया यत्र योऽर्थः प्रधानं तत्र तस्य क्रियान्वयित्वेन प्राधान्या-त्तदनुरोधिनी प्रथमैव भवतीति परिशेषादप्रधाने एव सप्तमी भवति । प्रतिपादितं चैतद्बृहद्वृत्तावपि । बृहन्न्यासे चैन-दित्थं व्याख्यातम्—"सर्वत्र सम्बन्धे किञ्चिदनूद्यते किञ्चि-दाख्यायते । यत् प्रसिद्धं तदनूद्यते, यदप्रसिद्धं तदाख्यायते-विधीयते ज्ञाप्यते । तत्र यद् विधीयते तत् प्रधानम्, यद-नूद्यते तदप्रधानम् । तत्र यदप्रधानतया विवक्ष्यते तत्र सप्तमी भवति नेतरत्रेत्युभयत्र ( विवक्षावशात् ) पर्यायेण सप्तमी भवति न यौगपद्येनेति । अधिमगधेषु श्रेणिक इति । मगधविषयकस्वामित्ववान् श्रेणिक इत्यन्वयबोधः । अधि-श्रेणिके मगधा इति श्रेणिकविषयकस्वत्ववन्तो मगधा इत्यन्वयबोधः । अन्ये तु सप्तम्याः स्वामित्वमर्थः तच्-चाधिशब्दद्योत्यम् । तत्र प्रकृत्यर्थस्य निरूपकतयाऽन्वयः । तथाविधस्वामित्वस्य श्रेणिकेऽन्वयः । तथा च मगधनिरू-पितस्वामित्ववान् श्रेणिक इत्यन्वयबोधः । अधिश्रेणिके मगधा इत्यत्र चाधिद्योत्यं सप्तम्याः स्वत्वमर्थः तत्र निरू-पकतया प्रकृत्यर्थस्यान्वयः । तथा च श्रेणिकनिरूपितस्व-त्ववन्तो मगधा इत्यन्वयबोधः इत्याहुः ॥२।२।१०४॥

## उपेनाधिकिनि ।२।२।१०५॥

उपेन युक्तादध्यारूढवाचकान्नाम्नः सप्तमी विधीयते प्रकृतसूत्रेण । यदध्यारोहति कस्मादपि केनापि गुणेनोत्कर्ष-मावहति तदधिकम् । यच्चाध्यारुह्यतेऽधःक्रियते तदिहाधिकि-पदेन गृह्यते । तदध्यारोहणक्रियायाः कर्मभूतम् । अध्या-रूढपदं कर्तरि कर्मणि च क्तप्रत्ययेन निष्पद्यते इति तद्वा-चकमधिकपदमप्युभयार्थकं यद्यपि भवति तथापि कर्मण एव विभक्तिप्रकृतित्वं बोधयितुमधिकिनीति निर्देश इति बोध्यम् । उपशब्दश्च तयोस्तादृशं सम्बन्धं द्योतयति । अत्र सप्तम्या आधार आधेयत्वं वा यथामतमर्थः । तत्रौ-पश्लेषिकाधारविवक्षया सप्तम्यां सिद्धायामपि पुनर्विधानं सम्बन्धविवक्षया षष्ठ्या, अवधिविवक्षया पञ्चम्या वा बाधनार्थमिति विज्ञेयम् । कार्षापणोऽधिको निष्कस्येत्यर्थ इति कथनेन सम्बन्धसामान्यम्— 'द्रोणोऽधिकः खार्याः' इत्यर्थकथनेन च पञ्चम्या अपि प्राप्तिः सूचिता । अन्ये तु सर्वत्रात्र षष्ठ्या एव बाधः । अधिकेन भूयसस्ते ( २।२।१११ ) इति वक्ष्यमाणा पञ्चमी नेह प्राप्ता-यतोऽधिकशब्दस्य खार्यादिना सह सम्बन्धो न विवक्षितोऽपि तु— द्रोणादिनैवेति ॥ अन्ये तु 'उपनिष्के कार्षापण' इत्यादौ उपशब्दद्योत्यमाधिक्यं सप्तम्यर्थः, तत्र प्रकृत्यर्थस्यावधिभाव-सम्बन्धेनान्वयः तथाविधस्याधिक्यस्य कार्षापणेऽन्वयस्तथा

च निष्कावधिकाधिक्यवान् कार्षापण इत्यन्वयबोधः । अत्राधिक्यं तु मूल्यगताऽवयवगता वा बहुत्वस्याप्यसंख्यैवेति बोध्यमित्याहुः ॥२।२।१०५॥

## यद्भावो भावलक्षणम् ॥२।२।१०६॥

यस्य क्रियया क्रियान्तरं लक्ष्यते तस्माद्गौणान्नाम्नः सप्तमी विधीयतेऽनेन सूत्रेण । एका क्रिया लक्षिका अपरा च लक्ष्या । तथा च लक्षकक्रियायुक्तान्नाम्नः सप्तमी भवति । यद्धि प्रसिद्धं भवति तल्लक्षकं लक्षणं वा । अप्रसिद्धं च लक्ष्यम् । गोषु दुह्यमानासु गत इत्यत्र गवां दोहकालः प्रसिद्ध इति दोहक्रिया गमनक्रियां कालेन लक्षयति । लक्षणक्रियावत्या गोः सप्तमी भवति । तस्याश्च कालिकमधिकरणमर्थः । यस्मिन् काले गावो दुह्यन्ते तस्मिन्काले गत इत्यर्थात् । तत्र च कालो वर्तमानत्वादिना यथाप्रयोगं भासते इत्यन्यत् । अन्ये च सप्तम्याः कालवृत्तित्वमर्थः । काले प्रकृत्यर्थस्य स्वसम्बन्धिभावस्याधिकरणतया, तत्प्रागभावाधिकरणतया तन्नाशाधिकरणतया वा यथायोग्यमन्वयः । विद्यमानदोहनकर्मणां दुह्यमानशब्दार्थानां गोषु तादात्म्येनान्वयः तथाभूतानां गवां सप्तम्यर्थैकदेशे काले स्वकर्मकदोहनाधिकरणतयाऽन्वयः । तथाभूतस्य सप्तम्यर्थस्य कालवृत्तित्वस्य गमनादौ क्रियान्तरेऽन्वयः । तथा च विद्यमानदोहनकर्माभिन्नानां गवां स्वकर्मकदोहनाधिकरणं यः कालः तद्वृत्ति भूतं यद्गमनं तत्कर्तेत्यन्वयबोधः । कर्मपारतन्त्र्येण भासमानाया दोहनक्रियायाः गमनेऽपि कालघटितपरम्परयाऽन्वयः, विशिष्टान्वयसामग्रीबलात् । क्रियायां परम्परया विशेषणत्वमेवोपलक्षकत्वम् । एवं गोषु धोक्ष्यमाणासु दुग्धासु वा आगत इत्यादौ सप्तम्यर्थैकदेशे काले गवादेः स्वकर्मकदोहनस्य प्रागभावाधिकरणतया नाशाधिकरणतया वा पूर्ववदन्वयो बोध्यः । प्रकृते दोहनादीनां विद्यमानत्वभावित्वातीतत्वानि— क्रियान्तरकालवर्तमानत्व— तथाविधकालवृत्तिप्रागभावप्रतियोगिकालवृत्तित्व — तथाविधकालवृत्तिनाशप्रतियोगिकालवृत्तित्वानि बोध्यानि । न तु— प्रयोगाधिकरणकालघटितानि वर्तमानत्वादीनि । तथा सति आगत इत्यत्र क्तार्थातीतत्वादेरनन्वयप्रसङ्गात् । एवं "नष्टेषु धार्तराष्ट्रेषु द्रौणिः सुप्तान् जघान तान्" इत्यादौ सप्तम्यर्थैकदेशे काले स्वकर्तृकनाशाधिकरणतया प्रकृत्यर्थस्य धार्तराष्ट्रादेरन्वयः, क्तप्रत्ययार्थातीतत्वं विद्यमाननाशप्रतियोगिकालवृत्तित्वरूपं नाशेऽन्वेति । तथा च विद्यमाननाशप्रतियोगिकालवृत्तिनाशप्रतियोग्यभिन्नानां धार्तराष्ट्राणां स्वकर्तृकनाशाधिकरणं यः कालस्तत्कालवृत्तिसुप्तकर्मकं यदतीतं हननं तत्कर्ता द्रौणिरित्यन्वयबोधः । कालार्थककृदन्तार्थविशिष्टप्रकृत्यर्थान्वितः प्रदर्शितसप्तम्यर्थो भावे ( क्रियायाम् ) एवान्वेति न तु नामार्थे, अतो गोषु दुह्यमानासु घट इत्यादौ नान्वयबोधः ।

यत्तु गोषु दुह्यमानास्वागत इत्यादौ गोपदोत्तरसप्तम्याः कर्मत्वमर्थः दोहनादौ धात्वर्थेऽन्वेति, कृदन्तोत्तरसप्तम्याः कालवृत्तित्वमर्थः । शानजातिकृतौ वर्तमानत्वमर्थः तथा च गोकर्मकवर्तमानकालवृत्त्यागमनवानित्यन्वयबोध इत्युक्तम् तन्न सुन्दरम्, गवादौ दुह्यमानाभेदस्यापलापप्रसङ्गात् । गोषु दुह्यमाने समागत इत्यादिप्रयोगप्रसङ्गात्, गोषु दुह्यमानास्वागत इत्यादिप्रयोगस्यासाधुत्वप्रसङ्गाच्च । सप्तम्याः कर्मत्वार्थकत्वमपि न युज्यते अनुशासनविरहात् ।

एवं "भुक्तवत्सु च विप्रेषु पिण्डान्दर्भेषु निर्वपेत्" इत्यादौ सप्तम्यर्थैकदेशे कालेऽतीतभोजनकर्तुः स्वकर्तृकभोजननाशाधिकरणतयाऽन्वयः । भोजनस्य तु स्वनाशसमानकालिकतया निर्वापेऽन्वयो विशिष्टान्वयबलात् । क्वचित्समानकालिकतया क्रिययोरन्वये प्रयोज्यप्रयोजकभावेनाप्यन्वयः । यथा "पठत्सु तेषु प्रतिभूपतीनलं विनिद्ररोमाजनि शृण्वती नलम्" इति नैषधप्रयोगे प्रतिभूपतिपाठ— नलश्रवणयोः समानकालिकतयाऽन्वयेऽपि प्रयोज्यप्रयोजकभावेनाप्यन्वयः । यथा— वा "गोविन्दे मथुरां याते क्वथन्ते गोपयोषितः" इत्यादौ गोविन्दगमनस्य स्वनाश-

कालिकतया गोपीव्यथायामन्वयेऽपि प्रयोज्यप्रयोजकभावेनाप्यन्वयः ॥

एवं सूत्रे भावलक्षणमित्यत्र भावः स्वभावः स्वरूपमिति यावत्, तथा च स्वरूपस्य लक्षणं विशिष्टतया ज्ञापकमित्यपि सूत्रार्थः । अत एव गुणान्यत्वे सति जातेः, सत्त्वाद्वा इत्यादौ न सप्तम्यनुपपत्तिः, गुणान्यत्वसामानाधिकरण्येन विशेषणेन जातेः सत्ताया वा विशिष्टतया ज्ञापनम् इति सप्तमी साधुरेव । अत्र शत्रन्तास्धात्वर्थस्य वर्तमानकालविशिष्टसत्ताविशिष्टस्य तादात्म्येन गुणान्यत्वादावन्वयात् गुणान्यत्वादिशब्दानन्तरसप्तम्या अधिकरणवृत्तित्वमेवार्थः, तच्च जातौ सत्तादौ वाऽन्वेति । वर्तमानकालवृत्तिसत्ताविशिष्टस्य तादात्म्यान्वयबलादेव गुणान्यत्वादिकालवर्त्तित्वस्यार्थत एव लाभात्, न कालवृत्तित्वं सप्तम्यर्थः, इत्यधिकरणवृत्तित्वस्वरूपसप्तम्यर्थलाभायैव सतीति शत्रन्तोपादानं, न तु तदर्थस्य हेतुताऽवच्छेदकेऽनुप्रवेशः । सामानाधिकरण्येन गुणान्यत्वविशिष्टजातित्वादेरेव तथात्वात् इति दर्शितप्रयोगेऽपि सप्तम्युपपत्तिरिति ।

यत्तु "शरदि पुष्यन्ति सप्तच्छदा" इत्यादावुत्पत्तिरूपस्य ज्ञापनार्थमथवा पुष्पोत्पत्तिमत्त्वविशिष्टसप्तच्छदत्वावच्छेदेन शरदादिवृत्तित्वस्यान्वयार्थं 'कालभावयोः, इति कुमारसूत्रेण काले सप्तम्या विध्यन्तरम्, अन्यथा शरदि पुष्यन्ति पलाशा इत्यादि प्रयोगप्रसङ्गः, शरद्वृत्तित्वस्य पलाशे पुष्पे वा सत्त्वादिति कालापैरुक्तम्, तदसत् पुष्यर्थे पुष्पोत्पत्तौ शरद्वृत्तित्वस्यान्वयोपगमादेव दर्शितप्रयोगवारणसम्भवात्, कारकान्यसप्तम्यर्थस्य क्रियायां साक्षादन्वयोपगमात् शुक्तौ रजतत्वं जानातीत्यादौ विशेष्यतासंसर्गावच्छिन्नस्य शुक्त्याधेयत्वादेरिव ज्ञानादौ, तथा च न काप्यनुपपत्तिरिति काले सप्तमीविध्यन्तरमप्रामाणिकमेव । "शरदि पुष्यन्ति सप्तच्छदा" इत्यत्र पुष्यतेः पुष्पोत्पत्तिरर्थः, तेः पुष्पघटितपरम्परासंसर्गावच्छिन्नमाधेयत्वमर्थः, सप्तम्याः कालिकसम्बन्धावच्छिन्नाधेयत्वमर्थः । तथा च शरद्वृत्तेः पुष्पोत्पत्तेरेवाश्रयाः सप्तच्छदा इति बोधः । एवं "शरदि पुष्यन्ति पद्मिन्य" इत्यादावप्यन्वयो बोध्यः । न च पुष्यतेः पुष्पमर्थः, तेः आश्रयत्वमर्थः अत एव सप्तम्या उत्पत्तिरर्थ इति वाच्यम्, तथा सति माल्यं गुणो वा पुष्यतीति प्रयोगापत्तेः । न च पुष्यतेः पुष्पं तेः उत्पत्तिरर्थः उत्पत्तेः परम्परया प्रथमार्थे, सप्तम्यर्थस्याधेयत्वस्योत्पत्तावन्वय इति वाच्यम्, स्याद्यर्थत्याद्यर्थयोः परम्परान्वयस्य सर्वैरनभ्युपेतत्वात् त्याद्यर्थस्य प्रथमान्तार्थे साक्षादेवान्वयस्य व्युत्पन्नत्वात् अन्यथा ज्ञानं सुखं द्वेषो वा पचतीति प्रयोगप्रसङ्गात्, त्याद्यर्थकृतेः सामानाधिकरण्येन ज्ञानादेरन्वयसम्भवादिति पूर्वोक्तरीतिः श्रेयसी इत्यादि प्रपञ्चयन्ति ॥

अत्र लक्षकक्रियायाः प्रयोग एव लक्षकान्नाम्नः सप्तमी भवतीति न नियमः किन्तु गम्यमानायामपि क्रियायां सप्तमी भवतीति प्रतिपादितं बृहद्वृत्तौ— **गम्यमानेनापि भावेन भावलक्षणे भवतीत्यादिना** । आम्रेषु कलायमात्रेषु गतः पक्वेष्वागत इति । आम्राणां तत्तत्प्रसिद्धवस्तुपरिमाणेन तादृशावस्थाविशिष्टः कालो लक्ष्यते । तस्मिन्काले च आम्राणां या स्थितिर्जायते तस्यां दशायां स गतः, यश्च तेषां पाककालो नियतस्तत्र समागत इत्यर्थप्रतीतेः कलायमात्रेषु इत्यतः परं जातेष्विति पदमध्याह्रियते । तदाह **अत्र जातेष्विति गम्यत इति** । तथा च गम्यमाना जननलक्षणक्रिया गमनस्य लक्षिका भवतीति न लक्ष्यलक्षणभावानुपपत्तिः क्रिययोः । गम्यमानक्रियाया अपि विभक्तिनिमित्तत्वे विप्रतिपन्नं प्रति दृष्टान्तेनोक्तमर्थं द्रढयति— **यथा वृक्षे शाखा ग्रामे चैत्र इति** । अत्र का क्रिया गम्यमानेत्याह— **भवति वसति चेत्याधारनिमित्तं भवतीति** । अयमाशयः कर्तृकर्मद्वारा क्रियाया आश्रयस्यैवाधारत्वमिति क्रियायां प्रयोगाभावेऽपि गम्यमानां भवनादिक्रियामादायैव तदाश्रयस्य वृक्षादेरधिकरणत्वमिति सप्तमी सिध्यति इति ।

अत्र प्रकरणे अर्हाणां कर्तृत्वेऽनर्हाणामकर्तृत्वे तद्वै–

परीत्ये च सप्तमीं विदधति अन्ये वैयाकरणाः, तदपि प्रकृत-सूत्रेणैव गतार्थयति— **यत्र क्रियाद्वयं कारकत्वं तद्विपर्ययो** वेत्यादिना **बृहद्वृत्तौ**। उदाहृतं च ऋद्धेषु भुञ्जानेषु दरिद्रा आसते इत्यादिना। अत्रापि क्रियाद्वयस्य लक्ष्यलक्षणभावः प्रतीयत एवेति यदा ऋद्धानां भोजनस्य लक्षणत्वं तदा ततः सप्तमी भवति, दरिद्राणां तस्मिन्समये भोजनस्यावसराभावात् आसनक्रियाकर्तृत्वं तेषाम्, सैव क्रिया प्रकृते लक्ष्या। तथा च नैतदर्थं विशेषवचनमावश्यकम्। लक्षणस्य ( सूत्रस्य ) व्यापकत्वेन सर्वत्र प्रसरात्॥ २।२।१०६॥

## षष्ठी वाऽनादरे ॥२।२।१०८॥

यद्भावो भावलक्षणमिति सम्बध्यते। तथा च यस्य भावेन भावान्तरं लक्ष्यते ततः सप्तमी षष्ठी च प्रकृतसूत्रेण विधीयतेऽनादरे गम्यमाने। रुदतो लोकस्य बन्धुवर्गस्य वा प्राव्राजीत्, रुदति लोके बन्धुवर्गे वा प्राव्राजीत् इत्युदाहरणम् अत्रापि सप्तम्याः षष्ठ्याश्च कालिकमधिकरणमेवार्थः, यस्मिन् काले लोको बन्धुवर्गो वा रुदन्नासीत् तस्मिन्नेव कालेताननादृत्य प्रव्रज्यायै निर्गत इत्यर्थस्य गम्यमानत्वेन उभयोः क्रिययोरेककालवृत्तित्वं प्रतीयतेऽनादरश्चाधिकः। रोदनं लक्षणम्, प्रव्रजनं लक्ष्यम्। अन्ये च षष्ठीसप्तम्योः कालवृत्तित्वमनादरश्चाधिकोऽर्थः। सोऽपि समानकालिकतया क्रियान्तरेऽन्वेति। अनादरोऽवहेला सा च समीहितासिद्धि-स्वरूपा। रुदतः समीहितं तत्पुरुषस्य गार्हस्थ्यं प्रव्रज्या विरहो वा तदसिद्धिः प्रव्रजने सति भवत्येव। तथा च रुदत्काल-वृत्तिरुदत्समीहितस्य गार्हस्थ्यादेरसिद्धिकालिकी याऽतीत-कालवृत्तिप्रव्रज्या तत्कर्तृत्वं वाक्यार्थः। अनादरस्य नोत्तर-कालिकतयाऽन्वयः, समीहितस्य प्रव्रज्याविरहस्याभावः प्रव्रज्या तत्स्वरूपं क्रियान्तरं न तदुत्तरकालिकं भवतीत्यनुप-पत्तिप्रसङ्गात्। उभयोः क्रिययोः समानकालिकत्वज्ञापनायैव रुदन्तं ( पुत्रादिकं ) मनादृत्य प्राव्राजीदित्यर्थ इति वृत्ता-वुक्तम्। एवं पश्यतः पश्यति वा सुवर्णं हरतीत्यादावपि अनादरो गम्यत एवेति बोध्यम्। सुवर्णहरणाभाव एव द्रष्टुः समीहितः।

एवं 'यतमानानां यतमानेषु वा धार्तराष्ट्राणां धार्तराष्ट्रेषु वा जयद्रथमवधीत्'' इत्यादौ यतमानानां धार्तराष्ट्राणां जयद्रथस्य रक्षणं वधाभावो वाऽभिमतः, तदसिद्धिरूपाऽवहेलेहापि गम्यत एव। यदुद्देश्यकेच्छाप्रयोज्या क्रिया क्रियान्तरं लक्षयति तस्येच्छोद्देश्यस्यासिद्धिः समीहितासिद्धिर्बोध्या। तेन भुञ्जानस्य भुञ्जाने वा सुवर्णं हरतीति न प्रयोगः। यतः सुवर्ण-हरणाभावोद्देश्यकेच्छाप्रयोज्या न भोजनक्रिया। तथा भूतेच्छा प्रयोज्या च पश्यतः पश्यति वा सुवर्णं हरतीत्यादौ दर्शनक्रिया। रोदनादिक्रियायाः करुणोत्पादनद्वारा प्रव्रज्या-विरहानुगुणत्वावगमात् प्रव्रज्याविरहोद्देश्यकेच्छाप्रयोज्यत्वं रोदनक्रियायाः। अथवा तथाभूतेच्छोद्देश्यस्य विरोधिनी-क्रियाऽनादरः। तत्र क्रिया धातुपात्तैव तथाभूतोद्देश्यकेच्छा-विरोध एव षष्ठीसप्तम्योरर्थः। विरोधस्तु एककाला-वच्छेदेनैकत्रावर्तमानत्वम्। तथा च इच्छोद्देश्यो यः प्रव्रज्या-विरहादिः तद्विरुद्धमतीतकालवृत्ति प्रव्रज्यादिकं वाक्यार्थः, इत्यादि प्रपञ्चयन्ति। तत्र अनादरस्य इच्छोद्देश्यविरोधस्य वा विभक्त्यर्थत्वमनुशासनविरुद्धमिति कालवृत्तित्वमेव विभक्त्यर्थोऽनादरश्च प्रयोगोपाधितया प्रतीयत इति बोध्यम् ॥२।२।१०८॥

## सप्तमी चाविभागे निर्धारणे॥२।२।१०९॥

कथंचिद् ऐक्ये गम्यमाने सति समुदायादेकदेशस्य पृथक्करणे गौणान्नाम्नः सप्तमी षष्ठी च विधीयते प्रकृत-सूत्रेण। पृथक्करणं च कंचिद्धर्ममाश्रित्य भवति। स च धर्मो जातिगुणक्रिया- व्यक्त्यादिरूप एव। क्षत्रियः पुरु-षाणां शूरतम इत्यादौ क्षत्रियत्वं जातिः, 'कृष्णा गोषु संपन्नक्षीरतमा' इत्यादौ कृष्णो गुणः, धावन्तो गच्छत्सु

शीघ्रतमा इत्यादौ धावनं क्रिया, युधिष्ठिरः कुरुषु श्रेष्ठतम इत्यादौ युधिष्ठिरो व्यक्तिश्च निर्धारणहेतुः। विभक्ती षष्ठीसप्तम्यौ निर्धारणार्थे। तथा च पुरुषत्वावच्छिन्नसमुदायतादात्म्यवान् क्षत्रियत्वविशिष्टः शूरतम इत्यादिर्बोधः। अत्र केचित्– पुरुषाणां पुरुषेषु वा क्षत्रियः शूरतम इत्यादौ विशेषान्यत्वं व्यावृत्तत्वं तादात्म्यं चेति त्रयः षष्ठीसप्तम्योरर्थाः। विशेषस्तु समभिव्याहृतक्षत्रियादिर्विशिष्य ग्राह्यः। व्यावृत्तत्वं च भेदप्रतियोगित्वम्, तथा च क्षत्रियस्य पुरुषविशेषतया क्षत्रियान्यत्वस्वरूपं विशेषान्यत्वं पुरुषेऽन्वेति। तथान्वितस्य पुरुषस्य क्षत्रियान्यपुरुषत्वावच्छिन्नाधिकरणतानिरूपिताधेयतया भेदे प्रतियोगित्वविशेषणीभूतेऽन्वयः। तथान्वितस्य भेदप्रतियोगित्वस्य शूरतमेऽन्वयः। तथा च क्षत्रियान्यपुरुषत्वावच्छिन्नवृत्तिकभेदप्रतियोगित्ववच्छूरतमत्वाभिन्नः पुरुषाभिन्नः क्षत्रिय इत्यादिरूपेणान्वयबोधः। विशेषान्यत्वोपादानात् पुरुषाणां पुरुषेषु वा क्षत्रियो द्विजातिरिति न प्रयोगः, क्षत्रियान्यपुरुषवृत्तिभेदप्रतियोगित्वस्य द्विजातौ विरहात्। द्विजातिभेदस्य क्षत्रियान्यचाण्डालादिवृत्तित्वेऽपि क्षत्रियान्यपुरुषत्वावच्छिन्नवृत्तिकत्वविरहात्। भेदप्रतियोगित्वस्यानुपादाने दर्शितवाक्यस्यायोग्यत्वप्रसङ्गः, क्षत्रियान्यनरतादात्म्यस्य शूरतमे क्षत्रिये च बाधात्। न च विशेषान्यत्वभेदप्रतियोगित्वयोरुभयोरपि नोपादानं व्यर्थत्वात्, तादात्म्यस्यैवोपादानमिति वाच्यम्, तथा सति नराणां क्षत्रियः प्राणीति प्रयोगप्रसङ्गात्; नरतादात्म्यस्य प्राणिनि क्षत्रियेऽपि सत्त्वात्। तादात्म्यस्यानुपादाने घटानां क्षत्रियः शूरतमः इत्यादिप्रयोगप्रसङ्गः, क्षत्रियान्यघटवृत्तिभेदस्य क्षत्रिये सत्त्वात्। न च संख्यान्य-स्याद्यर्थस्य प्रकृत्यर्थविशेष्यत्वनियमात् क्षत्रियान्यत्वादिरूपस्य षष्ठ्याद्यर्थस्य प्रकृत्यर्थप्रकारत्वायोग इति वाच्यम् संबोध्यत्वादेः प्रथमार्थस्य प्रकृत्यर्थे प्रकारत्वोपगमेन दर्शितनियमे व्यभिचारात्, तस्य प्रायिकत्वात्। न च पुरुषाणां क्षत्रियो द्रव्यमिति प्रयोगः स्यात्—क्षत्रियान्यपुरुषत्वावच्छेदेन द्वित्वाद्यवच्छिन्नप्रतियोगिताकद्रव्यभेदस्य सत्त्वादिति वाच्यम्, द्रव्यत्वादिविशिष्टे धर्मिणि द्रव्यत्वाद्यवच्छिन्नस्यैव भेदप्रतियोगित्वस्य बोधने निर्धारणविभक्तेः समर्थत्वात्। यद्यपि भेदः प्रतियोगित्वं चेति द्वयमेव निर्धारणविभक्तेरर्थो युज्यते तावतैवाभिमतनिर्वाहात्, प्रतियोगितया क्षत्रियान्वितस्य विशेषणतया पुरुषेऽन्वयात्, तथान्वितस्य पुरुषस्य पुनर्भेदे प्रतियोगितयाऽन्वयात् तथान्वितस्य भेदस्य निरूपकतया प्रतियोगित्वे, तथान्वितस्य प्रतियोगित्वस्य शूरतमेऽन्वयसंभवात्। तथापि क्षत्रियादेर्नामार्थस्य स्वार्थकनामोत्तरविभक्त्यर्थ एव प्रकारतया भेदान्वयस्य व्युत्पन्नत्वात् पुरुषादिनामोत्तरविभक्त्यर्थे तथा तदन्वयस्याव्युत्पन्नत्वात्। न च पुरुषस्य पुरुषे वा क्षत्रियः शूरतम इत्यादिरूपेण निर्धारणविभक्त्येकवचनप्रयोगः स्यादिति वाच्यम्, पाणिपादस्य पाणिः पवित्रः इत्याद्येकवचनवदन्यत्रापि निर्धारणविभक्त्येकवचनप्रयोगे क्षतिविरहात्। अत एव "द्वन्द्वः सामासिकस्य च" इत्यादि गीतावाक्यमपि सङ्गच्छते।

ननु "पाथः पृथिव्योर्जलं स्नेहवत्" इत्यादौ जलभिन्नयोः पाथः पृथिव्योरप्रसिद्धया पाथः पृथिव्युभयवृत्तिभेदप्रतियोगित्वस्य स्नेहवति बाधेन च जलान्यपाथःपृथिव्युभयत्वावच्छिन्नवृत्तिभेदप्रतियोगिनः स्नेहवतो बोधासम्भवः। न च द्विपदद्वन्द्वोत्तरनिर्धारणविभक्तेरन्यतरवृत्तिभेदप्रतियोगित्वमेवार्थः, तन्निविष्टे चान्यतरस्मिन् एवैकपदोपात्तत्वेन जलान्यत्वादेः षष्ठ्यर्थान्यितरस्यान्वयः, तथा च जलान्यो यः पाथः पृथिव्योरन्यतरः तन्निष्ठभेदप्रतियोगित्वं स्नेहवति वर्तत एवेति वाच्यम्, तावतापि पाथः पृथिव्युभयतादात्म्यस्य जले बाधेनोक्तवाक्यस्यायोग्यत्वतादवस्थ्यात्। पाथः पृथिव्योस्तेज उष्णमित्याद्यप्रयोगेण निर्धारणविभक्तेस्तादात्म्यवाचिताध्रौव्यात्। घटतद्भिन्नयोर्घटः कम्बुग्रीवादिमान् इत्यादौ घटतद्भिन्नान्यतराप्रसिद्ध्या तादृशेतरभेदस्य बोधयितुमशक्यत्वादिति चेन्न, द्वन्द्वोत्तरनिर्धारणविभक्तेः पर्याप्तसंख्याश्रयेऽपि शक्तत्वेन तस्मिन्नेवैकपदोपात्तत्वेन विभक्त्यर्थस्य जलान्यत्वरूपनिर्धार्यभेदस्या–

न्वयेन सर्वसामञ्जस्यात्, पाथःपृथिव्योर्जलं स्नेहवदित्यादौ जलभिन्नो यः पाथः पृथिवीपर्याप्तसंख्याश्रयस्तत्त्वावच्छिन्न-वृत्तिकभेदस्य प्रतियोगि स्नेहाभिन्नं पाथः पृथिवीपर्याप्त-संख्याश्रयो जलमित्यन्वये बाधकाभावात्। यत्र तूद्देश्यविधेययोर्न तादात्म्येनान्वयबोधसामग्री किन्तु सम्बन्धान्तरेण, तत्र निर्धारणविभक्तेरत्यन्ताभावप्रतियोगित्वमर्थः यथा पुरुषाणां क्षत्रिये शौर्यमित्यादौ। अत्र क्षत्रियान्यपुरुषत्वावच्छिन्न-वृत्तिकात्यन्ताभावस्य प्रतियोगित्वं शौर्ये प्रतीयते न तु तादृशभेदस्य, तथा सति पुरुषाणां क्षत्रिये रूपमित्यादि-प्रयोगापत्तेः। पुरुषाणां मध्ये क्षत्रियः शूरतम इत्यादौ निर्धारणवाचिनो मध्य इत्यव्ययस्य निर्धारणविभक्त्या सह सम्भेदे हे चैत्रेत्यादाविव नान्यतरवैयर्थ्यमिति वदन्ति; तच्चिन्त्यम्, क्षत्रियान्यत्वादेर्निर्धारणेऽनुप्रवेशे निर्धारण-विभक्तेर्नामार्थतापत्तेः। यत्र चापूर्वो वाक्यार्थः तत्र मित्रा-तनयानां माधवः पण्डित इत्यादौ माधवान्यत्वस्यापूर्वतया तत्र निर्धारणविभक्तिवाच्यत्वस्याग्रहेणान्वयबोधानुपपत्ति-प्रसङ्गात्, द्रोणैकलव्यकालयवनाद्यन्यतमवृत्तेः शूरतमभेदस्य क्षत्रियान्यपुरुषत्वावच्छिन्नवृत्तिकत्वबाधाद् दर्शितवाक्यस्या-योग्यप्रसङ्गाच्च। किं च पर्याप्तिसंख्याश्रये विभक्तिवाच्य-त्वाभ्युपगमेऽपि तत्र विशेषान्यत्वान्वयो न युक्तः, तथा सति धवखदिरयोर्धवखदिरौ छेद्यावित्यादिप्रयोगापत्तेः, पर्याप्त-संख्याश्रये धवान्यत्वखदिरान्यत्वयोरन्वयसंभवात्। न च द्वन्द्वस्थले निर्धारणविभक्तेरिव निर्धार्यपदोत्तरविभक्तेरपि पर्याप्तसंख्याश्रयोऽर्थः तत्रैव निर्धारणान्वय इति वाच्यम्, तथा सति पाण्डवानां युधिष्ठिरभीमार्जुनाः कौन्तेयाः इत्यादौ निर्धार्ययुधिष्ठिरादौ निर्धारणानन्वयप्रसङ्गात्, भिन्नभिन्न-स्याद्यर्थयोः परस्परान्वयस्याव्युत्पन्नत्वाच्च।

यत्तु पुरुषाणां क्षत्रियः शूरतम इत्यादौ राहोः शिर इत्यत्रेवाभेद एव षष्ठ्यर्थः स च क्षत्रियादावन्वेति, तदन्वित-तदन्वयितावच्छेदकक्षत्रियत्वाद्यवच्छेदेन शूरतमस्य तादा-त्म्येनान्वयः तथा च पुरुषाभिन्नक्षत्रियत्वावच्छेदेन शूरतम-स्याभेदो वाक्यार्थः तेन पुरुषाणां क्षत्रियोऽर्जुन इत्यादिको न प्रयोगः, न वा नराणां कीशः पशुरित्यादिकश्च प्रयोगः कीशे मानुषाभेदस्य विरहादिति, तत्तुच्छम्, 'नराणां क्षत्रियः प्राणी' क्षत्रियाणां नरः शूर इत्यादि प्रयोगापत्तेः। यदपि नराणां क्षत्रियः शूर इत्यादौ भेदोऽभेदश्च निर्धारणविभ-क्तेरर्थः, प्रकृत्यर्थे विशेषणीभूय भेदो, भेदे विशेषणीभूय प्रतियोगी क्षत्रियादिरन्वेति, व्युत्पत्तिवैचित्र्येण भेदे पुनः प्रतियोगितया विशेषणान्तरस्य शूरादेरन्वयः, शूराद्यन्वित-भेदस्तु क्षत्रियाभेदान्वितप्रकृत्यर्थतावच्छेदकावच्छेदेन विधेय-तयाऽन्वेति, प्रकृत्यर्थविशेषितोऽभेदः क्षत्रियादावन्वेति, प्रकृत्यर्थाभेदान्विते क्षत्रिये शूरस्य तादात्म्येनान्वयः, तथा च क्षत्रियान्यो नरः शूरभिन्नः, नराभिन्नः क्षत्रियः शूर इति मुख्यविशेष्यताद्वयशाली, समूहालम्बनाकारो द्विविधो-वाऽन्वयबोध इति, तदसत्; नामार्थमुख्यविशेष्यकान्वयबोधे नामार्थस्य प्रथमार्थत्वानियमपरित्यागापत्तेः, संख्यान्य-स्याद्यर्थविशेषणकनामार्थविशेष्यकान्वयबोधस्य अव्युत्पन्नत्वात्। एकपदोपस्थाप्यस्य भेदस्योद्देश्यतावच्छेदकविधेयभावेन कथ-मप्यन्वये व्युत्पत्तिविरहाच्च।

इत्थं च निर्धारणमन्यादृशं बोध्यम्। तथा हि— भेद-प्रतियोगितावच्छेदकधर्मवत्त्वं प्रकृत्यर्थतावच्छेदकत्वोपलक्षित-धर्मसामानाधिकरण्यं च द्वयमेव निर्धारणषष्ठीसप्तम्योरर्थः। दर्शितसामानाधिकरण्यं तु प्रतियोगितावच्छेदकेऽन्वेति। एकपदोपात्तयोरपि त्याद्यर्थ— कृतिवर्तमानत्वयोरिव त्यादिसप्तम्यर्थ— बलवदनिष्टाननुबन्धीष्टसाधनत्वयोरिव, परस्परान्वयस्य व्युत्पत्तिसिद्धत्वात्। एवं पुरुषाणां पुरुषेषु वा क्षत्रियः शूरतम इत्यादौ भेदप्रतियोगितावच्छेदकधर्मः प्रकृत्यर्थतावच्छेदकसामानाधिकरण्ये च षष्ठीसप्तम्योरर्थः। तत्र दर्शितसामानाधिकरण्यं भेदप्रतियोगितावच्छेदकधर्मेऽन्वेति। तथान्वितः स धर्मः क्षत्रियादावपरपदार्थेऽन्वेति। भेदे प्रकृत्यर्थतावच्छेदकपुरुषत्वादौ च विभक्त्यर्थैकदेशे प्रकृत्यर्थस्याधेयतयाऽन्वयः। क्षत्रियादौ विशेषणपदार्थस्य

शूरतमादेः तादात्म्येनान्वयः। शौर्यादिधर्मस्वरूपस्य विशेषणस्य सम्बन्धान्तरेण; तथा च पुरुषवृत्तिपुरुषत्वसमानाधिकरणो पुरुषवृत्तिभेदप्रतियोगितावच्छेदको यस्तद्वान् क्षत्रियः शूरतम इत्यन्वयबोधः। 'नराणां नरेषु वा क्षत्रियो शौर्यम्' क्षत्रियस्यायुधजीवित्वम्, इत्यादौ दर्शितनिर्धारणान्वितस्य क्षत्रियस्याधेयत्वं शौर्ये सम्बन्धः आयुधजीवने चेति। अत्र भेदप्रतियोगितावच्छेदकोऽन्वयितावच्छेदकीभूतयद्धर्मावच्छेदेन भासते, स एव धर्मो भेदप्रतियोगितावच्छेदकत्वेन भासते। यथा— सत्तावन्ति सर्वाणि निखिलजातिव्यापकजातिमन्ति, सकलजातिव्यापकजातिमन्ति सत्तावन्ति वा इत्यादौ सकलजातिव्यापकजातित्वेन सत्तैव भासते, तथा प्रकृते क्षत्रियत्वादिरन्वयितावच्छेदक एव भेदप्रतियोगितावच्छेदकत्वेन भासते इति व्युत्पत्तिः। अत एव क्षत्रियस्य क्षत्रियनिष्ठभेदप्रतियोगितावच्छेदकीभूत — क्षत्रियवैश्यो — भयत्ववत्त्वेऽपि— क्षत्रियाणां क्षत्रियः शूर इत्यादिको न प्रयोगः। न वा द्रव्यस्य तथाभूततादृशोभयत्ववत्त्वेऽपि नराणां द्रव्यं शौर्यवदित्यादिकः प्रयोगः। प्रतियोगितावच्छेदकत्वं प्रतियोगितावच्छेदकधर्मसमनियतत्वं बोध्यम्। अतः पार्थिवपात्राणां कम्बुग्रीवादिमत्— जलाहरणमित्यादिप्रयोगस्य नानुपपत्तिः; कम्बुग्रीवादिमत्त्वादेरन्वयितावच्छेदकस्य प्रतियोगितावच्छेदकत्वविरहेऽपि प्रतियोगितावच्छेदकीभूतघटत्वादिसमनियतत्वात्। तथा चान्वयितावच्छेदकसमनियतो धर्म एव भेदप्रतियोगितावच्छेदकत्वेन प्रकृते भासते इति व्युत्पत्तिः। एतदर्थमेव भेदप्रतियोगित्वमपहाय भेदप्रतियोगितावच्छेदको निर्धारणे प्रवेशितः।

यदि च प्रतियोगित्वमतिरिक्तपदार्थः, तत्रापि विशेषप्रतियोगितातोऽतिरिक्तं सामान्यधर्मावच्छिन्नप्रतियोगित्वमिति मन्यते तदापि अन्वयितावच्छेदकसमनियतधर्मावच्छिन्नप्रतियोगित्वलाभार्थं प्रतियोगितावच्छेदकस्यानुप्रवेशः, तथा च भेदप्रतियोगित्वमेव निर्धारणविभक्तेरर्थः। भेदप्रतियोगितात्वेनान्वयितावच्छेदकसमनियतधर्मावच्छिन्ना प्रतियोगिता — व्यक्तिरेव भासते इति व्युत्पत्तिः। भेदप्रतियोगित्वे तदवच्छेदके वा प्रकृत्यर्थतावच्छेदकसामानाधिकरण्यस्यान्वयोपगमात् ब्राह्मणानां क्षत्रियः शूर इति न प्रयोगः। ब्राह्मणत्वसमानाधिकरणस्य ब्राह्मणवृत्तिभेदप्रतियोगित्वस्य क्षत्रिये विरहात्। न च— दर्शितप्रयोगवारणार्थं निर्धारणविभक्तेस्तादात्म्यमर्थोऽस्तु तादात्म्यस्य क्षत्रियादावन्वय इति न काऽप्यनुपपत्तिरिति वाच्यम्, तथासति पुरुषाभेदविशिष्टे क्षत्रिये शूरस्य तादात्म्येन विधेयत्वोपगमे पुरुषाभेदस्य क्षत्रियविशेषणत्वे वैयर्थ्यप्रसङ्गात्। एवं निर्धार्यतावच्छेदकधर्मसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकधर्मवान् निर्धार्यतावच्छेदकनानाधर्मसमानाधिकरणश्च यो धर्मः तद्वान् तादात्म्येन, स च धर्मः सम्बन्धान्तरेण निर्धार्येऽन्वेतीति व्युत्पत्तिः। धर्मवदित्यन्तोपादानात् नराणां क्षत्रियो द्विजातिः प्राणी वेत्यादिको न प्रयोगः; द्विजातित्वादेः क्षत्रियवृत्त्यन्ताभावप्रतियोगितावच्छेदकत्वविरहात्। समानाधिकरण इत्यन्तोपादानात् 'नराणां नरेषु वा क्षत्रियोऽर्जुनः' इत्यादिको न प्रयोगः; अर्जुनत्वस्य क्षत्रियत्वव्याप्यनानाधर्मसामानाधिकरण्यस्य विरहात्। नानाधर्मोऽपि परस्परविरुद्धो ग्राह्यः, तेनार्जुनत्वस्य क्षत्रियत्वव्याप्यगुणकर्मादिनानाधर्मसामानाधिकरण्येऽपि न दर्शितप्रयोगः। न च निर्धार्यतावच्छेदकावच्छेदेन विधेयान्वयोपगमादेव न दर्शितप्रयोगः, अर्जुनत्वादेर्विधेयस्य निर्धार्यतावच्छेदकक्षत्रियत्वावच्छेदेनान्वया — सम्भवादिति समानाधिकरणान्तोपादानं व्यर्थमेवेति वाच्यम्, तथासति नराणां नरेषु वा क्षत्रियः शूरतम इत्यादिप्रयोगानुपपत्तिप्रसङ्गात्, शूरतमादेर्विधेयस्य क्षत्रियत्वावच्छेदेनान्वयासम्भवात्; रणभीतक्षत्रियादौ शूरतमतादात्म्यविरहेणायोग्यत्वात्। तादृशधर्मसामानाधिकरण्यं तु विधेये, तत्त्वावच्छेदके वा तत्रैव तन्त्रं, यत्र परस्परविरुद्धनानाधर्मसमानाधिकरणमुद्देश्यतावच्छेदकं भवति। तेन पाण्डवानां धनञ्जयोऽहं, गाण्डीवी वेत्यादौ धनञ्जयत्वव्याप्यपरस्परविरुद्धनानाधर्मस्याप्रसिद्ध्या अहंत्वस्य गाण्डीवित्वस्य वा तादृशधर्मसमानाधिकरण्यस्याप्रसिद्ध्याऽपि नान्वयानुपपत्तिः।

न चैवं क्षत्रियाणां धनञ्जयो गाण्डीवीत्यादिप्रयोगः स्यादिति वाच्यम्, इष्टत्वात् ।

यदि च द्रव्याणां क्षत्रियः शूर इत्यादिकः प्रयोगो नेष्यते, तदा निर्धार्यतावच्छेदके निर्धारणविभक्तिप्रकृत्यर्थतावच्छेदकस्य साक्षाद्व्याप्यत्वं तत्र तन्त्रमिति मन्तव्यम्; नहि क्षत्रियत्वादिकं द्रव्यत्वसाक्षाद्व्याप्यम्, द्रव्यत्वव्याप्यपृथिवीत्वादिव्याप्यत्वात्, भवति च नरत्वसाक्षाद्व्याप्यमिति दर्शितप्रयोग इष्यते । न च नरत्वव्याप्यत्वात् क्षत्रियत्वस्य न नरत्वसाक्षाद्व्याप्यत्वम्, इति कथं दर्शितप्रयोग इति वाच्यम्, क्षत्रियत्वस्य द्विजातित्वाव्याप्यत्वात्, संस्कारविशेषरूपस्य द्विजातित्वस्याकृतसंस्कारकमृतक्षत्रिये विरहात् । न च द्विजातीनां क्षत्रियः शूर इत्यादिकः प्रयोगो न स्यादिति वाच्यम्, इष्टत्वात् । अत एव क्षत्रियादिपदसमभिव्याहारे द्विजातीनामिति निर्धारणविभक्तिर्न, किं तु नराणामित्येव । यदि च द्विजातित्वव्याप्यत्वेऽपि नरत्वव्याप्यजात्यव्याप्यत्वात् जातिघटितं नरत्वसाक्षाद्व्याप्यत्वं क्षत्रियत्वे नानुपपन्नमिति नराणां क्षत्रियः शूर इति प्रयोगोऽपीष्ट एव । अत्र व्याप्यता न तन्त्रमिति वक्ष्यते ।

ननु पाथः पृथिव्योः पृथिवी गन्धवतीत्यादावन्वयानुपपत्तिः, पृथिवीवृत्तिभेदप्रतियोगित्वस्य पृथिवीत्वसमनियतधर्मावच्छिन्नस्य पृथिव्यामसत्त्वात् । जलनिष्ठभेदप्रतियोगित्वस्य तादृशस्य पृथिव्यां सत्त्वेऽपि तादृशप्रतियोगित्वे जलत्वसामानाधिकरण्यविरहात् । यद्धर्मावच्छिन्ननिष्ठभेदप्रतियोगित्वं निर्धारणं तत्र तद्धर्मसामानाधिकरण्यान्वयस्यैव व्युत्पत्तिसिद्धत्वात् । अन्यथा जलानां पृथिवी गन्धवतीत्यादिप्रयोगः स्यादिति चेन्न, भेदप्रतियोगित्वे प्रकृत्यर्थतावच्छेदकसामानाधिकरण्यस्य विवक्षितत्वात्, द्वन्द्वस्थले प्रकृत्यर्थतावच्छेदकस्य नानात्वादन्वयोपपत्तेः । तथा हि प्रकृते जलत्वं पृथिवीत्वं च द्वयं प्रकृत्यर्थतावच्छेदकं, तत्र जलत्वावच्छिन्नस्याधेयतया भेदे पृथिवीत्वसामानाधिकरण्यस्य भेदप्रतियोगित्वेऽन्वयो निराबाध एवेति । जलानां पृथिवीत्यादौ तु जलत्वस्यैकस्य प्रकृत्यर्थतावच्छेदकत्वात् जलनिष्ठभेदस्य प्रतियोगित्वे पृथिवीत्वसमनियतधर्मावच्छिन्ने जलत्वसामानाधिकरण्यविरहात् पृथिवीत्वस्य व्याप्ततायाः सत्त्वेऽपि तत्साक्षाद्व्याप्यत्वविरहात् । तदन्यत्वे सति तद्व्याप्यत्वविशिष्टस्य तद्व्याप्यत्वस्य तदन्यत्वविरहेण विशिष्टाभावसम्भवात्– इति कथं पृथिवीत्वस्य जलनिष्ठभेदप्रतियोगितान्वयितावच्छेदकत्वमिति चेन्न, यतस्तदन्यस्य तद्व्याप्यस्याव्याप्यत्वे सति तदन्यतद्व्याप्यत्वं साक्षाद्व्याप्यत्वम्, तत्र विशेष्यदले तदन्यत्वं प्रकृते न प्रवेशनीयम् । तथा च पृथिवीत्वसाक्षाद्व्याप्यत्वं पृथिवीत्वे निराबाधमिति नान्वयितावच्छेदकत्वहानिरिति ।

नन्वेवं निर्धारणविभक्तिप्रकृत्यर्थतावच्छेदकसाक्षाद्व्याप्यत्वस्य निर्धारणान्वयितावच्छेदकत्वे तन्त्रत्वेऽभ्युपगते तत एव ब्राह्मणानां क्षत्रियः शूरः, जलानां पृथ्वी गन्धवतीत्यादिप्रयोगवारणं, क्षत्रियत्वादावन्वयितावच्छेदके ब्राह्मणत्वादिप्रकृत्यर्थतावच्छेदकसाक्षाद्व्याप्यत्वविरहात् । इत्थं च निर्धारणे प्रकृत्यर्थतावच्छेदकसामानाधिकरण्यप्रवेशो व्यर्थ इति चेन्न, यतो यत्र प्रकृत्यर्थतावच्छेदकान्वयितावच्छेदकत्वयोः साजात्यं तत्रैव साक्षाद्व्याप्यत्वं तन्त्रम्, न तु तयोर्वैजात्ये । साजात्यं तु जातित्वादिना बोध्यमिति द्रव्याणां क्षत्रियः शूर इत्यादिको न प्रयोगः । वैजात्ये तु न साक्षाद्व्याप्यता तन्त्रं यथा गवां गोषु वा कृष्णा संपन्नक्षीरतमेत्यादौ । अत्र प्रकृत्यर्थतावच्छदकस्य गोत्वस्यान्वयितावच्छेदके कृष्णगुणे साजात्यविरहात् न साक्षाद्व्याप्यताविरहेणान्वयविरह इति ।

एवं च हंसानां कृष्णः सुचेष्टः, नराणां चतुष्पादो मदोत्कटः इत्यादिप्रयोगवारणार्थं प्रकृत्यर्थतावच्छेदकसामानाधिकरण्यस्य निर्धारणे प्रवेशः, अन्यथा हंसादिवृत्तिभेदप्रतियोगित्वस्य कृष्णगुणादिमति सत्त्वात् दर्शितप्रयोगस्य दुर्वारताऽऽपत्तेः ।

तदिदं निर्धारणं जात्या, गुणेन, क्रिययाऽन्येन वा धर्मेण भवति । तत्र जात्या-नराणां नरेषु वा क्षत्रियः शूरतम इति । गुणेन यथा- गवां गोषु वा कृष्णा सम्पन्नक्षीरतमा, क्रियया यथा- गच्छतां गच्छत्सु वा धावन्तः शीघ्रतमाः, अन्येन धर्मेण यथा कुरुणां कुरुषु वा युधिष्ठिरः श्रेष्ठतमः, इत्याद्युदाहरणं दत्तम् । यत्र प्रकृत्यर्थतावच्छेदकनिधार्यतावच्छेदकयोर्वैजात्यं तत्र परस्परव्यभिचारित्वैवान्वयितावच्छेदकत्वे तन्त्रम्, अतो द्रव्याणां कृष्णा सम्पन्नक्षीरतमेत्यादिको न प्रयोगः कृष्णानां गौः सम्पन्नक्षीरतमा, द्विजातीनां क्षत्रियः शूरतम इत्यादिप्रयोगस्तु समुपपद्यते । हरीणां हरिषु वा शक्रः सुरश्रेष्ठ इत्यादौ हरिपदार्थतावच्छेदकं सूर्यत्वविष्णुत्वेन्द्रत्वादिकं नानाविधमेव प्रकृत्यर्थतावच्छेकं तत्र शक्रान्यप्रकृत्यर्थनिष्ठस्य भेदस्य प्रतियोगित्वेऽन्वयितावच्छेदकीभूतशक्रत्वावच्छिन्ने शक्रत्वसामानाधिकरण्यान्वयसम्भवात्, द्वन्द्वस्थल इवैकशेषेऽपि नानुपपत्तिः । "द्वन्द्वः सामासिकस्य च" इति गीतावाक्ये समासत्वस्यानुगतधर्मतया जातित्वात् जातिगतैकत्वविवक्षायामेकवचनमिति नानुपपत्तिः । जात्याख्यायामेकवचनमिति नियमे अनुगतधर्मस्यैव जातित्वेनोपादानम्, अत एव 'शरीरमाद्यं खलु धर्मसाधन' मिति सङ्गच्छते । यतः शरीरत्वं न वैशेषिकसंमता जातिः, नवैकमात्रशरीरं धर्मसाधनम्, इत्यनुगतशरीरत्वधर्मस्वरूपजातिगतैकत्वविवक्षायामेकवचनोपपत्तिः । "नक्षत्राणामहं शशी' इति गीतावाक्ये नक्षत्रपदस्य शशिसहितनक्षत्रसमुदाये लक्षणायां निर्धारणे षष्ठी, अन्यथा स्वस्वामिभावरूपे शेषे षष्ठी । 'वित्तेशो यक्षरक्षसाम्' इति गीतावाक्येऽपि यदि वित्तेशो यक्षस्तर्हि जले पृथ्वी गन्धवतीत्यादाविव निर्धारणे, अन्यथा-शेषे षष्ठीतिबोध्यम् । एवं 'नराणां मध्ये नापितो धूर्तः' इत्यत्र मध्य इत्यव्ययस्य भेदप्रतियोगित्वं समभिव्याहृतपदार्थतावच्छेदकसामानाधिकरण्यं चार्थः । षष्ठ्याः भेदान्वयी समभिव्याहृतशब्दार्थतावच्छेदकान्वयी च सम्बन्धोऽर्थः। सम्बन्धस्तु प्रकृते आधेयत्वमेव; भेदप्रतियोगित्वमन्वयितावच्छेदकधर्मसमनियतधर्मावच्छिन्नं पूर्ववद्बोध्यम् । अत एव 'ईशाजिमैश्वर्यविवर्त्तमध्ये ! लोकेशलोकेशयलोकमध्ये । तिर्यञ्चमप्यञ्च मृषानभिज्ञरसज्ञतोपज्ञसमज्ञमज्ञम्" इति नैषधप्रयोगे "लोकेशलोकेशयलोकमध्ये" इति पदे समास उपपद्यते । अन्यथा निर्धारणषष्ठ्याः समासनिषेधेन स न स्यात् । शेषे षष्ठीस्वीकारे तु समासो निर्बाधः । एवं नरमध्ये क्षत्रियः शूर इत्यादावपि समासोपपत्तिः २।२।१०९ ।।

## क्रियामध्येऽध्वकाले पञ्चमी च ॥२।२।११०॥

क्रिययोर्मध्ये स्थितादध्वकालवाचिनो नाम्नः पञ्चम्या सह सप्तमी विधीयते प्रकृतसूत्रेण । इहस्थोऽयमिष्वासः क्रोशात्क्रोशे वा लक्ष्यं विध्यति' इति प्रयोगः । अत्र सप्तमीपञ्चम्योः सम्बन्धसामान्यमर्थः । तद्विवक्षायां षष्ठीं प्राप्तां बाधितुं तयोर्विधानम् । अन्यथा स्थितिक्रियाया आधारत्वं क्रोशस्य, तत्र स्थितं हि लक्ष्यमिष्वासो विध्यति, एवं कालस्यापि स्वपूर्तिद्वारा भुजिक्रियाया आधारत्वमिति सप्तमी सिद्धैव, क्रोशे स्थितं लक्ष्यं, द्व्यहे पूर्णे भोजनमित्यर्थावगमात् । एवं निःसृत्येत्यादि यबन्तक्रियाया गम्यमानत्वात् तत्कृतमपायमादायापादनत्वसम्भवात्पञ्चम्यपि सिद्धैव । किंचैवं, क्रोशं वाहयित्वा, द्व्यहं वाहयित्वेत्यादि विवक्षायां द्वितीयापि प्राप्नोतीति तद्बाधनायापि पञ्चमी सप्तम्योर्विधानमिति स्वमतं बृहन्न्यासादौ प्रपञ्चितम् । अन्ये च वैयाकरणाः क्रिययोर्मध्ये इत्यस्य स्थाने कारकयोर्मध्य इति सूत्रे पठन्ति तथा च कारकशक्तिद्वयमध्य इत्यर्थं वर्णयन्ति । कारकशक्तिश्चान्ततः क्रियैवेति साम्यमेवोभयोरपि मतयोः । इहस्थोऽयमिष्वासः क्रोशे क्रोशाद्वा लक्ष्यं विध्यतीत्यादौ दैशिकापरत्वनिरूपितपरत्वाधिकरणदेशवर्त्तित्वं सप्तमीपञ्चम्योरर्थः । तच्च कर्मद्वारा धात्वर्थफलेऽन्वेति । विध्यतेरवयवविभागानुकूलो व्यापारोऽर्थः । छिदेस्तु आरम्भकसंयोगानर्जकावयवविभागानुकूलो व्यापारो ऽर्थः इति न छिदिपर्यायता विध्यतेः । तथा च क्रोशवृत्यपरत्वनिरूपितपरत्वाधिकरणदेशवृत्तिः यः लक्ष्यवृत्तिरवयवविभागः, तदनुकूलव्या-

पारकर्ता इहस्थ इष्वासोऽयमित्यन्वयबोधः । अत्र क्रियाद्वय-मध्ये, कर्तृशक्तिद्वयमध्ये वा अध्वा । अद्य भुक्त्वा द्व्यहे द्व्यहाद्वा भोक्ता इत्यादौ सप्तमीपञ्चम्योः परत्वनिरूपिता-परत्वाधिकरणकालवृत्तित्वमर्थः, तत्र परत्वे समवेतत्वेन प्रकृत्यर्थस्यान्वयः, क्त्वार्थोऽनन्तरत्वं द्व्यहेऽन्वेति, तथा चाद्य-वृत्तिभोजनानन्तरद्व्यहवृत्तिपरत्वनिरूपितापरत्वाधिकरण-कालवृत्तिभोजनकर्तेति शाब्दबोधः । अत्र भोजनकरणरूपक्रिया-द्वयमध्ये, भोजनकर्तृतारूपकारकशक्तिद्वयमध्ये वा कालः, ततः सप्तमी पञ्चम्यौ भवतः ।

वस्तुतस्तु क्रिययोर्मध्येऽर्थे कारकशक्त्योर्मध्येऽर्थे वा सप्त-मीपञ्चम्यौ भवत इत्येव सूत्रार्थः । तत्र मध्यत्वं कालिकम-परत्वसमानाधिकरणं परत्वम्, दैशिकमपरत्वमेव । तत्रापरत्वे प्रकृत्यर्थयोः कालदेशयोः समवेतत्वेनान्वयः । अवधितया कारकस्य कारकाधिकरणस्य चान्वयः । कालिकमध्यत्व-घटकपरत्वस्य निरूपकतया, दैशिकापरत्वस्य स्वनिरूपितपर-त्वसमवायेन कारकाधिकरणे, परम्परया वा कारकेऽन्वयः । तच्च कारकं योग्यतावशात् कर्तृकर्मादिकं बोध्यम् । 'अद्य हविष्यं भोक्ता द्व्यहे द्व्यहाद्वा निरामिषं भोक्ता' अत्र हविष्यकर्मकभोजनकर्त्रा तदधिकरणेनाद्यकालेन वाऽवधिमद् द्व्यहवृत्ति यदपरत्वं तत्समानाधिकरणपरत्वस्य निरूपको-निरूपककालवृत्तिर्वा निरामिषकर्मकभोजनकर्ता अद्याधिकर-णकभोजनकर्तेत्यन्वयबोधः । इहस्थोऽयं क्रोशे क्रोशाद्वा लक्ष्यं विध्यतीत्यादौ वेधकेन तदधिकरणदेशेन वाऽवधिमद् यत्पर-त्वं तन्निरूपकक्रोशवृत्त्यपरत्वस्य निरूपकं तदधिकरणं तादृ-शदेशवृत्ति वा यल्लक्ष्यं तत्कर्मकवेधकर्त्ता इहस्थोऽयमित्यन्वय-बोधः । इहाद्यशब्दयोर्देशकालार्थयोरधिकरणयोरवधित्वार्थं इहाद्यशब्दयोरुपादानम्, अवधिमत्त्वस्य अवधिमत्परत्वनिरूप-कस्याधिकरणकालवृत्तित्वस्य चोल्लेखः संसर्गमर्यादया बोध्यः ।

अथ वा मध्यशब्दोऽन्तरालवाची, तथा चान्तरालेऽर्थे सप्तमीपञ्चम्यौ भवत इति सूत्रार्थः । तत्र कालिकमन्तरालत्वं परस्परनिरूपितकालिकपरत्वापरत्वाधिकरणयोरनधिकरण-त्वमत्यन्ताभाववत्त्वमिति यावत् । दैशिकं तु दैशिकपरत्वस्या-वधिसमवायिनोरनधिकरणत्वमत्यन्ताभाववत्त्वमिति यावत् । तथा च कालिकपरत्वापरत्वयोरधिकरणकारकयोरधिकरण-कालवृत्तिकारकशक्त्योस्तत्तत्कारकभावस्वरूपयोः, एवं दैशि-कपरत्वस्यावधिसमवायिनोः कारकयोरवधिसमवायिदेशवृत्ति-कारकशक्त्योर्वा स्यादित्यादितोलाभात् कालाध्ववाचकपदो-त्तरयोः सप्तमीपञ्चम्योरत्यन्ताभावप्रतियोगित्वमर्थः, तत्र कालनिष्ठात्यन्ताभावप्रतियोगित्वं कारके चेदन्वेति स्वनिरू-पितक्रियावत्त्वसम्बन्धावच्छिन्नं, कारकशक्तौ चेदन्वेति कालि-कविशेषणतासम्बन्धावच्छिन्नमेव । देशनिष्ठात्यन्ताभावप्रति-योगित्वं तु कारकीयदैशिकसम्बन्धावच्छिन्नं कारके, कारक-शक्तौ तु स्वनिरूपककारकघटितपरम्परासम्बन्धावच्छिन्न-मन्वेति । इत्थं च सम्बन्धान्तरावच्छिन्नप्रतियोगित्वमादाय न प्रयोगातिप्रसङ्गः । प्रतियोगित्वमन्वयितावच्छेदकधर्मा-वच्छिन्नमेव भासते, व्युत्पत्तिवैचित्र्यात्, अतो द्वित्वावच्छिन्ना-भावप्रतियोगित्वमादाय न प्रयोगातिप्रसङ्गः । अत्यन्ताभावे प्रकृत्यर्थस्य स्वावच्छेदकधर्मव्यापकाधिकारणतानिरूपिताधेयत-याऽन्वयः । एवमद्य भोक्ता द्व्यहे द्व्यहाद्वा भोक्ता'इत्यादौ द्व्यहव्यापकवृत्त्यन्ताभावप्रतियोगिभोक्त्रभिन्नोऽद्य भोक्ता, अथ वा तथाविधात्यन्ताभावप्रतियोगिभोक्तृत्ववदभिन्नोऽद्य भोक्ता इत्यन्वयबोधः । एवम् इहस्थोऽयं क्रोशे क्रोशाद्वा लक्ष्यं विध्यतीत्यादौ क्रोशव्यापकवृत्यन्ताभावप्रतियोगि यल्ल-क्ष्याभिन्नमधिकरणं लक्ष्यनिरूपितमाधेयत्वं वा तद्वृत्तिस्त-द्वान्वा योऽवयवविभागस्तदनुकूलव्यापारकर्तायमित्यन्वय-बोधः । इत्थं च प्रतिदिनं भुञ्जानो द्व्यहे द्व्यहाद्वा भोक्तेति न प्रयोगः । अत्यन्ताभावे व्यापकवृत्तित्वे प्रकृत्यर्थस्यान्वयो-पगमात् स्नानादिकालावच्छेदेन द्व्यहनिष्ठात्यन्ताभावप्रति-योगिभोक्तृत्वस्य प्रतिदिनं भुञ्जाने सत्त्वान्न दर्शितप्रयोग-प्रसङ्गः । कर्तृशक्तिमध्य एव कालः । गिरेः क्रोशे क्रोशाद्वा वनं विहगो गच्छतीत्यादौ कर्मापादानयोर्मध्ये देशः । पाटलि-पुत्रेश्वरः विंशतौ योजनेषु विंशतेर्योजनेभ्यो वा काशीस्थाय ददातीत्यादौ कर्तृसम्प्रदानयोर्मध्ये देशः । 'शिखरादुपत्य-

कायां क्रोशे क्रोशाद्वा पतति शिलेत्पादावपादानाधिकरणयोर्मध्ये देशः; करणकारकान्तरयोर्मध्ये देशोऽपि न भवति । एवमन्यत्रापि कारकयोर्मध्ये देशः कालश्च बोध्य इति ॥

इति सप्तम्यर्थप्रकाशः ।

# अथ प्रथमार्थप्रकाशः ।

कारकशक्तिविशेषेषु द्वितीयादयो विहिताः । परिशेषात् कारकशक्तावन्येनाभिहितायां स्वार्थमात्रबुबोधिषया प्रयुक्तान्नाम्नः प्रथमाविभक्तिः प्रयुज्यते; तदनुशासनाय सूत्रमाह–

## "नाम्नः प्रथमैकद्विबहौ ॥२।२।३१॥

विवृतं चैतत्सूत्रम् वृहद्वृत्तौ– एकत्व–द्वित्व–बहुत्व–विशिष्टेऽर्थे वर्तमानान्नाम्नः परा यथासंख्यं 'सि-औ-जस्' इतिलक्षणा प्रथमा विभक्तिर्भवतीति । तथा च नामार्थगतेष्वेकत्वादिषु प्रथमाया एकवचनादयो विधीयन्त इत्यर्थः पर्यवस्यति । यद्यपि 'एक–द्वि–बहौ' इति प्रकृत्यर्थविशेषणम् न तु प्रत्ययार्थनिर्देशः, तथापि त एव प्रत्यार्था अपि । यतः अनिर्दिष्टार्थाः प्रत्ययाः प्रकृतेः स्वार्थे भवन्ति' इति नियमः । नामार्थश्च पञ्चकम्–स्वार्थ–द्रव्य–लिङ्ग–संख्या–शक्ति (कारक)लक्षणः । तथा च अर्थे प्रथमा विभक्तिर्भवति । स्वार्थश्च प्रवृत्तिनिमित्तम्-तच्च- स्वरूप-जातिगुण-क्रिया-द्रव्य-सम्बन्धादिरूपं त्वतलादिभावप्रत्ययाभिधेयम् । भावश्च-विशेषणम्, गुण इति चाख्यायते । तत्र स्वरूपप्रवृत्तिनिमित्तकाः गौःअश्व इत्यादयः, गुणप्रवृत्तिनिमित्तकाः शुक्लः कृष्ण इत्यादयः, क्रियाप्रवृत्तिनिमित्तकाः कारकः पाचक इत्यादयः । द्रव्यसम्बन्धप्रवृत्तिनिमित्तका दण्डी विषाणी इत्यादयः । इत्थं स्वार्थो व्याख्यातः । द्रव्यं च, लिङ्गसंख्याद्याश्रयः सत्त्वस्वभावं तदित्यादिसर्वनामप्रतिपाद्यं विशेष्यभूतम् । लिङ्गं च कृत्याबादिसंस्कारहेतुः शब्दस्वभावमात्रावसेयं स्त्रीपुंनपुंसकशब्दैः प्रतिपाद्यम् । संख्या भेदप्रतिपत्तिहेतुभूता एकवचनद्विवचनबहुवचनादिनिमित्तभूता च एकत्वादिका । शक्तिः कारकं वा स्वपराश्रयाश्रितक्रियोत्पत्तिहेतुः विभविभक्तिनिमित्तम्, यस्यां वा त्यादिभिरनहितायां द्वितीयाद्याः कारकविभक्तयो भवन्ति । द्वितीयादिभिस्त्यादिभिश्चानभिहतेऽर्थे प्रथमा भवति । एवं प्रथमार्थं विस्तरेण व्याख्याय पर्यन्तेऽभिहितं वृहद्वृत्तौ–'तदयं वस्तुसंक्षेपःत्याद्यन्तपदसामानाधिकरण्ये प्रथमेति । त्यादयश्च- त्यादि-कृत्-तद्धितसमासाः । त्यादिसामानाधिकरण्ये यथा-यज्ञदत्तो गच्छतीति । य एवात्र ति प्रतिपाद्यः कर्त्ता(यज्ञदत्तः)स एव प्रथमयापि प्रतिपाद्यत इत्युभयोःसामानाधिकरण्यम् । कृत्सामानाधिकरण्यं यथा-कृत- कट इति । अत्र कृदन्तेन कृत इति शब्देन कृतिविषयभूतो योऽर्थः प्रतिपाद्यते स एव कटेतिनामोत्तरसिप्रत्ययेनापीति भवति सामानाधिकरण्यम् । तद्धितान्तेन यथा-शत्योऽश्व इति । शतेन क्रीत इत्यर्थे विहितेन तद्धितेन यः शतकरणकक्रयकर्मतया प्रतिपाद्यते स एव प्रथमयापि अश्वेतिनामप्रकृतिकयेति सामानाधिकरण्यम् । प्राप्तोदको ग्राम इति च समाससामानाधिकरण्योदाहरणम् ।

एवं च नाम्नः प्रदर्शितार्थपञ्चकगतैकत्वद्वित्वबहुत्वेषु प्रथमाया एकवचनद्विवचनबहुवचनानि भवन्तीति स्वमतनिष्कर्षः । तत्र जातिव्यक्तिपक्षभेदेन क्वचित् स्वार्थः (जातिः) एव मुख्यत्वेन प्रतीयते, तादृशस्थले च एकवचनमेव प्रयुज्यते । क्वचित्(व्यक्तिपक्षे)द्रव्यमेव प्राधान्येन प्रतिपाद्यमिति तत्रैकवचनादयः सर्वे यथायोगं प्रयुज्यन्ते । एवं क्वचिल्लिङ्गमेव विशेषतः प्रतीयते यथा– तटादिशब्देषु ॥

अन्ये च नामार्थ– लिङ्ग–परिमाण–वचन (संख्या)– रूपेष्वर्थेषु प्रथमामनुशासति । मात्रग्रहणं च कुर्वन्ति । तथा च नामार्थमात्रस्य–(कर्मादिरहितस्य) विवक्षायां,

लिङ्गमात्रस्य विवक्षायां, परिमाणमात्रस्य विवक्षायां, वचनमात्रस्य विवक्षायां च प्रथमेति तन्मतम् । नियतलिङ्गकः शब्दः, अव्ययानि च नामार्थमात्रस्योदाहरणम्, यथा– घटः श्रीः ज्ञानम्; उच्चैः, नीचैः इत्यादि । अनियतलिङ्गाः शब्दाः लिङ्गमात्रस्योदाहरणं यथा– तटः तटी, तटमिति । परिमाणमात्रस्य– द्रोणो व्रीहिरित्युदाहरणम्, अत्र द्रोणपदोत्तरप्रथमार्थस्य परिमाणस्य द्रोणपदार्थेन सहाभेदेनान्वयः । तस्य ( परिमाणार्थस्य ) च परिच्छेद्यपरिच्छेदकभावेन सम्बन्धेन व्रीहावन्वय इति द्रोणाभिन्नं यत्परिमाणं तत्परिच्छिन्नो व्रीहिरित्यन्वयबोधः । परिमाणग्रहणाभावे च विशेषणविभक्तेर भेदार्थकतया द्रोणाभिन्नो व्रीहिरिति बोधः स्यात् स च बाधित इति परिमाणग्रहणमावश्यकम् । अनुक्त एव स्वार्थेऽनेन प्रथमा स्यादिति– एकः, द्वौ, बहव इत्यादौ– विभक्तिर्न स्यात् । एकत्वादेरुक्तत्वादेकवचनाद्यनुपपत्तेः । विरुद्धं वचनं तु विरोधादेव नेति तदर्थं वचनग्रहणं पृथक्कृतमित्यादि वर्णयन्ति ।

तार्किकास्तु– नाम्नः स्वार्थे प्रथमा विधीयते । एवं च घट इत्यादौ व्यक्तेः, नाम्नः प्रकृतेरेव भानात् कथं प्रथमार्थत्वम् ? न चैकदानेकवृत्तिघटत्वादिवाचिनो घटादिशब्दात् न व्यक्तिलाभ इति वाच्यम् जातिशक्तिवादिनामपि मते जात्या व्यक्त्याक्षेपेण व्यक्तेरन्यलभ्यतया प्रत्ययार्थत्वाप्रसक्तेः । अत एव तेषां (जातिशक्तिवादिनां मीमांसकानां) त्यादेः भावनावाचित्वे भावनया आक्षेपेण कर्तुर्बोधने पचतीत्यादौ कर्तरि तृतीयाया न प्रसक्तिरिति । यत्तु घटाद्यर्थेषु स्यादीनां शक्तिः, घटादिपदानामनन्तानां शक्तत्वे शक्ततावच्छेदकानन्त्यसम्भवेन स्यादीनामेकविंशतिसंख्यकानां शक्ततावच्छेदकलाघवसम्भवेन तथात्वौचित्यात्, तदपि न सम्यक्; घटादिपदानां निरर्थकत्वे नामसंज्ञाविरहे तदनन्तरं स्याद्युत्पत्तेरप्रसक्तेः । दधि भवतीत्यादौ स्यादेर्लोपात् तत्र दध्यादिपदार्थानवगमप्रसङ्गात् । न च तत्रानुसन्धीयते विभक्तिरिति वाच्यम् । तथापि राजपुरुष इत्यादिसमासे राजपदार्थावगमस्याशक्यत्वात् । न च तत्राप्यनुसन्धीयते षष्ठीति वाच्यम्, तथा सति ऋद्धस्य राज्ञ इत्यादाविव ऋद्धस्य राजपुरुष इत्यादावपि ऋद्धादे राजान्वयप्रसङ्गात् । दर्शितसमासे नैयायिकानां राजपदलक्षणायाः, शाब्दिकानां वृत्तेश्च वैयर्थ्योनाकल्पनापत्तेश्च । किं च चैत्र इत्यादौ स्याद्यर्थचैत्रव्यक्तौ स्याद्यर्थयोर्लिङ्गसंख्ययोः भेदान्वयोऽवश्यमभ्युपेयः, तथा सति रूपं घट इत्यादौ, तन्तुघटावित्यादौ च रूपघटयोस्तन्तुपटयोर्भेदान्वयः स्यात् । अथ नाम्नां घटादिपदानां घटत्वेन सकलघटवाचकत्वेऽपि घटोऽस्तीत्यादावस्तिपदार्थान्वितघटव्यक्तिबोधः प्रथमयेति चेत्; न; घटपदेन घटोपस्थितावस्तिपदेनास्तित्वोपस्थितावबाधितत्वात्तद्घटव्यक्तेः घटत्वेन शाब्दभानसम्भवात् तद्व्यक्तित्वेन भानस्याप्रामाणिकत्वात्–इति नामार्थस्य न कथमपि प्रमार्थत्वं सम्भवतीति चेत्, अत्राहुः—घटो नील इत्यादौ विशेषणविभक्तेर्नीलपदोत्तरप्रथमाया अभेदोऽर्थः, स घटादौ विशेषणीभूयान्वेति–इति । तत्राभेदो यदि भेदत्वावच्छिन्नप्रतियोगिताकाभावत्वेन रूपेणार्थः, तदाऽप्रसिद्धिः; भेदत्वावच्छिन्नप्रतियोगिताकाभावाप्रसिद्धेः । यदि च भेदप्रतियोगिताकाभावत्वेन तदा नीलभेदगगनोभयत्वावच्छिन्नप्रतियोगिताकाभाववति पीते नीलाभेदावगमप्रसङ्गः । यदि च नीलत्वावच्छिन्नप्रतियोगिताकभेदत्वावच्छिन्नाभावत्वेन, तदा शक्यानन्त्यम्, नीलादेः पदार्थैकदेशे नीलत्वावच्छिन्नप्रतियोगिताकभेदेऽनन्वयप्रसङ्गः, नीलपटतात्पर्येण प्रयुक्तस्य घटो नील इति वाक्यस्य प्रामाण्यप्रसङ्गश्च । तस्माद्भेदोऽत्यन्ताभावश्च द्वयं प्रथमाविभक्त्यर्थः, तत्र भेदे नीलव्यक्तिःस्वरूपात्मिकया प्रतियोगितया भेदस्तु तद्भेदव्यक्तिस्वरूपावच्छिन्नया प्रतियोगितया अत्यन्ताभावेऽन्वेति । यदि च निरवच्छिन्नप्रतियोगितया नीलादेः प्रतियोगिनो भेदादौ भानं, भेदविशेषणतया भासमानस्य नीलादेः भेदव्यक्तिस्वरूपनिष्ठप्रतियोगितावच्छेदकताया अनवच्छेदकत्वं च न साम्प्रदायिकमित्युच्यते तदा तु उभयावृत्तित्वोपलक्षितधर्मावच्छिन्नप्रतियोताकान्योन्याभावेऽप्यन्ताभावे च खण्डशः शक्तिः

तदादिपदवत्, स्मरणं तूपलक्षणोभयावृत्तित्वांशपरीहारेण, नामोपस्थापिततत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदत्वेन भेदविषयकम् अत्यन्ताभावत्वेनात्यन्तभावविषयकं च भवति। तत्र नीलादिपदार्थस्य तत्तद्व्यक्तित्वेऽन्वयः। नीलान्वितता दृशभेदत्वावच्छिन्नप्रतियोगितया भेदोऽत्यन्ताभावेन्वेति, तादृशात्यन्ताभावः समानविभक्तिकघटादिपदार्थेन्वेति। यदि नीलादेस्तद्व्यक्तित्वे पदार्थैकदेशेऽन्वयो न व्युत्पत्तिसिद्ध इत्युच्यते, तदा उभयावृत्तित्वोपलक्षितधर्मावच्छिन्नप्रतियोगितायां भेदेऽत्यन्ताभावे च त्रिषु स्यादिविभक्तेः शक्तिः, तत्रोभयावृत्तित्वांशमपहाय नामोपस्थापितव्यक्तीयतद्व्यक्तित्वावच्छिन्नप्रतियोगितायाः स्मरणम्। तादृशप्रतियोगितायां नीलादेः प्रकृत्यर्थस्यान्वयः। नीलाद्यन्विततादृशप्रतियोगिताया भेदेऽन्वयः, तथाविधान्वितभेदत्वावच्छिन्नप्रतियोगितासंसर्गेण भेदस्यात्यन्तभावेऽन्वयः, तथाविधान्वितात्यन्ताभावस्य समानविभक्तिकघटादिपदार्थेऽन्वयः। एवमीदृशभेदात्यन्ताभावः प्रतियोगिस्वरूप एव। यत्र प्रतियोग्यननुगतः तत्रैव सामान्यधर्मावच्छिन्नभेदस्यात्यन्ताभावः प्रतियोगितावच्छेदकस्वरूप इति स्वरूपभेदाभावस्तन्नीलादिव्यक्तिस्वरूपो नीलपदादिनामार्थो दर्शितरीत्या भवति प्रथमार्थ इति। न च भेदस्याभावः प्रतियोगी न सम्भवति, तेन सममविरोधात्; किं तु प्रतियोगितावच्छेदकस्वरूप इति वाच्यम्, प्रतियोगितावच्छेदकसम्बन्धेनैव प्रतियोगिनोऽभावविरोधात्; तस्यात्राप्यविकलत्वात्, तद्व्यक्तित्वस्वरूपतादात्म्येन सम्बन्धेन तद्व्यक्तेः प्रतियोगिन्या विरोधित्वात्। न च तद्व्यक्तित्वस्य धर्मविधया अवच्छेदकत्वं न संसर्गविधयेति कथं तेन सम्बधेन विरोधित्वमिति वाच्यम्, भेदे संसर्गविधया प्रतियोगिताया अवच्छेदकस्यैव धर्मविधया अवच्छेदकत्वात्। तादृशस्यैवावच्छेदकस्याभेदाभावत्वोपगमात्। एतदभिसन्धानेन पक्षधरमिश्रैः तत्त्वचिन्तामणौ प्रत्यक्षालोके- योग्यानुपलब्धिहेतुतावादे "न हि यथा तादात्म्यमन्योन्याभावस्याभावः, तथाऽन्योन्याभावोऽपि तदभावस्वरूपः, घटाप्रतियोगित्वात्"इत्युक्तम्। भेदप्रतियोगितायाः संसर्गविधयावच्छेदकस्य तादात्म्यस्य धर्मविधयाऽवच्छेदकात्मकान्योन्याभावविरहस्वरूपप्रदर्शनं संसर्गीभूतावच्छेकधर्मीभूतावच्छेदकयोरैक्यं विना नोपपद्यत इति।

महामहोपाध्यायगोकुलनाथोपाध्यायास्तु—भवतु स्वरूपभेदाभावस्तद्व्यक्तिस्वरूपः तथापि स न प्रथमार्थः प्रमाणाभावात्। घटो नील इत्यादौ स्वरूपभेदात्मकतादात्म्यसंसर्गेणैव शाब्दबोधोपपत्तेः। न चाभेदस्य संसर्गत्वोपगमे स्यन्तनीलपदस्य स्यन्तघटपदेन पौर्वापर्यरूपायास्तद्वयङ्ख्याया आकांक्षायाः शाब्दप्रयोजकत्वे गौरवम्, अधिकवर्णघटितत्वात्। अभेदस्य पदार्थत्वे नीलविशेषणकाभेदविशेष्यकबुद्धौ नीलपदस्य सिना सहाकांक्षाया अभेदप्रकारकघटविशेष्यकबुद्धौ तेनैव सिना सह स्यन्तघटपदस्याकांक्षायाः स्वप्रयोजकत्वस्वीकारे लाघवम्, नीलपदघटपदयोरेकत्राकांक्षायामप्रवेशेन तयोर्विशेष्यविशेषणभावव्यत्यासप्रयुक्तस्याकांक्षाधीहेतुताभेदस्य गुरुतरस्याप्रसक्तेरिति वाच्यम्, नीलाभेदविधेयकघटोद्देश्यकबुद्धौ नीलघटपदयोःपौर्वापर्यस्वरूपाकांक्षायाः प्रयोजकत्वस्य तवाप्यावश्यकत्वात्। अन्यथा नीलो घट इत्यादितो नीलाभेदविधेयकबोधापत्तेः। न च नीलो घटो जलपूर्ण इत्यादौ जलपूर्णत्वविधेयकबोधस्थलेऽभेदस्य प्रथमार्थत्वपक्षे घटे नीलाभेदविशेषणकान्वयबोधो दर्शितरीत्याकांक्षाद्वयस्य प्रयोजकत्वे नैवोपपद्यते। भेदस्य संसर्गतापक्षे स्यन्तनीलघटपदयोरेकत्राकांक्षाप्रवेशे विशेष्यविशेषणभावव्यत्यासप्रयुक्तं गौरवं दुष्परिहरमिति वाच्यम्, यतोऽभेदस्य स्यर्थत्वपक्षेऽपि स्यन्तघटपदस्य पदोत्तरत्वाद्यविशेषितेन सिना सहाकांक्षा न तथाविधान्वयबोधोपयोगिनी, तथा सति नीलः पटो घटो दण्ड इत्यादौ स्यन्तघटपदस्य दण्डोत्तरसिना सहाकांक्षाग्रहे घटे नीलाभेदान्वयबोधः स्यादित्यवश्यं नीलपदोत्तरसिना

सहाकांक्षा वक्तव्या । तथा चैकस्यामाकांक्षायां नीलघट-पदयोः प्रवेशे विशेष्यविशेषणभावव्यत्यासप्रयुक्तं गौरवं तवापि दुष्परिहरमिति । न च प्रथमान्तनीलपदप्रथमान्तघटपदयो-राकांक्षाज्ञानस्य नीलविशेषणक-तादृश तादात्म्यसंसर्गक-घटविशेष्यकशाब्दं प्रति हेतुत्वे नीलघट इत्यादिकर्मधारय-स्थले व्यभिचारः, तत्र स्यन्तनीलपदघटिताकांक्षाज्ञानविर-हादिति वाच्यम्, कलशः कृष्ण इत्यादौ व्यभिचारवारणार्थ-मव्यवहितोत्तरोत्पत्तिकत्वं जन्यतावच्छेदकेऽवश्यं प्रवेशनीयम्, अत एव कर्मधारयस्थले व्यभिचाराप्रसक्तेः । न च 'शिखी विनष्टः' 'क्षुदुपहन्तुं शक्या' 'सुरभि चन्दनमाघ्रातम्' इत्यादौ विनष्ट-शक्याघ्रातानां तादात्म्यसम्बन्धेन शिखिनि क्षुधि सुरभिचन्दने चान्वयो बाधित इति सामानाधिकरण्या-नुपपत्तिः अभेदस्य स्याद्यर्थत्वपक्षे तस्य स्वाश्रयशिखावत्त्व-सम्बन्धेन, स्वाश्रयोपहननवत्त्वेन स्वाश्रयसौरभवत्त्वेन च-संसर्गेणान्वयसम्भवाद्भवति सामानाधिकरण्यमिति वाच्यम्, ततः परम्परासम्बन्धावच्छिन्नशक्तिकर्मतावतोऽभिधानात् । क्षुधो न द्वितीया, तादृशस्य कर्मणस्तादात्म्यसंसर्गेणान्वयः क्षुधिनिष्प्रत्यूह एव । शिखाविशिष्टे विनष्टस्य, सौरभ-विशिष्टचन्दने आघ्रातस्य, तादात्म्यसंसर्गेणान्वयः शिखा-सौरभं विशेषणमादाय पर्यवस्यति । अत्रैवार्थे "सविशेषणे हि विधिनिषेधौ, सति विशेष्यबाधे विशेषणमुपसङ्क्रामत" इति तान्त्रिकाणां सिद्धान्तः । एवं युक्त्या अभेदस्य विभक्त्यर्थत्वे प्रतिहते, अनुशासनमपि तत्र विभक्तीनां साधुत्वमात्रं ज्ञापयति । तथाहि— "लुपि युक्तवद्व्यक्ति-वचने (पा० सू० १।२।५१) इत्येकं सूत्रं लुप्ते प्रत्ययो सति प्रकृतिवल्लिङ्गवचने प्रयोक्तव्यो न तु लवणा यवागू-रित्यादिवद्विशेष्यनिघ्नतया लिङ्गवचनान्तरप्रयोगः । यथा पञ्चाला नाम क्षत्रियाः नियतबहुवचनान्तपुंल्लिङ्गपञ्चाल-शब्दविषयाः, तेषां निवासे जनपदे प्रवृत्तस्य तद्धिताणो लुपि सति पञ्चाला जनपद इति । एवं विदेहाः कुरवो मगधाः मत्स्या अङ्गा बङ्गाः कलिङ्गाः सुह्माः पुण्ड्राः इत्यादि, इत्यर्थकम् । 'विशेषणानां चा जातेः (पा० सू० १।२।५२) इत्यपरं सूत्रं तद्विशेषणवाचिपदानां जातिवर्जितानां तद्व-ल्लिङ्गवचने स्याताम् । पञ्चाला रमणीयाः, जातौ तु पञ्चाला जनपदः । एव गोदयोर्निवासे ग्रामे गोदौ बहुक्षीर-घृतौ इति; जातौ तु गोदौ ग्रामः इति इत्यर्थकम् । तदे-तत्पूर्वाचार्याणां सूत्रद्वयमनूद्य पाणिनिरसूत्रयत् "तदशिष्यं संज्ञाप्रमाणत्वात् (पा० सू० १।२।५३) तत् प्रकृति-वल्लिङ्गवचनत्वं लुप्ततद्धितकानां पञ्चालादिशब्दानां, तद्विशेषणपदानां च विशेष्यतुल्ययोगक्षेमं नियतलिङ्गवचनं च न शिष्यं, न वक्तव्यम्-- संज्ञा नियतव्यवहारः तत्प्रमाण-कत्वात् इति सूत्रार्थः । तथा च यथा क्षत्रियविशेषे प्रवर्त-मानानां पञ्चालादिशब्दानां नियतलिङ्गवचनत्वं व्यवहारे-णैव, तथा लुप्ततद्धितेऽपि व्यवहारस्तु नियतलिङ्गवचनोऽपि न लिङ्गवचनार्थकः, किं तु साधुत्वार्थः । अत एव नियत-स्त्रीलिङ्गबहुवचनत्वेनाप्शब्दस्य तद्विशेषणपदस्य च, नियत-पुंलिङ्गबहुवचनत्वेन दारशब्दस्य, तादृशस्य तद्विशेषण-पदस्य च व्यवहारो लिङ्गवचनस्वरूपमर्थं तु विशेष्ये विशे-षणे वा क्वापि न बोधयति, यथापो रसमय्यः, रामस्य दाराः पुण्यमयाः इति विशेषणविभक्तीनां साधुत्वार्थतयोपपत्तौ निरर्थकत्वे तदनुपपत्तिर्न भवतीति पदवाक्यरत्नाकरे प्राहुः ।

युज्यते चायमर्थः—स्वरूपभेदाभावस्य तद्व्यक्तिस्व-रूपस्य प्रथमार्थत्वे नीलेऽपि यत्किञ्चिन्नीलव्यक्तिभेदसत्त्वात् नीलो न नील इति प्रयोगः स्यात् । नच तत्रापि तादृशभेद-संसर्गावच्छिन्नप्रतियोगिताकभेदस्य नीले सत्त्वात् कथं न तथाप्रयोग इति वाच्यम्, नञ्स्थलेऽन्वयितावच्छेदका-वच्छिन्नप्रतियोगिताकत्वस्यैव भेदे भानोपगमात् । नीलत्वा-वच्छिन्नप्रतियोगिताकभेदस्य नीलेऽसत्त्वात् । भवतु स्वरूप-भेदाभावत्वस्य प्रतियोगितावच्छेदकतया तदवच्छिन्नप्रति-योगिताकभेदस्य नीले सत्त्वात्तथाप्रयोगो दुर्वार एवेति ।

यत्तु त्यादिनिपाताभिहितकारकः प्रथमार्थः चैत्रः पचति, तण्डुलः पच्यते, वृक्षः छेत्तुं साम्प्रतम्, इत्यादौ कर्तृत्वं कर्मत्वं प्रथमयाऽभिधीयते । अत एव नामार्थविशेष्यकत्या- द्यर्थान्वयबोधे नाम्नः प्रथमान्ततानियमः । तेन ब्राह्मणस्य पक्तृत्वसम्प्रदानत्वोभयविवक्षायां पचति ब्राह्मणाय देहीति न प्रयोगः। त्यादिना प्रथमया च कर्तृतात्वेनैका कर्तृता प्रतिपाद्यते, एकवचनैकत्वसंख्येव। एवं नामार्थविशेष्यक- त्याद्यर्थप्रकारकान्वयबोधे त्यादिजन्याया इव स्यादिजन्याया अपि उपस्थितेः सहकारित्वमत एव चैत्रः पचतः इति न प्रयोगः । न वा पचति ब्राह्मणाय देहीत्यस्य शतृशानजापत्त्या वारणेऽपि पक्ष्यति देवदत्ताय देहीत्यस्य प्रयोगो दुर्वारः चतुर्थ्याः त्याद्यर्थकारकानभिधायित्वात् । न च चैत्रः सुन्दर इत्यादौ न कारकार्थोपपत्तिरिति वाच्यम्, तत्राप्यध्याहृता- स्तिक्रियाकारकत्वस्य प्रथमयाऽभिधानात्; "अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्ति" इति कात्यायनस्मरणात् । न च रामो रावणस्य कल्की म्लेच्छस्य हन्तेत्यादौ कथं क्रियापदाध्याहारः अस्तीत्यर्थस्यान्वेतुमयोग्यत्वात् ( रामस्य भूतकालिकत्वात् कल्किनो भविष्यत्वात्)- इति वाच्यम् अत्र वाक्यभेदस्यावश्यकत्वे- आसीदिति रामे भविष्यतीति कल्किन्यध्याहारसम्भवात् भवन्तीपर इत्यस्योपलक्षणत्वात् । न च भूतभविष्यद्वर्त्तमानानां द्रव्याणां विभागार्थं नामनिर्देश- स्थले- आसीदस्तिभविष्यतीत्येकतमस्याध्याहारासम्भवात् का गतिरिति वाच्यम् उद्देशवाक्यार्थे विभागवाक्यार्थस्यान्वय- सम्भवेन सन्तीत्यध्याहारसम्भवात् । विभागवाक्यार्थे उद्देश- वाक्यार्थ स्यान्वयविवक्षणे तु एकवचनान्तबहुवचनान्तयोरुभयो- रपि साधुत्वेन अस्तिसन्तीत्युभयोरपि साधुत्वात् । न चातीताना- गतयोः कथं वर्तमानसत्ताया अध्याहृतत्याद्यर्थस्यान्वय इति वाच्यम्, वर्तमानत्वाविवक्षणेऽपि धात्वर्थसम्बन्धविवक्षणे वर्त- मानाप्रयोगस्य युक्तत्वात् । "वारिदः सुखमाप्नोति सुखमक्षय्य- मन्नद" इत्यादि दर्शनात् । न च 'हंसीव धवला कीर्तिः' इत्यादौ धवलपदात्कीर्तिपदाच्चाध्याहृतास्तिपदार्थस्वरूप भवनकर्तृत्वार्थिकीप्रथमोत्पद्यतां, हंसीपदात्कथं सा तस्याः कर्तृत्वस्येहाभानादिति वाच्यम् तत्रापीवनिपातार्थभवनकर्तृ- त्वार्थकतया प्रथमाया उपपत्तेः । न चेहेवनिपातस्य- भवनकर्तृत्वार्थकत्वोपगमेऽन्यत्र कर्मकरणत्वाद्यर्थकत्वमभ्युप- गन्तव्यं स्यात्- तथा च "शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव" ( रघुवंशे चतुर्थसर्गे ) इत्यादाविवनिपातेन करण- कर्मत्वाभिधानात् अनभिहिते करणे तृतीयाविधानात्, तादृशे कर्मणि च द्वितीयाविधानात्तयोरनुपपत्तिरिति वाच्यम्. दर्शितस्थले इवनिपातस्य सादृश्यमात्रार्थकत्वात् करणकर्म- त्वाद्यर्थकत्वे मानाभावात् । उस्रैः, रसानित्यादौ शरैः, उदीच्यानित्येताभ्यां समानलिङ्गवचनकत्वेन साधुत्वार्थिका तृतीया द्वितीया च । तेन उस्रसदृशैः शरैः रससदृशानु- दीच्यानिति प्राथमिको बोधः । अत एवेवपदद्वयं सङ्गच्छते । ततो रविकर्तृकोस्रकरणकरसकर्मकोद्धरणसदृशशरकरण- कोदीच्यकर्मकोद्धरणकर्त्ता रघुः इति विशिष्टवाक्यार्थबोधः ।

"तत्र तृतीयाद्वितीयार्थयोः करणत्वकर्मत्वयोर्धात्वर्थे- नान्वयात् तृतीयाद्वितीययोर्नानुपपत्तिरिति कालापा ऊचुः- तदसत्; घटोनास्तीत्यादौ घटात्यन्ताभावशब्दे प्रथमया कर्तृत्वाभिधानासम्भवात् । यदि च तत्रास्तिधात्वर्थान्वित- त्याद्यर्थात्यन्ताभावविशेष्यतया घटः प्रतीयते तदापि प्रथमया कर्तृत्वाभिधानमसम्भवि, प्रथमोक्तकर्तृत्वस्य नञर्थान्वया- सम्भवात् । न च त्यादिप्रथमाविभक्तिभ्यामेकमेव कर्तृत्व- मुपस्थाप्यते, तत् नञर्थे सघटे विशेषणतयाऽन्वेतीति प्रथमया कर्तृत्वाभिधानं निराबाधमिति वाच्यम्, प्रथमार्थाभावस्य नामार्थेऽन्वयासम्भवात्; प्रकृत्यर्थे प्रत्ययार्थाभावान्वयस्या- व्युत्पन्नत्वात् । न च तत्राश्रयत्वस्वरूपकर्तृत्वाभाव एव त्यादिप्रथमयोरर्थः, तस्य घटेऽन्वयः नञ् पदं तात्पर्यग्राहकम्, अतएव त्याद्यर्थान्वयिनिप्रथमान्तार्थे त्याद्यर्थसंख्यान्वयस्य व्युत्पन्नत्वात् घटौ घटा वा नास्तीति न प्रयोग इति वाच्यम्,

तथा सति कर्तृत्वस्यैकदेशतया तत्र धात्वर्थानन्वयप्रसङ्गात् । धात्वर्थान्वितकर्तृत्वाभावस्य स्याद्यर्थत्वाभ्युपगमे तण्डुलं पचति नेत्यादौ धात्वर्थस्यैकदेशतया तत्र तण्डुलकर्मत्वानन्वयप्रसङ्गात् । धात्वर्थान्वितस्याद्यर्थान्वयिनि प्रथमान्तार्थे, तादृशस्याद्यर्थान्वितनञर्थान्वयिनि च प्रथमान्तार्थे स्याद्यर्थसंख्यान्वयस्य व्युत्पन्नत्वात् घटौ घटा वा नास्तीति प्रयोगः ।

वस्तुतस्तु कर्तृत्वस्य स्याद्यर्थत्वमावश्यकमेव, पचतीत्यादौ प्रथमां विना कर्तृत्वस्य प्रतीयमानत्वात् । प्रथमार्थत्वं तु न युज्यते, स्यादिं विना तस्य कुत्राप्यप्रतीयमानत्वात्, अन्यलभ्यत्वाच्च । पटो न घट इत्यादौ पटघटभेदान्वयबुद्धौ जायमानायां घटपदोत्तरप्रथमायाः कथमपि कर्तृत्वप्रत्यायकत्वं न सम्भवतीति न कर्तृत्वं प्रथमार्थ इति, पचतीत्यादौ तृतीयाया असाधुत्वात्, षष्ठ्या असाधुत्वात्, षष्ठ्यर्थस्याविवक्षणाद्वा, द्वितीयादेरर्थस्यायोग्यत्वात् "न केवलाप्रकृतिः प्रयोक्तव्ये"ति नियमात् साधुत्वार्थं प्रथमोपात्ता प्रथमा चैत्रादिपदानन्तरं प्रयुज्यते इति ।

लिङ्गमपि प्रथमाविभक्त्यर्थोऽनन्यलभ्यत्वात् । लिङ्गं—पुंस्त्वं, स्त्रीत्वं, क्लीबत्वं च । तत्र शोणिताधिकशुक्रसमवेतप्राणित्वं पुंस्त्वम्, शुक्राधिकशोणितसमवेतप्राणित्वं स्त्रीत्वम्, समशुक्रशोणितोभयसमवेतप्राणित्वं क्लीबत्वम् । तथा च निरुक्तम्—शुक्रातिरेके पुमान् भवति शोणितातिरेके स्त्री भवति, द्वयोः समत्वे षण्ढो भवतीति । इदं च प्राणिविषयकं पुंस्त्वादि लक्षणम् । सामान्यतस्तु सत्त्वाधिक्ये पुंस्त्वम्, रज आधिक्ये स्त्रीत्वम्, उभयोः साम्ये क्लीबत्वमिति । अन्ये तु घटादिशब्दे पुंस्त्ववाचकस्यादिप्रकृतित्वं पुंस्त्वमौपचारिकम् । एवं तटीत्यादौ तटशब्दे ईत्वेन स्त्रीत्ववाचकस्य-ङीप्रत्ययस्य प्रकृतित्वं स्त्रीत्वम्, खट्वेत्यादौ खट्वशब्दे आत्वेन स्त्रीत्ववाचकस्य आप् प्रत्ययस्य प्रकृतित्वं स्त्रीत्वम् । दधीत्यादौ क्लीबत्ववाचकस्य लोपस्मारितस्यादेः प्रकृतित्वं क्लीबत्वम्, कुण्डमित्यादौ कुण्डशब्दे क्लीबत्ववाचकस्याम्स्मारितस्यादेः प्रकृतित्वं क्लीबत्वमित्येवं रीत्या सर्वत्रौपचारिकं लिङ्गबोधनं प्रथमया भवति ।। परिमाणमपि प्रथमाविभक्त्यर्थः । परिमाणं गुरुत्वं परमितिश्च । द्रोणो व्रीहिरित्यादौ गुरुत्वविशेषवाचिनो द्रोणशब्दात् विहिता प्रथमा गुरुत्वमभिधत्ते । प्रथमार्थगुरुत्वे द्रोणपदार्थस्याभेदेनान्वयः, तादृशगुरुत्वं व्रीहावन्वेति । एवं द्रोणभिन्नगुरुत्ववान् व्रीहिरिति वाक्यार्थबोधः । वितस्तिः शङ्कुः इत्यादौ द्वादशाङ्गुल परिमाणवाचिनो वितस्ति शब्दात् विहिता प्रथमा परिमाणमभिधत्ते । प्रथमार्थपरिमाणे वितस्ति शब्दार्थस्याभेदेनान्वयः, तादृशपरिमाणस्य शङ्कुऽन्वयः; एवं वितस्त्यभिन्नपरिमाणवान् शङ्कु इति वाक्यार्थबोध इति अनन्यलभ्यत्वात् गुरुत्वं परिमितिश्च गुरुत्वत्वेन, परिमाणत्वेन च प्रथमार्थ इति । अत्र गुरुत्वविशेषविशिष्टवाचिनो द्रोणशब्दस्यार्थः व्रीहौ, परिमाणविशिष्टवाचिनो वितस्तिशब्दस्यार्थः शङ्कौ तादात्म्येनान्वेति । तावतैव व्रीहौ गुरुत्वविशेषवैशिष्ट्यस्य, शङ्कौ परिमाणविशेषवैशिष्ट्य चावगमसम्भवात् ।। गोकुलनाथोपाध्यायास्तु— गुरुत्वत्वेन गुरुत्वस्य परिमाणत्वेन च परिमाणस्य भानमप्रामाणिकमेवेति गुरुत्वं परिमाणत्वं च न प्रथमार्थः इति पदवाक्यरत्नाकरे प्राहुः । युज्यते चायमर्थः, तथाहि— यदि परिमाणं प्रथमार्थः, तस्य प्रकृत्यर्थविशेषितस्य नामान्तरार्थेऽन्वयः तदा राजः पुरुष इत्यादाविव द्रोणव्रीहिरित्यादौ समानविभक्तिकतानियमो न स्यात् । तथा च द्रोणो, व्रीहिं व्रीहिणा व्रीहेः व्रीहौ वेतिरूपेण यथार्थं व्रीहेः विभिन्नविभक्त्यन्तत्वेऽपि द्रोणपदात्प्रथमैव स्यात्—इति । किन्तु यदि द्रोणो व्रीहिरित्यादौ गुरुत्व विशेषविशिष्टाभिन्नतयैव बोधस्तर्हि तदर्थं प्रथमायास्तत्र शक्तिरावश्यक्येवानन्यलभ्यत्वात् । यदि च प्रकृत्यर्थविशेषितयोस्तयोः प्रथमार्थयोः समानविभक्तिकपदान्तरार्थ एवान्वयः तदा तादात्म्यान्वय इव गुरु-

त्वपरिमाणान्वयेऽपि समानविभक्तिकत्वं तन्त्रमभ्युपेयमिति ।

वचनमपि प्रथमाविभक्त्यर्थः । वचनं च संख्या, एकत्वं द्वित्वं बहुत्वं च । तत्रैकत्वं क्वचित्प्रकृत्यर्थतावच्छेदकव्यापक संसर्गेण प्रकृत्यर्थेऽन्वेति । यथा परमेश्वर इत्यादौ समग्रैश्वर्यप्रकृत्यर्थतावच्छेदकव्यापकसमवायेनैकत्वं परमेश्वरेऽन्वेति । क्वचित्पदान्तरार्थव्यक्तिविशेषघटितेन प्रकृत्यर्थतावच्छेदकव्यापकेन संसर्गेण प्रकृत्यर्थेऽन्वेति यथा वेदाः प्रमाणमित्यादौ सकलवेदनिष्ठप्रमितिकरणतावच्छेदकव्यापकसमवायसम्बन्धेनैकत्वं प्रमाणेऽन्वेति । ईदृशसंसर्गेणैकत्ववैशिष्ट्यमेव सजातीयद्वितीयराहित्यं ज्ञापयति । एवं द्वित्वमपि; आश्विनेयावित्यादौ अश्विनीपुत्रत्वप्रकृत्यर्थतावच्छेदकव्यापकसंसर्गेण द्वित्वमाश्विनेययोरन्वेति । ईदृशसंसर्गेण द्वित्ववैशिष्ट्यमेव सजातीयतृतीयराहित्यं ज्ञापयति । इत्थं संसर्गवैचित्र्येणैकत्वद्वित्वयोरन्वयसम्भवेन नाव्यावर्त्तकत्वम् । बहुत्वं तु नेदृशसंसर्गेणान्वेति, सजातीयराहित्यस्य ज्ञापयितुमशक्यत्वात्, बहुत्वस्य सकलसंख्याव्यापकत्वात् । छात्राः समागता इत्यादौ त्रयाणां छात्राणां बोधस्य तात्पर्यविषयत्वे बहुत्वत्वेनैव त्रित्वस्य बोधस्तात्पर्येण; संसर्गवैचित्र्येण त्रित्वबोधनासम्भवात् । एवं यत्र प्रकृत्यर्थतावच्छेदकमेकं तत्र प्रकृत्यर्थतावच्छेदकव्याप्यसंसर्गेण द्वित्वबहुत्वयोरन्वयः, तेन घटाकाशयोर्द्वित्वस्य घटपटाकाशानां बहुत्वस्य च गगने सत्त्वादाकाशावाकाशा इति न प्रयोगः । यत्र प्रकृत्यर्थतावच्छेदकं नाना धवखदिरावित्यादौ, तत्र द्वन्द्वस्थले व्युत्पत्तिवैचित्र्येण धवत्वखदिरत्वनिष्ठान्योन्याभाव प्रतियोगितानवच्छेदकपर्याप्तिसंसर्गेण द्वित्वं तयोः प्रकृत्यर्थतावच्छेदकयोरन्वेति । तादृशपर्याप्त्या स्वाश्रयप्रकृत्यर्थतावच्छेदकवत्त्वसम्बन्धेन प्रकृत्यर्थयोर्वाऽन्वेति । एवं बहुत्वमपि धवखदिरपलाशा इत्यादौ प्रकृत्यर्थतावच्छेदकेषु प्रकृत्यर्थेषु वा दर्शितरीत्याऽन्वेति ।

एवं "वामे बहून् कुशान् कृत्वा दक्षिणे तु कुशत्रयम्" इत्यादावपि तात्पर्यविशेषेण बहुशब्दार्थताच्छेदके त्रित्वे, तात्पर्यविशेषबहुवचनार्थत्रित्वास्यान्वयः, किंवा बहुवचनार्थबहुत्वात्मकत्रित्वविशिष्टेषु कुशेषु बहुशब्दार्थत्रित्वविशिष्टस्य तादात्म्येन निराकांक्षत्वमिति बहुशब्दप्रयोगसार्थक्याय कुशविशेषणं त्रित्वम्, तथान्वयविशेष्ये अयोग्यताया इव निराकांक्षताया अपि विशेषणान्वयप्रयोजकत्वात् । एवं वामे नवकुशधारणमपि क्वचिद्दृश्यते साम्प्रदायिकं, विशिष्टानाम् । एवं यदादिशन्ति पूज्यपादा इत्यादौ पादविशेषणपूजायामनिर्धारितविशेषस्य बहुत्वस्य विवक्षितस्य बहुवचनार्थस्य 'सविशेषणेही'ति न्यायादन्वयः । एवं गोदौ ग्राम इत्यादौ द्वित्वस्य गोदयोर्निवासविशेषणीभूतयोरन्वयो निराबाध एव । गोदशब्दोऽपि नासत्यशब्दवन्नित्यद्विवचनान्तोऽपि न द्वित्वविशिष्टवाचकः, येन निराकांक्षतया नान्वयः प्रसज्येत ।

ननु गगनशब्दस्य शब्दविशिष्टवाचकतया गगनपदार्थैकदेशे शब्दे बहुत्वान्वयविवक्षायां गगनानीति प्रयोगः स्यात् । एकदेशेऽन्वयानभ्युपगमे पूज्यपादाइत्यत्रैकदेशे पूजायां बहुत्वान्वयो न स्यात् । एवं वेदाः प्रमाणमित्यत्र प्रमाणत्वेनैकत्वान्वयः स्यादिति चेत्, व्युत्पत्तिवैचित्र्येणान्वयोपगमेन समीहितसिद्धौ नैकदेशान्वयोऽभ्युपेयते; पूज्यपादा इत्यत्र पूजाविशिष्टपादे बहुत्वान्वयः, पादे बाधात् पूजायां पर्यवस्यति, शिखी विनष्ट इत्यादिवत् । एवं प्रमाणमित्यत्र प्रमाविशेषितल्युडर्थकरणे एकत्वान्वयः, करणे बाधात् प्रमायां पर्यवस्यति । तत्रापि स्वाश्रयशाब्दवत्त्वसम्बन्धेन प्रमायामन्वेति, 'सविशेषणे हि विधिनिषेधौ सति विशेष्यबाधे विशेषणमात्रे पर्यवस्यती'ति न्यायात् । तदेव विशेषणं यत्सामान्यधर्मवतो व्यावर्तयति, यथा घटे नीलादिः नीलान्यघटात् स्वाश्रयनीलं व्यावर्तयति । शब्दस्तु नेदृशं, येन गगनानीति प्रयोगः स्यात्, पूजा प्रमाचेदृशमेव विशेषणमिति ।

सविशेषणेहीति न्यायस्य विशेष्ये योग्यताया इव आकांक्षाया अपि बाधः प्रापक एव, सति विशेष्यबाधे इत्यस्य विशेष्यान्वयाभावे सतीत्यर्थः। एवं ग्रामे बहून् कुशानित्यादौ बहुत्वविशिष्टकुशे बहुशब्दार्थस्य बहुत्वविशिष्टस्य तादात्म्येनान्वयो निराकांक्ष इति कुशविशेषणबहुत्वेऽन्वयः पर्यवस्यति। बहुशब्दोत्तरबहुवचनं साधुत्वार्थमेव। कुशशब्दोत्तरबहुवचनाद् बहुशब्दाच्च त्रित्वोपस्थितिस्तात्पर्यविशेषेणैवेति।

क्वचिदेकत्वस्याप्येवं रीत्याऽन्वयः, यथा वेदाः प्रमाणमित्यादौ प्रकृत्यर्थतावच्छेदकप्रमाणत्वे तद्द्वारा प्रमाणे वा एकत्वस्यान्वयः। एवं 'विंशत्याद्याः सदैकत्वे संख्याः संख्येयसंख्ययोः' इति कोशेनानुशिष्टस्यैकवचनस्यार्थ एकत्वं विंशतित्वादिसंख्यायामन्वेति। यथा– विंशतिर्ब्राह्मणाः, शतं धार्तराष्ट्राः सहस्रं भानोः कराः इत्यादौ। विंशतित्वादौ बहुत्वान्वयविवक्षणे तु बहुवचनमपि साधु, यथा "असंख्याताः सहस्राणि ये रुद्रा अधिभूम्याम्" इति श्रुतौ "तिस्रः कोट्योऽर्धकोटी च तीर्थानां वायुरब्रवीत्" इति पुराणे "किमेकयैव विंशत्या बाहुभिस्त्वं विकत्थसे। पश्य रावण नाराचैश्छिन्नानि कति विंशतीः" इति लोके च तथा-प्रयोगदर्शनात्। 'ते शतानि वयं पञ्च' त्यत्र बहुवचनान्ततच्छब्दविशेषणात् शतत्वसंख्यागतबहुत्वाभावेऽपि बहुवचनं संगच्छते। संख्येयवाचिनः शतशब्दाद्बहुवचनं, बहुवचनान्तास्मच्छब्दविशेषणपञ्चशब्दाच्च बहुवचनं साधुत्वार्थमेव। एवं 'दशशतान्यम्भोजसंवर्तिकाः' इत्यादौ संख्येयवाचिनो दशशब्दस्यार्थः संख्येयवाचिशतशब्दार्थे तादात्म्येनान्वेति, 'शिखी विनष्ट' इत्यादाविव सविशेषणे हीति न्यायेन शतत्वसंख्यामादाय पर्यवसानं, शतत्वे दशत्वविशिष्टसंख्यावगमे सहस्रत्वसंख्यालाभ इति।

जातिगतैकत्वविवक्षायामेकवचनं बहुवचनं च प्रमाणम्; तादृशशाब्दिकानुशासनात्। यथा 'सम्पन्नो व्रीहिः' 'सम्पन्ना व्रीहय' इत्यादौ व्रीहित्वजातावेकत्वमेकवचनबहुवचनाभ्यां प्रत्याय्यते। तत्रापि– यद्येकजातिर्विवक्षिता तत्रैवेयं वचनव्यवस्था। एकजातिविवक्षणात् सम्पन्नौ व्रीहियवावित्यादौ नैकवचनबहुवचने। एको व्रीहिरित्यादौ न बहुवचनं संख्यायोगे प्रतिषेधात्। एवं 'ब्राह्मणेन हतः पतती' त्यादौ ब्राह्मणत्वजातावेकत्वमन्वेति, ब्राह्मणत्वस्वरूपैकजातिमतः सामान्येन हननान्वयविवक्षणात् ब्राह्मणसामान्यकर्तृकस्यैव हननस्य पातित्यप्रयोजकत्वं न तु ब्राह्मणविशेषकर्तृकस्य। एवं 'ग्रहं संमार्ष्टी' त्यादौ ग्रहत्व एवैकत्वमन्वेति ग्रहसामान्यकर्मत्वस्यैव संमार्गेऽन्वयात्, न तु ग्रहविशेषकर्मत्वस्येति।

अस्मच्छब्दादेकत्वे बहुत्वे च विवक्षिते वैकल्पिकं बहुवचनमप्यानुशासनिकम्, 'अहं ब्रवीमि' 'आवां ब्रूव' इत्यर्थे 'वयं ब्रूम' इति बहुवचनमस्मदर्थान्वितमेकत्वं द्वित्वं चाभिधत्ते। विशेषणयोगे च बहुवचनं प्रतिषिद्धमिति 'पटुरहं ब्रवीमी' त्येव साधु।

एवं त्याद्यर्थानामेकत्वादीनां प्रथमान्तार्थेऽन्वयः। भावाख्यातस्थले त्याद्यर्थभावनाया विरहात् तदन्वयि प्रथमान्तार्थासंभवात् न त्याद्यर्थसंख्यान्वयसम्भवः इति चैत्रेण स्थीयते इति साधुत्वार्थमेकवचनं भावाख्यातस्थले न तु द्विवचनबहुवचने। भावाख्यातस्थले एकत्वादिसंख्या धात्वर्थेऽन्वेति न च पच्यते चैत्रेणेत्यादौ धात्वर्थव्यापाराणां बहुत्वात् कथमेकत्वान्वय इति वाच्यम्, व्यापाराणां बहुत्वेऽपि पूर्वापरीभूतानां तेषामेकबुद्धिविषयतयैक्यसंभवात् बुद्धिगतैकत्वस्य स्वाश्रयविषयत्वसम्बन्धेन व्यापारेष्वन्वयसम्भवात्। तदुक्तम्– "गुणभूतैरवयवैः समूहः क्रमजन्मनाम्। बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते॥" इति वाक्यपदीये। "पूर्वापरीभूतं भावमाख्यातमाचष्टे। यथा 'पचति व्रजती' त्युपक्रमप्रभृत्यपवर्गपर्यन्तम्" इति निरुक्तमप्यमुमर्थं संवदति। नचैकबुद्धिविषयतया व्यापाराणामैक्ये भावाख्याते "उष्ट्रासिका आस्यन्ते" "हतशायिकाः शय्यन्ते"

इत्यादि भाष्यप्रयोगे ( भावाख्यात प्रयोगोऽयमिति वादिनां मते ) कथं बहुवचनोपपत्तिरिति वाच्यम्, तादृशव्यापाराणां पुनः पुनः सम्भवे पुनः पुनर्बुद्धिष्वन्तर विषयतया बहुवचनस्य संभवात् । आस्यन्ते इत्यादावुपवेशनव्यापाराणां मुहुरन्तरोत्थाने त्रिचतुः कृत्वो जातानां बहुत्वेन बहुवचनोपपत्तिः । शय्यन्ते इत्यत्रापि शयनव्यापाराणां मुहुरन्तराजागरणे त्रिचतुःकृत्वो जातानां बहुतया बहुवचनोपपत्तिः । इत्थं चोपवेशनक्रियाविशेषणस्य उष्ट्रासिकाशब्दस्य, शयनक्रियाविशेषणस्य हतशायिकाशब्दस्य च बहुवचनान्तत्वं बहुत्वविशिष्टव्यापारे बहुत्वान्यसंख्याविशिष्टस्य तादात्म्येनान्वयायोगात्, समानवचनत्वं तन्त्रत्वात् । उष्ट्रासनसदृश उष्ट्रासिकाशब्दार्थः । हतशयनसदृशो हतशायिकाशब्दार्थ इति उष्ट्रासनसदृशानि वर्तमानासनानि, हतशयनसदृशानि वर्तमानशयनानि चेति वाक्यार्थबोधः ।

नन्वेवं धात्वर्थे संख्यान्वयोपगमे लिङ्गसंख्यान्वयायोग्यत्वरूपमसत्त्वं तत्र व्याहन्येत । तत्र लिङ्गान्वयायोग्यत्वस्य घटपटादिनियतलिङ्गनामसाधारणतया संख्यान्वयायोग्यत्वस्यैवासत्त्वशब्दार्थत्वात्– इति चेत् साक्षात्संख्यान्वयायोग्यत्वमसत्त्वमिति स्वीकारे दोषाभावात् । धात्वर्थस्य बुद्धिद्वारा संख्यान्वयित्वेऽपि निरुक्तरूपेणासत्त्वमव्याहतमेव । नचैवं वेदाः प्रमाणमित्यादौ संख्यायाः प्रमितिकरणे साक्षादन्वयात् असत्त्वं स्यादिति वाच्यम्, प्रमाणानीत्यादौ प्रमाणे साक्षात्संख्यान्वयादयोग्यतायाः विरहात् । अयोग्यतापर्यन्तानुधावनेन क्वचित् संख्याया अनन्वयेऽपि नासत्त्वमिति । यत्र नामार्थत्वं सत्त्वम्, तदभावोऽसत्त्वम्, तच्च धात्वर्थे निराबाधमेवेत्यादिरीत्या बहु प्रपञ्चयन्ति ।

अनन्तरोक्तं तार्किकमतं पाणिनीयसूत्रमनुसृत्य प्रवृत्तम् । तच्च सूत्रम्– प्रातिपदिकार्थलिङ्ग परिमाणवचनमात्रे प्रथमा ( पा० सू० २।३।४६ ) इति । प्रातिपदिकपदं नामपरम् । तत्र लिङ्गस्यापि नामार्थपञ्चकान्तर्भूतत्वेनैव सङ्ग्रहे तस्य पृथगुपादानेन– नामतो नियतमुपस्थितस्यैवार्थस्य नामार्थत्वमिति नियमलाभे यत्र यस्मार्थस्यानियतोपस्थितिः तस्य प्रतीतये तत्रार्थे प्रथमाविधानमावश्यकमिति तटादिशब्देषु लिङ्गस्य कस्यचन नियतोपस्थित्यभावात्तदर्थमिह लिङ्गग्रहणं कृतम् । एवं द्रोणः खारी आढकमित्यादिपरिमाणबोधकनाम्नां परिमेयपरत्वे तदर्थबोधनाय परिमाणग्रहणमप्यावश्यकम् । एकः द्वौ इत्यादिसंख्यावाचकपदेषु एकत्वादीनामभिहितत्वात्तदर्थौ विभक्तेरप्राप्त्या तदर्थं वचन ग्रहणमिति सर्वेषां सार्थकत्वमुपपादयन्ति । किन्तु महाभाष्यकैयटादिग्रन्थपर्यालोचनयैतदवसीयते यत्– तटादिपदेऽपि यत्र यल्लिङ्गस्य विवक्षा तस्य नियतैवोपस्थितिरिति नामार्थत्वेनैव सिद्धिरिति लिङ्गग्रहणमनावश्यकम् । एवं परिमाणमपि द्रोणादिपदानामर्थ एवेति तस्यापि नियतैवोपस्थितिः, मेयपरत्वे च लाक्षणिकस्थलेष्विव लक्षणयैव तदर्थबोध इति न तदर्थमपि परिमाणग्रहणमावश्यकम् । वचनग्रहणमपि नावश्यकम्– एक इत्यादौ कर्मादिबोधाभावेन द्वितीयादिविभक्त्यनुत्पत्तौ साधुत्वार्थं प्रथमायाः स्वभावत एवोत्पत्तिः । न चैकत्वादीनामभिहितत्वादेकवचनस्याभावे द्विवचनादीनामन्वयासम्भवाच्च कथमत्र प्रथमापि भविष्यतीति वाच्यम्, 'अपदं न प्रयुञ्जीते'तिनिषेधस्मरणात् पदत्वार्थं विभक्त्युत्पत्तेरावश्यकत्वेनानुवादकविभक्तेरुत्पत्तौ बाधकाभावादिति नामार्थे– अर्थे वा– प्रथमेत्येतावतैव सर्वेष्टसिद्धिरिति नव्या आहुः । स्वमते च एकत्वादिवृत्तेर्नाम्नः स्वार्थे एव प्रथमा विहितेति तावतैव सर्वेष्टसिद्धिरिति विवृतमेव बृहद्वृत्तौ प्रपञ्चितं च महार्णवन्यास इति विस्तरभयादिह नानूद्यते ।।२।२।३१।।

## आमन्त्रे ॥२।२।३२॥

आमन्त्रणं सम्बोधनं तद्विषये वर्तमानान्नाम्नः प्रथमा विधीयतेऽनेन सूत्रेण। विवृतं चैतत्सूत्रं बृहद्वृत्तौ—'प्रसिद्ध-तत्सम्बन्धस्य किमप्याख्यातुमभिमुखीकरणमामन्त्रणम्, तद्विषय आमन्त्र्यः तस्मिन्नर्थे वर्तमानान्नाम्नः एकद्विबहौ यथासंख्यं प्रथमेति तत्र प्रसिद्धतत्सम्बन्धस्येति पदेन आमन्त्र्यस्य-कर्म–प्रयोजन–स्वरूपाणि विवृतानि। प्रसिद्धः निश्चित–रूपेण ज्ञातः तेन कर्मादिकारकेण सम्बोधनविभक्त्यन्तपदेन वा सम्बन्धः कर्तृत्वादिरूपो वाच्यवाचकभावरूपो वा यस्य तस्येत्यर्थेन, प्रवृत्तिनिवृत्त्यन्यतरोद्देश्यक्रियादिकर्मत्वादिना सम्बद्धस्यैवामुखीकरणार्थमाह्वानमामन्त्रणमुच्यते, तद्विषयः सम्बोध्यमानो देवदत्तादिरामन्त्र्यस्तस्मिन्नर्थे वर्तमानाद्–देवदत्तादिनाम्नः प्रथमा भवति। एवं च नामार्थ आम–न्त्रणमेकत्वादिसंख्या चेति समुदितः सम्बोधनप्रथमार्थः। आमन्त्र्यपदस्य क्रियाविशेषणत्वमुक्तं बृहन्न्यासे। देवदत्त! व्रजाम्यहमिति वाक्यात् अभिमुखीकृतदेवदत्तविशिष्टा गमन क्रिया प्रतीयते। वै० च प्रकृतवाक्यजन्यबोधोद्देश्यत्वसम्ब–न्धेन। बोधोद्देश्ये देवदत्ते चैकत्वमपि भासत एवेति देवदत्त-नामार्थं आमन्त्रणं संख्याचेति त्रयमपि सम्बोधनपदात्प्रती–यते। यदाह हरिः सम्बोधनपदं यच्च तत्क्रियाया विशेषणम्। व्रजामि(नि) देवदत्तेति निघातोऽत्र तथा सति॥" इति पदात्परस्यामन्त्रितस्य निघातोऽनुदात्तस्वरः परैः क्रियते, तदिह फलत्वेनोपन्यस्तम्। कर्माद्यभावाच्छेषत्वेन प्राप्ता षष्ठी बाध्यते। तार्किकास्तु– सम्बोधनम्– बोधोद्देश्यकेच्छा। तत्र बोध इच्छा च खण्डशः प्रथमार्थः। तत्र नामार्थः सम-वेतत्वसम्बन्धेन बोधेऽन्वेति। नामार्थान्विते बोधे उद्देश्यता-सम्बन्धेनेच्छाऽन्वेति। बोधश्च विशिष्टविषयतासम्बन्धेन वाक्यार्थेऽन्वेति। एवं नामार्थदेवदत्तादिसमवेतबोधस्यो–द्देश्यतया बोधसमवायितयोद्देश्यत्वस्वरूपं सम्बोध्यत्वम् (आमन्त्र्यत्वम्) नामार्थस्यार्थतः प्रतीयते। एवं सति 'ईश! पालय' इत्यादावीशसमवेतेष्टज्ञानविषय एकत्व–कर्तृकमाशंसाविषयः पालनमिति शाब्दिकमते, ईशसमवेतेष्ट-ज्ञानविषय आशंसाविषयपालनकर्तृकस्त्वमिति तार्किकमते शाब्दबोधः। एवं यादृशरूपावच्छेदेन सम्बोध्यत्वं प्रथमया प्रत्याय्यते तादृशरूपविशिष्टमेव युष्मदा परामृश्यते, सम्बो–ध्यतावच्छेदकोपलक्षितधर्मविशिष्ट एव युष्मत्पदशक्तेः। देव त्वं पुरुषोत्तमोऽसीत्यादौ पुंस्त्वैकत्वविशिष्टदेवत्वा–वच्छेदेन सम्बोध्यत्वमेकवचनप्रथमया प्रतिपाद्यते। त्वं शब्देनापि पुंस्त्वैकत्वविशिष्टदेवत्वविशिष्ट उच्यते। अत एव सर्वलिङ्गेऽपि युष्मदस्मदोः समानरूपता। इत्थं च हे ब्राह्मणास्त्वं प्रसीदेति न प्रयोगः, सम्बोध्यतावच्छेदकतयोप-लक्षितेन बहुत्वविशिष्टब्राह्मणत्वेन विशिष्टस्य युष्मदा परा-मर्शे तत्रैकवचनस्यानन्वितार्थकत्वादसाधुत्वाच्च। "हे चण्ड। हे मुण्ड! बलैर्बहुभिः परिवारितौ। तत्र गच्छतं गत्वा च सा समानीयतां लघु"॥ (दुर्गा सप्तशती) इत्यादौ एकत्वविशिष्टचण्डत्वैकत्वविशिष्टमुण्डत्वस्वरूप धर्मद्वयावच्छेदेन प्रथमया सम्बोध्यत्वबोधनेऽपि तादृश-चण्डत्वविशिष्टस्य तादृशमुण्डत्वविशिष्टस्य च युष्मदा परामर्शात्ततो न द्विवचनमनुपपन्नम्। एकघटैकपटाविरयादि-द्वन्द्वस्थले इव द्वित्वान्वयसम्भवात्।

"हे सौमित्रे सखा यस्ते निर्विशेषस्त्वया गुहः। युवां गत्वा नदीमेनां शीघ्रमानयतां पयः॥" (वाल्मीकि-रामायणम्) इत्यादौ यच्छब्दाकांक्षापूरणक्षमेण तच्छब्देन युष्मद एकशेषे स्मृततच्छब्देन शक्त्या, युष्मदा लक्षणया बोधस्थापितं गुहमादाय द्वित्वान्वयसम्भवात् युष्मदुत्तरं द्विवचनोपपत्तिरिति। रीतिरियं भवच्छब्देऽपि बोध्या। तेन 'हे ब्राह्मणा भवान् प्रसीदतु' इत्यादिको न प्रयोगः। यत्र तु सम्बोध्यस्य द्वित्वे भवच्छब्दो बहुवचनान्तः यथा– अर्जुनार्जुन! सात्यके सात्यके!

"कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः। नरकरिपुणा सार्धं तेषां समीमकिरीटिना—मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम् ॥" (वेणीसंहार नाटकम्) इत्यादौ, तत्र न सम्बोध्यार्थको भवच्छब्दः किं तु शत्रन्तः, तेन मनुजपशुभवनविशिष्टैरिति वैरित्यस्य विशेषणम्। यत्तु नाथ ! पालयेत्यादौ पालनकर्तृत्वस्य सम्बोधनप्रथमान्तार्थ एवान्वय इति, तदसत्, गुणीभूते प्रथमान्तार्थे आख्यातार्थान्वयायोगात्। सम्बोधनप्रथमान्तार्थस्य सम्बोध्यत्वे गुणीभूतत्वात्। अन्यथा नारायण इव नरो गच्छतीत्यादौ नारायणेऽपि गमनकर्तृत्वान्वयप्रसङ्गात्। किं च युष्मदोऽसामानाधिकरण्ये मध्यमपुरुषो न स्यात्। न च युष्मत्पर्यायो यः सम्बोधनप्रथमान्त इति मध्यमपुरुषोपपत्तिरिति वाच्यम्, तथा सति भवच्छब्दसामानाधिकरण्येऽपि मध्यमपुरुषप्रसङ्गात्। नन्वेवम्—"अकाण्डशक्तिनिर्भिन्ने वत्से जहति चेतनाम्। हताश राम कस्यार्थे त्वं जीवितमिच्छसि ॥" (वाल्मीकिरामायणम्) इत्यादौ रामस्य वक्तुः सम्बोध्यत्वमनुपपन्नम्। तदा हि तस्य (शोकाभिभूतत्वेन) वाक्यार्थज्ञानासत्त्वे वाक्यप्रयोगोऽनुपपन्नः। वाक्यार्थस्य ज्ञानसत्त्वे तु तस्य सिद्धतया तत्रेच्छाविरहवाक्यार्थसिद्धौ शाब्दबोधो न भवतीति चेन्न, मानान्तरजन्यवाक्यार्थज्ञानसत्त्वेऽपि वाक्यार्थगोचरशाब्दत्वावच्छेदेनेच्छासम्भवात्। श्रवणसिद्धौ मननेच्छावत्, सिद्धेः शाब्दं प्रत्यप्रतिबन्धकत्वात्। प्रतिबन्धकत्वे वा शाब्देच्छाविरहविशिष्टायास्तस्यास्तथात्वाच्चेति वक्तुरपि स्ववाक्यजन्याभीष्टवाक्यार्थबुद्धिसमवायितया सम्बोध्यत्वमबाधितमिति सम्प्रदायः।

ननु सम्बोध्यपुरुषवृत्तिवाक्यार्थज्ञानस्य सिद्धत्वनिश्चये करणापाटवेन प्रयुक्तस्य 'चैत्र ! त्वं गच्छे'ति वाक्यस्य प्रामाण्यापत्तिः, भाविभूतायाःपुरुषान्तरीयाया इच्छाया विषयत्वस्य चैत्रीयवाक्यार्थज्ञानेऽबाधितत्वात्। एवं सम्बोध्यपुरुषवृत्ति वाक्यार्थज्ञानस्य वाक्याजन्यत्वेऽपि अगृहीतपदसङ्केतं म्लेच्छमुद्दिश्यार्यैः प्रयुज्यमानस्य वेदादिवाक्यस्य प्रामाण्यसम्भवाद् उपहास्यत्वाभावप्रसङ्गश्च, म्लेच्छे मानान्तरजन्यवाक्यार्थज्ञानस्य म्लेच्छवाक्यार्थज्ञाने चार्येच्छाविषयत्वस्याबाधितत्वात्, म्लेच्छस्य सम्बोध्यत्वोपपत्तौ दर्शितवाक्यप्रामाण्यस्य निष्प्रत्यूहत्वात्। तत्तत्कालीनत्वेन तत्तत्पुरुषीयत्वेन चेच्छायां तत्तद्वाक्यजन्यत्वेन ज्ञानस्य च सम्बोधनप्रथमार्थत्वे शक्त्यानन्त्यमिति चेन्न; यतः स्वघटितवाक्यप्रयोगोपधायकत्वोपलक्षितेच्छायां स्वघटितवाक्यजन्यत्वोपलक्षिते ज्ञाने च सम्बोधनप्रथमायाः शक्तिः। यथा तदादिपदानां स्वप्रयोगोपधायकबुद्धिप्रकारत्वोपलक्षितधर्मविशिष्टे शक्तिः, शक्तिग्रहस्तु सामान्योपलक्षितविशेषावगाही सर्वोपसंहारेण। तथाहि— तत्पदत्वावान्तरतत्तात्वोपलक्षितास्तत्तत्पदत्वव्यक्तीर्धर्मितावच्छेदकीकृत्य तत्पदप्रयोगोपधायकबुद्धिप्रकारत्वावान्तरतत्तात्वोपलक्षितधर्मविशिष्टबोधकत्वावगाही वृत्तिग्रहः। फलतस्तत्पदत्वावच्छेदेन तत्तद्धर्मविशिष्टवाचकतामेवावगाहते। तथा सम्बोधनप्रथमाया अपि प्रथमात्वावान्तरतत्तात्वोपलक्षिततत्तत्प्रथमात्वावच्छेदेन सम्बोधनप्रथमाप्रयोगोपधायकत्वावान्तरतत्तात्वोपलक्षितधर्मविशिष्टेच्छावाचकत्वं गृह्यते। इच्छायां तादृशोपलक्षितधर्मस्तत्तद्व्यक्तित्वमेव। न च तद्व्यक्तित्वेनेच्छावगमे वाचकताया-मिच्छाप्रवेशो व्यर्थ इति वाच्यम्, इच्छावृत्तितत्तद्व्यक्तित्वलाभार्थमिच्छाप्रवेशात्। अथ वेच्छावृत्तित्वोपलक्षितत्वेनापि धर्मो विवक्षणीय इच्छा वाचकतायां न प्रवेशनीया। एवं स्वघटितवाक्यजन्यत्वेनोपलक्षितं ज्ञानमपि दर्शितरीत्या सम्बोधनप्रथमावाच्यमिति यथा तदादिपदानां न शक्त्यानन्त्यं तथा सम्बोधनप्रथमाया अपीति पदवाक्यरत्नाकरे म० म० गोकुलनाथोपाध्याया आहुः।

अत्रेदं तत्त्वम्—ज्ञानेच्छा सम्बोधन (आमन्त्रण) प्रथमार्थः सा चेच्छा चैत्रस्य मैत्रीयगमनकर्तृत्वज्ञानं भवत्वित्यादिविशेषाकारा सर्वत्र सम्बोधनस्थले। चैत्रादिनामार्थस्य समवेतत्वसंसर्गावच्छिन्नस्य प्रकारतानिरूपितज्ञानत्वावच्छिन्नविशेष्यत्वावच्छिन्नोद्देश्यताप्रतियोगित्वेन सम्बन्धेनान्वयः। इच्छा तु स्वोद्देश्यत्वावच्छिन्नज्ञानत्वावच्छिन्नविशेष्यतानिरूपितविषयितासंसर्गावच्छिन्नप्रकारतासम्बन्धेन वाक्यार्थे मैत्रीयगमनकर्तृत्वादावन्वेति। एवं 'चैत्र मैत्रो गच्छतीत्यादौ चैत्रस्य व्यासङ्गवशाद्वाक्यार्थज्ञानानुत्पादेऽपि न सम्बोध्यत्वहानिः, दर्शितसंसर्गेण चैत्रस्येच्छायाम्, इच्छायाश्चवाक्यार्थेऽन्वयस्य निष्प्रत्यूहत्वात्। उद्देश्यता तु वाक्य प्रयोगप्रयोजकतत्तदिच्छीयोद्देश्यतात्वेन संसर्गमध्ये निविशते। एवमाशीःपञ्चम्योस्त्यादिविभक्त्योरर्थस्येच्छाया अप्युद्देश्यता प्रयोक्तृतत्तदिच्छीयोद्देश्यतात्वेन संसर्गमध्ये निविशते। भवतु वा स्वप्रयोक्तृतावच्छेदकत्वोपलक्षितधर्मविशिष्टे प्रयोक्तरि सम्बोधनप्रथमाया आशीः पञ्चम्योश्च शक्तिः। तत्र देवदत्तादेः प्रयोक्तुस्तत्तत्कालावच्छिन्नसमवेतत्वेन सम्बन्धेनेच्छायामन्वयः। तेन चैत्रस्य कालान्तरे देवदत्तसम्बोध्यस्य मैत्रीयगमनकर्तृत्वादिस्वरूपवाक्यार्थज्ञाने सिद्धत्वनिश्चयदशायां, पुरुषान्तरस्य तादृशचैत्रीयवाक्यार्थज्ञानेच्छायां यज्ञदत्तं सम्बोधयता देवदत्तेन, करणापाटवेन प्रयुक्ते 'चैत्र! मैत्रो गच्छतीत्यादौ चैत्रस्य सम्बोध्यत्वविरहादप्रामाण्यम्, कालान्तरीयपुरुषान्तरीयेच्छयोः तद्वाक्याप्रयोजकत्वात्, तयोरिच्छयोः तत्तदिच्छीयोद्देश्यताघटितसम्बन्धमध्ये प्रवेशाभावात्। प्रयोगजनकयज्ञदत्तविषयकसम्बोधनेच्छायां तत्तदिच्छीयोद्देश्यत्वघटितेन दर्शितसंसर्गेण चैत्रस्यान्वयासंभवात्। प्रयोक्तुः प्रथमार्थत्वपक्षे देवदत्तसमवेततत्तत्कालिकेच्छायां दर्शितसंसर्गेण चैत्रस्यान्वयासम्भवाच्च।

एवं प्रयोक्तृपुरुषेणोपलक्षिताया ज्ञानेच्छाया उद्देश्यतयाऽनुपलक्षितायाः तत्तदिच्छीयोद्देश्यतया वाऽवच्छिन्नं यज्ज्ञानत्वावच्छिन्नविशेष्यत्वं तन्निरूपितसमवेतत्वसंसर्गावच्छिन्नप्रकारतावच्छेदकत्वसंसर्गेण ज्ञानेच्छोपलक्षितधर्मविशिष्टे युष्मत्पदस्य शक्तिः। तत्तदिच्छोद्देश्यताव्यक्तेरुद्देश्यतात्वेनैव सम्बन्धमध्ये प्रवेशः। यथा 'स्वर्गकामो यजेत' इत्यादौ इष्टसाधनत्वं विध्यर्थः, तत्राव्यवहितपूर्वकालः, अधिकरणम्, अभावः प्रतियोगितावच्छेदकत्वं धर्मश्च पञ्चशो विध्यर्थः। तत्रेष्टत्वेनोपस्थितः स्वर्गोऽव्यवहितपूर्वकाले, सः (अव्यवहितपूर्वकालः) अधिकरणे, तदभावे, स प्रतियोगितया, सा अवच्छेदकत्वे, तदभावे, स धर्मेऽन्वेति। तत्र स्वर्गाव्यवहितपूर्वकालस्याननुगमेऽपि तत्तत्क्षणावच्छिन्नाधिकरणतयाऽभावस्य स्वर्गादिकार्याधिकरणेऽन्वयः, तेन तत्तत्क्षणावच्छेदेन स्वर्गाधिकरणवृत्तिर्योऽभावः तत्प्रतियोगितावच्छेदकत्वाभाववान् धर्म इति विध्यर्थबोधः। तत्र यथा न शक्यानन्त्यं तथात्रापि। यदि चाव्यवहितपूर्वकालो विध्यर्थे न निविशते किं तु—अधिकरणम्, अभावः, प्रतियोगिता, अवच्छेदकत्वं, धर्मश्चेति पञ्च विध्यर्थाः तत्र स्वर्गोऽधिकरणे, अधिकरणं तत्तत्स्वर्गाव्यवहितपूर्वक्षणावच्छिन्नाधेयतासम्बन्धेनाभावे, स प्रतियोगितायां, सा अवच्छेदकत्वे, तदभावे, स धर्मेऽन्वेति। एवं यागत्वावच्छेदेन स्वर्गाधिकरणनिष्ठाभावप्रतियोगितावच्छेदकत्वाभाववद्धर्मवत्ताज्ञानमेव यागप्रवृत्तौ हेतुः, स धर्मस्तु यागत्वमेव दर्शितधर्मत्वेन रूपेण यागत्वावच्छेदेन गृह्यते।

एवमेवान्यत्रापीष्टसाधनताज्ञानस्य प्रवर्तकत्वं संसर्गघटितविशेषं सामान्येनावगाहमानमिष्टसाधनताज्ञानं सामान्येन व्यभिचारग्रहः प्रतिरोद्धुं नेष्टेऽतः स्वर्गत्वावच्छेदेन सामान्यतो व्यभिचारग्रहेऽपि न क्षतिः। न चैवं व्यभिचारग्रहेऽपि दण्डविशेषत्वादिना घटकारणताग्रहः स्यात्, सामान्यतो घटत्वावच्छेदेन व्यभिचारग्रहस्य सामान्यविशेषकारणताग्रहं प्रत्यविरोधि-

त्वादिति वाच्यम्; सामान्यतो व्यभिचारग्रहस्य सामान्यतः कारणताया ग्रहविरोधित्वे निष्प्रत्यूहत्वात् । प्रकृतेऽपि स्वर्गत्वावच्छेदेन सामान्यतो न यागकारणताग्रहः, दण्डविशेषत्वादिना सामान्यतो विशेषावगाही कारणताग्रहस्तु न सम्भवति । घटत्वावच्छिन्नं प्रति दण्डत्वादिना सामान्यतः कारणत्वस्यावश्यकत्वे विशेषघटितकारणताया एवाप्रसिद्धेः । प्रकृते तु स्वर्गत्वावान्तरजात्याऽवच्छिन्नं प्रति, यागत्वेन कारणतायाः सत्त्वात्, सामान्येन तदवगाही कारणताग्रहः सम्भवत्येवेति विधेर्न शक्त्यानन्त्यम् ।।

युष्मच्छब्दस्य तु तत्तदिच्छीयोद्देश्यतायाः संसर्गविषयापि सङ्केतप्रवेशे कुतो न शक्त्यानन्त्यमिति विभाव्यते तदा युष्मच्छब्दस्य स्वप्रयोगोपधायकेच्छीयोद्देश्यतावच्छिन्नविशेष्यता-निरूपितसमवेतत्वसंसर्गावच्छिन्नप्रकारतावच्छेदकत्वसम्बन्धेन स्वोपलक्षितधर्मविशिष्टे शक्तिः । युष्मच्छब्दपरस्य स्वशब्दस्योभयत्र परिचायकतया कथनमिति कालान्तरीयपुरुषान्तरीयेच्छाघटितसम्बन्धेन विद्यमानस्यैतत्पुरुष प्रयुक्तस्य युष्मच्छब्दस्यान्यत्रासत्त्वान्नातिप्रसङ्गः । तत्तद्युष्मच्छब्दस्य तत्कालीनज्ञानेच्छाविषयेऽर्थतः शक्तिपर्यवसानेऽपि न शक्त्यानन्त्यम्, युष्मच्छब्दस्य सामान्येनैव सङ्केतग्रहे प्रवेशात् । यदि च युष्मच्छब्दाच्चैत्रत्वादिना चैत्रादिर्न प्रतीयते, तथा सति त्वं चैत्र इत्यादौ चैत्रश्चैत्र इत्यादाविव निराकांक्षतयाऽनन्वयः स्यादिति कथ्यते, तदा ज्ञानेच्छाप्रकार एव युष्मच्छब्दस्य शक्तिः, तत्र ज्ञानेच्छायाः स्वप्रयोज्यवाक्यप्रयोगोपधायकेच्छीयोद्देश्यतावच्छिन्नज्ञानत्वावच्छिन्नविशेष्यता - निरूपितसमवेतत्वसंसर्गतानिरूपितत्वसम्बन्धेन वैशिष्ट्यं प्रकारत्वे, विशिष्टप्रकारत्वस्य वैशिष्ट्यं धर्मिणि स्वरूपसम्बन्धेन बोध्यमिति ज्ञानेच्छाविशिष्टप्रकारत्वविशिष्टो युष्मच्छब्दार्थः । स्वप्रयोज्येत्याद्युपादानात् कालान्तरीयायाः स्वज्ञानेच्छायाः प्रकारे नातिप्रसङ्गः, स्वशब्दस्य ज्ञानेच्छा-परिचायकत्वान्न शक्त्यानन्त्यम् इति ।

एवं ज्ञानेच्छायाः स्वप्रयोज्यवाक्यप्रयोगोपधायकेच्छीय-समवायेन वैशिष्ट्यवानस्मच्छब्दार्थः ।

एवं चैत्र त्वं पश्येत्यादौ चैत्रप्रकारकज्ञानेच्छाप्रकारः आशंसाविषयदर्शनकर्ता ज्ञानेच्छाप्रकार इति शाब्दबोधस्य विशेषणविशिष्टयोरुद्देश्यतावच्छेदकविधेययोर्विशेषणभेदाद्भेदेनोपपत्तिः, कनककुण्डलवान् मणिकुण्डलवानितिवत् । एवं म्लेच्छमुद्दिश्यार्यैः प्रयुज्यमानस्य शुङ्गापसरेत्यादिवाक्यस्य म्लेच्छे सम्बोध्यत्वयुष्मदर्थत्वयोर्निराबाधतया शक्तिभ्रमा-जन्यत्वसम्भवेऽपि अगृहीतसङ्केतोद्देश्यकतयोपहसनीयत्वं सम्भवत्येव, शक्तिभ्रमजन्यत्वस्योपहास्यत्वाप्रयोजकत्वात्; तथा सत्यपभ्रंशप्रयोगेऽप्युपहास्यतापत्तेः । इच्छाविषयज्ञानस्य सम्बोधनप्रथमार्थत्वे तत्समवायितावच्छेदकत्वोपलक्षितधर्मस्य वा युष्मत्पदप्रवृत्तिनिमित्तत्वेऽभ्युपेतेऽपि शक्तिभ्रमजन्यत्वं नोपहासप्रयोजकम्, अन्यथा भगवज्ज्ञानस्य सिद्धतया तत्रेच्छाविरहात् भगवत्सम्बोध्यकस्य–भगवत्–पर–युष्मच्छब्द–घटितस्य—"स्वकर्मफलनिर्दिष्टां यां यां योनिं व्रजाम्यहम् । तस्यां तस्यां हृषीकेश त्वयि भक्तिर्दृढास्तु मे ।।" इत्यादि-वाक्यस्य शक्तिभ्रमजन्यतयोपहास्यत्वापत्तेः । अगृहीतपद-सङ्केतकोद्देश्यकवाक्यस्योपहासप्रयोजकत्वे–भगवतो गृहीतपद सङ्केतकत्वात् तदुद्देश्यकवाक्यस्य नोपहास्यत्वमिति ज्ञानेच्छायाः सम्बोधनप्रथमार्थत्वे भगवतः सम्बोध्यत्वं निराबाधमेव । भगवत्प्रत्यक्षस्य सिद्धत्वेऽपि भगवतः शाब्दज्ञानं जायतामितीच्छायाः सम्भवात् । न च भगवतः शाब्दबोधे कथं तादृशीच्छा सम्भवेदिति वाच्यम्, बाधितविषयेऽपीच्छा-सम्भवात् । "नवपल्लवसंस्तरेऽपि ते मृदु दूयेत यदङ्गमर्पितम् । तदिदं विषहिष्यते कथं वद वामोरु चिताधिरोहणम् ।।" इति ( रघुवंशमहाकाव्ये ) मृतेन्दुमतीवचनशुश्रूषादेर्दर्शनात् । कर्मफलेत्याद्युक्तपद्ये–भगवतः सम्बोध्यत्वं निष्प्रत्यूहमेव ।

एवं "जानीहि नाथ दीनोऽस्मि" इत्यादौ दीनभिन्नमत्कर्तृकभवनविषयके आशंसाविषयत्वत्कर्तृकज्ञाने; अथ वा भवनकर्तृत्वान्वितदीनाभिन्नमद्विषयकस्याशंसाविषयज्ञानस्यकर्तृत्वान्विते त्वं पदार्थे, नाथप्रकारकज्ञानेच्छाप्रकारस्य सम्बुद्धिप्रथमान्तार्थस्यान्वयः; नाथस्य मदीयदीनभावविषयज्ञानविषयकं ज्ञानं जायतामितीच्छासम्भवात् । इच्छाविषयत्वस्य ज्ञानविषयकज्ञानवृत्तित्वपर्यन्तधावनं, मदीयदीनभावविषयज्ञानस्यापेक्षात्मकत्वार्थम्, उपेक्षाज्ञानस्यानुव्यवसायविषयत्वानियमात् ।

यत्र सम्बोधनपदघटितवाक्यं मुहुः श्रूयते यथा स्तोत्रादौ, तत्र ज्ञानान्तरेच्छया सम्बोध्यत्वनिर्वाहः । "अकाण्डशक्तिनिर्भिन्ने" इत्यादिपूर्वोदाहृतवाल्मीकिरामायणवाक्यादौ एवमेव ज्ञानान्तरेच्छया वक्तुरपि सम्बोध्यत्वनिर्वाहः । एवं "शोचनीयाऽसि वसुधे यात्वं दशरथच्युता । रामहस्तमनुप्राप्य कष्टात्कष्टतरं गता ॥ इति पुत्रशोकातुरब्राह्मणस्य राज्ञो रामचन्द्रस्य द्वारमागत्याक्रन्दतो वाक्येऽचेतन वसुधादेः बाधितविषयेऽपीच्छासम्भवेन ज्ञानेच्छाप्रकारतया संबोध्यत्वयुष्मत्पदप्रतिपाद्यत्वयोर्निर्वाहेऽपि कष्टतरगततादात्म्यान्वयबाधात्, वसुधावासिलोके लक्षणा, तत्प्रयोजनन्तु रामवशगत्वरूपवसुधाधर्मस्य लोके प्रतिपत्तिः । एवं सति गृहीतपदसङ्केतकोद्देश्यकतया नास्य वाक्यस्योपहास्यत्वमिति दार्शनिकसरणिः । चेतनतादात्म्यारोपेण वसुधायाः सम्बोध्यत्वं युष्मत्पदप्रतिपाद्यत्वं कष्टतरगततादात्म्यान्वयश्च सम्भवतीति । अत एव तुल्ये प्रस्तुते तुल्यस्याप्रस्तुतस्याभिधानमित्यप्रस्तुतप्रशंसाऽलङ्कार ईदृशस्थले स्फुरति । पुत्रशोकसन्तप्तस्य वक्तुर्ब्राह्मणस्य, प्रस्तुतस्य तादात्म्यारोपेण युष्मत्प्रतिपाद्यत्वसम्बोध्यत्वयोर्वसुधायामुपपत्तौ युष्मदर्थे सम्बोधनान्तार्थे वसुधातादात्म्येनाध्यवसितः प्रस्तुतोऽर्थोऽन्वेति व्यञ्जनयोपस्थित इति रसविद्याविदां रीतिः । युष्मदेकवचनादिव्यवस्था पूर्वमुक्तैव । तत्र, श्रीस्त्राहीत्यादौ सम्बोधनैकवचनस्य सः ( सकारस्य ) श्रूयमाणत्वात्, सत्वेनैव वाचकत्वं, देव ! शुचे ! जिष्णो इत्यादौ लोपः सम्बोधनविभक्तिस्मारकः इति विचारसरणिः ।

तदिदं सम्बोधनपदं संबोध्यत्वरूपोऽर्थो वा क्रियायां विशेषणमिति पूर्वमुक्तमेव । तत्र महाभाष्यकृता 'ब्रूहि देवदत्त' इति वाक्यमुक्तम् । तस्यायमाशयः— आमन्त्रणार्थकप्रत्ययान्तपदानां पदात्पराणामेव निघातः ( सर्वांशेनानुदात्तत्वम् ) स्वरो विधीयते पाणिनीयनये । स चात्र देवदत्तपदे तदा स्यात्, यदि देवदत्तपदब्रूहिपदयोर्व्यपेक्षारूपं सामर्थ्यं स्यात् । तद्विरहे हि कस्यापि पदविधेरनुपपत्तेः 'समर्थः पदविधिः' इति परिभाषया सर्वस्यापि पदसम्बन्धिनो विधेः सामर्थ्याश्रितत्वप्रतिपादनात् । ब्रूहीति क्रियापदेन च देवदत्तस्यासम्बन्धे उभयोः पदयोः परस्परापेक्षत्वरूपव्यपेक्षाविरहेण सामर्थ्याभावान्निघातो न स्यात् समानवाक्य एव 'निघात युष्मदस्मदादेशानां वार्तिककृता नियमनात् । तस्मान्नामविशेषितं सम्बोध्यत्वं क्रियायां विशेषणम्, त्याद्यन्तविनाकृतं वाक्यमेव नास्तीति 'एकतिङ् वाक्यम्' इति वदता कात्यायनेनानुशिष्टत्वात् । भाष्यानुसारिणस्तु 'एकतिङ् वाक्यम्', इत्यस्य एकतिङन्ता(त्याद्यन्ता)र्थनिष्ठमुख्यविशेष्यताकं वाक्यमित्यर्थं इत्याहुः तथा हि 'पश्य मृगो धावति' 'जानीहि जगज्जगन्नाथाज्जायते' 'अस्ति साधवः सीदन्ति' 'भवति दुर्जना मोदन्ते' इत्याद्यनेकत्याद्यन्तमप्येकं वाक्यमिति मन्यन्ते । तत्र मृगकर्तृकधावनस्य धावनकर्तृमृगस्य वा कर्मतया दर्शने ( पश्य मृगो धावतीत्यत्र ), जगत्कर्तृकजगन्नाथहेतुकजननस्य, जगन्नाथहेतुकजननकर्तृजगतो वा कर्मतया ज्ञाने ( जानीहि जगज्जगन्नाथाज्जायत इत्यत्र ), साधुकर्तृकसीदनस्य, सीदनकर्तृसाधोर्वा कर्तृतया सत्तायां ( अस्ति साधवः सीदन्तीत्यत्र ), दुर्जनकर्तृकमोदस्य

मोदकर्तृ दुर्जनस्य वा कर्तृतया भवने ( भवति दुर्जना: मोदन्ते इत्यत्र ), यथामतमन्वयोपगमादेकवाक्यतानिर्वाहः । तथाचोक्तं हरिणा– सुबन्तं ( स्याद्यन्तं ) हि यथाऽनेकं सुबन्तस्य ( स्याद्यन्तस्य ) विशेषणम् । तथा तिङन्त ( स्याद्यन्त ) मप्याहुः तिङन्तस्य ( स्याद्यन्तस्य ) विशेषणम् ॥" इति ।

न चैकतिङ् वाक्यम् इति कात्यायनवचनेन नानेक–स्याद्यन्तस्य वाक्यत्वनिषेधः, किं तु वाक्यं स्याद्यन्तमेवेति नियम इति वाच्यम्– "कष्टा वैधव्यथा कष्टं नित्यमुद्वहन–श्रमः । श्रवणानामलङ्कारः कपोलस्य तु भूषणम् ॥" इत्यादेस्तिङन्त ( स्याद्यन्त ) शून्यवाक्यस्य दर्शनात् । न वा "स्तिर्भवन्ती ( वर्तमाना ) परः प्रथमपुरुषोऽप्रयुज्य–मानोऽप्यस्ति" इति कात्यायनवचनात् स्याद्यन्तशून्यवाक्येऽ–स्तीतिपदमध्याह्रियत इति वाच्यम्, अध्याहारे मानाभावात् । स्याद्यन्तविनाकृतं वाक्यं नानुभावकमिति व्युत्पत्तिरपि न सम्भवति । तथाहि– प्रथमान्तस्याद्यन्तघटितवाक्यस्थले प्रथमान्तार्थस्य स्याद्यन्तार्थेऽन्वयोऽभ्युपेयते, 'भूतले न घट' इत्यादावस्तीत्यध्याहारे स्याद्यन्तार्थे नञर्थविशेषणघटस्या–न्वयासम्भवात् । न च भूतलवृत्तित्वाभावो घटेऽन्वेतीति वाच्यम्, कारकस्य कारकान्वितनञर्थस्य वा क्रियातिरिक्ते–ऽन्वयस्याव्युत्पन्नत्वात् । न च भूतलाधेयत्वाभावोऽस्तीति नञर्थो धात्वर्थ एवान्वेति, धात्वर्थविशेषणे स्याद्यन्तार्थ–कर्तरि घटस्य तादात्म्येनान्वय इति वाच्यम् घटपदस्यातीत-घटपरतायां घटस्य स्याद्यन्तार्थकर्तरि योग्यताविरहात् तादा-त्म्येनान्वयासम्भवात् । न च भूतलाधेयत्वमध्याहृतास्ति–धात्वर्थेऽन्वेति तद्विशेषणस्याद्यर्थकर्तरि घटविशेषितो नञर्थ–भेदोऽन्वेतीति वाच्यम्, तथा सति घटवत्यपि भूतले घटा–न्योऽस्तीतिवत् घटो नास्तीतिप्रयोगापत्तेः । न च भूतला–धेयत्वान्वितेनाध्यहृतास्तिधात्वर्थेन सत्तया विशेषितस्य स्याद्यर्थकर्तृनञर्थभेदेऽन्वयस्तथान्वितो भेदो घटेऽन्वेति इति वाच्यम्, तथा सति क्रियायाः प्राधान्यनियमभङ्गापत्तेः । एवं सति शाब्दस्य क्रियामुख्यविशेष्यकत्वनियमरक्षार्थमस्ती–त्यध्याहारो व्यर्थ एव, तादृशनियमभङ्गस्य स्वयमेव प्रोत्सा–हितत्वात् । अत एव भूतले न घट इत्यादौ प्रतियोगिता–सम्बन्धेन नामार्थविशेषितस्य स्वार्थात्यन्ताभावस्यान्वयबोधने नञनुयोगिवाचकपदे सप्तम्यपेक्ष्यते; नापेक्ष्यते विभक्त्यर्थ–विशेषितस्येति सर्वतन्त्रसिद्धा व्यवस्था ।

एवं स्याद्यन्तसमुदायः, स्याद्यन्तसमुदायः, स्याद्यन्तस्या–द्यन्तोभयसमुदायश्च त्रिविधं वाक्यम् । तत्र प्रधानार्थे सम्बोध्यत्वान्वय इति महाभाष्य सिद्धान्तानुसारिणः । एवं चैत्रः पचतीत्यादौ धात्वर्थः प्रधानमिति शाब्दिकाः । स्या–द्यर्थो भावना प्रधानमिति भाट्टाः । प्रथमान्तार्थः प्रधानमिति तार्किकाः; तदनुसारिणश्चान्ये दार्शनिकाः । तेषां तेषां तत्र तत्र प्रधानार्थे सम्बोध्यत्वान्वय इति रीतिः । अत एव देवदत्त यज्ञदत्तः समागत इत्यादौ समागताभिन्नयज्ञदत्ते देवदत्तसम्बोध्यत्वान्वयः । इत्थं सम्बोधनान्तपदं स्याद्यन्त–मात्रसाकांक्षमिति भ्रमः । एवं प्रथमार्थः, सम्बोध्यत्वं, लिङ्गं, संख्या च नञर्थेऽभावेनान्वेति । तेन यज्ञदत्तः समा-गतो देवदत्त ! नेत्यादौ देवदत्तसम्बोध्यत्वाभावस्य न प्रतीतिः । न वा घटो नेत्यादौ लिङ्गसंख्याभावप्रतीतिरिति ।

इत्थं तार्किका: आमन्त्र्यस्य क्रियाविशेषणत्वमपह्नुवते, तच्च महाभाष्यादिसिद्धान्तविरुद्धं युक्तिविरुद्धं च । सर्वं वाक्यं क्रिययैव परिसमाप्यत इति हि सर्वानुमतम् । एवञ्च यत्र 'हे नाथ !' इत्यादि वाक्ये क्रियापदं न श्रूयते तत्रापि पाहीत्यादिक्रियापदमध्याहार्यमेव । यत्तु– "कष्टा वैधव्यथा कष्टं नित्यमुद्वहनश्रमः । श्रवणानामलङ्कारः कपोलस्य तु भूषणम्" इत्यादौ विनापि क्रियापदं बोध इत्यादिकमुक्तम्,

तदपि न समीचीनम्, तत्रापि प्रतिवाक्यं भवतीत्यादिक्रिया-पदस्याहृत्यैवान्वयबोधात् । 'एकतिङ्वाक्यम्' 'आख्यातं सविशेषणं वाक्यम्', इत्यादि वार्तिकभाष्यादिवचनैः क्रिया-पदं विना वाक्यत्वस्यैवाभावात् । यच्च स्याद्यन्तपदसमु-च्चयः, स्याद्यन्तपदसमुच्चयः त्याद्यन्तस्याद्यन्तोभयविधपद-समुच्चयश्च वाक्यमिति वाक्यस्य त्रैविध्यमुक्तम्, तदपि न सम्यक् प्रकृतवार्तिकभाष्यादिप्रामाण्येनानुभवाच्च केवल-स्याद्यन्तपदसमुच्चयस्य वाक्यत्वे मानाभावात् । कोशेऽपि "सुप्तिङन्तचयो वाक्यं क्रिया वा कारकान्विता" इति वाक्यलक्षण स्याद्यन्तत्याद्यन्तोभयसमुच्चयस्य, कारकान्वित-क्रियाया वा वाक्यत्वकथनात् । किञ्च कस्यचित् कस्मि-श्चित्कार्ये विनियोगार्थमेवामन्त्रणं भवति, न केवलं स्मरण-मात्रार्थम् । उक्तञ्च वाक्यपदीये हरिणा- सिद्धस्याभि-मुखीभावमात्रं सम्बोधनं विदुः । प्राप्ताभिमुख्यो ह्यर्थात्मा क्रियासु विनियुज्यते" इति । अयमाशयः, सम्बोधनं हि सिद्धस्य देवदत्तादेराभिमुख्यसम्पादनं, तच्च कस्मैचित्प्रयोज-नायैवेति निर्विवादम् तदेव प्रयोजनमुत्तरार्धेनोक्तम्, प्राप्ता-भिमुख्यो हीत्यादिना । अभिमुखीभूत एव पदार्थः क्रियासु प्रवृत्तिनिवृत्तिरूपासु विनिर्नियुज्यते प्रवर्त्यते । तथा च प्रवर्तनाविषयक्रियायामेव सम्बोधनपदस्यान्वय इति- 'सम्बो-धनपदं यच्च तत्क्रियायां विशेषणमिति पूर्वोक्तकारिका समुपोद्वलिता विज्ञेया । किमधिकप्रपञ्चेनेति शिवम् ।।

इति प्रथमार्थप्रकाशः ।।

## युग्मम्–

विचार्य शास्त्राणि बहूनि सम्यक्
स्याद्यर्थसारं तत आकलय्य,
स्वसम्प्रदायानुमतं तमर्थं
समग्रहीद् बुद्धिबलानुरूपम् ॥१॥

श्रीमत्तपोगच्छगणप्रतिष्ठ–
श्रीनेमिसूरीश्वरपट्टशिष्यः ॥
लावण्यसूरिर्विजयादिनामा,
समार्पयत् सत्सु विचारणाय ॥२॥

इति श्रीमत्तपोगणगगनाङ्गणगगनमणि– सूरिचक्रचक्रवर्तिसर्वतन्त्र
स्वतन्त्र–श्रीविजयनेमिसूरीश्वर–पट्टालङ्कारेण–व्याकरण-
वाचस्पति–शास्त्रविशारद–कविरत्नेतिपदालङ्कृतेन
श्रीविजयलावण्यसूरिणा प्रणीतः
स्याद्यर्थप्रकाशः परिपूर्णः ॥

॥ ॐ ह्रीं अर्हं नमः ॥

# श्रीस्याद्वादार्थप्रकाशप्रशस्तिः

[ उपजातिः ]

श्रीनाभिजातं शुभशान्तिनाथं, सुभव्यराजीनयनाऽमृतं च ।
प्रकाशिपं श्रीशुभवर्धमानं नमामि नित्यं जिनराजराजम् ॥१॥

[ शार्दूलविक्रीडितानि ]

लोकाऽलोकविलोकिनो जिनपतेर्दूरीकृतांहस्ततेः,
सोल्लासैरमराधिपैः कृतनतेः सूर्यातिगाङ्गद्युतेः ।
गीरीशस्यचनश्च शासनपतेः सिद्धार्थसत्सन्ततेः,
पट्टं धर्मधुरन्धरं विजयते वीरप्रभोः सन्मतेः ॥२॥
तत्र श्रीश्रुतकेवली गणिमणिश्चारित्रचूडामणि-
र्निर्ग्रन्थाभिधमच्छगच्छमतनोत् स्वामी सुधर्माभिधः ।
कोटीशः किल सूरिमन्त्रकलनात् कोटीति नाम्नोज्वलं,
गच्छं चाच्छमतिश्च सुस्थित इति श्रीसूरिपोऽनुव्यधात् ॥३॥
चन्दं चन्द्रकलाकलापधवलं भूयोयशोमालितं,
गच्छं चानु चकार चारुचरणः श्री चन्द्रसूरीश्वरः ।
तत्रैवानु च सूरिराट् शमनिधिः सामन्तभद्राऽभिधो,
ख्यातेने वनवासिगच्छममलं लीनं गुणानां गणे ॥४॥
सन्तापापहरं समाश्रितनृणां शाखावलीलालितं,
दीक्षादानशुभास्पद सुचरणाबद्धं विशालोन्नतम् ।
श्रेयांसं वटगच्छमच्छमतुलं सत्पुण्यपण्यापण,-
माचार्याधिप आततान तदनु श्री सर्वदेवाभिधः ॥५॥
भूपालेन च मेदपाटपतिना दृष्ट्वा तपो दुष्करं,
सान्वर्थं च 'महातपा' इतिपदं, यस्मै ददे सम्मदात् ।
पुण्यात्मा विदधे ततः स च जगच्चन्द्राभिधः सूरिराट्,
षष्ठं प्रष्ठगुणालयं किल तपागच्छं सदच्छाशयम् ॥६॥

गच्छेऽस्मिंश्च परम्परागतमहो वशद्यलीलालये,
श्रद्धाचारचितां कुलालयमये राद्धान्तमार्गाब्धगे ।
श्रीहीरेण जिनेन्द्रशासनशिरोहीरेण धीरेण च,
भूपालाऽकबरप्रबोधनकृता पुण्यात्मना सूरिणा ॥७॥
मोहेलापतिपाटने पटुमते सद्धर्मसेनाकरे,
श्रीसेनेन च सैनिकेन गुणिना श्रेयोऽर्थिना सूरिणा ।
श्रीदेवेन च सूरिणा विबुधतास्फातिं परां बिभ्रता,
श्रीसिंहेन च पापनागहरिणा श्रीसूरिणोल्लासिते ॥८॥
पृथ्वीपादप्रचारतो विदधतो ध्वस्तान्धकारां वरां,
निर्मातुः शमसागरोदयरमां सद्वृत्तताशालिनः ।
सत्सौम्याकृतिमालिनः कुवलयाऽऽनन्दं ददानस्य च,
साधोस्तारकपस्य वृद्धिविजयाऽभिख्यस्य वै सद्गुरोः ॥९॥
पादाम्भोजरजोमरन्दमधुपो विद्याविलासालयो,
भूपालावलिमौलिलालितपदाम्भो जो जनानन्ददः ।
उच्चाचारप्रचारप्रोद्यतमना नानामुनीनां गुरु-
रुद्वोढाऽऽगमयोगमुच्चविधिना प्रस्थानपञ्चत्परः ॥१०॥
स्वं चाऽस्वं समयं सदा सहृदयं विद्वांश्च दिव्याकृतिं,
नित्यधर्मकथाविधौ विलसता माधुर्यमाबिभ्रता ।
गम्भीरध्वनिना घनाघनरवं हास्यास्पदं कुर्वता,
तारेणाऽखिलभव्यकेकिनिकराऽऽनन्दं ददानः सता ॥११॥
तीर्थानामवने समुद्धृतिकृतो लीनान्तरालः सदा.
शीलं शैशवतोऽमलं च कलयन्नाचार्यचूलामणिः ।
सम्राट श्रीजिनशासनस्य वसतिः प्रौढप्रतापालयो,
राराजीतितरां जगद्गुरुरयं श्रीनेमिसूरीश्वरः ॥१२

## [ वसंततिलकावृत्तानि ]

ईडे सुदर्शनधरं पुरुषोत्तमं तं, मैत्रीयुतं समुदयश्रियमादधानम् ।
सन्नन्दनं सुमनसामनुरागचञ्चं, विज्ञानतामरसतामरसाकरं च ॥१३॥
भव्यालिपङ्कविकलं जडतातिगं च, नित्यं पुनानमखिलं किल साधुपद्मम् ।
सन्दर्शिता-ऽमृतपथं वरदेशनातो, लावण्यमन्दिरमुदारमनोऽभिरामम् ॥१४॥

साधुस्वकस्तुररवस्तुतकीर्तिजालं, भक्त्या नरेन्द्रनतपादकजं शिवाय ।
संसज्जयन्तमथ दक्ष-सुशीलमाशु, कल्याणकेलिमथ केवलकेलिधाम ॥१५॥
नित्यं जिनं वरधिया किल लोकमानं, सच्चन्दनं जनमनोभवतापहारम् ।
सन्मङ्गलं विबुधगीतगुणावलीं च, नित्यं सदाचरणकान्तिहितं मताशम् ॥१६॥

[ अनुष्टुप् ]

साधुकञ्चनवत् कान्तं, सदातपोदयाञ्चितम् ।
विनोदजं सदामोदं, वितन्वानं महाशयम् ॥१७॥

[ उपजातिः ]

चञ्चन्महानन्द-विवर्धमानं, दिव्यं विकाशं च दधानमाशु ।
जितेन्द्रपाठं सुमनाहरं चा-मोदं ददानं मलयप्रकाशम् ॥१८॥

[ पञ्चभिः कुलकम् ]

[ वसन्ततिलका-छन्दः ]

श्रीरत्नशेखर-प्रभोज्वलशील-शोभं, जैनेन्द्रशासनधुरन्धरदेवभद्रम् ।
श्रीचन्द्रशेखरसखं शिवशङ्करं च, विश्वा-ऽभयाय विमलाऽभयशेखराभम् ॥१९॥
स्याद्वादनादसदनं वृजिनं जयन्तं, जीमूतगर्जितवचोऽङ्गिमयूरमोदम् ।
सद्बोधबोधनविधौ बृहतीपतिं त, सूरीश्वरं गुरुवरं च नमामि नेमिम् ॥२०॥

[ युग्मम् ]

[ अनुष्टुभः ]

राजस्थाने मरौ देशे, शिवगंजपुरे वरे ।
चातुर्मासीस्थितेनैव, विज्ञलावण्यसूरिणा ॥२१॥
श्रीस्याद्यर्थप्रकाशाख्यो, ग्रन्थोऽयं रचितो मुदा ।
विज्ञप्त्यात्मविनेयस्य, दक्षसूरिवरस्य च ॥२२॥
९ १ ० २
ग्रह-चन्द्र-नभ-श्चक्षु-र्मितेऽब्दे वैक्रमे किल ।
पाठकानां मुदे भूयात् पठ्यमानो हि भूतले ॥२३॥
चन्द्रप्रभाकरौ यावद्, यावच्च कनकाचलः ।
तावत् प्रकाश्यमानोऽयं, प्रकाशो जयताद् भुवि ॥२४॥